891.21
Bha/Bha
761



Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018

MAJUMDÁR'S SERIES.

BHATTI KÁVYA;

A POEM

ON THE ACTIONS OF RAMA.

PART I.

WITH THE COMMENTARIES

OF

JAYAMANGALA & BHARATAMALLIKA.

EDITED AT THE REQUEST OF BÁBU BARADÁ PRASÁDA MAJUMDÁRA.

BY

YADU NÁTHA TARKRATNA

PUNDIT, SANSCRIT COLLEGE, CALCUTTA.

CALCUTTA.

PRINTED BY A. L. CHOWDHORY AT B. P. M'S PRESS.
NO. 22 Jhama Pooker Lane.

1871.

Price 2—8As.

মূল্য ২৷৷০ টাকা মাত্র।

H 2

MAJUMDÁR'S SERIES.

भट्टिकाव्यम्

जयमङ्गलरचितजयमङ्गलया

भरतमल्लिकनिर्म्मितसुग्धबोधिन्या टीकया च

समेतम् ।

प्रथमखण्डम् ।

श्रीयुक्तबाबुवरदाप्रसादमजुमदारस्य प्रार्थनया

कलिकातासंस्कृतकालेजाध्यापकेन

श्रीयदुनाथतर्करत्नेन

संस्कृतम् ।

कलिकातराजधान्याम्

वि. पि. एम्स् यन्त्रे

श्रीअन्नदालालचक्रवर्त्तिना यत्नेन मुद्रितम् ।

संवत् १९२८ ।

00000761

भट्टिकाव्यम्

दशमः सर्गः ।

अथ स वल्कदुकूलकुथादिभिः परिगतो ज्वलदुद्धतवालधिः ।
उद्पतद्दिवमाकुललोचनैर्नृरिपुभिः सभयैरभिवीक्षितः ॥ १ ॥

अनुप्रासवत् ।

शब्दलक्षणसङ्गतमपि लक्षयन् काव्यलक्षणार्थं प्रसन्नकाव्यमुच्यते काव्यस्य प्रसन्नत्वात् प्रथमभेदं लक्षणं यत् प्रसन्नतानाम अभिधेयस्य काव्यस्य प्रतीतार्थं प्रसन्नमिति शब्दलक्षणं पुनः प्रकीर्णमेव द्रष्टव्यं तत्राभिनु काव्ये चत्वारः परिच्छेदाः अलङ्कारमाधुर्यप्रदर्शनदोषाः भावसमावेशश्चेति तत्रालङ्कारो द्विविधः शब्दालङ्कारोऽर्थालङ्कारश्चेति तत्र पूर्वो द्विविधः अनुप्रासो यमकञ्चेति उभयं दर्शयन्नाह

अथेति । अथ दाक्षादेशानन्तरं स वानरो विपदाशासदृशत् उल्लसितवालं अंशुकं शुक्लवल्कलं कुथा इति निपातनं आदिशब्दाद्व्यजनादिभिः परिगतः परिवेष्टितः ज्वलदुद्धत ज्वलितो वालधिः पुच्छ यस्य सः नरिपुभिः राक्षसैः सभयैरा उल्लोचनैरभिवीक्षितः विस्मयमनुष्ठाचक्षीति अनुप्रासमिति अनुप्रासो यस्मिन् विद्यत इति तस्य च लक्षणं शब्दपर्यन्तविन्यासगतमनुप्रासं प्रचक्षत इति ॥ १ ॥ ज० म०

अथ प्रकीर्णकशब्दलक्षणसङ्गतं काव्यं लक्षयन् प्रसन्नकाव्यमुद्दिशते काव्यस्य प्रसन्नत्वात् प्रसादः शब्दार्थयोर्गुणविशेषः तत्राभिनु काव्ये चत्वारः परिच्छेदाः अलङ्कारश्च माधुर्यादिगुणश्च भाविकञ्च भावसमावेशश्च तदर्शनात् काव्यशोभाजनकोऽलङ्कारः स च द्विविधः शब्दालङ्कारोऽर्थालङ्कारश्च तत्र पूर्वो द्विविधः अनुप्रासो यमकञ्च तत्र प्रथमतोऽनुप्रासशब्दालङ्कारं प्रदर्शयति

अथेत्यादि । दाक्षादेशानन्तरं स वानरो विपदाशां शब्दयतः स्मयमानः

रणपण्डितोऽग्रविबुधारिपुरे कलहं स राममहितः कृतवान् ।
ज्वलदग्निरावणगटञ्च बलात्कलहंसरामहितः कृतवान् ॥२॥

युक्पादयमकम् ।

कौडयः वल्कैस्तरुविशेषत्वग्भिर्दुकूलैः क्षौमैः कृपैश्चित्रकम्बलैः आदिशब्दात् कृष्णादिभिश्च परिगतो वेष्टितः ज्वलन् उद्गत ऊर्ध्वीकृतो बालधिः पुच्छं यस्य सः तथा ऋक्षरिपुभिः राक्षसैरभिवीक्षित आभिमुख्येन भाषितः कौडयैः किमयं करिष्यतीति सभयैस्त्रासयुक्तैः अतएव आकुललोचनैः आकुलानि इतस्ततः परिभ्रान्तानि लोचनानि येषां वल्कं वल्कलमस्त्रियामित्यमरः कार्पासं वादरं प्रोक्तं दुकूलाद्यञ्च वल्कलमित्यमरमाला कृपपदस्थाने कृपपदं कोचित्पठन्ति बालधस्तस्तु बालधिरित्यमरः कृतविलम्बितनामवृत्तमिदं तल्लक्षणं यथा कृतविलम्बितमाह नभौभरावितीति । अनुप्रासवदिति अनुप्रासो विद्यतेऽस्मिन्निति अनुप्रासयतीति वा अनुप्रासः वर्णानुवृत्तिरनुप्रासः तथाच वर्णानामनुवृत्तिर्या नातिदूरान्तरस्थितिः । अनुप्रासः स तेनैव सनाथा काव्यपद्धतिरिति । सकृत्पयर्णविन्यासमनुप्रासं प्रचक्षत इति च अनुप्रासो द्विविध उद्भटानुप्रासश्चैकानुप्रासश्च अनेकस्य वर्णस्य सकृत्साद्दश्यं चैकानुप्रासः स एवोत्कृष्टत्वादिह प्रदर्शितः ॥ १ ॥ भ०

यमकस्यापि लक्षणं तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् । वर्णानां यः पुनर्वादो यमकन्तन्निरूप्यत इति तदनेकविधं दर्शयन्नाह

रणेति । स कपिः विबुधोत्तमितो रामपूजितः रणपण्डितो युद्धकुशलः अग्रविबुधारिपुरे अग्रयो यो विबुधः इन्द्रः तस्य यो रिपुर्दशाननस्तस्य पुरे लङ्कायां कलहं कृतवान् कलहंसान् रमयतीति कलहंसरामं रमेरर्त्तिन्ताकर्मण्यण् तादृशं रावणगटं बलाद्दार्ढ्यमाणोऽपि ज्वलदग्निं दीप्यमानपावकमकृतवान् ज्ञातं विद्यते यस्येति ज्ञतायेत्यर्थः । अहितः शत्रुः युक्पादयमकमिति युजोर्द्वितीयचतुर्थयोः पादयोर्यमितत्वात् ॥ २ ॥ भ० म०

अथ यमकान्युच्यन्ते तल्लक्षणं यथा तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम् । वर्णानां यः पुनर्वादो यमकं तन्निरूप्यत इति अस्य भेदा बहवः काव्यप्रकाशादौ दर्शिताः कोचनात्र दर्शिताः तत्र प्रथमं युक्पादयमकं दर्शयति

रणेत्यादि । अग्रस्य श्रेष्ठस्य विबुधस्य इन्द्रस्य योऽरिः शत्रुर्दशाननः तस्य पुरे लङ्कायां स कपिः कलहम् युद्धम् कृतवान् रावणस्य गटम् ज्वलदग्निं दीप्यमानपावकम् बलाद्दार्ढ्यमाणोऽपि कृतवान् चकार रावणगटम् कीडयं कलहंसरामम्

जयमङ्गलाटीका।

श्रीगणेशाय नमः ॥

प्रणिपत्य सकलवेदिनमतिदुस्तरभट्टिकाव्यसलिलनिधेः।
जयमङ्गलेति नाम्ना नौकेव विरच्यते टीका ॥

लक्ष्यं लक्षणं चोभयमेकत्र विदुषः प्रदर्शयितुं श्रीस्वामिसूनुः कविर्भट्टिनामा रामकथाश्रयमहाकाव्यं चकार। तथास्योपनिबन्धनं कविना द्विधाकृतं एकं लक्षणसूचकैः प्रकीर्णाधिकारप्रसन्नतिङन्तकाण्डैश्चतुर्भिः। द्वितीयं लक्ष्यसूचकैरामसम्भवादिभिर्द्वाविंशत्या सर्गैः। तत्र लक्षणं द्विविधम्। शब्दलक्षणं काव्यलक्षणञ्च। तत्र प्रथमस्य प्रकीर्णाधिकारतिङन्तकाण्डानि द्वितीयस्य प्रसन्नकाण्डं यत्रोद्भावनेन बहूनां लक्षणानां प्रकरणं तत्प्रकीर्णकाण्डं तदेवात्र प्रथममुक्तं तस्य व्यापित्वात्। उत्तरत्रापि द्रष्टव्यमितिप्रदर्शनार्थं अत्र यद्यप्यादौ कविना देवतानमस्कारो न कृतः तथापीष्टदेवतासङ्कीर्त्तनमपि विघ्नोपशमनहेतुर्भवतीति मन्यमान आह। अभूदित्यादि तस्य चेष्टदेवता सनातनो विष्णुः स चादौ कीर्त्तितः। तत्प्रतिबन्धना चेयं कथेति प्रबन्धेनैवात्र सङ्कीर्त्तनं रामायणवत्र विष्णोर्यस्मिन् काले अवतारकार्य्यवशादवतारः कृतः तदेव प्रथमं दर्शयति।

भरतटीका।

नमो गणेशाय ॥

नत्वा शङ्करमम्बष्ठगौराङ्गमल्लिकात्मजः।
भट्टिटीकां प्रकुरुते भरतो मुग्धबोधिनीं ॥
विदिताः पाणिनीयाद्यैः पठनीयादिबोधिकाः।
भट्टिटीका मम त्वेष मौग्धबोधार्थ उद्यमः ॥
कविकल्पद्रुमोक्तानां धातूनामनुबन्धतः।
स्पष्टानि यानि कार्य्याणि ततो बोध्यानि तानि तु ॥
नातिस्पष्टानि कार्य्याणि ग्रन्थगौरवभीतितः।
वाच्यान्यत्र न चाप्यर्था अतिविस्तृतवाग्भवाः ॥

भर्तृहरिर्नाम कविः श्रीरामकथाश्रयं महाकाव्यं चकार। अत्र सर्गबन्धो लक्ष्यसूचनाय काण्डबन्धो लक्षणसूचनाय अत्र सर्गा द्वाविंशतिः प्रकीर्णाधिकारप्रसन्नतिङन्तकाण्डानि चत्वारि। शब्दलक्षणकाव्यलक्षणभेदाल्लक्षणं द्विविधं। तत्र काण्डत्रये शब्दलक्षणं प्रसन्नकाण्डे काव्यलक्षणं आदौ मङ्गलक्षणप्रदर्शनं प्रकीर्णकाण्डं व्यापकत्वाद्दर्शितम्। महाकाव्यस्यादावाशीर्नमस्क्रिया वस्तुनिर्देशो वा कर्त्तव्य इति सम्प्रदायानुरोधादस्तु-निर्देशं कुर्वन्नभेष्टदेवतास्मरणात्मकं मङ्गलमध्यादौ प्रकाशयति।

निखिलाभवन्न सहसा सहसा ज्वलनेन पूः प्रभवता भवता ।
वनिताजनेन वियता वियता त्रिपुरापदं नगमिता गमिता ॥३॥

पादान्तयमकम् ।

कलहंसेन कादम्बेन रामममिरामं कलहंसान् रमते रमयतीति अन्तर्भूतण्यर्थाद्रमेः ढात्पक्षिति षण् वा कलहंसा रमन्तेऽत्रेत्याधारे घञ् वा यद्वा बलेन क्रमेण अतोऽतन्त्र्यो गच्छन्त्यः कलहंसरामा राजपत्न्यो यत्र दृष्टे तत्तथा स कीदृशः रणपण्डितः युद्धकुशलः राममहितः रामेण महितः पूजितः महपूजे ग्राह्मेच्छार्थेत्यादिना वर्त्तमानविहितः क्तोभूतक्तस्य बाधक इति केचित् वस्तुतस्तु भूते कर्म्मणि क्तः अनुबन्धादिभ्यो वर्त्तमानक्तेनातीतक्तस्य बाधेन प्रमाणमिति कातन्त्रटीकालताप्युक्तं अहितः यत्वर्थाद्रात्तसानां अस्य विष्णोरामरूपस्य हित इति वा कृतवान् कर्त्ता कार्य्यः हिंसाजान् वा बलं गन्धे रसे रूपे स्थामनि स्थौल्यसैन्ययोरिति रभसः कलहंसस्तु काश्मे राजहंसे न्यपोत्तमे इति कृतं युगेऽपि हिंसायाम् पर्य्याप्ते विहिते कुले इति विश्वः युक्पादयमकमिति युजोर्द्वितीयचतुर्थयोः पादयोर्यमकितत्वात् तथाच द्वितीये च चतुर्थे च यमकम् यत्र दृश्यते । युक्पादयमकं तत्तु विज्ञेयं कविपुङ्गवैरिति ॥ २ ॥ भ०

निखीत्यादि । ज्वलनेनाग्निना प्रभवता वृद्धिङ्गच्छता भवता सप्तत्यद्यमानेन सहसा तत्क्षणम् पूः पुरी निखिला सर्व्वा न सहसा अभवत् सानन्दा न जाता ह्रासप्रानन्दकार्य्यत्वात् एवमुक्तं खनहसोर्व्वेत्यपि रूपम् वनिताजनेन वियता नभसा वियता भयादितस्ततो गच्छता त्रिपुरापदङ्गमिता प्रापिता पूः त्रिपुरेष्वपि दह्यमानेषु भयादितस्ततो जनो गतः नगन्त्रिकूटपर्व्वतमिता सती । पादान्तयमकमिति पादान्तेषु यमितत्वात् ॥ २ ॥ ज० म०

निखिलेत्यादि । ज्वलनेनाग्निना सहसा तत्क्षणम् निखिला, सकला पूर्ज्जङ्गा सहसा ह्रासमहिता नाभवत् किन्तु सशोकाभवत् ह्रासप्रानन्दकार्य्यत्वात् ज्वलनेन कोटरेण प्रभवता वृद्धिं गच्छता भवता उत्पद्यमानेन पूः कीदृशी वनिताजनेन त्रिपुरापदं त्रिपुरसम्बन्धिनीमापदं विपत्तिं गमिता प्रापिता स्त्रीजनेन कीदृशेन वियता गगनपथेन वियता गच्छता भयात् पलायमानेन [illegible] स्फुरदग्निना संदह्यमानेषु त्रिपुरेषु भयाद्गमिता इतस्ततो गच्छन्ति [illegible] भावः ज्वलनेन त्रिपुरापदं गमिता वनिता जनेनोपलक्षितेति [illegible] नगं त्रिकूटपर्व्वतं इता प्राप्ता नगेन मिता परिच्छि[illegible]

सरसां सरसां परिमुच्य तनुं पततां पततां ककुभो बहुशः ।
सकलैः सकलैः परितः करुणैरुदितैरुदितैरिव खं निचितम् ॥४॥

पादादियमकम् ।

न च काञ्चन काञ्चनसञ्चितिं न कपिः शिखिना शिखिना समयौत् ।
न च न द्रवता द्रवता परितो हिमहानकृता न कृता क्वचन ॥५॥

पादमध्ययमकम् ।

विपूर्वादिणः शतः वोलईलवदित्यस्माद्वा ईलकान्तिगतिव्याप्तिक्षेपप्रजनखादनेषु इति प्रमिताक्षरानाम वृत्तं तल्लक्षणं यथा प्रमिताक्षरा सजसैः कथितेति पादान्तयमकमिति पादचतुष्टयान्ते यमकितत्वात् ॥ ३ ॥ भ०

सरसामित्यादि । सरसाम् तोयाशयानाम् तनुं शरीरम् सरसाम् आर्द्रां परिसुच्य त्यक्त्वा पततां पक्षिणाम् बहुशः बहून् वारान् ककुभो दिशः पततां गच्छताम् उदितैः शब्दितैः वदेर्यजादित्वात्क्तप्रत्ययः सकलैः समस्तैः सकलैः माधुर्यवद्भिः कलशब्दस्य गुणवाचकत्वात्तद्वति वर्त्तते ततश्च सहशब्देन समासो भवति करुणैः कारुण्यजनकैः रुदितैरिव क्रन्दितैरिव परितः समन्तात् खमाकाशम् विततम् व्याप्तम् । पादादियमकमिति पादानामादौ यमितत्वात् ॥ ४ ॥ ज० म०

सरसामित्यादि । सरसां जलाशयानां सरसां आर्द्रां स्निग्धां तनुं शरीरं जलाशयमध्यं परिसुच्य भयात् त्यक्त्वा बहुशो बहून् वारान् ककुभः दिशः पतताम् गच्छताम् पतताम् पक्षिणाम् उदितैः शब्दितैः खमाकाशम् परितः सर्वतो निचितम् व्याप्तं रुदितैरिव क्रन्दितैरिव सकलैः सम्पूर्णैः सकलैरव्यक्तमधुरैः कलशब्दोऽव्यक्तशब्दवचनः किंवा सर्वैरुदितैर्वचनैरव्यक्तमधुरध्वनियुक्तैरित्यर्थः वाक्यसमुदायस्यावयवे गात् करुणैः कारुण्यजनकैः केचित्तु सरसाम् सम्बन्धिनाम् पतताम् सरसाम् तनुं परिसुच्य भयात् परित्यज्येत्याहुः वदेः क्ते सहस्य पाद्योरिति जिः तोटकनामवृत्तं तल्लक्षणं यथा यद तोटकमब्धिसकारयुतम् । पादादियमकमिति चतुर्णां पादानामादौ यमकितत्वात् ॥ ४ ॥ भ०

न चेत्यादि । काञ्चनसञ्चितिं सौवर्णसङ्घातम् काञ्चन काञ्चिदपि [illegible]खिना शिखिना ज्वालावता न कपिने च समयौत् न च न मिश्रि[illegible]तं नीतवान् यौतेर्लङि उतो वृद्धिलुकि हलीति वृद्धिः क च [illegible]हिमहानस्य हिमापचयस्य कर्ता शिखिना अङ्गा-

अवसितं हसितं प्रसितं मुदा
विलसितं ह्रसितं स्मरभासितम् ।
न समदाः प्रमदा हतसम्मदाः
पुरहितं विहितं न समीहितम् ॥ ६ ॥

चक्रवालयमकम् ।

तेभावे ल्युट् न च न द्रवता न च न विगर्हता अपि तु हतस्ततो गच्छता द्रवता द्रवभावः परितः न न कृता किन्तु कृतैव काञ्चनसञ्चयचितेरित्यर्थात् । पादमध्ययमकमिति पादानां मध्ये यमितत्वात् ॥ ५ ॥ ज० म०

न चेत्यादि । कपिर्हनूमान् काञ्चन काञ्चनस्य सञ्चयचितिं रावणगृहरुहतिम् शिखिना अतिशयितशिखायुक्तेन जाज्वल्यमानेन शिखिना वह्निना न समयौत् इति न अवश्यमेव समयौत् मिश्रितवान् युङ् मिश्रणे धो रपिद्वस्तुतोऽद्वैरिति त्रिः अभिधानात् विभक्त्यन्तात् किमविज्ञनाविद्यते हिमहानकृता वह्निना परितः सर्वतो न च न द्रवता अपि तु गच्छता सता क्वचन कुत्रापि काञ्चनसञ्चयचितेर्द्रवता द्रवत्वम् न कृता अपि तु कृतैव दुगतौ शतृ द्रवस्य भाव इति तः हिमस्य हानम् नाशम् करोतीति किं हानमिति जहातेरनटि रूपम् । पादमध्ययमकमिति चतुर्णां पादानां मध्ये यमकितत्वात् ॥ ५ ॥ भ०

अवेत्यादि । हसितं यत्प्रीतं सन्ततप्रवृत्तं नित्यप्रमुदितत्वात्तत्रत्यजनस्य तदन्यत्रकृत्माद्वसितं अपगतं क्षोऽन्तकर्मणीत्यस्य व्यतिरिक्तार्तित्वं हृदा हर्षेण यद्विलसितं शृङ्गारविचेष्टितं लसितं श्लिष्टमनुबद्धमिति यावत् स्मरभासितं मन्मथदीपितं ह्रसितं अपोद्धृतं प्रमदाश्च स्त्रियः न समदाः सदर्पा न जाताः हतसंमदाः ध्वस्तहर्षाः प्रमदसम्मदौ हर्षे इति निपातन यच्च पुरहितं पुरानुकूलं समीहितं कर्तुरभिमतं तन्न विहितं नानुष्ठितमित्यर्थः । चक्रवालयमकमिति मण्डलाकारेण यमितत्वात् तथाहि द्वयोर्द्वयोः पद्योरन्त्यवर्णानां नेमिवदवस्थितत्वात् मध्यस्य वर्णस्याविसदृशस्य नेमिवदिति । तथाचास्य लक्षणं पदानामवसाने तु वाक्ये स्यात्स्वल्पवर्णता । प्रतिपादं भवेद्यत्र चक्रवालं तदुच्यत इति ॥ ६ ॥ ज०म०

अवेत्यादि । मुदा हर्षेण यद्वसितं हास्यं प्रसितम् अयत्नप्रवृत्तमासीत् तद्वसितं विनष्टम् तत्रत्यलोकानामप्रमुदितत्वात् क्षोयनाये अकर्मकत्वात् गत्यर्थाकेत्यादिना कर्तरि क्तः दोषोमास्थामिति क्तिः प्रसितमिति विनुगङ्बन्धे इत्यस्य रूपम् किञ्च मुदा यत् विलसितं विलासः शृङ्गारचेष्टितं स्मरेण कामेन भासितं उद्दीपितं

समिद्धशरणा दीप्ता देहे लङ्का मतेश्वरा ।
समिद्धशरणादीप्ता देहे लङ्कामतेश्वरा ॥ ७ ॥

समुद्गयमकम् ।

लक्षितं संश्लिष्टमासीत् तदप्यवसितमिति सम्बन्धः लषश्लिषिक्रोडेङ्क्षितमिति पाठे विलक्षितमल्पीभूतं प्रमदाश्च स्त्रियो न समदाः नसदर्पाः यतो हृतसम्मदा नष्टहर्षा जाताः घञ्जलनट इति भदेरल् यच्च पुरहितं नगरानुकूलं समीहितं कर्तुमिष्टं तन्न विहितं नानुष्ठितम् । चक्रवालयमकमिति मण्डलाकारेण यमकितत्वात्तथाहि सर्वेषां पादानां अन्त्यवर्णानां सदृशतया नेमिवदवस्थितत्वात् मध्यस्य वर्णस्य च विसदृशस्य नाभिवदवस्थितत्वात् । मण्डलाकारतालक्षणं यथा पादानामवसाने तु सर्वेषां तुल्यरूपता । प्रतिपादं भवेद्यत्र चक्रवालं तदुच्यत इति ॥ ६ ॥ भ०

समिद्धेत्यादि । देहे अभ्यन्तरभागे समिद्धशरणा उज्ज्वलगृहा ततएव दीप्ता शोभावती लङ्का पुरी मतेश्वरा ज्ञातमहादेवा तत्रान्यदेवस्य नामापि न श्रूयते समिधोदधति हुतवन्तोवेति समिद्धा ऋषयः पूर्वस्मादातोऽनुपसर्गे क इति कः द्वितीयस्मादन्येष्वपि दृश्यत इति डः अग्निशब्दस्य सर्वोपाधिव्यभिचारार्थत्वात् धात्वन्तरादपि भवति ऋधोहोऽन्यतरस्यामिति पूर्वसवर्णः तान् गृह्णन्ति हिंसन्तीति कृत्यल्युटोबहुलमिति कर्त्तरि ल्युट् समिद्धशरणा राक्षसास्तान् दानमानाभ्यामादीपयति प्रोत्साहयतीति क्विप् समिद्धशरणादीप् तैन रावणेन ताय्यते पाल्यत इति तायतेः कर्मणि कारके विवक्षिते संपदादिदर्शनात् क्विप् वेरपृक्तस्येति लोपात्पूर्वं लोपोव्योर्वलीति लोपः समिद्धशरणादीप्ता रावणस्य पालनीया समिद्धशरणादीप्ता लङ्का देहे दग्धा अलङ्कामोऽस्येत्यलङ्कामः तद्भावः अलङ्कामता तस्यामलङ्कामतायां पर्य्याप्तेच्छायां ईश्वरा लङ्का सर्वं क सम्पादनात् । समुद्गयमकमिति सदृशाकारेण यमितत्वात् पादद्वययोरर्द्धद्वययोश्च संपुटवत्वाद्दृश्यात् ॥ ७ ॥ ज० भ०

समिद्धेत्यादि । लङ्का देहे दग्धा अर्थात् हनूमता कर्मणि ठो कीदृशी देहे अभ्यन्तरभागे समिद्धशरणा उज्ज्वलगृहा शरणं गृहरक्षित्रोरित्यमरः अतएव दीप्ता शोभावती मतेश्वरा मतो ज्ञात ईश्वरो महादेवो यस्यां तत्रान्यदेवस्य नामापि न श्रूयते इति भावः मतः पूजित इति वा पुनः कीदृशी समिद्धशरणादीप्ता समिधोदधातीति आदृत्वात् हनजनादिति डः किंवा समिधो जुहोतीति तेनैव गमादित्वात् डः समिद्धो अग्निः तं गृह्णन्ति हिंसन्तीति समिद्धशरणा राक्षसाः ग्रह्गृहिंसने कर्मण्येऽभी इति कर्त्तर्यनट् नन्द्यादित्वाद्वा तान् मानदानाभ्यामादी-

पिशिताशिनामनुदिशं स्फुटतां
स्फुटतां जगाम परिविह्वलता ।
ह्वलता जनेन वञ्चधाचरितम्
चरितं महत्त्वरहितं महता ॥ ८ ॥

काञ्चीयमकम् ।

पयतीतिकर्तरि क्विप् समिद्धशरणादीप् रावणः तेन तायते पाल्यते इति कर्मणि क्विप् तायृङ्पालनसन्तत्योः व्योर्लोपोऽस्य इति यलोपः समिद्धशरणादीपो रावणस्य पालनीयेत्यर्थः किं वा समिद्धानां दीप्तिमतां देवादीनां शरणेन हिंसनेन अदीपं दीप्तप्रभावं तायते पालयति सन्तनुते वेति भावे क्विप् दीपनं दीप्तिरिति भावे क्विप् पश्चाद्वज् समासः अलङ्कामतेश्वरा अलङ्कामतायां यथेष्टेच्छायां ईश्वरा सर्वेच्छायाः सम्पादयित्रीत्यर्थः अलमत्यर्थः कामोऽस्य अलङ्कामः तस्य भावोऽलङ्कामता तस्यामीश्वरेति सप्तमीसमासः वरप्रत्ययान्तादीश्वरशब्दात् स्त्रियामत आबित्वाप् भवत्येव औणादिक वरट्प्रत्ययान्तात्तु ईप् प्रत्यय इति बोध्यं श्रीपतिस्वरसात् नदादावीश्वरशब्दं विभाषया पठन्त्यन्ये गौनादिरयमित्यपरे यद्वा लङ्काभिः कुलटाभिर्मतः पूजित ईश्वरो यत्र यद्वा अलमत्यर्थं कामत ईषन्नत ईश्वरोयत्र कोरीषदर्थे इति कुशब्दस्य कादेशः लङ्का रक्षःपुरी शाखा डाकिनी कुलटासु चेति विश्वः । सस्वनयमकमिति द्वयोर्द्वयोः सम्पुटाकारेण यमकितत्वात् तथाच रुद्रभट्टः अर्द्धं पुनरावृत्तं जनयति यमकं सस्वनकं नामेति अर्द्धाभ्यासः सस्वनः स्यादिति दण्डी ॥ ७ ॥ भ०

पिशिताशिनामित्यादि। पिशिताशिनां मांसाशिनां राक्षसानामनुदिशं दिशि दिशि अव्ययीभावे शरत्प्रभृतिभ्य इति टच् स्फुटतां पलायमानानां परिविह्वलता स्फुटतां स्पष्टतां जगाम जनेन चेतरेण ह्वलता चलता महता शौर्यादिगुणयुक्तेनापि सता यच्चरितं चेष्टितं बञ्चधा बञ्चप्रकारं तन्महत्त्वरहितं महता विकलमाचरितं अनुष्ठितं भयात् । काञ्चीयमकमिति रसनाकारेण यमितत्वात् तथाद्यपादस्यान्ते परस्यादौ च सदृशो विन्यासः ॥ ८ ॥ ज० म०

पिशितेत्यादि । पिशिताशिनां राक्षसानां परिविह्वलता व्याकुलता स्फुटतां स्पष्टतां जगाम किङ्कुर्वतां अनुदिशं दिशि दिशि स्फुटतां पलायनेन विकाशं गच्छतां स्फुटशिविकाग्रे अनुशब्देन वीप्सायामव्ययीभावे शरद्विपाडय इति अप्रत्ययः महता शौर्यादिगुणयुक्तेनाप्यपरेण जनेन ह्वलता चलता महत्त्वरहितं

न गजा नगजा दयिता दयिता विगतं विगतं ललितं ललितम् ।
प्रमदा प्रमदामहता महतामरणं मरणं समयात्समयात् ॥ ९ ॥

यमकावली ।

माहात्म्यविवर्जितं चरितं चेष्टितं बहुधा बहुप्रकारैराचरितं कृतं भयात् क्वलच्चलचाजे । काञ्चीयमकमिति रसनाकारेण यमकितत्वात् तथाच एकस्यान्ते-परस्यादौ सदृशं दृश्यते यदि । तत्काञ्चीयमकं नाम व्याहृतं कविपुङ्गवै-रिति एतदेव दण्डिना सन्दष्टयमकमुक्तं तथाहि सन्दष्टयमकस्थानमन्तादीपाद-योर्द्वयोरिति ॥ ८ ॥ भ०

न गजेत्यादि । गजा हस्तिनः नगजाः पर्वतजाताः अतएव दयिता दृष्टा न दयिताः न रक्षिताः दयतिरत्र रक्षणार्थः विगतं वीनां पक्षिणामुद्गतं गमनमपि विगतं नष्टं ललितं यद्दोषितं वस्तु तल्ललितं पीडितं प्रमदा योषित् प्रमदा प्रगतो मदो यस्या इति प्रमदा हर्षभ्रूर्वा यथैः आमहता रोगपीडितेव आमोरोग. इव शब्दलोपोऽत्र द्रष्टव्यः अमेन पीडिता पलायनहता वा अमोगत्यादिषु महतां शूराणां अरणं अविद्यमानयुद्धं मरणं विनाशनं समयात् समाप्तं यातेर्लङि रूपं समयात् कालेन । यमकावलीति यमकमाला ॥ ९ ॥ ज० भ०

न गेत्यादि । गजा हस्तिनो न दयिता न रक्षिताः ञिदयङ् अवणेगतौ बधेदानेऽत्रने कोट्टशाः नगजाः पर्वतजाः तेनोत्पन्ना अतएव दयिता दृष्टाः परञ्च विगतं वीनां पक्षिणां गतं गमनं विगतं विनष्टं अग्निदग्धत्वात् ललितमोषितं वस्तु हारभेदो वा ललितं चलितं भयाकुलजनसंसर्गादन्यत्र गतमित्यर्थः ललितं हारभेदे स्यादोषिते चलितेऽपि चेति विश्वः प्रमदा नारी अप्रमदा प्रमदरहिता हर्षभ्रूर्या इत्यर्थः प्रगतमदा वा आमहता रोगपीडितेव इवशब्दार्थोऽत्र गम्यते अमकरोगे घञ् यद्वा अमेन गमनेन हता पीडिता यद्वा अमेन दाहेन हाहाका-रशब्देन वह्निशब्देन वा हता व्याकुला अमगतौ शब्दे महतां शूराणां अरणं युद्धरहितं मरणं समयात् कालवशात् समयात् संग्रामं यातेर्धो यद्वा महतां जनानाम् अह खेदेऽङ्गने निश्चये वा तां प्रमदां समया समीपे समयात् कालेन युद्धरहितम् मरणं यात् आगतं अतसा तत्यगमने इत्यस्मात् आङ्-पूर्वात् किप् स्त्रियं हित्वा यतो न गच्छन्नित्यर्थः । यमकावलीति यमकमाला तथाहि पदेषु यत्र सर्वेषु सादृश्यं दृश्यते यदि । यमकावलिरुद्दिष्टा स्त्रिया यमककोविदैरिति ॥ ९ ॥ भ०

न वानरैः पराक्रान्तां महद्भिर्भीमविक्रमैः ।
नवानरैः पराक्रान्तां ददाह नगरीं कपिः ॥ १० ॥

अयुग्मपादयमकम् ।

द्रुतं द्रुतं वह्निसमागतं मतं महीमहीनद्युतिरोचितं चितम् ।
समं समन्तादपगोपुरं पुरं परैः परैरप्यनिराकृतं कृतम् ॥११॥

पादाद्यन्तयमकम् ।

नवेत्यादि । वानरैरन्यैर्महद्भिर्महाप्राणैर्भीमविक्रमैः असह्यशौर्यैः शक्रादिभिः न पराक्रान्तां नावष्टब्धां नगरीं लङ्कां नरैर्मनुष्यैर्नच पराक्रान्तां विगृहीतां कपिर्हनूमान् ददाह दग्धवान् । अयुक्पादयमकमिति । प्रथमतृतीययोर्यमितत्वात् ॥ १० ॥ ज० म०

नवेत्यादि । कपिर्हनूमान् नगरीं ददाह दग्धवान् नगरीं कीदृशीं वानरैर्बालिसुग्रीवादिभिर्न पराक्रान्तां न गतां सर्व्वैर्मनुष्यैः कार्त्तवीर्य्यादिभिर्न पराक्रान्तां न विगृहीतां किम्वा अनरैर्मनुष्यभिन्नैर्देवयक्षादिभिरपि नवा पराक्रान्तां न च विगृहीतां कीदृशैर्महद्भिर्महाप्रमाणैर्भीमविक्रमैर्भीमशौर्य्यैः शिवतुल्यपराक्रमैर्वा । अयुक्पादयमकमिति । अयुजोः प्रथमतृतीययोर्यमकितत्वात् ॥ १० ॥ भ०

द्रुतमित्यादि । यत्पुरं चितं सौवर्णगृहसंहत्या व्याप्तं तद्वह्निसमागतं अग्निसंयुक्तं द्रुतं विलीनं द्रुतं प्रवाहेण प्रहृतं द्रुतं शीघ्रं अहीनया उत्कृष्टया द्युत्या तेजसा रोचितं भासितं महीङ्गतं प्राप्तं अपगोपुरं अपगतपुरद्वारं अतएव समन्तात्सर्व्वतः समं तुल्यं कृतं परैः शत्रुभिः परैरपि उत्कृष्टैरपि शक्रादिभिरनिराकृतं अनभिभूतं सत् । पादाद्यन्तयमकमिति पादास्यादावन्ते च यमितत्वात् ॥ ११ ॥ज० म०

द्रुतमित्यादि । पुरं लङ्कां समन्तात् सर्व्वतः समं भूमितुल्यं कृतं उच्चानां द्रुतत्वात् कीदृशं द्रुतं शीघ्रं द्रुतं द्रवीभूतं यतो वह्निसमागतं अग्निसंयुक्तं महीं भूमिं गतं प्रवाहेण प्राप्तमहीनद्युतिरोचितं अहीनया उत्कृष्टया द्युत्या दीप्त्या रोचितं शोभितं अहीनद्युतिना रावणेन रोचितं अभिलषितमिति कैश्चित् चितं स्वर्णगृहादिभिर्व्याप्तं अतएव वह्नियोगे द्रवत्वमुक्तं अपगोपुरं अपगतपुरद्वारं परैरुत्कृष्टैरपि परैः शत्रुभिरिन्द्रादिभिरनिराकृतं अनभिभूतं द्रुतं शीघ्रे विलीने च विद्राणे चाभिधेयवदिति विश्वः । पादाद्यन्तयमकमिति पादस्यादावन्ते च यमकितत्वात् ॥ ११ ॥ भ०

नश्यन्ति ददर्श द्रुन्दानि कपीन्द्रः ।
हारीण्यवलानां हारीण्यवलानाम् ॥ १२ ॥

मिथुनयमकम् ।

नारीणामपनुनुदुर्न दैन्यखेदा-
न्नारीणामलसलिला हिरण्यवाप्यः ।
नारीणामनलपरीतपत्रपुष्पा-
न्नारीणामभवदुपेत्य शर्म द्रुत्वान् ॥ १३ ॥

द्रुन्तयमकम् ।

नश्येत्यादि । अबलानां स्त्रीणां अबलानां अविद्यमानरत्नकाणां द्रुन्दानि समूहान् हारीणि हारवन्ति हारीणि अवश्यं हरन्ति आवश्यके णिनिः चेतसश्चित्यर्थात् नश्यन्ति पलायमानानि सन्ति कपीन्द्रो ददर्श। मिथुनयमकमिति प्रादद्वयस्य चक्रवाकमिथुनवदवस्थितत्वात् ॥ १२ ॥ ज० म०

नश्यन्नीत्यादि । कपीन्द्रो हनूमान् अबलानां स्त्रीणां द्रुन्दानि समूहान् ददर्श दृष्टवान् कीदृशानि नश्यन्ति नाशं प्राप्नुवन्ति पलायमानानि वा हारीणि हारयुक्तानि हारीणि मनोहारीणि ग्रहादित्वात् णिन् अवश्यं हरन्तीति आवश्यके णिन्निति परः कीदृशानां अबलानां अविद्यमानरत्नकाणां अतिकृशानां वा। तनुमध्या छन्दः लक्षणं यथा त्यौचेत्तनुमध्या । मिथुनयमकमिति प्रादद्वयस्य चक्रवाकयुगलवत् स्थितत्वात् ॥ १२ ॥ म०

नारीत्यादि । अरीणां सम्बन्धिन्यो हिरण्यवाप्यः सुवर्णघटिता वाप्यः नारीणां स्त्रीणां अग्नितापाद्दैन्यखेदान्नामपनुनुदुः नापनीतवत्यः कृतः आरीणामलसलिलाः रीङ् स्रवण इत्यस्मादाङ्पूर्वात् स्रादय ओदित इति निष्ठा नत्वं आरीणकृतममलं सलिलं यासु हिरण्यवापीष्विति द्रुत्वांश्चोपेत्य गत्वा तासां शर्म सुखं नाभवत् न जातं अनलपरीतपत्रपुष्पत्वाद्द्रुत्वानां अरीणां नारीणामिति योज्यं अतुसम्बन्धिनीनामित्यर्थः अरीणामिमा इति तस्येदमित्यण् तदन्तात् टिड्ढाणञित्यादिना ङीप् अत्र द्रुत्वानुपेत्य स्थितानामित्यध्याहर्त्तव्यं अन्यथा समानकर्तृकत्वात् पूर्वकाले क्त्वाप्रत्ययो न स्यात् । द्रुन्तयमकमिति प्रतिपदं पुष्पफलस्येव मूलेऽवस्थितत्वात् ॥ १३ ॥ ज० म०

नारीणामित्यादि । हिरण्यवाप्यः सुवर्णस्थलनिर्म्मितदीर्घिका नारीणां

अथ लुलितपतत्रिमालं रुग्नासनवाणकेशरतमालम् ।
सवनं विविक्तमालं सीतां द्रष्टुं जगामालम् ॥ १४ ॥

पुष्पयमकम् ।

स्त्रीणां देहखेदान् अग्निसन्तापजनितान् न अपनुनुदुः नापनीतवत्यः हिरण्यवाप्यः कीदृश्यः आरीणामलसलिलाः आरीणं द्रुतं अमलं निर्मलं सलिलं स्वर्णजलं यासु अग्नितेजसा स्वर्णघटिततीरस्य द्रुतत्वात् स्वर्णजलं तत्र जातमित्यर्थः ओरोङ्त्व ऋरषे आङ्पूर्व्वात् क्नः क्नूत्वाद्योदिति नः किंवा शुष्कत्वादारीणं ईषत्कृतं जलं यासु रोगीबधे गतौ गत्यर्थात् कर्त्तरि क्नः ल्वादित्वात् क्नस्य नः णत्वञ्च आरीणां अरिसम्बन्धिनीनां तासां नारीणां वृत्तान् उपेत्य समीपे गत्वा स्थितानां श्रमं सुखं नाभवत् न जातं स्थितानामित्यध्याहारात् समानकर्तृकता वृत्तान् कीदृशान् अनलपरीतपत्रपुष्पान् अनलेनाग्निना परीतं व्याप्तं पत्रञ्च पुष्पञ्च येषां तान् अतएव न श्रमं नारीणां कीदृशीनां नारीणां आपो नारा इति प्रोक्तास्तत्र भवानां ततो वा आगतानां वरुणलोकादानीतानामित्यर्थः आरीणामिति अरिशब्दात् तस्येमा इति ण्यः श्रमं नाभवदित्यत्र पूर्व्वतो नञनुषज्यते केचित्तु अरीणां शत्रूणां हिरण्यवाप्य इति पूर्व्वत्र योजयन्ति नारीणां जलभवानामिति न व्याचक्षते तन्मते परार्द्धेऽपि नञ् विद्यते क्वचित्तु पुष्पान्नारीणामिति न द्वयसंयोगवत् पाठो दृश्यते तत्र पूर्व्वोक्तव्याख्यायां न नञनुषङ्गस्तस्य विद्यमानत्वात् केचित्तु आङ्पूर्व्वादर्त्तेरीणादिक इप्रत्ययः आ समन्तात् रीणां गच्छन्तीनामित्याहुः । प्रहर्षिणीच्छन्दः लक्षणं यथा त्रयाशाभिर्म्मनजरगाः प्रहर्षिणीयमिति । वृन्तयमकमिति प्रतिपादं पुष्पफलस्येव मूले वृन्तवदवस्थितत्वात् तथाहि पादादौ सदृशं यस्य प्रतिपादं प्रदृश्यते । तद्वृन्तयमकं नाम कथ्यते कविपुङ्गवैरिति ॥ १३ ॥ भ०

अथेत्यादि । दाहानन्तरं लुलितानां चलितानां पतत्रिणां पक्षिणां माला संहतिर्यस्मिन् तद्वनमशोकवनिकाख्यं स कपिर्जगाम रुग्नाः भग्नाः असनादयो यस्मिन् वने तत्रासनः पीतसालः वाणः वन्धिका केशरो नागकेशरो देववल्लभो वा विविक्ताः शुचयो मालाः स्रजो यस्मिन् तद्विविक्तमालं सीतां द्रष्टुं अलं पर्य्याप्तौ सीतां द्रक्ष्यामीति जगाम । पुष्पयमकमिति प्रतिपादं वृन्तादुपरि पुष्पमिवावस्थितत्वात् ॥ १४ ॥ ज० म०

अथेत्यादि । अथ दाहानन्तरं स हनूमान् अलं पर्य्याप्तं सीतां द्रष्टुं वनं

घनगिरीन्द्रविलङ्घनशालिना वनगता वनजद्युतिलोचना ।
जनमता दृढशे जनकात्मजा तरुस्थलशायिनी ॥१५॥

पादादिमध्ययमकम् ।

अशोकवनिकां जगाम वनं क्रीडयं लुलितपतत्रिमालं लुलिता चलिता पतत्रिणां पक्षिणां माला संहतिर्यत्र यद्यपि छन्दःशास्त्रे सानुस्वारस्य गुरुत्वमनुशिष्टं तथापि तथा पादान्तगोऽपि वेति वचनात्तस्य लघुत्वात् प्रथमपादे द्वादशमात्रा भवन्ति किन्तु भवंति नेह विषमेऽज इत्यार्यायां प्रायिकं तृतीयगणस्यात्र मध्यगुरुत्वात् सत्तगणादौ हन्नाजोनलङ्घच्छटणेऽजोविषम इत्यत्र नजः प्रशंसापरत्वमिति टीकाकृतोक्तं जापचमती यमश्च धस ओट्टागेन हो दृगुरुमजखा गुविनीए गुणवहि आगहो देसिशआसेद इत्यनेन अप्राशस्त्योक्तत्वात् नतु विषमस्थजगणे लक्षणबहिर्भूता गाथा भवन्तीति वस्तुतः पतिमालमिति पाठः मध्ये तकारपाठो लेखकप्रमादात् रुग्णा भग्ना अशनादयो यत्र वने अशनः पीतसालः वाणो-ज्झिण्टीविशेषः केशरं हिङ्गुलि प्रोक्तं केशरो नागकेशरे सिंहटाठायां किञ्जल्कपुन्नागवकुलेष्वपीति विश्वः तमालः खनामख्यातः विविक्ताः पृथग्भूता मालाः स्रजः षड्क्रयो यत्र तत्तथा विविक्तः स्यादसम्पृक्ते विविक्तः शुभभूतयोः । चारुवद्दृश्यते धीरैर्विविक्तं रहसि स्थितमिति विश्वः । पुष्पयमकमिति प्रतिपादान्ते वृन्तोपरि पुष्पवत् स्थितत्वात् ॥ १४ ॥ भ०

घनेत्यादि । तरुस्थलशायिनी तरुमूले यत् स्थलं तत्रैव शयाना सत्यपि शयने तेन व्रत इति णिनिः । तरुस्थलेन कपिना जनकात्मजा दृढशे दृष्टा घनाः निरन्तराः ये गिरीन्द्राः मेघसदृशा वा तेषां यल्लङ्घनं अतिक्रमणं तेन शालिना युक्तेन कपिना वनगता काननस्था वनजद्युतिलोचना पद्मस्येव कान्तिर्द्युतिर्लोचनयोः ते तथाविधे लोचने यस्याः नक्षोडादिवक्च इति ङीप्प्रतिषेधः जनमता जनेनावबुद्धा पतिव्रतेयमिति मनु अवबोधन इत्यस्य भूते निष्ठायां रूपं न लोकेति षष्ठीप्रतिषेधः कर्त्तरि तृतीया तस्माच्च कर्तृकरण इति समासः वर्त्तमाने तु मतिबुद्धीत्यादिना क्तप्रत्ययः क्तस्य च वर्त्तमान इति षष्ठी तस्माच्च क्तेन च पूजायामिति समासप्रतिषेधः स्यात् तरुस्थलशायिनी तरुमूले यत् स्थलं तत्रैव शयाना सत्यपि शयने तेन व्रत इति णिनिः । आदिमध्ययमकमिति पादानामादौ मध्ये च घननवजनतरुशब्दानां यमितत्वात् ॥ १५ ॥ ज० म०

घनेत्यादि । तेन तरुस्थलेन कपिना तरुस्थलशायिनी जनकात्मजा दृढशे कर्मणि रूपं तेन क्रीडयेन घनगिरीन्द्रविलङ्घनशालिना घना निविड़ा ये

कान्ता सहमाना दुःखं च्युतभूषा ।
रामस्य वियुक्ता कान्ता सहमाना ॥ १६ ॥

विपथयमकम् ।

मितमवददुदारं तां हनूमान्नुदारं
रघुवृषभसकाशं यामि देवि प्रकाशम् ।

गिरीन्द्राः पर्व्वतास्तेषां विलङ्घनं विद्यतेऽस्येति अस्त्यर्थे शालिन्प्रत्ययो बोध्य इति शाब्दिकाः यद्वा तेषां विलङ्घनेन शाडितं शोभितं शीलं यस्य शाडृ श्लाघायां णिनिः डलयोरलयोरेति लत्वं कीदृशी वनगता अशोकवनिका स्थिता पुनः कीदृशी वनजद्युतिलोचना वने जले जायते इति गमादित्वात् डः वनजं पद्मं कैरवं वा तस्येव द्युतिर्ययोस्तादृशे लोचने यस्याः सा वनं सलिलकानन इत्यमरः पुनः कीदृशी—जनेन मता ज्ञाता पतिव्रतात्वेन पूजिता वा नतु जनानामिति षष्ठी तथाचोक्तं कारकषष्ठी न समस्यते इति न्यायात् ज्ञानेच्छापूजेति क्तः तद्योगे प्राप्तापि षष्ठी न स्यात् अथास्यानित्यता च दृश्यत इति न्यायात् यद्वा वर्त्तमाने क्तो नातीतक्तस्य बाधक इति अतीते वा क्तस्तव चकारात् मनुबोधने धातूनामनेकार्थत्वात् पूजार्थेऽप्यस्य प्रयोगः । आदिमध्ययमकमिति प्रतिपादमादिमध्ययोस्तुल्यत्वात् ॥ १५ ॥ भ०

कान्तेत्यादि । कान्ता कमनीया सहमाना वेदयमाना दुःखं वियोगजं च्युतभूषणा रामस्य कान्ता प्रिया वियुक्ता वियोगिनी सहमाना सह मानेन वर्त्तत इति बोपसर्जनस्येति सभावविकल्पः दृश्य इति सम्बन्धः । विपथयमकमिति पादद्वयातिक्रमाद्विपथेन विमार्गेण यमितत्वात् ॥ १६ ॥ ज० म०

कान्तेत्यादि । जनकात्मजा सीता कीदृशी दृश्ये कान्ता कमनीया दुःखं वियोगजं सहमाना तत्खेदं न करोतीत्यर्थः च्युतभूषणा रामस्य कान्ता प्रिया वियुक्ता वियोगिनी सहमाना मानेन चित्तसमुन्नत्या पूजया वा सहिता । विपथयमकमिति पादद्वयातिक्रमाद्विपथेन विमार्गेण यमकितत्वात् तनुमध्या छन्दः ॥ १६ ॥ भ०

मितमित्यादि । मितं अल्पाक्षरं अर्थावगाढं तां सीतां हनूमान् सुदा हर्षेण युक्तः अवदत् कथितवान् किमित्याह अरं शीघ्रं हे देवि रघुवृषभसकाशं रामसमीपं माल्यवन्तं पर्व्वतं प्रकाशं प्रकटं यामि तव विदितविषादो ज्ञातावसादः दृष्टक्लमक्लामिषादः वीक्षिताशेषनिशाचरः आमिषं मांसमदन्नीति कर्मण्यण्

तव विदितविषादो दृष्टकृत्स्नामिषादः
श्रियमनिशमवन्तं पर्व्वतं माल्यवन्तम् ॥ १७ ॥

मध्यान्तयमकम् ।

उदपतद्दियदग्रगमः परैरुचिरमुन्नतिमत्पृथुसत्ववत् ।
रुचिरमुन्नतिमत्पृथुसत्ववत्प्रतिविधाय वपुर्भयदं द्विषाम् ॥१८॥

गर्भयमकम् ।

वासरूपोऽस्त्रियामिति वचनात् अदोनन्न इति विट्प्रत्ययेनाणोविकल्पेन वाधनात् श्रियं शोभां अनिशमवन्तं रत्नन्तं पर्व्वतम् । मध्यान्तयमकमिति पादस्य मध्ये अन्ते च यमितत्वात् ॥ १७ ॥ ज० म०

मितमित्यादि । हनूमान् मुदा हर्षेण मितमल्पाक्षरमुदारं गभीरार्थं तां अवदत् किमित्याह हे देवि अरं शीघ्रं रघुवृषभस्य रघुश्रेष्ठस्य सकाशं समीपं माल्यवन्तं पर्व्वतं प्रकाशं यथास्यात्तथा यामि तव विदितो ज्ञातो विषादो येन विषादस्य नित्यसापेक्षत्वात् समासः दृष्टः कृत्स्नः सकल आमिषादो राक्षसो येन स तथा अनिशं सततं श्रियं शोभामवन्तं रत्नन्तं माल्यवन्तं नाम पर्व्वतम् । मध्यान्तयमकमिति मध्यान्तपादयोर्यमितत्वात् । मालिनी वृत्तम् ॥१७॥भ०

उदपतदित्यादि । वियदाकाशमुदपतत् उत्पपात परैः शत्रुभिरप्रगमः अनभिभवनीयः गमेः अकृदृदनिश्रिनमश्चेति कर्म्मण्यप् कर्त्तृकर्म्मणोः कृतीत्यत्र विभाषोपसर्ग इति मण्डूकप्लुत्या अनुवर्त्तनीयं सोपसर्गस्य प्रयोगे विभाषा षष्ठी रुचितं शोभितं वियच्चिन्मलत्वात् अथवा अग्रगमोऽन्येषामित्यर्थात् परैरुत्कृष्टैरन्तरीक्षचारिभिः रुचितं दीपितं उन्नतिमत् उच्छ्राययुक्तं पृथुसत्त्ववद्भिः प्राणिभिर्युक्तं किं कृत्वा उदपतदित्याह वपुः शरीरं प्रतिविधाय कृत्वा रुचितान् तुष्टान्मोदयतीति रुचितसुत् ण्यर्थोऽत्रान्तर्भूतः द्विषां शत्रूणां भयदं नतिमत् तदानीं देवेषु कृतशिरःप्रणामत्वात् अथवा रुचिरमेवाभीष्टमेव वपुः उन्नतिमत् विभूतिमत् पृथुसत्त्ववत् विस्तीर्णसत्त्ववत् सत्त्वगुणयुक्तं वा । गर्भयमकमिति द्वयोः पादयोर्मध्ये पादद्वयस्य यमितत्वात् ॥ १८ ॥ ज० म०

उदपतदित्यादि । कपिर्वियदाकाशमुदपतत् उत्पपात कीदृशः परैः शत्रुभिरप्रगमोऽनभिभवनीयः न प्रगम्यतेऽसौ अप्रगमः यद्वा परैः सह नास्ति प्रकृष्टं गमनं यस्येत्यर्थः अतिशीघ्रगामित्वात् कीदृशं वियत् परैरुत्कृष्टैरन्तरीक्षगामिभिः रुचिरं दीपितं पुनः कीदृशं उन्नतिमत् उच्छ्राययुक्तं पृथुसत्त्ववत्

वभौ मरुत्वान् विकृतः समुद्रो वभौ मरुत्वान् विकृतः समुद्रः ।
वभौ मरुत्वान् विकृतः समुद्रो वभौ मरुत्वान् विकृतः समुद्रः॥१९॥

सर्व्वयमकम् ।

महाप्राणियुक्तं उन्नतिमदिति सत्त्वविशेषणं वा किं कृत्वोदपतदित्याह द्विषां शत्रूणां भयदं वपुः शरीरं प्रतिविधाय कीदृशं वपुः रुचिरमुत् रुचिरान् दृष्टान् मोदते इति क्विप् नतिमत् तदानीं देवेषु कृतप्रणामत्वात् । गर्भयमकमिति मध्यपादद्वयस्य यमितत्वात् ॥ १८ ॥ भ०

वभावित्यादि । मरुत्वान् हनूमान् पितृत्वेन मरुद्विद्यते अस्येति कृत्वा मरुत इति वत्वं विविधं कृतं वनभङ्गादि कर्म्म येन विविधं वा कृन्ततीति विकृतः दृगुपधलक्षणः कः दृत्वादीनां क्वेदक इत्यर्थः समुद्रो मुद्रयाभिज्ञानेन चूडामणिना सह वर्त्तत इति समुत्पतितो नभसि तेजःपुञ्ज इव वभौ दीप्यतेस्म इत्ययं प्रथमः पादः । तस्मिन् तथाभूते मरुत्वानिन्द्रः अनुजीवितया मरुतो देवा अस्य सन्तीति कृत्वा विकृतः रावणपरिभवात् विकृतदेवाधिपत्यः विकृतः स च समुद्रः मुद्रया अम्बरसा सह वर्त्तमानः समुपलब्धमारुतिदत्तान्नः वभौ हृष्टवान् कपिना तावदिदं कृतं रामः पुनः समूलं क्षेत्स्यतीति अनेकार्थत्वाद्धातूनां भातिरत्र तुष्टौ वर्त्तते इत्ययं द्वितीयः समुद्रो जलनिधिः मरुत्वान् हनूमदुत्पतनजनितवायुना युक्तः अतएव विकृतोऽतिक्रान्तमर्य्यादः वभौ बभूव अत्र सत्तातां प्रयुक्तः इत्ययं तृतीयः सलोकपालो मरुत्वान् महाभूतात्मकेन युक्तः मरुत्वान् पूर्ब्ववन्मतुप् मरुत्वानिति व्याख्याने जलाङ्गशोन्त इति जश् स्यात् समुदो हर्षस्य दाता पुत्रो मे सुखेन यास्यतीति मुदं राति ददातीति आतोऽनुपसर्गे कः विकृतो मन्दगतिः वभौ वाति स्म अत्र मतौ प्रयुक्त इत्ययं चतुर्थः अन्यस्त्वाह यमकेषु क्रियापदस्याभिन्नाभिधेयत्वं न दुष्यतीति तेन दीप्त्यर्थ एव योज्यः । सर्व्वयमकमिति चतुर्णामपि पादानां सदृशत्वात् ॥ १९ ॥ ज० म०

वभावित्यादि । मरुद्वायुः पितृत्वेन वेगजनितत्वेन वा विद्यते यस्य स हनूमान् वभौ शुशुभे इत्यन्वयः कीदृशः विविधानि कृतानि वनभङ्गलङ्कादाहादीनि येन सः समुद्रः मुद्रया प्रत्यभिज्ञानेन चूडामणिना सहितः मुद्रा प्रत्ययकारिणीति कोषः इति प्रथमपादार्थः तस्मिंस्तथाभूते सति मरुत्वानिन्द्रो वभौ तुतोष धातूनामनेकार्थत्वात् भातिरत्र तोषे कीदृशः विकृतः पराभवात् विगता क्रिया जगत्परिपालनरूपा यस्य सः समुद्रः मुद्राख्याभिरम्बरोभिः सहित

अभियाता वरं तुङ्गं भूभृतं रुचिरं पुरः
कर्कशं प्रथितं धाम ससत्वं पुष्करेक्षणम् ।
अभियातावरं तुङ्गं भूभृतं रुचिरं पुरः
कर्कशं प्रथितं धाम ससत्वं पुष्करेक्षणम् ॥ २० ॥

महायमकम् ।

इति द्वितीयपादार्थः समुद्रः सागरोऽपि नभौ चुकोप धातूनामनेकार्थत्वाद्गतिरत्र कोपे पुनः पुनर्व्वानरेण लङ्घनात् कीदृशः मरुत्वान् मरुतो देवा विद्यन्ते यस्य सः मरुतौ पवनामराकिल्यमरः अतएव विक्लवः अतिक्रान्तमर्य्यादः वीन् पक्षिणः क्लृप्ति वेष्टते इति विक्लवः क्लृती ध वेष्टे पूर्व्ववत् कः अतिक्रान्तमर्य्यादत्वात् इति तृतीयपादार्थः वाचकत्वेन मरुच्छब्दो विद्यतेऽस्य मरुत्वान् वायुर्नभौ वाति स्म भातिरत्र गत्यर्थः केचित्तु मरुद्वायुर्व्वान् गच्छन् नभौ सन्धेरनित्यत्वात् न तस्य दत्वं यदुक्तं सन्धिरेकपदे नित्यो नित्यो धातूपसर्गयोः । स्तूतेष्वपि तथा नित्यः सैवान्यत्र विभाषिता इत्याहुः स्वमते सन्धेरनित्यत्वं णवातोर्डौरित्यत्र ओकारणेनैवेष्टसिद्धौ डित्करणेन ज्ञापितमिति देवीदासचक्रवर्त्तिनोक्तं कीदृशः विक्लवः मन्दगतित्वात् पुत्रस्नेहादन्यथाभूतः समुद्रः समुत्सर्पोरोर्म्मियत्वात् वायोरग्निसखत्वात् किं वा स इति विशेष्यपदं स लोकपालत्वेन प्रसिद्धो वायुरित्यर्थः मुदं प्रीतिं गात्रसंसर्गात् राति ददातीति मुद्रः इत्ययं चतुर्थपादार्थः सर्व्वत्र भातेर्दीप्त्यर्थत्वमेव युक्तमिति केचित् नैकं पदं द्विः प्रयोज्यं प्रायेणैकार्थत्वेन तेनात्र भातिर्नानार्थत्वेन प्रयुक्तो न दोषावहः । सर्व्वयमकमिति पादचतुष्टयस्य तुल्यरूपत्वात् कण्ठाभरणेन महायमकमिदमुक्तं तथाहि एकाकारचतुष्पादं महायमकमुच्यते इति रुद्रटमते षड्भक्तिरिति नाम तदुक्तं अन्योन्यं पश्चिमयोरादृत्या पादयोर्भवति पुच्छः । सर्व्वैः सार्द्धं युगपत्प्रथमस्य जायते षड्भक्तिरिति ॥ १९ ॥ भ०

अभियातेत्यादि । भूभृतं रामं वरं श्रेष्ठं तुङ्गं महाकुलीनत्वादिति सर्व्वेषामुपरि स्थितं गुणैरुचिरं सर्व्वाङ्गसुन्दरं पुरोऽग्रतो वक्षःस्थले कर्कशं लोमशं प्रथितं लोके प्रख्यातं धाम गृहं वर्णाश्रमधर्म्माणां ससत्त्वं पराक्रमयोगात् पुष्करेक्षणं पद्मलोचनं अभियाता अभिमुख्येन यास्यति हनूमान् लुटि रूपं अभियातेत्यादि भूभृतं पर्व्वतं यत्राङ्गदादयः स्थिताः तमभिया अभिगच्छता हनूमता कृतः पुरो लङ्कायाः सकाशात् पुष्करे आकाशे धाम तेजः

क्षणं मुहूर्त्तं प्रथितं विस्तारितं अभियातीत्यन्येभ्योऽपि दृश्यत इति क्विप् तृतीयैकवचने आतो धातोरित्याकारलोपे अभियेति रूपं कीदृशं अतावरं सातत्येनाततीति पचाद्यच् अतो वायुः आदित्यो वा आदृणोतीत्यप् आवरः अतस्यावरं यतस्तुङ्गं उच्चैस्तरं रुचिरं तुष्टिदं रुचिं रातीति कर्कशं कठिनस्वभावं सत्त्वं प्राणियुक्तं । महायमकमिति श्लोकस्यैकस्य द्वितीयेन श्लोकेन यमितत्वात् ॥ २० ॥ ज० म०

अभीत्यादि । अथादत्र हनूमान् कर्त्ता भूभृतं राजानं रामं अभियाता अभिगमिष्यति त्वां रूपं यद्वा भूभृतं अभियाता आभिमुख्येन गन्ता हनूमान् वभौ भाति स्मेति पूर्व्वेणान्वयः क्वचिदपवादविषयेऽप्युत्सर्गोऽपि प्रवर्त्तत इति क्त्वोगेऽपि कर्म्मणि द्वितीया किं वा शीलार्थत्वं विवक्षितं किं वा अभियोगे द्वितीया भूभृतं कीदृशं वरं श्रेष्ठं तुङ्गं सर्व्वेषामुपरि स्थितं महाकुलीनत्वात् रुचिरं सर्व्वाङ्गसुन्दरं पुरोऽग्रे वक्षःस्थले कर्कशं महापुरुषत्वात् कठिनं लोमशं वा प्रथितं लोकविख्यातं धाम रूढं गुणानामित्यर्थात् तेजःस्वरूपं वा सत्त्वं सपराक्रमं सत्त्वगुणयुक्तं वा पुष्करेक्षणं पुष्करवत् पद्मवदीक्षणे लोचने यस्य तं किं वा युद्धार्थं पुष्करं शरं ईक्षते पश्यतीति नन्द्यादित्वादनः । अभीत्यादि तेन हनूमता पुरो लङ्कायाः सकाशात् यतोऽङ्गदादयः सन्ति तं भूभृतं पर्व्वतं अभि लक्ष्यीकृत्य याता गच्छता पुष्करे आकाशे धाम तेजः क्षणं मुहूर्त्तं प्रथितं विस्तारितं यातेति यातेः भृतः भूभृतं कीदृशं वरं व्रियतेऽसौ वरं कर्म्मण्यन् देवादिभिरङ्गदादिभिर्वा वृतमित्यर्थः किं वा वरं श्रेष्ठं किं वा भूभृतं अभि लक्ष्यीकृत्य या गच्छता यातीति याः कर्त्तरि क्विप् धीरालोपोऽच्यघाविति टापरे आलोपः अतावरं अततीति सातत्येन गच्छतीति अतो वायुः सूर्य्यादिर्वा अतसातत्यगमने पचादित्वादन् आदृणोतीत्यावरः अत्रापि पचादित्वादन् अतस्यावरमिति समासः पर्व्वतविशेषणं यतस्तुङ्गमत्युच्चं किं वा भूभृतं अता गच्छता अततीति अत् कर्त्तरि क्विप् अभिया अविद्यमानभयेन हनूमद्विशेषणं आवरं आदृणोति अर्थात् सूर्य्यादीन् तुङ्गत्वादित्यावरं पूर्व्ववत् पुनः कीदृशं पर्व्वतं रुचिरं तुष्टिदं रुचिं राति ददाति हनजनादिति डः कर्कशं कठिनं पाषाणमयत्वात् सत्त्वं प्राणिभिर्हिंस्रादिभिर्युक्तं पुष्करं पङ्कजे व्योम्नि पयः करिकरायोः । औषधद्वीपविहगतीर्थराजोरगान्तरे । पुष्करं तूर्य्यवक्त्रे च काण्डे खड्गफलेऽपि चेति विश्वः । महायमकमिति आद्यश्लोकस्य द्वितीयश्लोकेन यम-

चित्रं चित्रमिवायातो विचित्रं तस्य भूभृतम् ।
हरयो वेगमासाद्य सन्त्रस्ता सुमुहुर्मुहुः ॥ २१ ॥

आद्यन्तयमकम् ।

गच्छन् स वारीण्यकिरत्पयोधेः
कूलस्थितांस्तानि तरूनधून्वन् ।
पुष्पास्तरांस्तेऽङ्गसुखानतन्वंस्तान्
किन्नरामन्मथिनोऽध्यतिष्ठन् ॥ २२ ॥

आदिदीपकम् ।

कितत्वात् तथाच रुद्रटः अर्द्धं पुनरादृत्तं जनयति यमकं समुद्गकं नाम। श्लोकस्तु महायमकमिति । ॥ २० ॥ भ०

चित्रमित्यादि । भूधरं पर्व्वतं चित्रं गैरिकादिभिर्नानावर्णं अतएव चित्रमिवालेख्यमिव आयातः आगच्छतस्तस्य हनूमतः वेगञ्जवञ्चित्रं अद्भुतमासाद्य प्राप्य हरयः कपयः सन्त्रस्ताः सभया सुमुहुः मोहङ्गताः मुहुः क्षणं श्लोकाद्यन्तयमकमिति श्लोकस्यादावन्ते च यमितत्वात् ॥ २१ ॥ ज० भ०

चित्रमित्यादि । तस्य हनूमतश्चित्रञ्चुतं वेगं यमासाद्य प्राप्य हरयः कपयः सन्त्रस्ताः सन्तो मुहुर्म्मोहमुपागताः तस्य कीदृशस्य भूभृतं पर्व्वतमायातः आगच्छतः यातेः शतः कीदृशं भूभृतं विचित्रं गैरिकादिभिर्नानावर्णं अतएव चित्रमिव आलेख्यमिव आद्यन्तयमकमिति श्लोकस्यादावन्ते च यमितत्वात् ॥ २१ ॥ भ०

अथालङ्कारस्य दीपकरूपकादिभेदेनानेकप्रकारः तत्र वाक्यार्थप्रकाशनादीपकमुच्यते तदादिमध्यान्तभेदात्त्रिविधमिति दर्शयन्नाह ।

गच्छन्नित्यादि । स हनूमान् वेगेन गच्छन् पयोधेर्वारीणि वेगजेन वायुना अकिरत् विक्षिप्तवान् तानि वारीणि अधिक्षिप्तानि कूलस्थितांस्तरूनधून्वन् कम्पितवन्ति धूञ्कम्पन् इति सौत्रादिकः ते तरवः कन्विताः पुष्पास्तरान् पुष्पाणां प्रकरान् आस्तीर्य्यन्त इति रुदोरप् अङ्गसुखान् रुदुस्वर्गत्वात् कायस्य सुखहेतूनतन्वन् विस्तारितवन्तः तान् पुष्पास्तरान् किन्नराः मन्मथिनः कामवन्तः अध्यतिष्ठन् अध्यासितवन्तः अधियीङित्यादिनाधिकरणस्य कर्म्मसंज्ञा आदिदीपकमिति क्रियापदस्यादौ श्रूयमाणत्वात् द्विविधं ह्यादिदीपकं एकतिङ-

स गिरिं तरुषण्डमण्डितं समवाप्य त्वरया लताम्बरः ।
स्मितदर्शितकार्य्यनिश्चयः कपिसैन्यैर्मुदितैरमण्डयत् ॥ २२ ॥

अन्तदीपकम् ।

नेर्कतिङ्सहितञ्च तत्र यत्पूर्व्वं तदेकमप्यनेकार्थप्रकाशकं यथाह भामहः मदो-जनयति प्रीतिमानन्दं मानभङ्गुरं यत्प्रियासङ्गमोत्कण्ठामसह्यां मनसः शुचमिति यत्तु द्वितीयं तत्समस्तवाक्यार्थप्रकाशकं यथेदमेव तत्र ह्युत्तरेषां वाक्यार्थाना-मादेनैव दीपनात् तस्मिन्नसति शेषाणामस्फुटत्वात् पूर्व्वकं परित्यज्य द्वितीयस्य प्रदर्शनं यत् तत्प्रतीपदीपकं नाम चतुर्थमस्तीति दर्शनार्थं तद्यथा तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः सत्यं ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् । मान्यान्मानय विद्विषोऽप्यनुनय प्रख्यापय स्वान् गुणान् कीर्त्तिं पालय दुःखिते कुरु दयामेतत्समस्तं चेष्टितमिति शेषो यदत्र परस्परमसं-बद्धमिति ॥ २२ ॥ ज० म०

अथ शब्दालङ्कारं प्रदर्श्य अर्थालङ्कारं दर्शयति स च बहुप्रकारो रूप-कदीपकादिभेदात् तत्रादौ दीपकं दर्शयति ।

गच्छन्नित्यादि । स हनूमान् गच्छन् वेगजेन वायुना पयोधेर्व्वारीणि अकिरत् क्षणविक्षेपे तानि वारीणि विक्षिप्तानि सन्ति कूलस्थितान् तरून् अधुन्वन् अकम्पयत् धुञ् कम्पे ते तरवः कम्पिताः सन्तः पुंप्राणामास्तरणानि अतन्वन् तनुङ् विस्तारे अङ्गसुखात् शरीरे सुखजनकात् मृदुस्पर्शत्वात् तान् पुंप्रास्तरान् किंनराः मन्मथिनः कामिनः सन्तः अध्यतिष्ठन् अध्यास्तुः कर्म्म क्रियेत्यादिना कर्त्तृत्वं आदिदीपकमिव गच्छन्नित्यादावुपादानात् तदेव सर्व्वां क्रियां दीपयति अन्यासां तन्मूलत्वात् अकिरदिति यदादौ दत्तं तेनैवान्यासा-मपि क्रियाणामुद्दीपनादिति केचित् तथाहि अकिरदिति क्रियापदेन कीर्णानि वारीणि इति योजना एवं सर्व्वत्र ॥ २२ ॥ भ०

स गिरिमित्यादि । स लताम्बरो हनूमान् प्रयोजककर्त्ता गिरिमङ्गदादि-भिरध्यासितं तरुषण्डमण्डितं त्वरया वेगेन समवाप्य कपिसैन्यैर्मुदितैर्हृष्टैः प्रयोज्यकर्तृभिः अमण्डयत् मडि भूषायामिति भौवादिकः चौरादिके तु कपि-सैन्यैः करणभूतैरिति योज्यं मुदितत्वे कारणमाह स्मितदर्शितकार्य्यनिश्चयः ईष-द्विकसितप्रकटीकृतसीतोपलब्धिनिश्चयः । अन्तदीपकमिति अमण्डयदिति क्रिया-पदस्यान्ते निर्द्दिष्टत्वात् ॥ २२ ॥ ज० म०

गरुडानिलतिग्मरश्मयः पततां यद्यपि सम्मता जवे ।
अचिरेण कृतार्थमागतं तममन्यन्त तथाप्यतीव ते ॥ २४ ॥

मध्यदीपकम् ।

व्रणकन्दरलीनयस्त्वसर्पः पृथुवक्त्रःस्थलकर्कशोरुभित्तिः ।

स गिरिमित्यादि । स लताम्रगः कपिर्हनूमान् प्रयोजककर्त्ता अङ्गदादिभिरध्यासितं गिरिं त्वरया वेगेन समवाप्य मुदितैर्हृष्टैः कपिसैन्यैः प्रयोज्यैरमण्डयत् शोभयामास गिरिमिति काकाक्षिगोलकन्यायेन उभयत्र सम्बध्यते भ्वादिकमण्डिधातोः प्रेरणे ञिः किं वा स लताम्रगः कर्त्ता त्वरया गिरिं समवाप्य कपिसैन्यैः करणभूतैरमण्डयत् शोभते स्म चौरादिकमण्डिधातो रूपं किमण्डि भूषे गिरिं कीदृशं तरुषण्डैर्वृक्षसमूहैर्मण्डितं कपिसैन्यानां मुदितत्वे हेतुमाह स्मितेति स्मितेन ईषद्धासेन दर्शितो ज्ञापितः कार्यस्य सीतादर्शनरूपस्य निश्चयो येन षण्डं पद्मादिसंघाते षण्डः स्यान्नोपतापेऽपीति विश्वः सुन्दरी छन्दः तल्लक्षणं यथा अयुजोर्यदि सौ जगौ युजोः सभराङ्गौ यदि सुन्दरी तदेति अत्र वाक्यभेदाभावेऽपि अमण्डयदित्यन्तिमक्रियापदेन सम्पूर्णवाक्योपकारादन्तदीपकं किं वा गिरिमवाप्य तं स्वयममण्डयत् कपिसैन्यैश्चामण्डयदिति वाक्यभेदोऽत्र मन्तव्यः ॥ २३ ॥ भ०

गरुडेत्यादि । पततां गच्छतां मध्ये यद्यपि गरुडादयो जवे वेगविषये सम्मताः अभिमताः तथापि तं हनूमन्तं अचिरेणैव कालेन कृतार्थं कृतकृत्यमागतं अतीवजविनं ते कपयः अमन्यन्त मन्यतेर्लङि रूपम् । मध्यदीपकमिति क्रियापदस्य मध्ये निर्दिष्टत्वात् ॥ २४ ॥ ज० भ०

गरुडेत्यादि । गरुडवायुसूर्या यद्यपि पततां गच्छतां मध्ये जवे वेगविषये लोकस्य सम्मता अभिमतास्तथापि ते कपयस्तं हनूमन्तं अतीव जववन्तं अमन्यन्त ज्ञातवन्तः मन्यौङ् बोधे यतोऽचिरेणैव कालेन कृतार्थं कृतकार्यमागतम् । मध्यदीपकमिति सम्मता इत्यस्यामन्यन्तेत्यस्य वा क्रियापदस्य मध्ये निर्दिष्टत्वात् विद्यासागरस्तु जव इति कारकपदं मध्ये श्रूयमाणमतीवेत्यपि दीपयतीति कारकदीपकमिदमित्याह ॥ २४ ॥ भ०

रूपकमनेकविधं दर्शयन्नाह

व्रणेत्यादि । असौ वानरो भूधर इव वानरभूधरः उपमितमित्यादिना समासः तदा तस्मिन्वानरमध्यगमनकाले कृतार्थः सुशुभे शोभते स्म व्रणानि

च्युतशोणितबद्धधातुरागः शुशुभे वानरभूधरस्तदासौ ॥ २५ ॥

रूपकम् ।

अस्यैव भेदा अपरे चत्वारः ।

चलपिङ्गलकेशरहिरण्यलताः स्फुटनेत्रपङ्क्तिमणिसंहतयः ।
कलधौतसानव इवाथ गिरेः कपयो बभुः पवनजागमने ॥ २६ ॥

एतद्विशिष्टोपमायुक्तं रूपकम् ॥

शस्त्रक्षतानि कन्दराणीव शस्त्राणि सर्पा इव शस्त्रसर्पाः व्रणकन्दरेषु लीनाः शस्त्रसर्पा यस्य वक्षःस्थलं कर्कशोरुभित्तिरिव सा पृथुला विस्तीर्णा यस्य सः शोणितं बद्धधातुरागः श्लिष्टगैरिकादिराग इव स च्युतो यस्य सर्वत्र उपमितमित्यादिना समासः । रूपकमिति सावयवेन भूधरेणोपमानेन सावयवस्य कपेरुपमेयस्य तत्स्वभावतयाध्यारोपितत्वात् यथोक्तं उपमानेन तुल्यत्वरूपमेयस्य रूप्यते । गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुरिति ॥ २५ ॥ ज० म०

व्रणेत्यादि । असौ वानरस्वरूपभूधरस्तदा वानरमध्यगमनकाले शुशुभे दीप्यते स्म कीदृशः व्रणानि शस्त्रक्षतस्वरूपाणि कन्दराणि तेषु लीनाः शस्त्रस्वरूपाः सर्पा यस्य पृथु विस्तीर्णं वक्षःस्थलमेव कर्कशोरुः कठिनोरुर्भित्तिर्यस्य शोणितमेव बद्धधातुरागः श्लिष्टगैरिकादिरागश्च्युतो यत्र रूपकमिति व्रणादीनां कन्दरादिभिरिह सादृश्यं न वाच्यं किन्तु अभेद एव विवक्षितः स च यद्यपि बाधितस्तथापि सादृश्यातिशयव्यञ्जनात्तथात्वं गम्यते यदुक्तं उपमैव तिरोभूतभेदा रूपकमिष्यत इति उपमानेन यत्तुल्यरूपमेयस्य रूप्यते । गुणानां समतां दृष्ट्वा रूपकञ्चैव तद्विदुरिति च यदि व्रणादि कन्दरादीव वानरो भूधर इत्युपमानसमासे उच्यते तदेतदेव लुप्तोपमोदाहरणं बोद्धव्यं यद्वा उपमानरूपसमासेऽपि रूपकत्वमिति मते उदाहरणमिदं तथाच सरस्वतीकण्ठाभरणे यदोपमानशब्दानां गौणवृत्तिरूपाश्रया । उपमेये भवेद्वृत्तिस्तदा तद्रूपकं विदुरिति ॥ २५ ॥ भ०

चलेत्यादि । अथ पवनजागमने हनूमदागमने कपयो गिरेस्तस्यैव कलधौतसानव इव सौवर्णैकदेशा इव बभुः शोभन्ते स्म पिङ्गलकेशराणि पिङ्गलसटाः तानि हिरण्यलता इव सुवर्णलता इव ताश्चला येषां कपीनां नेत्रपङ्क्तयो मणिसंहतय इव ताः स्फुटा उज्ज्वला येषामिति एतदपि रूपकमेव किन्तु कलधौतत्वेन श्यामानां विशिष्टत्वादिशिष्टोपमायुक्तं कमलकं नाम ॥ २६ ॥ ज० म०

कपितोयनिधीन् प्लवङ्गमेन्दुर्मदयित्वा मधुरेण दर्शनेन ।
वचनामृतदीधितीर्वितन्वन्नकृतानन्दपरीतनेत्रवारीन् ॥२७॥
एतच्छेषार्थान्वयसितमवतंसकम् ।
परिखेदितविन्ध्यवीरुधः परिपीतामलनिर्झराम्भसः ।
दुधुवुर्मधुकाननं ततः कपिनागा मुदिताङ्गदाज्ञया ॥२८॥
अर्द्धरूपकम् ।

चलेत्यादि । अथानन्तरं कपयोऽङ्गदादयः पवनजस्य हनूमत आगमने बभुः शोभन्ते स्म तस्यैव गिरेः कलधौतसानव इव स्वर्णसानव इव कलधौतं रूप्यहेम्नोरिति विश्वः कीडृशाः पिङ्गकेशराणि कपिलशटा एव हिरण्यलतास्ताश्चलाश्चञ्चला येषां नेत्रपङ्कज एव मणिसंहतयस्ताः स्फुटा उज्ज्वला येषाम् । इदमपि रूपकमेव केशराणां लतात्वेन नेत्राणां मणित्वेन च रूपणात् किन्तु कलधौतसानूनां विशिष्टत्वाद्विशिष्टोपमायुक्तमिति ॥ २६ ॥ भ०

कपीत्यादि । प्लवङ्गम इन्दुरिव प्लवङ्गमेन्दुः कपयस्तोयनिधय इव कपितोयनिधीन् मधुरेण सुखेन दर्शनेन मदयित्वा हर्षयित्वा मदीहर्षयोरिति घटादित्वान्मित्त्वे हुस्वत्वं वचनानि अमृतमयदीधितय इव वचनामृतदीधितीर्वितन्वन् विस्तारयन् लोकवृत्तान्तसम्बोधकमाह्लादकं वचनमुदाहरन्नित्यर्थः आनन्देन हर्षेण परीतं सञ्जातं नेत्रवारि येषां तानेवम्विधानकृत कृतवान् । एतद्रूपकं शोषार्थान्वयसितं रूपितादन्यो योऽर्थः आनन्दपरीतनेत्रवारीनिति स शेषः तेनान्वयसितं युक्तमवतंसकं नाम विसदृशस्यार्थस्य लपितत्वात् तदेवान्यैः खण्डरूपकमित्युच्यते ॥ २७ ॥ ज० म०

कपीत्यादि । प्लवङ्गमो हनूमानेव इन्दुः कपीनेव समुद्रान् मधुरेण प्रेमदर्शनेन मदयित्वा हर्षयित्वा वचनान्येव अमृतदीधितीः सुधासम्बन्धकिरणान् वितन्वन् युक्तवृत्तान्तबोधकमाह्लादकवचनमुदाहरन् आनन्देन हर्षेण परीतं सञ्जातं नेत्रवारि येषां तानेवंविधान् अकृत कृतवान् मदीहर्षयोः घटादित्वात् हुस्वः एतच्छेषार्थान्वयसितमवतंसकमिति एतद्रूपकं उक्तादन्यः शेषः रूपकादन्यः इत्यर्थः रूपितार्थादन्यार्थ आनन्दपरीतनेत्रवारीनकृतेत्येवंरूपः तेनान्वयसितं युक्तं अवतंसं नाम विसदृशस्यार्थस्योक्तत्वात् एतदेवान्यैः खण्डरूपकमित्युक्तम् ॥ २७ ॥ भ०

परिखेदितेत्यादि । तत उत्तरकालं कपयो नागा इव हस्तिन इव कपि-

विटपिस्थगविषादध्वान्तनुद्वानरार्कः
प्रियवचनमयूखैर्बोधितार्थारविन्दः ।
उदयगिरिमिवाद्रिं संप्रसुच्याभ्यगात् खं
रूपहृदयगुहास्थं घ्नन् प्रमोहान्धकारम् ॥ २९ ॥

एतदन्वर्थोपमायुक्तललामकम् ।

नागाः मुदितस्याङ्गदस्याद्रया मधुकाननं सुग्रीवस्य क्रीडोद्यानं दुधुवुः कम्पितवन्तः मधून्युपभुज्य संभ्रममकुर्वन्नित्यर्थः परिखेदिताः परिमर्दिताः विन्ध्यवीरुधो विन्ध्यलता गुल्मा यैः परिपीतममलनिर्झराम्भो यैः । अर्धरूपकमिति पश्चिमार्धे कपिनागा इति रूपितम् ॥ २८ ॥ ज० म०

परीत्यादि । ततोऽनन्तरं कपय एव नागा हस्तिनो मुदितस्य हृष्टस्याङ्गदस्याद्रया मधुकानन सुग्रीवस्योद्यानं दुधुवुः कम्पितवन्तः मधुवनं भङ्क्त्वा भुक्तवन्त इत्यर्थः कीदृशाः परिखेदिता मर्दिता विन्ध्यपर्वतस्य वीरुधो लता यैः ते तथा परिपीतं निर्मलं निर्झरजलं यैः नागाः कानन धुन्वन्त्येवेति रूपणमर्धरूपकमित्युक्तं कपिनागा इत्युत्तरार्धे रूपितं नतु पूर्वार्धे ॥ २८ ॥ म०

विटपीत्यादि । वानरार्कः वानरोऽर्क इव वानरार्कः उदयगिरिमिवाद्रिं पर्वतं महेन्द्रं सम्प्रसुच्य खमाकाशमभ्यगात् अभिगतवान् विटपिस्थगाणां यो विषाद आसीत् कथं सीतान्वेषणीयेति स ध्वान्तमिव तं नुदतीति क्विप् प्रियवचनानि मयूखा इव तैः करणभूतैः बोधितमर्थारविन्दं येन अर्थः सीतोपलब्धिः सोऽरविन्दमिव रूपहृदयं गुहेव तत्र तिष्ठतीति रूपहृदयगुहास्थं प्रमोहो विषादोऽन्धकार इव तं घ्नन् हनिष्यन् वर्त्तमानसमीपत्वात् भविष्यति लट् । एतदिति रूपकं अन्वर्थयोपमया युक्तं ललाम नाम यत उदेत्यस्मादित्युदयः अकर्त्तरि च कारके सच् स चासौ गिरिश्चेत्युदगतार्थता यत्वान्वर्थता सादृश्योपमायाः तदुपमायुक्तमेव रूपकं द्रष्टव्यम् ॥ २९ ॥ ज० म०

विटपीत्यादि । स वानररूपोऽर्क उदयाचलमिव अद्रिं महेन्द्राद्रिं संप्रसुच्य खमाकाशं अभ्यगात् अभिमुखेन गतवान् कीदृशः विटपिस्थगानां वानराणां यो विषादः सीतानुपलब्धिजनितः स एव ध्वान्तमन्धकारस्तं नुदति अपसारयतीति क्विप् प्रियवचनरूपैर्मयूखैर्बोधितानि विकाशितानि अर्थरूपाणि सीतोपलब्धिरूपाणि पद्मानि येन रूपस्य रामस्य हृदयरूपायां गुहायां तिष्ठन्तं प्रमोहरूपमन्धकारं घ्नन् विनाशयिष्यन् वर्त्तमानसामीप्ये वर्त्तमानत्वोपचारात् शतृः

रघुतनयमगात्तपोवनस्थं
विधृतजटाजिनवल्कलं हनूमान् ।
परमिव पुरुषं नरेण युक्तं
समशमवेशसमाधिनानुजेन ॥ २० ॥

इवोपमा ।

एतदपि रूपकं अन्वर्थोपमा युक्तं ललामकं नाम तथाहि उदेत्यस्मादित्युदयः अपादानेऽल् स चासौ गिरिश्चेति अनुगतार्थत्वमुदयगिरिशब्दस्य योगार्थस्यान्वयात् उदयगिरिमिवेत्युपमा दर्शिता विषादादीनां ध्वान्तत्वादिना रूपणम् ॥२६॥ भ०

उपमालङ्कारं दर्शयन्नाह ।

रघुतनयमित्यादि । हनूमान् रघुतनयमगात् प्राप्तवान् तपः प्रधानं वनं तपोवनं तत्र स्थितं विधृता जटा अजिनञ्चर्म वल्कलञ्च येन तं अनुजेन कनीयसा भ्रात्रा लक्ष्मणेन समास्तुल्याः शमावेशाः समाधयश्च यस्य तेन युक्तं परमत्तमं पुरुषमिव पुरुषोत्तममिव नरेण युक्तं बदरिकाश्रमे नरनारायणयोस्तपश्चर्य्यया स्थितत्वात् इवोपमेति इवशब्देनोपमार्थस्य गम्यमानत्वात् । उपमाया लक्षणं विरुद्धेनोपमानेन देशकालक्रियादिभिः । उपमेयस्य यत्साम्यं गुणमात्रेण सोपमेति अत्र विरुद्धदेशकालक्रियागुणः पुरुषोत्तम उपमानं तेन रामस्योपमेयस्य तपोवनस्थत्वेन विधृतजटाजिनवल्कलत्वेन नरानुकारिलक्ष्मणेनानुगतत्वेन च गुणमात्रेण साम्यमुपमानम् ॥ २० ॥ ज० म०

रघुत्यादि । हनूमान् रघुतनयं रामं अगात् प्राप्तवान् कीदृशं तपः प्रधानं वनं तपोवनं तत्र स्थितं विधृतं जटाश्मशानवल्कलञ्च येन समास्तुल्याः शमः शान्तिर्वेशो जटावल्कलादिधारणं समाधिर्ध्यानञ्च यस्य तादृशेन अनुजेन कनीयसा लक्ष्मणेन युक्तं नरेण मुनिना युक्तं परं पुरुषमिव नारायणमिव नरनारायणयोर्बदरिकाश्रमे तपश्चर्य्यायां स्थितत्वात् । पुष्पितायां छन्दः लक्षणं यथा अयुजि न युगरेफतोयकारो युजि तु न जौ जरगाश्च पुष्पितायेति । इवोपमेति इवशब्देनोपमाया गम्यमानत्वात् उपमालक्षणं यथा विरुद्धेनोपमानेन देशकालक्रियादिभिः उपमेयस्य साम्यं यद्गुणमात्रेण सोपमेति अत्र विरुद्धदेशकालक्रियादिगुणयुक्तः पुरुषोत्तम उपमानं तेन रामस्य उपमेयस्य तपोवनस्थत्वेन विधृतजटत्वेन लक्ष्मणानुचरत्वेन च गुणमात्रेण साम्यादुपमा इवशब्द उपमाद्योतकः तथा च दण्डी इवादयोपमाशब्दा ज्ञेयाः सादृश्यसूचका इति ॥ २० ॥ भ०

करपुटनिहितं दधत् स रत्नं परिविरलाङ्गुलिनिर्गताल्पदीप्ति ।
तनुकपिलघनस्थितं यथेन्दुं नृपमनमत्परिभुग्नजानुमूर्द्धा ॥३१॥

यथोपमा ।

रुचिरोन्नतरत्नगौरवः परिपूर्णास्तरश्मिमण्डलः ।
समदृश्यत जीविताशया सह रामेण बधूशिरोमणिः ॥३२॥

सहोपमा ।

यथेवशब्द उपमार्थस्यूचकस्तथान्योऽपीति दर्शयन्नाह

करपुटनिहितमित्यादि । करपुटे करयुग्मे निहितं न्यस्तं रत्नं सीताचूडामणिं परिविरलाङ्गुलिभ्यो निर्गता अल्पा दीप्तयो यस्य तद्रत्नं दधद्धारयन् स हनूमान् नृपं राममनमत् प्रणतवान् परिभुग्ने अवनते जानुनी मूर्द्धा च यस्य हनूमतः यथेन्दुं इन्दुमिव तनुः अच्छः कपिलश्च यो घनः मेघः तत्र स्थितमिन्दुमिव रत्नम् । यथोपमेति यथाशब्देनोपमार्थस्य गम्यमानत्वात् ॥३१॥ ज० म०

करेत्यादि । परिभुग्ने कुटिलीकृते जानुनी मस्तकञ्च यस्य तथाभूतः सन् स हनूमान् नृपं रामं अनमत् प्रणतवान् कीदृशः रत्नं सीताचूडामणिं दधत् धारयन् कीदृशं करपुटे निहितमर्पितं परितो विरलाभ्यो अङ्गुलिभ्यो निर्गता अल्पा दीप्तिर्यस्य स तथा अतएव तनुरल्पः कपिलो यो घनो मेघस्तत्र स्थितं इन्दुं यथा येन रूपेण दधाति तथा रत्नं दधदिति सम्बन्धः । यथोपमेति यथाशब्देनोपमानस्य गम्यमानत्वात् ॥ ३१ ॥ भं० .

रुचिर इत्यादि । बधूशिरोमणिः सीताचूडामणिः उन्नतं महद्रत्नगौरवं महार्घ्यादिलक्षणं यस्य रुचिरो दीप्तिमांश्चासौ उन्नतरत्नगौरवश्चेति सः परिपूर्णस्तरश्मेरिन्द्रमसो मण्डलमिव मण्डलं यस्य सः रामेण समदृश्यत संदृष्टः कर्म्मणि लङ् जीविताशया सह सार्द्धं तद्दर्शनतो जीवितोऽस्मीति तदाशया सहसा रुचिरा तुष्टिदा रुचिं राति ददातीति कृत्वा उन्नतरत्नगौरवादुन्नतं रत्नमिव गौरवं बहुमानो यस्यामिति परिपूर्णममृतममरणं रश्मिमण्डलं यस्यामिति सहोपमेति सहशब्देन जीविताशया उपमाद्योतनात् ॥ ३२ ॥ ज० म०

रुचिर इत्यादि । रामेण बध्वाः सीतायाः शिरोमणिः समदृश्यत संदृष्टः कर्म्मणि घी जीवितोऽस्मीति या प्रत्याशा तया सदृशः सहशब्दोऽत्र सादृश्यार्थः उभयसाधर्म्यप्रमाह रुचिरोन्नतरत्नगौरवः उन्नतं महद्रत्नगौरवं बहुमूल्य-

अवसन्नरुचिं वनागतं तमनाम्रष्टरजोविधूसरम् ।
समपश्यदपेतमैथिलिं दधतं गौरवमात्मवत् ॥३३॥

तद्धितोपमा ।

त्वादिलक्षणं गुरुत्वाख्यगुणविशेषो वा यस्य स तथा ततो रुचिरः शोभायुक्तश्चासावुन्नतरत्नगौरवश्चेति कर्मधारयः जीविताशापि रुचिं तुष्टिं रातिं ददातीति रुचिरा उन्नतरत्नेष्विव गौरवं बहुमानो यस्यामिति भावः परिपूर्णस्याम्रष्टरश्मेश्चन्द्रस्येव मण्डलं वक्राकारत्वं यस्य स तथा आशापक्षे परिपूर्णमम्रष्टमिव रश्मिमण्डलं यस्यां जीविताशायां सत्यां शरीरस्य तेजस्वित्वसम्भवात् परिपूर्णमम्रष्टेनामरणेन रश्मिमण्डलं यस्यामिति केचित् । सहोपमेति सहशब्देन जीविताशासादृश्यसूचनात् चूडामणिदर्शनेन तस्य जीविताशा जातेति व्यङ्ग्यार्थः ॥ ३२ ॥ भ०

अवसन्नरुचिमित्यादि । तं शिरोमणिं आत्मवदात्मानमिव समपश्यद्रामः तेन तुल्यमिति वतिः अवसन्नरुचिं मन्दप्रभं वेणी बन्धनमलिनत्वात् इतरत्व सशोकत्वात् वनागतं अशोकवनिकाख्यादनादागतं इतरं पितुरादेशाद्वनमागतं शुशुभेति शः अनाम्रष्टं "अनपनीतं यद्रजः तेन विधूसरं उभयमपि अपेतमैथिलिं अपेता मैथिली येन यस्माद्वा दधतं गौरवमात्मं गुरुत्वमेव न दीप्त्यादिकं इतरं माहात्म्यं दधतम् । तद्धितोपमेति तद्धितप्रत्ययेनोपमार्थस्याभिधानात् । तदत्र कल्पवादयोऽपि तद्धितप्रत्यया द्रष्टव्याः ॥३३॥ ज० म०

अवेत्यादि । रामस्तं शिरोमणिमात्मवदात्मानमिव समपश्यत् संदृष्टवान् उभयसाधर्म्यमाह अवसन्नरुचिं मन्दप्रभं वेणीबन्धेन मलिनत्वात् अमार्ज्जनाद्वा आत्मपक्षे सशोकत्वात् वनागतं अशोकवनिकायाः समागतं पक्षे पितुरादेशात् वनमायातं अनाम्रष्टरजोविधूसरं अनाम्रष्टं अनपनीतं यद्रजो भूमौ शयनाल्लग्नं तेन विधूसरं पाण्डुरं धूसरशब्दोदन्त्यमध्यः महिषधूसरितः सरितस्तट इति प्रयोगात् अपेतमैथिलिं अपेता मैथिली यस्मात् बहुव्रीयसीत्युदाहरणेन द्युतः इत्यस्य प्रायिकत्वसूचनान्न क्तप्रत्ययः गवावादेरिति ह्रस्वः किं वा मैथिल्याः सकाशादपेतं भ्रष्टं अपेतस्य पूर्वनिपातोऽभिधानात् राजदन्तादित्वादिति परः गौरवमात्रं केवलं गुरुत्वाख्यगुणविशेषं दधतं धारयन्तं न दीपनादि आत्मपक्षे माहात्म्यं तद्धितोपमेति तद्धितसंज्ञकेन चूडाख्य इति कृतवत्प्रत्ययेन सादृश्याभिधानात् एवं कल्पादयोऽपि सादृश्यसूचकाः स्मृते तद्धितस्य तसंज्ञा ॥३३॥ म०

सामर्थ्यसम्पादितवाञ्छितार्थश्चिन्तामणिः स्यान्न कथं हनूमान् ।
सलक्ष्मणो भूमिपतिस्तदानीं शाखामृगानीकपतिश्च मेने ॥२४॥

लुप्तोपमा ।

युष्मानचेतन् क्षयवायुकल्पान् सीतास्फुलिङ्गं परिगृह्य जाल्मः ।
लङ्कावनं सिंहसमोऽधिशेते मर्त्तुं द्विषन्नित्यवदद्धनूमान् ॥२५॥

समोपमा ।

सामर्थ्येत्यादि । सामर्थ्येन शक्त्या सम्पादितो निष्पादितो वाञ्छितोऽभिलषितोऽर्थो येन स हनूमान् कथञ्चिन्तामणिश्चिन्तामणिरिव न स्यात् इति तदानीं मेने ज्ञातवान् सलक्ष्मणः सह लक्ष्मणेन भूमिपतीरामः शाखामृगानीकपतिश्च सुग्रीवः । लुप्तोपमेति चिन्तामणिरित्यत्रेवशब्दार्थस्य गम्यमानत्वात् लुप्तोपमेति ॥ २४ ॥ ज० म०

सामर्थ्येत्यादि । तदानीं तस्मिन् चूडामणिप्राप्तिसमये लक्ष्मणसहितो भूमिपतीरामः शाखामृगानीकस्य कपिसैन्यस्य पतिः सुग्रीवश्च इति मेने ज्ञातवान् किमित्याह हनूमान् कथं चिन्तामणिरिव न स्यात् स्यादेव यतः सामर्थ्येन स्वशक्त्या सम्पादितो वाञ्छितार्थो येन लुप्तोपमेति इवशब्दस्य गम्यमानत्वादनुच्चारात् तथाच कण्ठाभरणे लोपे सामान्यधर्म्माणां द्योतकस्य च योपमा । प्रतीयमाने सादृश्ये द्वयोर्लुप्ते तां विदुरिति ॥ २४ ॥ भ०

युष्मानित्यादि । युष्मान् रामादीन् क्षयवायुकल्पान् प्रलयकालमहावायुसदृशान् अचेतन् अजानन् चितीसंज्ञान इति भौवादिकः द्विषन् दशाननः जाल्मः मूर्खः सीतास्फुलिङ्गं सीतामग्निकणमिव परिगृह्यादाय लङ्कां वनमिवाधिशेते मर्त्तुं मरिष्यामीति सिंहसम इत्यवदद्धनूमान् । समोपमेति समशब्देनोपमाया अभिधानात् अत्र निभसदृशादयोऽपि द्रष्टव्याः ॥ २५ ॥ ज० म०

युष्मानित्यादि । हनूमान् इति अवदत् किमित्याह सिंहसमः सिंह इव जाल्मोऽसमीक्ष्यकारी द्विषन् शत्रूरावणः सीतां स्फुलिङ्गमिवाग्निकणमिव परिगृह्य युष्मान् रामादीन् क्षयवायुकल्पान् प्रलयकालसम्बन्धिवायुसदृशान् अचेतन् अजानन् मर्त्तुं प्राणान् त्यक्तुं लङ्कां वनमिव अधिशेते अधिवसति सिंहोऽपुत्रत्वादन्यमगणयित्वा वने वसतीति सादृश्यम् । समोपमेति समशब्देन उपमाभिधानात् एवं निभसदृशादयो द्रष्टव्याः ॥ २५ ॥ भ०

अहृत धनेश्वरस्य युधि यः समेतमायोधनं
तमहमितो विलोक्य विबुधैः कृतोत्तमायोधनम् ।
विभवमदेन निह्नुतह्रिया तिमात्रसम्पन्नकं
व्यथयति सत्पथादधिगताथ वेह सम्पन्नकम् ॥ २६ ॥

अर्थान्तरन्यासः ।

इदानीमुलङ्कारान्तराख्याह

अहृतेत्यादि । यो द्विषन्युधि संग्रामे समेतमायः समेता प्राप्ता माया येनेति तृतीयार्थे बहुव्रीहिः मायावीत्यर्थः धनेश्वरस्य धनदस्य धनमहृत हृतवान् हृस्वादङ्गादिति सिचो लोपः तं विबुधैर्देवैः सह कृतोत्तमायोधनं कृतमहासंग्रामं निह्नुता अपलपिता ह्रीर्लज्जा येन विभवमदेन तेन निह्नुतह्रिया अतिमात्रं सुष्ठु सम्पन्नकं युक्तं येन परस्त्रियमपहृत्यानीतवानसौ तं विलोक्य अहमितः प्राप्तः विभवमदो लज्जां त्याजयतीत्यसमेवार्थं अनुस्मृतार्थान्तरमाह अथवेति अथवा शब्दे निपातसमुदायः यस्मादर्थे वर्त्तते यस्मादिह लोके संपत् विभूतिरधिगता प्राप्ता सत्पथात् सन्मार्गात् कं न व्यथयति चलयति व्यथिरत्र चलने वर्त्तते । अर्थान्तरन्यास इति उक्तादर्थादन्यस्योपन्यासात् यथोक्तम् । उपन्यसनमर्थस्य प्रक्रान्तादपरस्य यत् । ज्ञेयः सोऽर्थान्तरन्यासः पूर्व्वार्थानुगतौ यथेति॥ २६॥ज०म०

अहृतेत्यादि । यो द्विषन् शत्रुर्धनेश्वरस्य कुबेरस्य धनं अहृत हृतवान् हृगुडुर्मढीस्यनिमिति किच्चान्न गुणः झसस्खादिति सिलोपः कीदृशः युधि संग्रामे समेता प्राप्ता माया येन सम्बद्धा माया यत्रेति वा तं विलोक्य अहमित आगतः कीदृशं विबुधैर्देवैः सह कृतोत्तमायोधनं कृतमहायुद्धं निह्नुतह्रिया अपनीतलज्जेन विभवमदेन ऐश्वर्यमत्ततया अतिमात्रमतिशयेन सम्पन्नकं युक्तं विकारसंहेत्यादिना कुत्सायां कः परस्त्रियमपहृत्याप्यानयतीति निर्लज्जत्वं विभवमदो लज्जां त्याजयतीति अर्थान्तरन्यासमाह अथवा यस्मात् अधिगता प्राप्ता सम्पत् विभूतिरिह लोके कं जनं सत्पथात् सदाचारात् न व्यथयति न चालयति अपि तु सर्व्वमेव व्यथङ् दुःखे चाले भये अत्र चलनार्थः अथवेत्यव्ययं यस्मादर्थे । नन्द्यं नाम छन्दः लक्षणं यथा नजभजरैस्तु रेफसहितैः शिवैर्हयैर्नन्द्यमिति अत्र तृतीयपादे नवमाक्षरस्य ह्रस्वे वेति पिङ्गलसूत्रेण गुरुत्वविकल्पविधानात् लघुत्वं तथाच माघे प्राप्तनाभिह्रदमज्जनमागु इति यदा तोद्यमप्रयत्नेन संयोगादेव गौरवम् । न छन्दोभङ्गभयाद्ध्रस्वदा दोषाय स्मरय इति

ऋद्धिमान् राक्षसो मूढचित्तं नासौ यदुद्धतः ।
को वा हेतुरनार्य्याणां धर्म्ये वर्त्मनि वर्त्तितुम् ॥ ३७ ॥

आक्षेपः ।

तस्याधिवासे तनुरुत्सुकासौ दृष्टा मया रामपतिः प्रभन्युः ।
कार्य्यस्य सारोऽयमुदीरितो वः प्रोक्तेन शेषेण किमुद्धतेन ॥३८॥

आक्षेप एव ।

कण्ठाभरणं केचित्तु संयोगे गुरुत्वात् छन्दोभङ्गः स्यादिति शङ्कया निरुक्तशब्दस्य त्यत्व निरुक्तभियेत्यत्र निरुक्तभियेति पाठं कल्पयन्ति अर्थान्तरन्यास इति ज्ञेयः सोऽर्थान्तरन्यासो योऽन्यत् प्रस्तुत्य किञ्चन । तत्साधनसमर्थस्य न्यासो भिन्नस्य वस्तुन इति उपन्यसन् समर्थस्य प्रक्रान्तादपरस्य यत् ज्ञेयः सोऽर्थान्तरन्यासः पूर्व्वार्धानुगतो यथेत्यत्योऽपि ॥ ३६ ॥ भ०

ऋद्धिमानित्यादि । यदसावुद्धतो दुर्वृत्तः न तच्चित्रमाश्चर्य्यं यस्मादसौ ऋद्धिमान् राक्षसश्च उभयथा विमूढ इत्येतदुक्तमिति प्रतिषेधयन्नाह कोवेति । किमनेनोक्तेन यस्मादनार्याणां तद्विधानां धर्म्मे धर्म्मादनपेते वर्त्मनि मार्गे वर्त्तितुं को वा हेतुः किन्नाम कारणं नैवेत्यर्थः । आक्षेप इति प्रतिषेधो नाम यथोक्तं प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया । आक्षेप इति तं सन्तः शंसन्ति द्विविधो यथेति अत्र पूर्व्वार्द्धेनोक्तो य इष्टोऽर्थः तस्य कोवेत्यादिना विशेषप्रतिपादनेच्छया प्रतिषेध इति स च उक्तवच्यमाणविषयभेदाद्विविधः अयमुक्तविषयः ॥ ३७ ॥ ज० म०

ऋद्धिमानित्यादि । असौ रावणो यदुद्धतो दुर्वृत्तो भवति तन्न चित्रं नाश्चर्य्यं यस्मादसौ ऋद्धिमान् सम्पत्तियुक्तो राक्षसश्च उभयथापि मूढो विचारशून्य एव एतदुक्तं प्रतिषेधयन्नाह कोवेति अथवा किमनेनोक्तेन यस्मात् अनार्य्याणां उद्धतानां तादृशानां धर्म्मे धर्म्मादनपेते वर्त्मनि सदाचारे वर्त्तितुं स्थातुं कोवा हेतुः न कोऽपीत्यर्थः अतएवासावुद्धतः किमद्यादिहेतुचिन्तयेति भावः वाशब्द आक्षेपद्योतकः आक्षेपप्रतिषेध इति । निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया । वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मत इति अयमुक्तोक्षेपः पूर्व्वार्द्धेनोक्तो य इष्टस्तस्य कोवेत्यादिना विशेषाभिधानेच्छया प्रतिषेधात् ॥ ३७ ॥ भ०

तस्येत्यादि । तस्य रावणस्याधिवासे लङ्कायां असौ रामपतिः सीता मया दृष्टा रामः प्रतिर्यस्या इति विभाषा सपूर्व्वस्येति नकाराभावपक्षे रूपं तनुः

समतां शशिलेखयोपयायादवदाता प्रतनुः क्षयेण सीता ।
यदि नाम कलङ्क इन्दुलेखामतिवृत्तो लघयेन्न चापि भावी॥३९॥

व्यतिरेकः ।

क्षशाङ्की वोतोगुणवचनादिति ङीषो विकल्पः उत्सुका सोत्कण्ठा प्रमन्युः प्रकृष्टशोका ऊङुतऋत्यृङ् न भवति तत्रायोपधादिति वर्त्तते अयङ्कार्य्यस्याऽऽदायत्तस्य सारः शरीरं सीतादर्शनं उदीरितः कथितः वो युष्मभ्यं शेषेणोद्वृतेन अशोकवनिकाभङ्गादिना किं प्रोक्तेन न किञ्चित् प्रयोजनं स एवेत्ययमध्याक्षेप एव किन्तु वक्ष्यमाणविषयः अत्र पूर्व्वार्द्धेनोक्तो यो दृष्टोऽर्थः तस्य विशेषाभिधित्सया प्रोक्तेनेत्यादिना शेषार्थप्रतिषेधः ॥ ३८ ॥ ज० म०

तस्येत्यादि । तस्य रावणस्य अधिवासे लङ्कायां रामपतिः सीता मया दृष्टा रामः पतिर्यस्या इति बहुव्रीहिः परमते बहुव्रीहौ पत्युरिकारस्य नकार ईप्प्रत्ययश्च विभाषितः तेन रामपत्नी रामपतिश्चेति पदद्वयं स्वमते बहुव्रीहौ रामपतिरित्यादि भवत्येव रामपत्नीत्यादौ तु नारीसखीत्यादिना निपातितस्य पत्नीशब्दस्य ग्रहणं पत्नीशब्दो रूढो भार्य्यावाचकः तेन षष्ठीसमासः कामेकपत्नीं व्रतदुःखशीलामित्यादौ कर्म्मधारयश्च वाच्यः कीदृशी तनुः क्षशाङ्की गुणाद्योत इति पक्षे ईप्प्रत्ययाभावः उत्सुका उत्कण्ठावती त्वयीत्यर्थात् त्वत्सङ्गमभिलषमाणेत्यर्थः केचिदाहुः तनुषा शरीरेणाप्युत्सुका किं पुनर्म्मनसा तथाच स्यात्तनुस्तनुषा सार्द्धं धनुषा च धनुस्तेति शब्दभेदः प्रमन्युः प्रकृष्टशोका अयं कार्य्यस्य मद्विधेयस्य सार उत्कृष्टभागो वो युष्मभ्यमुदीरित उक्तः अशेषेणापरेण उद्वृतेन उच्छावचेन प्रोक्तेन किं न किञ्चित् प्रयोजनं स एवेति आक्षेप एव किन्तु वक्ष्यमाणविषयक इति भेदः पूर्व्वार्द्धेनोक्तस्य दृष्टार्थस्य विशेषाभिधेच्छया प्रोक्तेनेत्यादिना शेषार्थप्रतिषेधात् ॥ ३८ ॥ भ०

समतामित्यादि । सीता अवदाता शुद्धा प्रतनुः प्रकर्षेण तन्वी क्षयेण दौर्ब्बल्येन एतावता तुल्यधर्म्मत्वाच्छशिलेखया तुल्यतां समतामुपयायात् उपगच्छेत् यदि कलङ्को नामापरोऽतिवृत्तोऽतिक्रान्तः इन्दुलेखां न लघयेत् न न्यूनयेत् तथा भावी आगामी नालघयिष्यदिति न चैवं न स्याच्चन्द्रलेखया न समेति भावः व्यतिरेक इति अयं व्यतिरेको नामा अन्वयः पूर्व्वार्द्धेनोपमानोपमेययोरर्थो दर्शितः तस्य पश्चादर्द्धेन भेददर्शनात् । यथोक्तं उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम् । व्यतिरेकं तमिच्छन्ति विशेषोत्पादनाद्यथेति ॥ ३९ ॥ ज० म०

अपरीक्षितकारिणा गृहीतां त्वमनासेवितदृढपरिष्ठतेन ।
अविरोधितनिष्ठुरेण साध्वीं दयितां त्रातुमलं घटस्व राजन्॥४०॥

विभावना ।

स च विह्वलसत्वसङ्कुलः परिभुज्यन्नभवन्ममाह्वदः ।

समतामित्यादि । सीता शशिलेखया चन्द्रकलया समतां तुल्यतां उपयायात् प्राप्नुयात् कीदृशी अवदाता शुद्धा चन्द्रलेखाप्यवदाता शुक्ला क्षयेण दौर्बल्येन प्रतनुः अतिकृशा शशिलेखापि क्षयेण रोगविशेषेण प्रतनुः यदि नामातिवृत्तोऽतीतो भावी भविष्यंश्च कलङ्कस्तामिन्दुलेखां न लघयेत् नातिशयेन न्यूनां कुर्यात् कलङ्कस्य भूतत्वाद्भावित्वाच्च सा चन्द्रलेखयापि न समेति भावः लघुशब्दात् लेः कृत्याख्याने जिरिति जिः जीमंश्च डिदिति डित्त्वात् टेर्लोपः नामेत्यव्ययं प्रकाशसम्भावनाक्रोधाभ्युपगमकुत्सनेषु व्यतिरेक इति उपमानाद्यदन्यस्य व्यतिरेकः स एव स इति अन्यस्य उपमेयस्य व्यतिरेक आधिक्यम्॥३९॥भ०

अपरीक्षितकारिणेत्यादि । अपरीक्षितकारिणा अविचारितकरणशीलेन अनासेवितदृढपरिष्ठतेन अपर्य्युपासितज्ञानवृद्धसत्येन अविरोधितनिष्ठुरेणानपकृतोऽपि क्रूरः सन् यः शत्रुः तेन गृहीतां साध्वीं पतिव्रतां दयितामिष्टां त्राणार्हां त्रातुं रक्षितुमलं पर्य्याप्तं त्वं घटस्व यतस्व हे राजन्नित्यवद्वनूमान् । विभावनेति परीक्षा सेवा विरोधनञ्चेति तिस्रः क्रियाः तासां यः प्रतिषेधः नञा तेन अपरीक्षापूर्व्वकं यत्करणं यथा वृद्धसेवापूर्व्वकं यत्परिष्ठतत्वं यच्चाविरोधपूर्व्वकं निष्ठुरत्वं तस्य क्रियाफलस्य विभावनात् प्रकाशनात् । यथोक्तं क्रियायाः प्रतिषेधेन तत्फलस्य विभावनात् । ज्ञेया विभावनैवासौ सार्थं कथ्यते यथेति ॥ ४० ॥ ज० म०

अथेत्यादि । हे राजन् दयितां सीतां प्रियां त्रातुं रक्षितुं त्वमलमत्यर्थं घटस्व चेष्टस्व यतः साध्वीं पतिव्रतां अपरीक्षितकारिणा अविचारितकरणशीलेन अनासेवितदृढपरिष्ठतेन दृढमनुपास्यैव परिष्ठतमनेन अविरोधितेनानपकृतेनापि सता निष्ठुरेण क्रूरेण रावणेनेत्यर्थात् गृहीतां इत्यवद्वनूमानिति सम्बन्धः । विभावनेति परीक्षादृढसेवाविधानैर्विनापि करणपरिष्ठत्यनैष्ठुर्याणां तत्फलानां स्वाभाविकत्वेन प्रकाशनात् । तथाच क्रियायाः प्रतिषेधेऽपि फलव्यक्तिर्विभावनेति काव्यप्रकाशः । प्रसिद्धहेतुव्यावृत्त्या यत्किञ्चित् कारणान्तरम् । यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावनेति दण्डी ॥ ४० ॥भ०

परितः परितापमूर्च्छितः पतितञ्चाम्बु निरभ्रमीप्सितम् ॥ ४१ ॥

समासोक्तिः ।

अथ लक्ष्मणरूपतुल्यवेशं गमनादेशविनिर्गताग्रहस्तम् ।
कपयोऽनुययुः समेत्य रामं नतसुग्रीवमटोहसादराङ्गम् ॥४२॥

अतिशयोक्तिः ।

स चेत्यादि । स च रामो महाह्रदः महाह्रदसमः सीताविरहात् विक्लवेनाकुलेन सत्त्वेन चेतसा संकुलो व्याप्तः परिशुष्यन् शोषमुपगच्छन् परितः समन्तात् परितापमूर्च्छितः शोकसन्तापेन मूर्च्छान्वितोऽभवत् भूतः अनन्तरं चाम्बु जलं सीतावार्त्ताश्रवणमीप्सितं अभिप्रेतं निरभ्रमाकस्मिकं पतितमित्येकोऽर्थः महाह्रदः परिशुष्यन् विक्लवैः सत्त्वैर्मत्स्यादिभिः संकुलो व्याप्तः परितापमूर्च्छितः परितापेन मूर्च्छितः व्यकतापान्वितोऽभवत् अम्बु च निरभ्रं विना मेघेन पतितमिति द्वितीयः समासोक्तिः यथोक्तम् । यत्रोक्तैर्गम्यतेऽन्योऽर्थस्तत्समानविशेषणः । सा समासोक्तिरुदिता संक्षिप्तार्थतया यथेति एवञ्च कृत्वा अयं श्लेषाद्विद्यते श्लेषे हि द्वयोरपि श्रूयमाणत्वात् ॥ ४१ ॥ ज० म०

स चेत्यादि । स च रामो महाह्रद इव अभवत् अथ निरभ्रं मेघं विनापि आकस्मिकं ईप्सितं अभिलषितं सीतावार्त्ताश्रवणस्वरूपमम्बु जलं पतितं प्राप्तं अभवच्च पतितञ्चेति चकारद्वयं तुल्यकालतासूचनार्थं कीदृशः विक्लवेन विरहव्याकुलेन सत्त्वेन चेतसा संकुलो व्याप्तः परिशुष्यन् कार्श्यमुपगच्छन् परितः समन्तात् परितापेन शोकसन्तापेन मूर्च्छितः मोहं प्राप्तः महाह्रदोऽपि परिशुष्यन् विक्लवैः सत्त्वैर्जन्तुभिर्मत्स्यादिभिः संकुलः परितापेन सूर्य्यातपेन मूर्च्छितो यदा भवति तदेप्सितमम्बु विना मेघेन पतितम् । सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः । आत्मनि व्यवसाये च चित्ते प्राणिषु जन्तुष्विति विश्वः । समासोक्तिरिति साक्षान्महाह्रदमात्रोपादानेऽपि तत्तुल्यविशेषणतया रामस्य गम्यमानत्वात् संक्षेपेणान्वयस्योक्तिरित्यर्थः । यदुक्तं यत्रोक्तैर्गम्यतेऽन्योऽर्थस्तत्समानविशेषणः । सा समासोक्तिरुदिता संक्षेपार्थतया तथेति । अन्यत्रापि वस्तु किञ्चिदभिप्रेत्य तद्वदन्यस्य वस्तुनः । उक्तिसंक्षिप्तरूपत्वात् समासोक्तिरिहेष्यते इति । अतएव श्लेषाद्भेदः तत्र द्वयोरपि श्रूयमाणत्वात् ॥ ४१ ॥ भ०

अथेत्यादि । अथ वार्त्ताश्रवणानन्तरं कपयः समेत्य मिलित्वा राममनुययुः अनुगतवन्तः लक्ष्मणेन तुल्यं रूपं वेशश्च यस्य रामस्य गमनाय प्रयाणाय आदेशः

कपिपृष्ठगतौ ततो नरेन्द्रौ कपयश्च ज्वलिताग्निपिङ्गलाङ्गाः ।
सुषुचुः प्रययुर्द्रुतं समीयुर्वसुधां व्योम महीधरं महेन्द्रम् ॥४२॥
यथासंख्यम् ।

तदर्थं विनिर्गतौ अग्रहस्तौ यस्य नतेन प्रणतेन सुग्रीवेण गृहीता प्रतिश्रिता सादराज्ञा यस्य तं रामम् । अतिशयोक्तिरिति अतिशयाभिधानात् अत्र सुष्ठुपि नामासौ लक्ष्मणे च तुल्यरूपवेशः स्यात् न तु प्रत्यक्षप्रमाणपरिच्छेद्य इति लोकातिक्रान्तवचनमेतद्वचनं अवश्यञ्च कश्चिद्विशेषोऽस्ति यथोक्तं निमित्ततो यत्र वचो लोकातिक्रान्तगोचरम् । मन्यन्तेऽतिशयोक्तिं तामलङ्कारतया यथेति ॥ ४२ ॥ ज० म० ।

अथेत्यादि । सीतावार्त्ताश्रवणानन्तरं कपयः समेत्य मिलित्वा रामं अनुययुः अनुगतवन्तः कीदृशं लक्ष्मणेन तुल्यं रूपं वेशश्च यस्य तं रामदुःखेन लक्ष्मणोऽधिकं दुःखितः सीतावार्त्ताश्रवणाच्च रामादप्यधिकं हृष्ट इति लक्ष्मणेन तुल्यतोक्ता । कपीनां गमनाय प्रस्थानाय आदेश आज्ञा तदर्थं विनिर्गतोऽग्रहस्तो यस्य तं हस्तशब्दस्यैकदेशवृत्तितया अग्रशब्देन कर्म्मधारयः अन्ये तु राजदन्तादौ पठन्ति प्रणतेन सुग्रीवेन गृहीता सादराज्ञा यस्य तम् । अतिशयोक्तिरिति अतिशयार्थप्रतिपादनात् अत्र हि आज्ञानन्तरमेव कपीनामनुगमनेनैव भक्त्यतिशयत्वं लक्ष्मणतुल्यताभिधानेन तद्धृतहर्षशोकातिशयत्वञ्च तथाच विवक्षाया विशेषस्य लोकसीमातिवर्त्तिनी । असावतिशयोक्तिः स्यादलङ्कारोत्तमा च सा । सा तु प्रायो गुणानाञ्च क्रियाणाञ्चोपकल्पते । नहि द्रव्यस्य जातेर्वा भवत्यतिशयः क्वचिदिति ॥ ४२ ॥ भ०

कपिपृष्ठगतावित्यादि । ततोऽनन्तरं नरेन्द्रौ रामलक्ष्मणौ कपयश्च सर्व्व एते सुषुचुः वसुधां त्यक्तवन्तः प्रययुर्व्योम आकाशं महेन्द्रं महीधरं समीयुः गतवन्तः लिटः कित्त्वे गुणाभावाद्धातोरियङ् नरेन्द्रौ किम्भूतौ कपिपृष्ठगतौ हनूमन्तमारूढौ यथासंख्यमिति सुषुचुरित्यादिना क्रियाणां वसुधादीनाञ्च कर्म्मणामनुक्रमशो निर्द्देशात् । यथोक्तं भूयसामुपदिष्टानां क्रियाणामथ कर्म्मणाम् । क्रमशो योऽनुनिर्द्देशो यथासंख्यं तदुच्यत इति ॥ ४२ ॥ ज० म०

कपीत्यादि । ततोऽनन्तरं कपिपृष्ठगतौ वानरपृष्ठस्थौ नरेन्द्रौ रामलक्ष्मणौ ज्वलदग्निवत् पिङ्गलशरीराः कपयश्च वसुधां पृथ्वीं सुषुचुः त्यक्तवन्तः व्योमाकाशं प्रययुः प्रयातवन्तः महेन्द्राख्यं पर्व्वतं द्रुतं समीयुः सङ्गतवन्तः । यथासंख्यमिति क्रियापदानां कर्म्मपदानाञ्च क्रमेणान्वयात् यदुक्तं काव्यप्रकाशे यथा-

स्थितमिव परिरक्षितुं समन्तादुदधिजलौघपरिप्लवाद्धरित्रीम् ।
गगनतलवसुन्धरान्तराले जलनिधिवेगसहं प्रसार्य देहम् ॥४४॥

उत्प्रेक्षा ।

विषधरनिलये निविष्टमूलं शिखरशतैः परिसृष्टदेवलोकम् ।
घनविपुलनितम्बपूरिताशं फलकुसुमाचितदक्षरम्यकुञ्जम् ॥४५॥

वार्त्ता ।

संख्यं क्रमेणैव क्रमिकाणां समन्वय इति अन्यत्वाप्युक्तं भूयसामपदिष्टानामर्थानां समधर्मिणाम् । क्रमशो योऽर्थनिर्देशो यथासंख्यं तदुच्यत इति ॥ ४३ ॥ भ०

स्थितमित्यादि । उदधिजलौघात्समन्ततो यः परिप्लवो विनाशः तस्माद्धरित्रीं परिरक्षितुमिव गगनतलवसुन्धरयोरन्तराले देहं शरीरं जलनिधिवेगं सहत इति मूलविभुजादित्वात्कः प्रसार्य स्थितं महेन्द्रं समीयुः । उत्प्रेक्षेति यथोक्तं अविवक्षितसामान्यात्किञ्चिदुपमया सह । अतद्गुणक्रियारोपादुत्प्रेक्षातिशयान्वितेति अत्र महीधरसामान्यस्यापि विवक्षितत्वादविवक्षितं सामान्यत्वं रक्षितुमिवेति किञ्चिदुपमया सह महेन्द्रगिरेरतद्गुणतया रक्षणक्रियायोगः गगनतलं वसुन्धरां व्याप्य स्थितमित्यतिशयान्विता ॥ ४४ ॥ ज० भ०

स्थितमित्यादि । कीदृशं महेन्द्रं उदधेर्जलौघेन परिप्लवात् विनाशात् समन्तादाप्लवनाद्वा धरित्रीं पृथिवीं परिरक्षितुमिव समन्तात् त्रातुमिव गगनतलवसुन्धरयोराकाशपृथिव्योरन्तराले मध्ये जलनिधिवेगसहं देहं प्रसार्य विस्तार्य स्थितं सहेः पचाद्यच्प्रत्ययात् परिप्लुङो भावेऽल् परिप्लवामिति पाठे पचाद्यच्प्रत्ययात् चञ्चलां व्याकुलां वा परिप्लवश्चञ्चलः स्यादाकुलेऽपि परिप्लव इति विश्वः । उत्प्रेक्षेति अन्यथावस्थिता वृत्तिश्चेतनस्येतरस्य वा । अन्यथोत्प्रेक्षते यत्र तामुत्प्रेक्षां विदुर्बुधा इति यत्र स्वाभाविका द्यावापृथिव्योरन्तराले स्थितिः पृथिवीरक्षणार्थतया सम्भाव्यते अन्यस्त्वाह अविवक्षितसामान्यात् किञ्चिदुपमया सह । अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्वितेति तत्र महीधरसामान्या विवक्षितत्वादत्वाविवक्षितसामान्यत्वं परिरक्षितुमिवेति प्रयोगात् किञ्चिदुपमया सह योगित्वं महेन्द्रगिरेरतद्गुणतया रक्षणक्रियायोगः गगनतलवसुन्धरान्तरालं व्याप्य स्थितमित्यतिशयान्वितत्वं इवशब्दोऽप्युत्प्रेक्षाव्यञ्जकः ॥ ४४ ॥ भ०

विषधरनिलय इत्यादि । विषधरनिलये पाताले निविष्टमूलं महेन्द्रं शिखरशतैः करणभूतैः परिसृष्टः संसृष्टो देवलोको येन घनैर्निरन्तरैर्विपुलैर्विस्तीर्णैः

मधुकरविरुतैः प्रियाध्वनीनां
सरसिरुहैर्दयितास्यहास्यलक्ष्म्याः ।
स्फुटमनुहरमाणमादधानं
पुरुषपतेः सहसा परं प्रमोदम् ॥ ४६ ॥

प्रेयः ।

नितम्बैर्मेखलाभागैः पूरिता व्याप्ता आशा दिशो येन फलकुसुमान्वितैर्वृक्षैः रम्यं कुञ्जं गहनं यस्मिन् वार्त्तेति तत्वार्थकथनात्सा द्विविधा विशिष्टा निर्विशिष्टा च तत्र या पूर्व्वा सा स्वभावोक्तिरुदिता यथेयमेव तथाचोक्तं स्वभावोक्तिरलङ्कार इति केचित्प्रचक्षते अर्थस्य तादवस्थ्यञ्च स्वभावोऽभिहितो यथेति निर्विशिष्टा-वार्त्तानामालङ्कारः यथोक्तं गतोऽस्तमर्कौ भातीन्दुर्यान्ति वासाय पक्षिणः । इत्येवमादिकं काव्यं वार्त्तामेतां प्रचक्षत इति ॥ ४५ ॥ ज० म०

विषधरेत्यादि । पुनः कीदृशं महेन्द्रं विषधरनिलये पाताले निविष्टं मूलं यस्य तं शिखराणां शृतैः करणभूतैः परिस्पृष्टः स्पृष्टो देवलोकः स्वर्गो येन घनैर्निरन्तरालैर्विपुलैर्विशालैर्घनेन मेघेन विपुलैर्वा नितम्बैर्मध्यभागैः पूरिता व्याप्ता आशा दिशो येन फलेन पुष्पेण चाचितैर्व्याप्तैर्वृक्षैः रम्यं कुञ्जं लतादिपिहितस्थलं यत्र तं तथा । वार्त्तेति तत्वार्थकथनात् सा द्विविधा विशिष्टा निर्विशिष्टा च तत्र पूर्व्वा स्वभावोक्तिरुच्यते यदुक्तं स्वभावोक्तिरलङ्कार इति केचित्प्रचक्षते अर्थस्य तादवस्थ्यञ्च स्वभाव इति कथ्यते इति निर्विशिष्टा तु सैव वार्त्तालङ्कारः यथोक्तं गतोऽयमस्तमादित्यो यान्ति वासाय पक्षिणः इत्येवमादिकं काव्यं वार्त्तामेतां प्रचक्षत इति प्रकृते तु स्वभावोक्तिरूपैव वार्त्ता बोध्या ॥ ४५ ॥ भ०

मधुकरविरुतैरित्यादि । प्रियाध्वनीनां सीतासम्बन्धिनां जल्पितानां मधुकरविरुतैः स्फुटं स्पष्टमनुहरमाणमनुकुर्व्वन्तं सादृश्यमित्यर्थात् दयितायाः सीतायाः यदास्यं हास्यं तयोर्लक्ष्म्याः सरसिरुहैः सादृश्यमनुहरमाणं सन्तं महेन्द्रं तत्र पद्मैरास्यलक्ष्म्याः कुसुमैर्हासलक्ष्म्याः अथवा कृत्यार्थैरिति षष्ठी अनुहरमाण-शब्दस्य तुल्यार्थत्वात् सदृशीभवन्तमित्यर्थः पुरुषपतेः रामस्य सहसा तत्क्षणं आगतमात्रस्येत्यर्थः परमुत्कृष्टं प्रमोदमादधानं जनयन्तं समीयुः । प्रेय इति प्रियतमवस्त्वभिधानात् ॥ ४६ ॥ ज० म०

मधुकरेत्यादि । पुनः कीदृशं महेन्द्रं मधुकराणां भ्रमराणां विरुतैः शब्दैः प्रियायाः सीतायाः जल्पितानां स्फुटं व्यक्तं अनुहरमाणं सादृश्यं दर्शयन्तं

ग्रहमणिरसनं दिवो नितम्बं
विपुलमनुत्तमलब्धकान्तियोगम् ।
च्युतघनवसनं मनोभिरामं
शिखरकरैर्मदनादिव स्पृशन्तम् ॥ ४७ ॥

रसवत् ।

प्रचपलमगुरुभ्भरासहिष्णुं जनमसमानमनूर्ज्जितं विवर्ज्य ।
कृतवसतिमिवार्षवोपकण्ठे स्थिरमतुलोन्नतिमूढतुङ्गमेघम् ॥ ४८ ॥

ऊर्ज्जस्वी ।

धातोरनेकार्थत्वात् अनुहरमाणमनुकुर्व्वन्तमित्यन्ये सरसिरुहैः पद्मैर्दयितायाः सीतायाः आस्यस्य सुखस्य हास्यस्य च लक्ष्म्या अपि अनुहरमाणं पद्मविकाशस्यात् हास्यसाम्येन पद्मैस्तदनुहरणमुक्तं अन्ये तु सरसिरुहपदेन कुमुदमप्युच्यते तस्यापि सरःसम्भूतत्वात् तेन पद्मैरास्यलक्ष्म्याः कुमुदैर्हास्यलक्ष्म्याश्चानुहरमाणः स्निग्धाङ्गः अतएव पुरुषपते रामस्य सहसा तत्क्षणमागतमात्रस्यैव परमुत्कृष्टं प्रमोदमानन्दं दधानं कुर्व्वन्तं जनयन्तमित्यर्थः एतेन यात्रायां मङ्गलमपि सूचितं प्रेय इति प्रियतरवस्त्वभिधानात् ॥ ४६ ॥ भ०

अहेत्यादि । दिवो नितम्बं मध्यभागं अहाः मणिरसनेव यस्य विपुलं विस्तीर्णं न विद्यते उत्तमोऽस्मादित्यनुत्तमं अतिशयवान् लब्धः कान्त्या योगो येन च्युतो घनो वसनमिव यस्मात् शिखरैः करैरिव मदनादिव स्पृशन्तं महेन्द्रम् । रसवदिति दिवो गिरेश्च स्त्रीपुंसयोरिव शृङ्गाररसाभिधानात् तथाचोक्तं रसवद्दर्शितं स्पष्टं शृङ्गारादिरसं यथेति ॥ ४७ ॥ ज० म०

अहेत्यादि । पुनः कीदृशं महेन्द्रं शिखररूपकरैर्मदनात् कामाद्वेतोरिव दिव आकाशस्य नितम्बं मध्यभागं स्पृशन्तं कीदृशं नितम्बं अहाश्चन्द्रादयो मणिनिर्म्मिता रसना काञ्ची यत्र विपुलं विस्तीर्णं अनुत्तमलब्धकान्तियोगं न विद्यते उत्तमो यस्मात् लब्धः कान्तियोगो येन पश्चात् कर्म्मधारयः च्युतघनवसनं च्युतो घनो मेघो वसनमिव यस्मात् एतेन प्रावृट्कालोऽपि सूचितः अतएव मनोभिरामं चित्तानन्दकरं अत्र दिवो नायिकासाम्यं महेन्द्रस्य नायकसाम्यं व्यङ्ग्यम् । रसवदिति दिवो गिरेश्च स्त्रीपुंसयोरिव शृङ्गाररसस्याभिधानात् । तथाच दण्डी रसवद्रसभावणमिति ॥ ४७ ॥ भ०

प्रचपलमित्यादि । जनं लोकं प्रचपलं अस्थिरं अशुचं लघुं अतएव भरा-

स्फटिकमणिगटैः सरत्नदीपैः प्रतरुणकिन्नरगीतनिस्वनैश्च ।
अमरपुरमतिं सुराङ्गनानां दधतमदुःखमनल्पकल्पवृक्षम् ॥४९॥

पर्य्यायोक्तम् ।

सहिष्णुं अनूर्जितं अनहङ्कारं विवर्ज्यैवासमानत्वात् अर्णवस्य समुद्रस्योपकण्ठे समीपे कृतवसतिं कृतावस्थानं महेन्द्रं समीयुः तदेवासमानत्वाद्दर्शयन्नाह स्थिरं अचलं अतुलोन्नतिं असाधारणमहत्त्वमूढतुङ्गमेघं तङ्कृतमहामेघं आश्रयणीयत्वात् अर्ज्जस्वीति साहङ्कारवस्त्वभिधानात् ॥ ४८ ॥ ज० म०

प्रचपलमित्यादि । पुनः कीदृशं महेन्द्रं जनं लोकं विवर्ज्य त्यक्त्वा विजनत्वात् अर्णवस्य समुद्रस्य उपकण्ठे समीपे आत्मसदृशत्वात् कृता वसतिर्येन स्थिरमचलं अतुलोन्नतिं महोच्छ्रायं एतेन गुरुत्वमूर्जितत्वञ्च सूचितं जठतुङ्गमेघं धृतमहामेघं भारसहत्वात् जनवर्ज्जने हेतुमाह प्रचपलेति कीदृशं जनं असमानं स्वस्यासदृशं असमानत्वं दर्शयन्नाह प्रचपलं अस्थिरं अगुरुं लघुं अतएव भारासहनशीलं अनूर्जितं दर्पशून्यं दुर्बलं वा जनस्यासदृशत्वात् त्यागः स्वसदृशस्यार्णवस्य समीपे वासश्च युक्तः । अर्जस्वीति साहङ्कारवस्त्वभिधानात् यदुक्तं उर्जस्विरूढाहङ्कारमिति ॥ ४८ ॥ भ०

स्फटिकमणिगटैरित्यादि । स्फटिकमणिगटैः रत्नदीपयुक्तैः प्रतरुणानां किन्नराणां गीतनिस्वनैश्च हेतुभूतैः अमरपुरमतिं स्वर्गबुद्धिं सुराङ्गनानां दधतं जनयन्तं अदुःखं न विद्यते दुःखमस्मिन्निति सुखहेतुमित्यर्थः बहुकल्पवृक्षं समीयुः । पर्य्यायोक्तमिति अमरपुरमतिं दधतमित्यनेन पर्य्यायेण वचनगत्या तदेवामरपुरमिति प्रतिपादनात् तथाचोक्तं पर्य्यायोक्तं यदन्येन प्रकारेणाभिधीयत इति ॥ ४९ ॥ ज० म०

स्फटिकेत्यादि । पुनः कीदृशं महेन्द्रं रत्नदीपसहितैः स्फटिकमणीनां गटैः प्रलष्टतरुणानां किंपुरुषाणां गीतनादैश्च हेतुभिः सुराङ्गनानां देवस्त्रीणां अमरपुरमतिं स्वर्गबुद्धिं दधतं जनयन्तं अदुःखं नास्ति दुःखं यत्र सुखहेतुमित्यर्थः अनल्पा बहवः कल्पवृक्षा यत्र तं एवंभूतं महेन्द्रं समीयुरित्यन्वयः । पर्य्यायोक्तमिति अमरपुरमतिं दधतमिति पर्य्यायेण वचनभङ्ग्या तदेवामरपुरमिति प्रतिपादनात् । यदुक्तं अथमिष्टमनाख्याय तस्यैवार्थस्य सिद्धये । यत्प्रकारान्तराख्यानं पर्य्यायोक्तं तदुच्यते इति अन्यत्रापि पर्य्यायोक्तं यदनेन प्रकारेणाभिधीयत इति काव्यप्रकाशेऽपि पर्य्यायोक्तं विना वाच्यवाचकत्वेन वस्तु यदिति ॥ ४९ ॥ भ०

अथ ददृशुरुदीर्णधूमधूम्रां
दिशमुदधिव्यवधिं समेतसीताम् ।
सहरघुतनयाः प्लवङ्गसेनाः
पवनसुताङ्गुलिदर्शितामुदक्ताः ॥ ५० ॥

समाहितम् ।

जलनिधिमगमन्महेन्द्रकुञ्जात्प्रचयतिरोहिततिग्मरश्मिभासः ।
सलिलसमुदयैर्महातरङ्गैर्भुवनभरत्तममप्यभिन्नवेलम् ॥ ५१ ॥

उदारम् ।

अथेत्यादि । अथ प्रास्थानन्तरं प्लवङ्गसेनाः सहरघुतनयाः दिशं ददृशुः उदधिव्यवधिं सजलधिव्यवधानां दक्षिणामित्यर्थः उपसर्गे घोः किं उदीर्णेन महता धूमेन धूम्रामसृष्टां समेतसीतां सङ्गता सीतानयेति तृतीयार्थे बहुव्रीहिः पवनसुतस्याङ्गुल्या दर्शितां उदक्ताः ऊर्ध्वीकृताञ्चाः बहुव्रीहौ सक्थ्यक्ष्णोरिति षच्समासान्तो ऽनिष् न भवति तस्यानित्यत्वात् तेन दंष्ट्रेत्युपपन्नं भवति समाहितमिति व्यनन्यमनस्कतया दिशोऽवलोकनात् ॥ ५० ॥ ज० म०

अथेत्यादि । महेन्द्रप्रास्थानन्तरं रघुतनयाभ्यां रामलक्ष्मणाभ्यां सहिता वानरसेनाः उदक्ता उद्गतनेत्राः सत्यः समुद्रव्यवधानां दक्षिणां दिशं ददृशुः कीदृशीं उदीर्णेन महता धूमेन धूम्रां कृष्णलोहितां कृगिगत्यां क्तै रूपं समेता सङ्गता सीता यां यत्र वा पवनसुतस्य हनूमतोऽङ्गुल्या दर्शितां निर्दिष्टां उदक्ता इति उद्गतमूर्ध्वीकृतमक्षं चक्षुर्यासां इन्द्रियसामान्यवाचिनोऽप्यक्षशब्दस्य विशेषपरत्वान्नेत्रवाचकत्वं किंवा सक्थ्यक्ष्णः षः स्वाङ्ग इति षप्रत्ययान्तस्य उदक्षशब्दस्य स्वाङ्गादौ पाठस्तेन नमनसंख्यास्वाङ्गजादेरिति ङीप्प्रत्ययनिषेधः नदादिपाठस्यानित्यत्वादिति कालापाः मात्वादित्वादिति वासवताः प्लवङ्गसैन्या इति पठन्त्यन्ये । समाहितमिति दक्षिणदिगवलोकनं स्वत एव जायमानं हनूमदङ्गुलिदर्शितत्वेन सुकरत्वात् समाहितं यदुक्तं समाधिः सुकरं कार्यं कारणान्तरयोगत इति अन्यत्रापि किञ्चिदारभमाणस्य कार्यं दैववशात्पुनः । तत्साधनसमापत्तिर्यदाङ्गत्वमाहितमिति जयमङ्गलायान्तु एकचित्ततया दिशोऽवलोकनात् समाहितमित्युक्तम् ॥ ५० ॥ भ०

जलनिधिमित्यादि । महेन्द्रकुञ्जात् जलनिधिमगमन् गतवत्यः प्लवङ्गसेनाः लदित्वाच्छतृ प्रत्ययेन उच्चतया तिरोहितास्तिग्मरश्मिभासो येन निकुञ्जेन

पृथुगुरुमणिमुक्तिगर्भभासा ग्लपितरसातलसंभृतान्धकारम् ।
उपहतरविरश्मिवृत्तिमुच्चैः प्रलघुपरिप्लवमानवज्रजालैः ॥५२॥

उदारमेव ।

तस्मादिक्ष्वाकुक्षात् सलिलसमुदयैर्महातरङ्गैर्मही भिभिः भुवनस्य भरणे क्षममपि यक्षमपि भूभरण इति क्रैयादिकः तस्य कृतोरपि रूपं अभिन्नवेलं अनतिक्रान्तमर्यादं जलनिधिं उदारमिति उदात्तमित्यर्थः महानुभावताप्रतिपादनात् यतो महातरङ्गैर्जलसमूहैर्भुवनभरक्षममपि अभिन्नवेलमिति द्विविधमुदारं महानुभावतया विविधरत्नयोगाच्चेति इयं महानुभावता दर्शिता ॥ ५१ ॥ ज० म०

जलनिधिमित्यादि । सरघुतनयाः प्लवङ्गसेना महेन्द्रक्ष्वाकुक्षात् जलनिधिमगमन् औगमुल्लगत्याम् लदित्वात् व्यां ङः प्रचयेन समूहेन तिरोहिता आच्छादितास्तिग्मरश्मेः सूर्यस्य भासो दीप्तयो याभिस्ताः प्लवङ्गसेनानां विशेषणं प्रचयेन उच्चतया तिरोहितास्तिग्मरश्मिभासो येन तस्मादिति क्ष्वाकुविशेषणं वा कीदृशं जलनिधिं महान्तस्तरङ्गा जर्मयो येषु तैः सलिलसमुदयैर्जलसमूहैर्भुवनस्य पृथिव्या भरणे पूरणे क्षमं यक्षमपि अभिन्नवेलमनतिक्रान्तमर्यादम् । उदात्तमिति महानुभावताप्रतिपादनात् महानुभावत्वन्तु महातरङ्गजलसमूहैर्भुवन भरक्षमस्याप्यभिन्नवेलत्वात् तथाचोक्तं आशयस्य विभूतेर्वा यन्महत्त्वमनुत्तमम् । उदात्तं नाम तं प्राहुरलङ्कारं मणीषिण इति उदारमिति पाठेऽप्ययमेवार्थः द्विविधमिदं महानुभावत्वात् नानीरत्नयोगित्वाच्च आद्यमलोक्तम् ॥५१॥ भ०

द्वितीयमाह

पृथ्वित्यादि । पृथवो महान्तः गुरवस्तु न परिछेद्याः मणयो मौक्तिका यासां शुक्तीनां तथाविधानां गर्भस्य भासा दीप्त्या ग्लपितं क्षयितं रसातले संभृतसुपचितमन्धकारं येन तं उच्चैरुपरि प्रलघूनामल्पानां परिप्लवमानानां वज्राणां यानि जालानि समूहाः तैरुपहता रविरश्मिवृत्तयो यस्मिन् सः तं जलनिधिमगमन् यद्वज्रं वारिणि तरति तत्प्लवस्तमित्युक्तं एतदेवापरेऽन्ये न वाक्यार्थेनान्यथा विदुः । नानारत्नवियुक्तं यत्तत्किलोदारमुच्यते इति ॥ ५२ ॥ ज० म०

द्वितीयं दर्शयति

पृथ्वित्यादि । कीदृशं जलनिधिं पृथवो महान्तो गुरवो गुरुत्वाख्यगुणविशेषयुक्ता ये मणयो मौक्तिकानि तेषां याः शुक्तयः तासां गर्भभासा अन्तर्लीनदीप्त्या ग्लपितं नाशितं रसातले पाताले सम्भृतसुपचितमन्धकारं येन तं शुक्तास्फोटः स्त्रियां शुक्तिरित्यमरः उच्चैरुपरि प्रलघूनां लघुतमानामत एव परि-

समुपचितजलं विवर्द्धमानैरमलसरित्सलिलैर्विभावरीषु ।
स्फुटमवगमयन्तमूढ़वारीन् शशधररत्नमयान्महेन्द्रसानून् ॥५३॥

उदारमेव ।

भुवनभरसहानलङ्घ्यधाम्नः पुरुरुचिरत्नभृतो गुरूरुदेहान् ।
श्रमविधुरविलीनकूर्म्मनक्रान् दधतमुदूढ़भुवो गिरीनहींश्च॥५४॥

श्लिष्टम् ।

भ्रुवमानानां तरतां वज्राणां जालैः समूहैरुपहता रविरश्मिदत्तयो येन यत्र वा तं यद्वज्रं जले तरति तत्प्रशस्तं यदुक्तं रत्नपरीक्षायां गुरूणि सर्व्वरत्नानि वज्रमेकं परं लघु । भिद्यन्तेऽन्यानि वज्रेण तच्च केनापि भिद्यत इति । उदात्तमेवेति विविधरत्नर्द्धियुक्तत्वात् यदुक्तं पूर्व्वत्राश्रयमाहात्म्यमत्राभ्युदयगौरवम् । विवक्षितमिति व्यक्तमुदात्तं हयमथ्यद इति अन्यत्रापि नानारत्नर्द्धियुक्तं यत्तच्चोदात्तं किलोच्यत इति ॥ ५२ ॥ भ०

समुपचितजलमित्यादि । विभावरीषु रात्रिषु विवर्द्धमानैरमलैः सरित्सलिलैः समुपचितजलं उदधिं स्फुटमवगमयन्तं बोधयन्तं किमित्याह महेन्द्रसानून् शशधररत्नमयान् चन्द्रकान्तस्वभावान् ऊढवारीन् अन्यथा कथं धीयते जलं यदि चन्द्रकान्तसानवो न स्युः उदारमेवेति रत्नयोगात् ॥५३॥ ज० भ०

समुपेत्यादि । कीदृशं जलनिधिं विभावरीषु रात्रिषु विवर्द्धमानैरमलसरित्सलिलैः निर्म्मलनदीजलैः समुपचितजलं अतएव महेन्द्रसानून् शशधररत्नमयान् प्रचुरचन्द्रकान्तमयान् तत्स्वरूपान् वा अवगमयन्तं बोधयन्तं ऊढवारीन् धृतजलान् यदि तत्र चन्द्रकान्तमयाः सानवो न स्युस्तदा कथमूढजलाः स्युः ततश्च कथं वा तत्समीपे नदीनां जलवृद्धिरिति तदनुमानमिति भावः । उदात्तमेवेति रत्नयोगात् उदात्तं वस्तुनः सम्पदिति काव्यप्रकाशः ॥५३॥ भ०

भुवनभरसहानित्यादि । गिरीन् भुवनभरसहान् अहींश्च साटशानेव दधतं जलनिधिमगमन् गिरीनलङ्घ्यधाम्नः अहींश्चानभिभवनीयतेजसः गिरीन् पुरुरुचिरत्नभृतः अहींश्च महारुचिरत्नभृतः गिरीन् गुरूदेहान् अहींश्च महाकायान् श्रमविधुराः श्रमपीडिताः निलीनाः कूर्म्मा नक्राश्च येषु तान् गिरीनहींश्चोदूढभुवो धृतवसुधान् गिरीनहींश्च नरूप्यप्रधानिति तुल्यं पूर्व्वसानुनासिकः श्लिष्टमिति । उपमानेनोपमेयत्वस्य साधनात् तथाचोक्तं विशेषणेन श्लिष्टम् । उपमानेन यत्तत्त्वमुपमेयस्य साध्यते । क्रियागुणाभ्यां नाम्ना च श्लिष्टं तदभि-

प्रदद्दशुरुरुमुक्ताशीकरौघान्
विमलमणिदुतिसंभृतेन्द्रचापान् ।
जलमुच इव धीरमन्द्रघोषान्
क्षितिपरितापहृतो महातरङ्गान् ॥ ५५ ॥

श्लिष्टमेव ।

धीयत इति अत्रोपमानभूतैरद्रिभिरुपमेयभूतानां गिरीणां तत्त्वस्य तादूप्यस्य भुवनभरादितादूप्यक्रियया तद्गुणेन च साधनेन गिरिभिरद्रिभिश्च नाम्ना च शब्देन भुवने भरसहानित्यादिना साध्यमानत्वात् रूपकमपीदृशमेव किन्तु श्लिष्टस्य भेदेनोपमानोपमेययोर्युगपत्प्रयोगात् रूपके पुनरेकस्यैवोपमेयपुरुषस्य व्याप्त उपमानं तथाचोक्तं लक्षणं रूपकेऽपीदं विद्यते काममत्र तु । दृष्टः प्रयोगो युगपदुपमानोपमेययोरिति तदुक्तम् । लक्षणं श्लिष्टं सहोक्त्युपमाहेतुनिर्देशात्त्रिविधं यथोक्तं श्लेषादेवार्थवचसोर्यस्य च क्रियते भिदा । तत्सहोक्त्युपमा हेतुनिर्देशात्त्रिविधं यथेति तत्रेदं सहोक्तिश्लिष्टसूक्तं गिरीनहींत्येति सहोक्त्या निर्देशात् ॥ ५४ ॥ ज०म०

भुवनेत्यादि । पुनः कीदृशं जलनिधिं गिरीन् पर्वतान् अहीन् सर्पांश्च दधतं पर्वतसर्पयोर्युगपद्विशेषणान्याह भुवनभरसहान् जगतां भारस्य सहान् दृढत्वात् बलवत्त्वाच्च सहेः पचाद्यच्प्रत्ययान्तात् अलङ्घधान्नः अनभिगम्यस्थानान् अद्रिपक्षे अनभिभवनीयतेजसः पुरुरुचिरत्नभृतः प्रचुरदीप्तिमद्रत्नधारकान् रत्नोत्पत्तिस्थानत्वात् फणारत्नयोगाच्च गुरुरुदेहान् अलघुमहाशरीरान् अमविधुरविलीनकूर्मनक्रान् अमेश्च विधुरा विकलाः सन्तो विलीनाः संश्लिष्टाः कच्छपाः कुम्भीराश्च येषु उदूढभुवो धृतभूमीन् पर्वतोपरि वालुकाशय्येन भूशय्यत्वेः भूमिधारकस्य शेषनागस्य तत्र सत्त्वाच्च एवमेवम्भूतं जलनिधिमगमन्निति सम्बन्धः श्लिष्टमिति श्लिष्टमिष्टमनेकार्थमेकरूपान्वितं वचः । तदभिन्नपदं भिन्नपदप्रायमिति द्विधा तदिहाभिन्नपदं दर्शितं पदभङ्गाभावात् तत्पुनस्त्रिविधं तथाचोक्तं श्लेषादेवार्थवचसोर्यस्य च क्रियते भिदा । तत्सहोक्त्युपमा हेतुनिर्देशात्त्रिविधं यथेति । तदिदं सहोक्तिलक्षणं श्लिष्टसूक्तं गिरीनहींत्येति सहोक्त्या निर्देशात् अन्यद्वयं क्रमेणाग्रे उदाहरिष्यति ॥ ५४ ॥ भ०

प्रदद्दशुरित्यादि । महातरङ्गान् जलमुच इव मेघानिव प्रदद्दशुः प्रदृष्टवन्तः उरवो महान्तो मुक्ताः प्रकीर्णाः शीकरौघा येषु अमलमणिद्युतय एव सन्ततामि

विद्रुममणिकृतभूषा मुक्ताफलनिकररञ्जितात्मानः ।
वभुरुदकनागरुग्ना वेलातटशिखरिणो यत्र ॥ ५६ ॥

हेतुश्लिष्टमेव ।

भूतनिखिलरसातलः सरत्नः
शिखरिसमोन्मितिरोहितान्तरीक्षः ।

इन्द्रचापानि येषु धीरमन्द्रघोषान् मधुरगभीरध्वनीन् क्षितिपरितापहृतः पृथिवीसन्तापहारिणः इदमपि यथानिर्दिष्टविशेषणात् श्लिष्टं जलमुच इवेत्युपमानिर्देशात् ॥ ५५ ॥ ज० म०

प्रदद्दशुरित्यादि । सहरघुतनयाः प्लवङ्गसेना जलमुच इव मेघानिव महत्तरशरीरान् जम्बीन् प्रदद्दशुः मेघतरङ्गयोर्युगपद्विशेषणान्याह उर्विति उरवो महान्तो मुक्ताः कीर्णाः शीकरौघा येषु तान् निर्मलरत्नदीप्तय एव ताभिः करणभूताभिर्वा सम्भृतानि इन्द्रचापानि यत्र तदुक्तं अकाले शक्रचापानाभ्युदयस्तु यतो भवेत् । असौ धन्यतरो श्रेयो बहुमूल्यो महामणिरिति मेघपक्षे अमलमणीनामिव द्युतिर्येषां तादृशानि उद्भूतेन्द्रचापानि यत्र धीरमन्द्रघोषान् मधुरगभीरध्वनीन् क्षितिपरितापहृतः पृथिवीसन्तापहारिणः । श्लिष्टमेवेति पूर्वोक्तलक्षणसत्त्वात् किन्तु जलमुच इवेत्युपमानिर्देशादुपमाश्लिष्टमिदम् ॥ ५५ ॥ भ०

विद्रुमेत्यादि । वेलातटशिखरिणो यत्रेति जलनिधौ वभुः शोभन्ते स्म ते तमीयुरिति वक्ष्यमाणेन सम्बन्धः वेलातटाः शिखरिणश्चेति द्वन्द्वः शेषाणि विशेषणान्युभयत्र तुल्यानि इदमपि यथानिर्दिष्टमेव किन्तु हेतुश्लिष्टं हेतुद्वारेण विशेषणानां निर्देशात् विद्रुममणिकृतभूषत्वात् जलहस्तिभग्नत्वाच्च वभुरिति ॥ ५६ ॥ ज० म०

विद्रुमेत्यादि । यत्र जलनिधौ वेलातटशिखरिणो वभुः शोभन्ते स्म तमीयुरित्यग्रिमश्लोकेनान्वयः वेलातटाश्च शिखरिणश्चेति द्वन्द्वः उभयं विशिनष्टि विद्रुमैः प्रवालैर्मणिभिश्च कृता भूषा येषु ते तथा मुक्तामणीनां उत्कृष्टमौक्तिकानां मुक्तानां मणीनाञ्च वा निकरेण समूहेन रञ्जिता आत्मानो देहाः प्रदेशा येषां उदकनागरुग्ना जलहस्तिभग्नाः श्लिष्टमेवेति पूर्वोक्तलक्षणसत्त्वात् किन्तु हेतुश्लिष्टमिदं युगपदुभयविशेषणानां हेतुत्वेनैव निर्देशात् प्रवालमणिकृतालङ्कारत्वात् मुक्तामणिदीप्तिरञ्जितरूपत्वात् उदकनागभग्नत्वाच्च वभुरित्यर्थः ॥ ५६ ॥ भ०

कुत इह परमार्थतो जलौघो
जलनिधिमीयुरतः समेत्य मायाम् ॥ ५७ ॥

अपह्नुतिः ।

शशिरहितमपि प्रभूतकान्तिं
विबुधकृतश्रियमप्यनष्टशोभम् ।
मथितमपि सुरैर्हृदं जलौघैः
समभिभवन्तमविच्युतप्रभावम् ॥ ५८ ॥

विशेषोक्तिः ।

भूतनिखिलरसातल इत्यादि । एवं गुणविशिष्टो जलौघः कुत इह प्रदेशे परमार्थतः परमार्थेन विद्यते । किं तर्हि मायां यतः पूरिताशेषपातालत्वात् सरत्नत्वात् शिखरसमैरूर्मिभिः पिहितान्तरीक्षत्वाच्च सराघवाः प्लवङ्गसेनाः समेत्य मायामिव जलधिमीयुः ज्ञातवत्यः सर्व्वे गत्यर्था ज्ञानार्था इति भृञ् भरण इति भौवादिकः अपह्नुतिरिति मायामित्यन्तर्गतोपमारूपतया निर्देशात् विद्यमानार्थस्य चापह्नवात् तथाचोक्तं अपह्नुतिरितीष्टात्र किञ्चिदन्तर्गतोपमा । भूतार्थापह्नवादेषा क्रियतेस्याभिदा यथेति ॥ ५७ ॥ ज० म०

भूतेत्यादि । सहरघुतनयाः प्लवङ्गसेनाः समेत्य मिलित्वा जलनिधिं यतः कारणात् मायामिव ईयुर्ज्ञातवत्यः सर्व्वेषां गत्यर्थानां ज्ञानार्थत्वात् किं कारणं तदाह इह प्रदेशे जलौघः कुतः परमार्थतस्तत्त्वेन विद्यते कीदृशः भूतनिखिलरसातलः पूरिताशेषपातालः रत्नैः सहितः पर्व्वततुल्यतरङ्गैराच्छादिताकाशः जलस्यैतादृशत्वासम्भवादियं खलु मायेति भावः । अपह्नुतिरिति जलनिधिमुपमेयमसत्यं कृत्वा मायामित्युपमानस्य सत्यतया व्यवस्थापितत्वात् तथाचोक्तं प्रकृतं यन्निषिध्यान्यत् साध्यते सा ह्यपह्नुतिरिति अन्यत्रापि अपह्नुतिरीष्टा च किञ्चिदन्तर्गतोपमा । भूतार्थापह्नवात् ज्ञेया क्रियतेऽस्याभिदा यथेति ॥ ५७ ॥ भ०

शशिरहितमित्यादि । शशिरहितमपि इन्दुरहितमपि प्रभूतकान्तिं पद्मरागादिरत्नावभासितत्वात् विबुधकृतश्रियमपि अनष्टशोभं सर्व्वदा शोभास्पदत्वात् सुरैर्मथितमपि दिनमाकाशं जलौघैः समभिभवन्तं अत्युच्छ्रितत्वात् तदेवमविच्युतप्रभावं अखण्डिताभिमानमीयुः ज्ञातवत्यः विशेषोक्तिरिति यस्यादेरेक-

क्षितिकुलगिरिशेषदिग्गजेन्द्रान्
सलिलगतामिव नावमुद्वहन्तम् ।
धृतविधुरधरं महावराहं
गिरिगुरुपोत्रमपोहितैर्जयन्तम् ॥ ५९ ॥

व्याजस्तुतिः ।

देशस्य विगमेऽपि प्रभूतकान्त्या गुणान्तरेण स्तुतिविशेषस्य प्रतिपादनात् यथोक्तं एकदेशस्य विगमे या गुणान्तरसंस्तुतिः विशेषप्रथनायासौ विशेषोक्तिर्मता यथेति ॥ ५८ ॥ ज० म०

शशीत्यादि । कीदृशं जलनिधिमीयुः शशिरहितमपि चन्द्रेण विरहितमपि प्रभूतकान्तिं प्रचुरदीप्तिं नानारत्नोपशोभितत्वात् विबुधक्षतश्रियमपि देवकृतलक्ष्मीकमपि अनष्टशोभं सकलशोभास्पदत्वात् सुरैर्मथितमपि जलौघैर्दिवमाकाशं सम्यगभिभवन्तं अत्युच्छ्रितत्वात् अतएव अविज्ञातप्रभावं अखण्डितमहिमानं विशेषोक्तिरिति चन्द्रादेरेकदेशस्य वैकल्येऽपि तत्कार्यप्रभूतकान्त्यादिना गुणान्तरेण विशेषस्य प्रतिपादनात् तथाचोक्तं गुणजातिक्रियादीनां यत्र वैकल्यदर्शनम् । विशेषदर्शनायैव सा विशेषोक्तिरिष्यते । अन्यत्रापि एकदेशस्य विगमे या गुणान्तरसंस्तुतिः । विशेषप्रथनायासौ विशेषोक्तिर्मता यथेति ॥५८॥ भ०

क्षितीत्यादि । क्षितिं पृथिवीं कुलगिरीन् कुलपर्वतान् शेषं नागराजं दिग्गजेन्द्रानैरावतादीन् सलिलगतामिव नावमुद्वहन्तं जलनिधिं महावराहं धृतविधुरधरं धृता उद्धृता विधुरा विह्वला धरा मही येनेति गिरिगुरुपोत्रं गिरिवत् गुरु पोत्रं यस्य तमपोहितैश्चेष्टितैर्जयन्तं जलनिधिमीयुः । व्याजस्तुतिरिति क्षित्यादिधारणादधिकगुणस्य जलनिधेस्तोत्रव्यपदेशेन वराहेण तुल्यत्वात् तमपि महावराहं जयन्तमिति किञ्चिद्विधातुमिच्छया निन्दनात् तथाचोक्तं दूराधिकगुणस्तोत्रव्यपदेशेन तुल्यता । किञ्चिद्विधित्सया निन्दा व्याजस्तुतिरसौ यथेति ॥ ५९ ॥ ज० म०

क्षितीत्यादि । जलनिधिमीयुरिति सम्बन्धः कीदृशं क्षितिं कुलपर्वतान् शेषं नागराजं दिग्गजेन्द्रानैरावतादींश्च सलिलगतां नौकामिव उद्वहन्तं दधतं अतएव महावराहमपि दुश्चेष्टितैश्चेष्टितैर्जयन्तं कीदृशं महावराहं धृतविधुरधरं धृता उद्धृता विधुरा प्रलये व्याकुला धरा पृथिवी येन गिरिवत् गुरु महत् पोत्रं सुखं यस्य तमुद्रूपत्वे पोत्रं तरङ्गः व्याजस्तुतिरिति जलनिधेः को महिमा यः सदा

गिरिपरिगतचञ्चलापगान्तं
जलनिवहं दधतं मनोभिरामम् ।
गलितमिव भुवो विलोक्य रामं
धरणिधरस्तनशुक्लपट्टचीनम् ॥ ६० ॥

उपमारूपकम् ।

अपरिमितमहाद्भुतैर्विचित्र-
श्रुतमलिनः शुचिभिर्महानलङ्कैः ।

क्षित्यादिभारं सेवकवत् वहतीत्यपो निन्दां कृत्वा महावराहं जयन्नमिति प्रथमतात् यद्वा भगवज्जयमथापातितो निन्दात्वेनोक्ता तत्साहश्यप्रदर्शनेन स्तुतिरुक्ता तथाचोक्तं यदि निन्दति वा स्तौति व्याजस्तुतिरसौ मता । दोषाभासा गुणा एव भजन्ते यत्र सन्निधिमिति अन्यैस्तु क्षित्यादिधारणादधिकगुणस्य जलनिधेः स्तोतव्यपदेशेन महावराहतुल्यत्वात् तमपि महावराहमीहितैर्जयन्नमिति किञ्चिद्विधित्सया निन्दनाद्व्याजस्तुतिरित्युक्तं तथाहि दूराधिकगुणस्तोतव्यपदेशेन तुल्यता । किञ्चिद्विधित्सया निन्दा व्याजस्तुतिरसौ मतेति ॥ ५६ ॥ भ०

गिरिपरीत्यादि । गिरिभिः परिगताः संश्लिष्टाः चञ्चला विलोला आपगान्ता नद्यन्ता यस्मिन् जलनिवहे तं जलनिवहं दधतं धारयन्तं समुद्रमीयुः कीदृशमिव जलनिवहं रामं भर्त्तारं विलोक्य हृष्टाया इत्यर्थप्राप्तं ततश्च पूर्व्वकालेक्षा भुवः पृथिव्या इव धरणिधरस्तनयोः शुक्लपट्टस्य चीनमिव गलितं उपमारूपकमिति तथोक्तं उपमानस्य तद्भावमुपमेयस्य रूपयन् । यो यदत्युपमाभेदमुपमारूपकं यथेति ॥ ६० ॥ ज० भ०

गिरिपरीत्यादि । कीदृशं जलनिधिं जलस्य निवहं समूहं दधतं धारयन्तं कीदृशं जलनिवहं गिरिभिः परिगताः संश्लिष्टाश्चञ्चला नद्यन्ता नद्यवयवा यत्र तं मनोभिरामं स्वपतिं विलोक्य हर्षवशात् जायारूपाया भुवः पृथिव्या धरणिधरस्य पर्व्वतस्य स्तनरूपस्य गलितं स्रस्तं शुक्लवर्णपटाञ्चलमिव उपमारूपकमिति उपमासहितं रूपकमित्यर्थः । अत्र उपमानेन स्तनेन उपमेयस्य कस्यचिद्धरणीधरस्य स्तनत्वं रूपितं गलितं पट्टचीनमित्येतदुपमापि निर्दिष्टा तथाचोक्तं उपमानेन तद्भावमुपमेयस्य रूपयन् यद्यदत्युपमानं तदुपमारूपकं यथेति अन्यत्राप्युक्तं दृष्टं साधर्म्म्यवैधर्म्म्यप्रदर्शनान्मुख्यगौणयोः । उपमाव्यतिरेकाख्यं रूपकाद्वितयं यथेति ॥ ६० ॥ भ०

ATIC SOCIETY OF

तरुष्टगपतिलक्ष्मणक्षितीन्द्रैः
समधिगतो जलधिः परं बभासे ॥ ६१ ॥

तुल्ययोगिता ।

न भवति महिमा विना विपत्ते-
रवगमयन्निव पश्यतः पयोधिः ।
अविरतमभवत् क्षणे क्षणेऽसौ
शिखरिपृथुप्रथितप्रशान्तवीचिः ॥ ६२ ॥

निदर्शनम् ।

अपरिमितमहाद्भुतैरित्यादि । तरुष्टगपतिलक्ष्मणक्षितीन्द्रैः सुग्रीवलक्ष्मणरामैः समधिगतः प्राप्तो जलधिः परं सुष्ठु बभासे शोभते स्म कीदृशैः कीदृग इत्याह अपरिमितमहाद्भुतैर्विचित्रैः नानाद्भुतैः शुचिभिर्विमलैः च्युतमलिनो निर्मलोऽलङ्घ्यैरनभिभवनीयैः महान् अनभिभवनीयः एवञ्च कृत्वा तेनापि ते समधिगताः परं बभासिर इति तुल्ययोगितेति न्यूनानामपि तेषां सुग्रीवादीनां विशिष्टेन जलनिधिना महाद्भुतत्वादिगुणसाम्यविवक्षया तुल्यस्य कार्यस्य भासनलक्षणस्यानुष्ठानेन तुल्ययोगात् तथाचोक्तम् । न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया । तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगितेति ॥ ६१ ॥ ज० म०

अपरिमितेत्यादि । तरुष्टगानां वानराणां पत्या सुग्रीवेण लक्ष्मणेन क्षितीन्द्रेण रामेण च समधिगतः प्राप्तो जलधिः परमत्यर्थं बभासे शोभते स्म क्रमेण सुग्रीवादीनां सप्तदशस्य च तुल्यानि विशेषणान्याह अपरिमितमहाश्चर्यैर्विचित्रः आश्चर्यान्वितः च्युतमलिनः शुचिभिर्विमलैः महान् अनभिभवनीयः अलङ्घ्यैरनभिभवनीयैः एवञ्च सति तुल्यरूपत्वात्तेन समधिगतास्तेऽपि बभासिरे इत्यर्थोऽभ्यते तुल्ययोगितेति उपमानानामपि सुग्रीवादीनां विशिष्टेन जलधिना गुणसाम्यविवक्षया तुल्यकार्यस्य भासनलक्षणस्य योगात् तथाचोक्तं विवक्षितगुणोत्कर्षे यत्साम्यीकृत्य कस्यचित् । कीर्त्तनं स्तुतिनिन्दार्थं सा स्मृता तुल्ययोगितेति अन्यत्राप्युक्तं न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया । तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगितेति ॥ ६१ ॥ भ०

न भवतीत्यादि । महिमा महत्वं विना विपत्तेः विनाशं विना न भवति पृथग्विनेत्यादिना पञ्चमी नास्त्येव तन्महत्वं यस्य विनाशो नास्तीत्येवमवगमयन्

मृदुभिरपि विभेद पुष्पबाणै-
र्जलशिशिरैरपि मारुतैर्ददाह ।
रघुतनयमनर्थपण्डितोऽसौ
न च मदनः क्षतमाततान नार्चिः ॥ ६२ ॥

विरोधः ।

बोधयन्निव पयोधिस्तान् पश्यतो रामादीन् अविरतमविच्छेदेन शिखरिवत् पृथवः प्रथिताः प्रशान्ताश्च वीचयो यस्य स एवं क्षणे क्षणे अभवत् भूतवान् निदर्शनेति प्रतिक्षणं वीचीनां पृथुत्वप्रशान्तत्वभवनक्रिययैव महिमभवनस्य तदर्थस्य विपत्तिफलस्य उपादानात् न यथैववतिशब्दानां प्रयोगात् तथाचोक्तं क्रिययैव तदर्थस्य विशिष्टस्योपदर्शनात् । दृष्टा निदर्शना नाम यथैववतिभिर्विनेति ॥ ६२ ॥ ज० भ०

न भवतीत्यादि । विपत्तेर्विना विनार्थं विना महिमा महत्त्वं न भवति अन्यारब्धेति विनायोगे पञ्चमी नास्त्येव तन्महत्त्वं यस्य विपत्तिर्नास्तीति पश्यतो रामादीन् अवगमयन्निव बोधयन्निव असौ पयोधिरविरतं अविच्छेदेन क्षणे क्षणे शिखरिपृथुप्रथितप्रशान्तवीचिरभवत् पर्व्वतवत् पृथवो महान्तः प्रथिताः प्रकाशिताः पश्चात् प्रशान्ताश्च वीचयस्तरङ्गा यस्य स तथा महता विपत्तौ खेदो न कर्त्तव्य इति रामं प्रत्युपदिष्टमिति पश्यत इत्यस्य भावः । निदर्शनमिति प्रतिक्षणं वीचीनां पृथुत्वप्रशान्तिक्रियां दर्शयित्वा अन्यत्रापि महिम्नो विपत्तिफलस्योपादानात् तथाचोक्तं अर्थान्तरप्रवृत्तेन किञ्चित्तत्सदृशं फलम् । सदृशत्वानिदर्शेत यदि स्यात्तन्निदर्शनमिति अन्यत्राप्युक्तं क्रिययैव तदर्थस्य विशिष्टस्योपदर्शनात् । दृष्टं निदर्शनं नाम यथैववतिभिर्विनेति कार्य्यः शब्दो यथा घट इत्यादिवत् यथाशब्दादिभिर्विनेदं निदर्शनमिति ॥ ६२ ॥ भ०

समुद्रोपकण्ठे रामस्य मदनावस्थामाह

मृदुभिरित्यादि । मदनोऽनर्थपण्डितः निष्प्रयोजनकुशलः पुष्पबाणैरपि मृदुभिः रघुतनयं विभेद न चासौ क्षतं खण्डनमाततान अनितवान् जलशिशिरैर्मारुतैस्तमेव रघुतनयं ददाह न चासावर्च्चिर्ज्वालामाततान विरोध इति पुष्पबाणानां यन्मार्दवं मरुताञ्च जलसंसर्गाद्यच्छैत्यं तयोर्भेददाहलक्षणे क्रिये विरुद्धे तयोरभिधानात् तयोश्च क्रिययोर्वा विरोधिनी क्रिया क्षतार्च्चिषोरवतानालक्षणास्ताः कामोद्रेकप्रतिपादनाभिधानात् तथाचोक्तं गुणस्य

अथ मृदुमलिनप्रभौ दिनान्ते
जलधिसमीपगतावतीतलोकौ ।
अनुकृतिमितरेतरस्य मूर्त्यो-
र्दिनकरराघवनन्दनावकार्ष्टाम् ॥ ६४ ॥

उपमेयोपमा ।

च क्रिया या वा विरुद्धान्यक्रियाभिधा । या विशेषाभिधानाय विरोधं तं विदुर्यथेति ॥ ६३ ॥ ज० म०

समुद्रान्तिके सीतास्मरणात् रामस्य कामावस्थामाह

मृदुभिरित्यादि । मदनो मृदुभिरपि पुष्पबाणैरघुतनयं विभेद न चासौ तावतापि क्षतं खण्डनं आततान कृतवान् सजलशीतलैरपि मारुतैस्तं ददाह न चासावङ्गिरातताप अतएवासौ अनर्थपण्डितः निष्प्रयोजने कर्मणि कुशलः विरोध इति पुष्पबाणानां यन्मार्दवं मारुतानाञ्च जलसंसर्गात् यच्चैत्यं तयोर्भेददाहलक्षणं क्रियाद्वयं विरुद्धमभिहितं तयोश्च क्रिययोर्विरुद्धं क्षताङ्गिशैरकरणं तेन कामोत्कर्षरूपोविशेषः प्रतिपादितः अयञ्च विरोधो न वास्तवः भेददाहाभ्यां पीडामात्रस्य लक्षितत्वात् तथाचोक्तं विरुद्धानां पादार्थानां यत्र संसर्गदर्शनम् । विशेषसाधनायैव स विरोधः स्मृतो यथेति । अन्यत्राप्युक्तं गुणस्य च क्रिया या वा विरुद्धार्थक्रियाभिदा । या विशेषाभिधानाय विरोधं तं विदुर्यथेति ॥ ६३ ॥ भ०

अथेत्यादि । यथोक्तप्रस्तवनन्तरं मृदुमलिनप्रभौ मृदुरप्रचण्डा मलिना प्रभा ययोः तौ दिनकरराघवनन्दनौ रघोरपत्यं राघवः दशरथस्तन्नन्दनो रामः दिनान्ते अन्योन्यस्य दिवाकरो रामस्य रामोऽपि दिवाकरस्येति मूर्त्योर्देहयोरनुकृतिमिवानुकारमिव यथोक्तधर्मतुल्यतया अकार्ष्टां कृतवन्तौ अतीतलोकौ त्यक्तलोकौ उपमेयोपमेति तयोः पर्यायेण उपमानोपमेयत्वात् तथाचोक्तं उपमानोपमेयत्वं यत्र पर्यायतो भवेत् । उपमेयोपमां धीरा ब्रुवते तां यथोदितामिति ॥ ६४ ॥ ज० म०

अथेत्यादि । अनन्तरं दिनकरः सूर्यो राघवस्य दशरथस्य नन्दनो रामो दिनस्यान्ते सन्ध्याकाले अन्योन्यस्य मूर्त्योः शरीरयोरनुकृतिमनुकारं अकार्ष्टां कृतवन्तौ तुल्यधर्मत्वात् सूर्यो रामस्य मूर्त्तेरनुकृतिं रामोऽपि सूर्यस्य मूर्त्तेरनुकृतिं चकारेत्यर्थः द्वयोस्तुल्यतां दर्शयति तौ कीदृशौ मृदुरप्रचण्डा मलिना

अपहरदिव सर्व्वतो विनोदान्
दयितगतं दधदेकधा समाधिम् ।
घनरुचि वहधे ततोऽन्धकारं
सहरघुनन्दनमन्मथोदयेन ॥ ६५ ॥

सहोक्तिः ।

प्रभा ययोः सूर्य्यस्य दिनान्तवशात् रामस्य शोकाच्छ्यादिशयनाच्च समुद्रसमीपं गतौ त्यक्तलोकौ च । उपमेयोपमेति इतरेतरशब्देन समानधर्म्मत्वात् पर्य्याये-णोपमानोपमेयत्वकथनात् तथाचोक्तं उपमानोपमेयत्वं यत्र पर्य्यायतो भवेत् । उपमेयोपमां धीरा ब्रुवते तां यथोदितामिति ॥ ६४ ॥ भ०

अपहरदित्यादि । ततस्तूत्तरकालं दिवसे ये विनोदाः चेतसः संस्थापकाः तान् सर्व्वतः सर्व्वान् सर्व्वेण वा प्रकारेण अद्यादित्वात्तसिः अपहरदिव अपनयदिवान्धकारं दयितगतं प्रियागतञ्च समाधिं चित्तैकाग्र्यतां एकधा एक-प्रकारं दधत् धारयत् घनरुचि बर्हलच्छायं वहधे वर्द्धते स्म सहरघुनन्दन-मन्मथोदयेन तदानीं तस्य कामोदयोऽपि वहधे सहोक्तिरिति अन्धकार-मन्मथाश्रितयोर्वर्द्धनक्रिययोस्तुल्यकालयोः वहध इत्यनेन पदेन कथनात् तथा-चोक्तं तुल्यकालक्रिये यत्र वस्तुद्वयसमाश्रिते वाक्येनैकेन कथ्येते सहोक्तिः सा मता यथेति ॥ ६५ ॥ ज० मं०

अपहरदित्यादि । ततो दिनान्तादुत्तरकालं अन्धकारं रघुनन्दनस्य रामस्य कामोदयेन सह वहधे तदानीमन्धकारो रामस्य कामोदयोऽपि प्रवृद्ध इत्यर्थः उभयविशेषणमाह सर्व्वतो विनोदान् अपहरदिव दिवसे ये विनोदाश्चित्त-प्रसादकाः तान् सर्व्वान् सर्व्वप्रकारेण वा अपनयदिव पक्षे विभक्तिव्यत्ययः दयितगतं समाधिं चित्तैकाग्र्यतां एकधा एकप्रकारं दधत् जनयत् घनरुचि मेघवत्श्यामं निविडच्छायं वा कामोदयपक्षे दयिताविषये निविडा श्रद्धा यस्मात् दयियगतमित्यत्र प्रमदवनमित्यादिवत् हृस्वः वस्तुतस्तु दयितशब्देन सामान्यविवक्षया भार्य्याप्युच्यते अन्धकारोऽस्त्रियां ध्वान्तमित्यमरः । सहोक्ति-रिति अन्धकारकामोदयाश्रितयोर्वृद्धिक्रिययोस्तुल्यकालयोर्वहधे इत्यनेनाभि-धानात् । तथाचोक्तं तुल्यकालक्रिये यत्र वस्तुद्वयसमाश्रिते । पदेनैकेन कथ्येते सहोक्तिः सा मता यथेति ॥ ६५ ॥ भ०

अधिजलधि तमः क्षिपन् हिमांशुः
परिदृष्टेऽथ दृशां कृतावकाशः ।
विदधद्दिव जगत्पुनः प्रलीनं
भवति महान् हि परार्थ एव सर्व्वः ॥ ६६ ॥

परिवृत्तिः ।

अशनिरयमसौ कुतो निरभ्रे
शितशरवर्षमसत्तदभ्यशार्ङ्गम् ।

अधिजलधीत्यादि । अथ हिमांशुरन्धकारवर्ज्जनानन्तरं अधिजलधि जलधेरुपरि विभक्त्यर्थेऽव्ययीभावः तमः क्षिपन् अपनयन् परिदृष्टे दृष्टः दृशां चक्षुषां कृतावकाशः दत्तप्रसरः जगल्लोकं प्रलीनं तिरोभूतं पुनर्विदधदिव सृजन्निव कस्मात्तेनैवं कृतमित्याह यस्माद्यो महान् स सर्व्वः परार्थ एव परप्रयोजन एव भवति परिवृत्तिरिति दृशां कृतावकाश इत्यनेन विशिष्टस्य वस्तुन आदानात् तमः क्षिपन्नित्यनेनास्य वस्तुनः अपोहात् भवतीत्यादिना अर्थान्तरन्यासात् तथाचोक्तं विशिष्टस्य यदादानं अन्यापोहेन वस्तुनः । अर्थान्तरन्यासवती परिवृत्तिरसौ यथेति ॥ ६६ ॥ ज० म०

अधीत्यादि । अथान्धकारवर्ज्जनानन्तरं हिमांशुश्चन्द्रो जनैः परिदृष्टे दृष्टः कीदृशः अधिजलधि समुद्रे तमोऽन्धकारं क्षिपन् नाशयन् अधिजलधीति सप्तम्यर्थेऽव्ययीभावः दृशां चक्षुषां कृतावकाशः दत्तावसरः प्रलीनं तिरोभूतं जगत् पुनर्विदधदिव सृजन्निव कृतस्तेनैवं कृतमित्याह हि यस्मात् सर्व्व एव महान् जनः परार्थ एव परप्रयोजन एव भवति परिवृत्तिरिति दृशां कृतावकाश इत्यनेन विशिष्टस्य वस्तुन आदानात् तमः क्षिपन् इत्यनेन च कस्यचिद्वस्तुनोऽपोहात् भवति हीत्यादिना अर्थान्तरन्यासात् तथाचोक्तं विशिष्टस्य यदादानमन्यापोहेन वस्तुनः । अर्थान्तरन्यासवती परिवृत्तिरसौ यथेति । विद्यासागरस्तु तमःसम्बन्धिनमवकाशं नेत्रेभ्याधाय तत्सम्बन्धिनः क्षेपणस्य तमसि विधानात् परिवृत्तिरियमित्याह तथाचोक्तं अर्थानां यो विनिमयः परिवृत्तिस्तु सा यथेति ॥ ६६ ॥ भ०

अशनिरित्यादि । असौ यश्चन्द्रः किमयमशनिर्वज्रं असौ कुतो निरभ्रे नभसि कुतः यतोऽसौ मेघादुत्पद्यत इति उत निशितानां शराणां वर्षं तदभ्यशार्ङ्गमविद्यमानधनुः असदविद्यमानमित्ययं मदनवशः कामाभिभूतो मुग्धः ऋणं

इति मदनवशो मुग्धः शशाङ्के
रघुतनयो न च निश्चिकाय चन्द्रम् ॥ ६७ ॥

ससन्देहः ।

कुमुदवनचयेषु कीर्णरश्मिः
क्षततिमिरेषु च दिग्वधूमुखेषु ।
वियति च विललास तद्वदिन्दु-
र्विलसति चन्द्रमसौ न यद्वदन्यः ॥ ६८ ॥

अनन्वयः ।

शशाङ्के शशाङ्कविषये रघुतनयोऽभूदित्यर्थात् द्रष्टव्यं न च चन्द्रं निश्चिकाय निश्चिनोति स्म विभाषाचेरिति कुत्वं ससन्देह इति अशनिशरवर्षाभ्यां उपमेयस्य चन्द्रस्य तत्त्वं अशनिशरवर्षमिति प्रयोक्तुरभिधानात् कुतो निरभ्रे तदभ्राङ्कमिति पुनरुपमानोपमेययोर्भेदाभिधानात् न निश्चिकाय चन्द्रमिति स्तुत्यर्थं सन्देहवचोभिधानाच्च तथाचोक्तं उपमानोपमेयस्य तत्त्वञ्च वदतः पुनः । ससन्देहवचः स्तुत्यै ससन्देहं विदुर्यथेति ॥ ६७ ॥ ज० म०

अशनिरित्यादि । रघुतनयो रामः कामवशः सन् चन्द्रं न च निश्चिकाय न निर्णीतवान् किन्तु मुग्धः क्षणं इत्येवं शशङ्के वितर्कितवान् किमित्याह अयमशनिर्वज्रः असावशनिर्निरभ्रे नभसि कुतः यतो मेघादेवाशनिरुत्पद्यते किमिदं निशितानां शराणां वर्षं तदपि कुतः यतस्तदभ्राङ्कं अविद्यमानधनुरभूत् धनुषा विना न भवतीत्यर्थः शशाङ्क इति पाठे इत्येवं मदनवशश्चन्द्रविषये ऽभूत् न च चन्द्रं निश्चिकायेति योज्यम् । ससन्देह इति उपमेयस्य चन्द्रस्य उपमानाशनिशरवर्षरूपत्वमभिधाय कुत इत्यादिना पुनरुपमानोपमेययोर्भेदाभिधानात् तावतापि न च निश्चिकाय चन्द्रमिति ससन्देहवचोभिधानाच्च तथाचोक्तं उपमानेन यत्तत्त्वं भेदञ्च वदतः पुनः । ससन्देहवचःस्तुत्यै ससन्देहं विदुर्बुधा इति ॥ ६७ ॥ भ०

कुमुदवनचयेष्वित्यादि । कुमुदवनानां चयेषु समूहेषु दिग्वधूमुखेषु वियति च क्षततिमिरेषु क्षिप्ततमःसु यतस्तेषु विकीर्णरश्मिः क्षिप्तमयूखः विललास तद्वदिन्दुः शोभते स्म चन्द्रमसः सकाशात् अन्यो यद्वद्यथा न विलसति तथा विललास इदमुक्तं भवति इन्दुर्विललास चन्द्र इवेति अनन्वय इति तत्त्वदर्शस्य

शरणमिव गतं तमो निकुञ्जे
विटपिनिरावृतचन्द्ररश्मिरातौ ।
पृथुविषमशिलान्तरालसंस्थं
सजलघनद्युति भीतवत्प्रसाद ॥ ६९ ॥

उत्प्रेक्षावयवः ।

साध्यस्याविवक्षातश्चन्द्रस्योपमानोपमेयत्वात् तथाचोक्तं यत्र तेनैव तस्य स्यादुपमानोपमेयता । सादृश्यस्याविवक्षातस्तमित्याऽऽह्रनन्वयमिति ॥ ६८ ॥ ज० म०

कुमुदेत्यादि । इन्दुस्तद्वदिन्दुवत् विललास शोभते स चन्द्रादन्यः कोऽपि यद्वत् इन्दुवन्न विलसति इन्दुः कीदृशः कुमुदवनानां चयेषु समूहेषु दिग्वधूनां मुखेषु वियति आकाशे च ततविभिरेषु खण्डिताम्बकारेषु कीर्णरश्मिः प्रसारितकिरणः कोचित्तु इन्दुस्तद्वत्तथा विललास यद्वत् यथा चन्द्रमसोऽन्यो न विलसतीत्याह । एवं सति चन्द्रस्योपमानत्वमुपमेयत्वञ्च न स्यात् । अन्ये तु इन्दुर्यथा विललास तथा तदन्यो न विलसतीत्यर्थं चन्द्रस्योपमानत्वञ्चोक्तं स्यादित्याहुः । अनन्वय इति चन्द्रस्योपमानोपमेयत्वकथनेनान्यस्य तत्सदृशस्य निरासात् तथाचोक्तं रुद्रटे सा स्यादनन्वयाख्या यत्रैक्यं वस्त्वन्यदसदृशमिति । स्वस्य स्वयमेव भवेदुपमानञ्चोपमेयञ्च ॥ ६८ ॥ भ०

शरणमित्यादि । पृथुविषमशिलानां यान्यन्तरालानि तेषु संस्थं सन्निष्ठमानं सत्तमः निकुञ्जे गहने विटपिभिर्निरावृतायाश्चन्द्रस्य रश्मय एवारातयो यस्मान्निकुञ्जात् तस्मिन् ससाद विलीनं शरणमिव यथा कश्चित् भीतो दुर्गे लीयते सजलस्य घनस्येव द्युतिर्यस्य तमसः उत्प्रेक्षावयव इति भीतवत्प्रसादेति उपमालेषलक्षणस्य श्लिष्टार्थेन योगात् शरणमिव गतमित्युत्प्रेक्षायोगात् विटपिनिरावृतचन्द्ररश्मिरातावितिरूपकार्थेन योगात् तथाचोक्तं श्लिष्टार्थेन संयुक्तः किञ्चिच्चोत्प्रेक्षयान्वितः । रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथेति । विटपितिरस्कृतचन्द्ररश्मियोग इति पाठान्तरं तत्र रूपकार्थो नास्तीति असंपूर्णलक्षणता ॥ ६९ ॥ ज० म०

शरणमित्यादि । सजलस्य मेघस्य इव द्युतिर्यस्य तत् तमोऽन्धकारं पृथुविषमशिलायामन्तराले स्थितं सत् निकुञ्जे शरणं गतमिव शरणापन्नमिव ससाद विलीनं भीतवत् यथा कश्चिद्भीतो दुर्गवनान्तरे विलीयते निकुञ्जे कीदृशे विटपिभिर्वृक्षैर्निरावृता चन्द्ररश्मिरूपा आरातयस्तमःशत्रवो यस्मात् उत्प्रेक्षा-

अथ नयनमनोहरोऽभिरामं
स्मर इव चित्तभवोऽप्यवामशीलः ।
रघुसुतमनुजो जगाद वाचं
सजलघनस्तनयित्नुतुल्यघोषः ॥ ७० ॥

संसृष्टिः ।

पतिबधपरिलुप्तलोलकेशी-
र्नयनजलापहृताञ्जनौष्ठरागाः ।

वयव इति भीतवत् ससादेत्युपमाश्लेषरूपश्लिष्टस्यार्थेन योगात् शरणमिव गतमित्युत्प्रेक्षायायोगात् विटपिनिराकृतचन्द्ररश्मिप्रतापाविति रूपकार्थेन योगाच्च तथाचोक्तं श्लिष्टस्यार्थेन संयुक्तः कश्चिच्चोत्प्रेक्षयान्वितः । रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथेति चन्द्ररश्मियोग इति पाठे रूपकार्थो नास्तीत्यसम्पूर्णलक्षणता ॥ ६९ ॥ भ०

अथेत्यादि । अथ चन्द्रदर्शनानन्तरं रघुसुतं राममभिरामं कामाभिभूतत्वादाभिमुख्येन रमत इति अनुजः कनीयान् भ्राता वाचं वक्ष्यमाणं जगाद गदितवान् नयनमनोहरः प्रेक्षणीय इत्यर्थः इति तुल्ययोगिता न्यूनस्य लक्षणस्याधिकेन रामेण सहाभिरमणीयगुणसाम्यविवक्षया अभिरमणतुल्यक्रियायोगात् स्मर इव चित्तभवोऽपि तस्य चेतसि सदा भवतीति श्लिष्टं तथाप्यवामशीलोऽप्रतिकूल इति विरोधः स्मरस्य वामशीलः सजलघनस्तनयित्नुना शब्देन तुल्यो घोषो यस्य संसृष्टिरिति वक्ष्यलङ्कारयोगात् यथाचोक्तं पराभिभूता संसृष्टिर्व्वक्ष्यलङ्कारयोगतः । रचिता रत्नमालेन सा चैवं कथ्यते यथा ॥ ७० ॥ ज० भ०

अथेत्यादि । चन्द्रोदयदर्शनानन्तरं रघुसुतं रामं अभिरामं सुन्दरं अनुजो लक्ष्मणो वा चं वक्ष्यमाणं जगाद कीदृशः स्मर इव काम इव नयनमनोहरः तदुभयानन्दकः चित्तभवः रामस्य चित्ते विद्यमानः अवामशीलः अनुकूलस्वभावः चित्तभवोहि कामोऽवामशीलो भवति तत्पथप्रवर्त्तकत्वात् अयन्तु न तथेत्यापाततो विरोधस्यूचनायापिशब्दः सजलनिविडमेघतुल्यशब्दः । संसृष्टिरिति नानालङ्कारसंसर्गात् तथाहि स्मर इवेत्युपमा नयनमनोहर इति तुल्ययोगिता चित्तभव इति श्लेषः अवामशील इति विरोधः सजलघनेत्यादिना पुनरुपमा । तथाचोक्तं संसृष्टिरिति विज्ञेया नानालङ्कारसङ्कर इति ॥७०॥ भ०

पतीत्यादि । पतिबधेन परिलुप्ता भ्रष्टा लोलाः केशा यासां रिपुवनितानां

कुरु रिपुवनिता जहीहि शोकं
क्व च शरणं जगतां भवान् क्व मोहः ॥ ७१ ॥

आशीः ।

अधिगतमहिमा मनुष्यलोके
वत सुतरामवसीदति प्रमादी ।
गजपतिरुरुशैलशृङ्गवर्ष्मा
गुरुरवमज्जति पङ्कभाङ् न दारु ॥ ७२ ॥

हेतुः ।

नयनजलेनाश्रुणा अपहृतमञ्जनमोष्ठरागश्च यासान्ताः मन्दोदरीप्रभृतीः कुरु शोकं जहीहीत्याशंसे किं क्व भवान् जगतां शरणमाश्रयः क्व च मोह इति आशीरिति दृष्टस्याशंसनात् तथाचोक्तं आशीरिति च केषाञ्चिदलङ्कारतया मता । सौहृदस्याविरोधोक्तौ प्रयोगोऽस्याश्च तद्यथेति ॥ ७१ ॥ ज० म०

पतीत्यादि । किं जगादेत्याह रिपोरावणस्य वनिताः स्त्रियः पतिवधात् परिलुप्ता भ्रष्टा लोलाश्चञ्चलाः केशा यासां नयनजलेनापहृतमञ्जनमोष्ठरागश्च यासां तथाविधाः कुरु शोकं जहीहि त्यज इत्याशंसे यतो जगतां शरणं रक्षिता भवान् क्व मोहश्च क्व वा असम्भावनायां क्वेदयम् । आशीरिति दृष्टार्थाशंसनात् तथाचोक्तं आशीर्नामाभिलषिते वस्तुन्याशंसनं यथेति अन्यत्रापि आशीरिति च केषाञ्चिदलङ्कारतया मता । सौहृदस्याविरोधोक्तौ प्रयोगोऽस्याश्च तादृश इति ॥ ७१ ॥ भ०

अधिगतमहिमेत्यादि । मनुष्यलोके योऽधिगतमहिमा प्राप्ताधिपत्यः स प्रमादी शोकादिषु प्रमादवान् वत कष्टमवसीदति न कार्यसमर्थो भवति कुत एतदित्याह गजपतिः उरुशैलशृङ्गवर्ष्मा महाशैलशृङ्गप्रमाणं वर्ष्म वपुर्यस्य सः पङ्कभाक् पङ्कम्भजतीति भजोण्विः पङ्कमवतीर्णः सन् अवमज्जति अवसीदति यस्मादसौ गुरुः न पुनर्दारु काष्ठं तस्मान्मुञ्च शोकं हेतुरिति गजपतेर्हेतुद्वारेण निर्देशात् अयमर्थान्तरो दृष्टव्यः ॥ ७२ ॥ ज० म०

अधीत्यादि । अधिगतमहिमा प्राप्ताधिपत्योऽपि मनुष्यलोके प्रमादी कार्येऽनवधानवान् सन् वत कष्टं सुतरां अवसीदति कार्यासमर्थो भवति कुत इत्याह उरुशैलशृङ्गवर्ष्मा महापर्वततिग्मशरप्रमाणशरीरो गजपतिः पङ्कभाक् पङ्कमवतीर्णः

बोद्धव्यं किमिव हि यत्त्वया न बुद्धं
किं वा ते निमिषितमप्यबुद्धिपूर्व्वम् ।
लब्धात्मा तव सुकृतैरनिष्टशङ्की
स्नेहौघो घटयति मां तथापि वक्तुम् ॥ ७२ ॥

निपुणम् ।

सौमित्रेरिति वचनं निशम्य रामो
जृम्भावान् भुजयुगलं विभज्य निद्रान् ।

सन् अवमज्जति पङ्के प्रविशति यस्मादसौ गुरुः न तु दारु काष्ठं मज्जति लघुत्वात् तस्मान्मृतं प्रमादो विनाशहेतुः न तु लघीयसां तत्कारणं शोकं संत्यजेति भावः । हेतुरिति गजपतेर्हेतुद्वारेण निर्देशात् तथाचोक्तं हेतुमता सह हेतोरभिधानमभेदकृत्यत्र । सोऽलङ्कारो हेतुः स्यादन्येभ्यः पृथग्भूतः ॥७२॥भ०

बोद्धव्यमित्यादि । किमिव तद्बोद्धव्यं ज्ञातव्यमस्ति नैवेत्यर्थः यत्त्वया न बुद्धं बुद्ध्या विज्ञेयं तव किञ्चिच्चेष्टितमपि नोपेक्षापूर्व्वकं यतो निमिषितमप्यक्ष्णोर्निमीलनमपि अबुद्धिपूर्व्वकं नैवेत्यर्थः यद्येवं किमित्यस्माकमुपदिशसीत्याह लब्धात्मेति तथापि सुकृतैर्लब्धात्मा लब्धजन्मा स्नेहौघः स्नेहसमूहः अनिष्टशङ्की अनिष्टशङ्कनशीलः मामित्यत्रेति घटयति निपुणमिति अर्थावगाटत्वादस्य चोदात्तेऽन्तर्भावो द्रष्टव्यः भाविकत्वमित्यलङ्कार उक्तः तद्वस्तुविषयत्वात्पृथक् प्रदर्शयिष्यति ॥ ७२ ॥ ज० म०

बोद्धव्यमित्यादि । यत्त्वया न बुद्धं तद्बोद्धव्यं किमिवास्ति अपि तु न किञ्चिदेव इवशब्दोऽसम्भावनायां तव निमिषितमपि चक्षुषोर्निमीलितमपि किंवा अबुद्धिपूर्व्वकं नैवेत्यर्थः अतो न किञ्चिदपि चेष्टितं तवानवधानपूर्व्वकमिति भावः अतो यद्यपि भवतो नोपदेशो युक्तस्तथापि सुकृतैस्तव सुष्ठु कर्म्मभिरस्मत्पुण्यैर्वा लब्धात्मा प्राप्तस्वरूपो जातः स्नेहसमूहस्त्वानिष्टशङ्काशीलः मां वक्तुं घटयति त्वामुपदेष्टुं मां प्रेरयति इत्यनुजो जगादेति पूर्व्वेणान्वयः निपुणमिति कनिष्ठस्य ज्येष्ठोपदेशानौचित्येऽपि नैपुण्ये नोक्तत्वात् निपुणनामायमलङ्कार इति प्राञ्च इति विद्यासागरः अस्य प्रेयस्यन्तर्भाव इति देवनाथः प्रेयः प्रियतराख्यानमिति तल्लक्षणात् उदात्तमध्येऽन्तर्भाव इति जयमङ्गला ॥ ७२ ॥ भ०

सौमित्रेरित्यादि । इत्येवं लक्ष्मणस्य वचनं निशम्य श्रुत्वा रामो जृम्भावान्

अध्यष्ठाच्छिशयिषया प्रवालतल्पं
रक्षायै प्रतिदिशमादिशन् प्लवङ्गान् ॥ ७४ ॥

इति भट्टिकाव्ये प्रसन्नकाण्डे काव्यालङ्कारो नाम
दशमः सर्गः ।

जातजृम्भिकः जृम्भणं जृम्भा गुरोश्च हल इत्यकारः शप् निद्रान् निद्राङ्कृच्छन् द्राकृत्मितायां गतावित्यस्मादादादिकस्य निपूर्वस्य शतरि रूपं शिशयिषया शयितुमिच्छया भुजयुगलं विभज्य एकं शिरःस्थाने न्यस्य द्वितीयं शरीरस्योपरि प्रसार्येत्यर्थः विभज्येति पाठान्तरं तत्र क्रोडभागे वक्रीकृत्येत्यर्थः प्रवालतल्पं पल्लवशयनीयं अध्यष्टात् अधिष्ठितवान् गातिस्थेति सिचो लुक् प्राक्सितेत्यादिना षत्वं सस्तृदिद्दत्तया नियमपूर्वं सुप्त्वापेत्यर्थः रक्षायै रक्षानिमित्तं प्लवङ्गमानादिशन् नियोजयन् प्रतिदिशं दिशि दिशि अव्ययीभावे शरत्प्रभृतिभ्य इति टच् तत्र दिक्शब्दस्य पठितत्वात् ॥ ७४ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां प्रसन्नकाण्डे काव्यालङ्कारदर्शनः प्रथमः
परिच्छेदः सीताभिज्ञानदर्शनो नाम काव्यस्य दशमः सर्गः ।

सौमित्रेरित्यादि । इत्येवं लक्ष्मणस्य वचनं निशम्य श्रुत्वा रामः प्रतिदिशं दिशि दिशि रक्षणार्थं प्लवङ्गान् वानरान् आदिशन् जृम्भावान् सन् निद्रान् निद्राङ्कृच्छन् शिशयिषया शयितुमिच्छया प्रवालशय्यामध्यष्टात् अधिष्ठितवान् भुजयुगलं विभज्य भग्नं कृत्वा एकं शिरःस्थाने निवेश्य अपरञ्चोरःस्थाने शिरस उपरि वा निवेश्येत्यर्थः विगुह्येति पाठे तत्र क्रोडोपरि वक्रीकृत्येत्यर्थः निद्रानिति निपूर्वात् द्रालस्त्रे इत्यस्मात् शतः अध्यष्टादिति अधिपूर्वस्तिष्ठतेष्ठांसिः भूस्येत्यादिना सेर्लुक् गीक इत्यादिना षत्वं कर्मक्रियेत्यादिना आधारस्य कर्मत्वं प्रतिदिशमिति वीप्सायामव्ययीभावः शरद्विपाडय इत्यादिना अप्रत्ययः ॥७४॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनविरचितायां
सुग्धबोधिन्यां भट्टिटीकायां प्रसन्नकाण्डे काव्यालङ्कारदर्शनं नाम
प्रथमः परिच्छेदः काव्यस्य सीताभिज्ञानदर्शनं नाम दशमः सर्गः ।

एकादशः सर्गः।

अथास्तमासेदुषि मन्दकान्तौ पुण्यक्षयेणेव निधौ कलानाम्।
समाललम्बे रिपुमित्रकल्पैः पद्मैः प्रहासः कुमुदैर्विषादः ॥१॥

माधुर्य्यमपि काव्यस्य गुण उक्तः तथाचोक्तं श्राव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यत इति तत्प्रदर्शनार्थं लङ्कागतप्रभातवर्णनमधिकृत्याह

अथेत्यादि। अथानन्तरं कलानां निधौ चन्द्रमसि अस्तं पर्व्वतमासेदुषि गतवति यथा कस्मिंश्चित् पुण्यक्षयेणावसानमासेदुषि भाषायां सदवसेति लिटः कसुरादेशः मन्दकान्तावित्यस्तगमने पूर्व्वलिङ्गं दर्शयति रिपुकल्पैः पद्मैः प्रहासः विकाशः मित्रकल्पैः कुमुदैर्विषादः सङ्कोचः समाललम्बे समालम्बितः॥१॥ज०स०

अथेत्यादि। अथ गुणाः प्रदर्श्यन्ते यतः अलङ्कृतमपि श्राव्यं न काव्यं गुणवर्জ্জितम्। गुणयोगस्ततो मुख्यो गुणालङ्कारयोगयोः। वामनादिभिर्दश-गुणा मन्यन्ते ते तु श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता। अर्थव्यक्ति-रुदारत्वमोजःकान्तिसमाधय इति अन्ये तु और्জित्यमर्थसौख्यञ्च गाम्भीर्य्य-मर्थविस्तरः। संक्षेपः समितत्वञ्च भाविकत्वं गतिस्तथा। रतिव्यक्तिस्तथा प्रौढिः प्रेयानथ सुभव्यता इत्येतानर्थाधिकान् गुणानाहुः। काव्यप्रकाश-कृता तु माधुर्य्यौजःप्रसादाख्यास्त्रयस्तेन पुनर्दर्शितेत्युक्तं तन्मते माधुर्य्यप्रकाशक एवायं सर्ग आरभ्यते तथाचोक्तं कण्ठाभरणे श्रुङ्गार एव मधुरः स च प्रह्लाद-नोरसः। तन्मयं काव्यमाश्रित्य माधुर्य्यं प्रति तिष्ठतीति अत्र सर्गे प्रसाद-गुणोऽपि द्रष्टव्यः तत्र लङ्कागतप्रभातवर्णनं प्रस्तूयते। अथानन्तरं यथा पुण्यक्षयेण कश्चिदस्तं याति तथा कलानां निधौ चन्द्रे मन्दकान्तौ मन्दप्रभे अस्तं पर्व्वतमासेदुषि प्राप्ते सति रिपुकल्पैः पद्मैः प्रहासो विकाशः पक्षे प्रकृष्टहासः मित्रकल्पैः कुमुदैर्विषादः सङ्कोचः पक्षे विषण्णता समाललम्बे अथास्तमासेदु-षीति श्लेषोऽत्र भव्दगुणः तथाचोक्तं गुणः सुश्लिष्टपदता श्लेष इत्युपदिश्यते। इति प्रसादोऽप्यत्रास्ति प्रसिद्धार्थपदत्वं यत् प्रसादोऽसौ निगद्यत इति लक्षणं पद्मैः प्रहास इत्यत्र माधुर्य्यं गुणो या पृथक्पदता काव्ये तन्माधुर्य्यप्रसादाहृतमिति

दूरं समारुह्य दिवः पतन्तं भृगोरिवेन्दुं विहितोपकारम् ।
बद्धानुरागोऽनुपपात तूर्णं तारागणः संभृतशुभ्रकीर्त्तिः ॥ २ ॥
क्व ते कटाक्षाः क्व विलासवन्ति प्रोक्तानि वा तानि ममेति मत्वा ।
लक्ष्मीकृनानामवबोधकाले तुलामनारुह्य गतोऽस्तमिन्दुः ॥ ३ ॥

न्यायात् आसेदुषीत्यत्र सुशब्दतापि व्युत्पत्तिः सुप्तिङन्तं पदं इति सुशब्दतेति वचनात् पद्मैः प्रहास इत्यत्र समाधिरप्यस्तिः समाधिः सोऽन्यवर्णानां यदन्यत्रापि रोपणं प्रहासस्येतनाधर्म्मः स चान्यत्राधिरोपित इति एवमन्यत्रापि गुणनिरूपणं कर्त्तव्यम् ॥ १ ॥ भ०

दूरमित्यादि । दूरमाकाशस्य भागमारुह्य पश्चात्तत एवाकाशात् भृगोरिव प्रपातादिव पतन्तमिन्दुं तारापतिमनु पश्चात् तारागणः विहितोपकारं तदुदयेन तारागणाध्यायनाच्चेद्बद्धानुरागः अस्तगमनकाले अनुगतरक्तभावः संभृता विपुलीकृता शुभ्रा निर्मला कीर्त्तिर्येन स तारागणः पपात यथा कश्चिच्चित्स्वामिनि भृगोः पतति पश्चात्स्वामिभक्त्या भृत्यलोको बद्धानुरागः संभृतशुभ्रकीर्तिः पतति तद्वदिति ॥ २ ॥ ज० म०

दूरमित्यादि । दिव आकाशस्य दूरं भागमारुह्य पश्चात्तत एव सकाशात् भृगोः प्रपाताख्यपर्व्वतोच्चभागादिव पतन्तमधस्तान्नश्यन्तमिन्दुं विहितोपकारं तदुदये तारागणस्याध्यायनात्तारापतित्वाच्च तारागणस्तूर्णमनुपपात अनुजगाम तमनु लक्ष्मीकृत्य पपातेति वा कीदृशः बद्धानुरागः अस्तगमनकाले रक्तत्वात् संभृता उपचिता शुभ्रा निर्म्मला कीर्त्तिर्येन अन्योऽपि भार्य्यागणोऽनुरक्तः सन् पतिमनुगच्छन् निर्म्मलकीर्त्तिर्भवति अतोदारत्वमर्थगुणः आश्रयस्य य उत्कृष्टस्तदुदारत्वमिष्यत इति लक्षणात् समत्वगुणोऽप्यत्र चन्द्रस्यास्तगमने तारागणस्यासम्भवात् तथाचोक्तं अनैश्वर्यं क्रमतया समत्वमभिधीयत इति प्रसादोऽप्यर्थगुणोऽत्र लोकप्रसिद्धार्थत्वात् तदुक्तं यत्तु प्राकृतमर्थस्य प्रसादः सोऽभिधीयत इति ॥ २ ॥ भ०

क्व त इत्यादि । ये कटाक्षाः सविलासास्तिर्य्यग्दृष्टयः यानि च प्रोक्तानि जल्पितानि विलासवन्ति तदुभयं क्व मम विद्यते लक्ष्मीकृनानान्तु सुखेन्दवः सकटाक्षाः सविलासाः जल्पिताश्च अतो यावन्न विबुध्यन्ते तावदपक्रमणं युक्तमिति मत्वा निरूप्य तुलामनारुह्य समानतामलब्ध्वा निःसंशयो वा भूत्वा तत्प्रबोधकाले लक्ष्मीकृनानामेवं गतोऽस्तमिन्दुः ॥ ३ ॥ ज० म०

मानेन तल्पेष्वयथासुखीना मिथ्याप्रसुप्तैर्गमितत्रियामाः ।
स्त्रीभिर्निशातिक्रमविह्वलाभिर्दृष्टेऽपि दोषे पतयोऽनुनीताः ॥४॥

क्व ते इत्यादि । मम ते प्रसिद्धाः विलासवन्तः कटाक्षाः क्व तानि वा विलासवन्ति प्रकृष्टजल्पितानि क्व न सन्त्येवेत्यर्थः लङ्कास्त्रीणान्तु लङ्कासुखेन्दुषु तदुभयमप्यस्ति अतएव यावत्तदुदयो न भवति तावदपक्रमणं युक्तमिति मत्वा तुलां तत्साम्यं अनारुह्य अप्राप्य लङ्कास्त्रीणां प्रबोधसमये जागरणकाले इन्दुरस्तं गतः विलासवन्तीति पुंनपुंसकविशेषणत्वेऽपि सामान्यत्वान्नपुंसकत्वं नपुंसकानपुंसकयोर्नपुंसकमेवेति श्रीपतिरूक्तत्वेन वा नपुंसकत्वं तात्कालिकविशेषस्तु विलासोऽङ्गक्रियोक्तिषु । प्रसिद्धानुभूतार्थविषयतच्छब्दो यच्छब्दं नापेक्षत इति काव्यप्रकाशः अत्रौर्जित्यं गुणः और्जित्यं गाढबन्धनेति तल्लक्षणात् माधुर्य्यमप्यत्र पूर्ब्ववत् सुकुमारतापि अनिष्ठुराक्षरप्रायं सुकुमारमिहेष्यत इति न्यायात् उदात्ततापि विलासवन्तीति श्राव्यविशेषणात् तदुक्तं श्राव्यैर्विशेषणैर्योगो यस्तु साम्यादुदात्ततेति गाम्भीर्यप्रमप्यर्थगुणोऽत्र विलासादीनां शास्त्रादेव ज्ञानात् । तथाचोक्तं शास्त्रार्थं सव्यपेक्षत्वं गाम्भीर्यप्रमभिधीयत इति ॥३॥भ०

मानेनेत्यादि । पतयस्तल्पेषु शयनीयेषु मानेनायथासुखीनाः पराङ्मुखाः यथासुखसंसुखस्य दर्शनं खः पराङ्मुखत्वात् प्रतिबिम्बाश्रयवक्त्रेषु योषितां प्रतिबिम्बमिव मनो न प्रसादीभवतीत्येवं मिथ्याप्रसुप्तैरलीकनिद्राभिः गमितत्रियामाः प्रेरितप्रथमादिप्रहराः दृष्टेऽपि दोषे गोत्रस्खलितादौ स्त्रीभिरनुनीता यतो-निशातिक्रमात्पर्य्यवसानात् विक्लवा विह्वलास्ताः ॥ ४ ॥ ज० म०

मानेनेत्यादि । स्त्रीभिर्दृष्टेऽपि दोषे गोत्रस्खलनादौ पत्यनुनयेन स्वस्यामनस्वित्वादिदोषे ज्ञातेऽपि वा पतयोऽनुनीताः अनुनयकरणे हेतुमाह कीदृशीभिः निशाया अतिक्रमात् पर्य्यवसानात् विह्वलाभिः कीदृशाः पतयः चाटूक्तिपादपतनेनापि प्रियामप्रसन्नां बुद्धा मानेन तल्पेषु शय्यासु अयथासुखीनाः पराङ्मुखाः किमियं करिष्यतीति ज्ञातुं मिथ्याप्रसुप्तैरलीकनिद्राभिर्गमितरात्रयः अतिवाहितप्रहरत्वया इत्यन्ये अयथासुखीना इति सुखस्यानतिक्रमः प्रियाभिमुखस्थितत्वरूपो यथासुखं ततः स्वार्थे ईनः ततो नञ्समासः विद्यासागरस्तु यथासुखं सम्मुखं दृश्यत अस्मिन्निति ईनः यस्मान्नञ्समन्वयः यथाशब्दोऽभिमुखे वर्त्तते अव्ययानामनेकार्थत्वादित्याह स्वभतेऽपि तथा विकारसंघेत्यादावीषद्शब्दात् अन्ये तु यथासुखमिति सादृश्यनिपातनान्नञ्न्यमित्याहुः अत्र कान्तिर्दीप्तरसत्वं स्यादिति

ईर्ष्याविरुग्नाः स्थिरबद्धमूला निरस्तनिःशेषशुभप्रतानाः ।
आप्यायिता नेत्रजलप्रसेकैः प्रेमद्रुमाः संरुरुक्षुः प्रियाणाम् ॥५॥
ततः समाशङ्कितविप्रयोगः पुनर्नवीभूतरसोऽविहृष्णुः ।
स्मरस्य सन्तं पुनरुक्तभावं नावर्त्तमानस्य विवेद लोकः ॥६॥

समाधिरप्यत्रार्थगुणः मिथ्याप्रसुप्तत्वात् व्याजावलम्बनं यत्तु स समाधिरिति स्मृत इति ॥ ४ ॥ भ०

ईर्ष्याविरुग्ना इत्यादि । प्रियाणां प्रेमद्रुमाः प्रेमाणि द्रुमा इव स्थिरं निश्चलं बद्धमूलं उत्पत्तिकारणं येषां ते ईर्ष्याविरुग्नाः अतएव निरस्ताः निःशेषाः शुभा एव हसितजल्पितादयः प्रताना शाखा येषां ते प्रसादनानन्तरं नेत्रजलप्रसेकैराप्यायिताः संरुरुक्षुः पुनर्नवीभूताः स्थिरबद्धमूलत्वात् ॥५॥ ज०भ०

ईर्ष्येत्यादि । प्रियाणां प्रेयसां प्रेयसीनां वा एकशेषादुभयेषां प्रेमाणि द्रुमा इव संरुरुक्षुः पुनः प्ररूढवितः यतो नेत्रजलप्रसेकैः आप्यायिताः प्रीणिताः स्थिरबद्धमूलाः स्थिरं निश्चलं बद्धं सम्बद्धं मूलमुत्पत्तिकारणं येषां कीदृशाः पूर्व्वमीर्ष्यया परोत्कर्षात्तमया विरुग्नाः भग्ना अतएव निरस्ता निःशेषाः शुभा एव हसितजल्पितादय एव प्रतानाः शाखास्तेषां विस्तारो वा येषां अन्येऽपि स्थिरबद्धमूला दृढा भग्ना अपि हतप्रताना अपि जलसेकैराप्यायिताः सन्तः संरोहन्तीति भावः । प्रौढिरत्रार्थगुणः विवक्षितार्थनिर्व्वाहः काव्ये प्रौढिरिति स्मृता प्रेम्णो द्रुमत्वनिर्व्वाहात् ॥ ५ ॥ भ०

तत इत्यादि । प्रेमद्रुमरोहणानन्तरं लोकः समाशङ्कितविप्रयोगो विप्रयोगोऽस्माकमासन्नवर्त्तीति पुनर्नवीभूतरसः अभिनवीभूतसुरतेच्छः स्मरस्य कामस्य आवर्त्तमानस्य पुनःपुनः प्रवर्त्तनात् अविहृष्णुः साभिलाषः सन्तमपि विद्यमानमपि पुनरुक्तभावं पौनःपुन्यं न विवेद आशङ्कितप्रयोगत्वादपूर्व्वमिव ज्ञातवानित्यर्थः ॥ ६ ॥ ज० भ०

तत इत्यादि । प्रेमसंरोहाद्वेतोरनन्तरं वा आवर्त्तमानस्य पुनः पुनः प्रवर्त्तमानस्य स्मरस्य कन्दर्पस्य पुनरुक्तभावं पौनःपुन्यं सन्तं विद्यमानमपि लोको न विवेद न ज्ञातवान् यतो रात्रिगमनेनाशङ्कितविरहः अतएव पुनर्नवीभूतसुरतेच्छः अतएवाविहृष्णुः हृष्णाविगमरहितः पुनस्तृष्णोदयात् अधिहृष्ण इति पाठे अधिकतृष्ण इत्यर्थः अत्रापि कान्तिगुणो दीप्तरसत्वात् प्रेयोऽस्ति प्रेयस्त्वेनाभीष्टता अभीष्टस्य कामस्य प्रतिपादनात् ॥ ६ ॥ भ०

दृत्तौ प्रकाशं हृदये कृतायां सुखेन सर्वेन्द्रियसम्भवेन ।
सङ्कोचमेवासहमानमस्यादशक्नुवद्वञ्चितमानि चक्षुः ॥ ७ ॥
पीने भटस्योरसि वीक्ष्य भुग्नांस्तनुत्वचः पाणिरुहान् सुमध्या ।
इच्छाविभङ्गाकुलमानसत्वाद्भर्त्रे नखेभ्यश्च चिरं जुजूरे ॥ ८ ॥

दृत्तावित्यादि । सुरतकाले श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानां इन्द्रियाणां शब्द-स्पर्शरूपरसगन्धग्रहणात् सर्वेन्द्रियसम्भवं सुखं अथवा सर्वमिन्द्रियं यत्रेति सर्वेन्द्रियः कायः तत्सम्भवं सुखं सर्वेन्द्रियसम्भवं सुखं तथा ह्यालिङ्गनचुम्बन-दर्शनच्छेदनेषु पुरुषोपसृष्टेषु तत्र प्रयुज्यमाने काये सुखसत्पद्यते तेन सुखेन हृदये चेतसि प्रकाशं स्पष्टं दृत्तौ कृतायां चक्षुर्वञ्चितमिवात्मानं मन्यमानं आत्म-मात्रे खत्वेति णिनिः सङ्कोचमेव निमीलनमेवास्यात् अनुष्ठितवत् असहमानमिति सर्वेन्द्रियसम्भवस्य सुखस्य हृदये दृत्तिं सोढुमपारयदित्यर्थः अशक्तवत् यथा कश्चि-दसमर्थोऽन्यसम्भवां सम्पदं सोढुमसहमानः सङ्कोचमनुतिष्ठति ॥७॥ ज० म०

दृत्तावित्यादि । सुखेन हृदये चेतसि प्रकाशं स्पष्टं दृत्तौ स्थितौ कृतायां सत्यां चक्षुः कर्तृ सङ्कोचं निमीलनमपि असहमानमेवास्यात् कुचसङ्कोचे इत्यस्मा-द्वञ् यतो वञ्चितमानि सङ्कोचे सति क्षणमपि रूपादर्शनेनात्मानं वञ्चितमिव मन्यते अशक्तवत् यथा असमर्थं चक्षुर्निष्पन्दं भवति तथा प्रियाङ्गे निष्पन्दमित्यर्थः यद्वा सुखस्य हृदि दृत्तौ सत्यां हृदयाप्रवेशेन वञ्चितमिवात्मानं मत्वा चक्षुः सङ्कोचं सङ्कुचितमेवास्यात् असहमानं हृदयस्थं सुखं सोढुमसमर्थमिव अशक्तवत् यथा कश्चिदसमर्थोऽन्यसम्पदं असहमानः सङ्कोचित एव तद्वत् यद्वा अशक्तवत् यथा असमर्थं चक्षुरुन्मीलनाक्षमं सत् सङ्कुचितमेव तिष्ठति तद्वत् सुरतान्ते नेत्र-निमीलनस्थो प्रेक्षेयं कचकौटिल्ये खेलने इत्यस्मात् पचादित्वादनि कुटादित्वा-ङ्णाभावः सुखेन क्रीडनेन सर्वेन्द्रियसम्भवेन रतिकाले स्वविषयसम्बन्धैः सर्वैरिन्द्रियैर्युगपदित्यादिना यद्वा सर्वाणि इन्द्रियाणि यस्य स सर्वेन्द्रियः कायः तेनोत्पादितेन प्रौढिरत्र गुणः विशिष्टा भणितिर्या स्यात् प्रौढिं तां कवयो विदुः । उचितनिमीलनस्यासहनजन्यत्वात् पूर्ववन्माधुर्यमपि शब्दगुणोऽत्र पृथक्पदत्वात् ॥ ७ ॥ म०

पीने इत्यादि । काचित् सुमध्या सुमध्यमा नखैः व्यापद्यमाना अहमस्य क्षतं विधास्यामीति भटस्योरसि पीने कठिने भुग्नान् कुञ्चितान् भग्नानिति पाठान्तरं पाणिरुहान्नखान् वीक्ष्य भर्त्रे नखेभ्यश्च चिरं जुजूरे क्रुध्यति स्म कथमस्य

स्रस्ताङ्गचेष्टो विनिमीलिताक्षः स्वेदाम्बुरोमोद्गमगम्यजीवः ।
अशेषनष्टप्रतिभापटुत्वो गाढोपगूढो दयितैर्जनोऽभूत् ॥ ९ ॥
तमः प्रसुप्तं मरणं सुखं नु मूर्च्छा नु माया नु मनोभवस्य ।
किं तत्क्रियं वेत्युपलब्धसंज्ञा विकल्पयन्तोऽपि न संप्रतीयुः ॥ १० ॥

वक्षः कठिनं मम च नखास्तनुत्वचो न कठिना इति पूरीजूरीहिंसाव्ययोर्हान्योरित्यस्मात्सनेषदिनो रूपं क्रुधद्रुहेत्यादिना सम्प्रदानसंज्ञा कक्षाज्जुजूर इत्याह इच्छाविभङ्गाकुलमानसत्वात् चिकीर्षिताकरणेनाकुलचित्तत्वात् ॥८॥ ज० म०

पीने इत्यादि । कापि सुमध्या दयितेन नखैः खण्ड्यमाना अहमप्यस्य क्षतं विधास्यामीति मत्वा भटस्य योधस्य पीने कठिने उरसि दत्तान् पाणिरुहान् नखान् मृदुत्वक्त्वात् भग्नान् कुण्ठितान् भुग्नानिति पाठे कुटिलान् वीक्ष्य दृष्ट्वा चिकीर्षाविभङ्गेन व्याकुलचित्ततया भर्त्रे नखेभ्यश्च चिरं चिरकालं व्याप्य जुजूरे क्रुध्यति स्म ऊज्जूरीयोज्यानौ बधे अनेकार्थत्वात् कोपेऽपि यश्चै दित्येत्यादिना सम्प्रदानत्वं शास्त्रव्यपेक्षत्वं गाम्भीर्यमत्र गुणः कामशास्त्रे मानावसाने स्थानविशेषे नखक्षतदानस्योक्तत्वात् ॥ ८ ॥ भ०

स्रस्ताङ्गचेष्ट इत्यादि । दयितैर्गाढोपगूढः आलिङ्गितः सन् स्त्रीजनः अशेषनष्टप्रतिभाटुत्वोऽभूत् अशेषं नष्टं प्रतिभाया बुद्धेः पटुत्वं यस्येति एवञ्च कृत्वा स्रस्ताङ्गचेष्टोऽपगतकायव्यापारः विनिमीलिताक्षः सुखानुभवान्निमीलितलोचनः मृतस्तूष्णीत्याह स्वेदाम्बुरोमोद्गमगम्यजीवः स्वेदाम्बुरोमोद्गमाभ्यां लिङ्गाभ्यां गम्यमानसंज्ञः ॥ ९ ॥ ज० म०

स्रस्तेत्यादि । स्त्रीजनो दयितैर्गाढालिङ्गितः सन् अशेषनष्टप्रतिभापटुत्वोऽभूत् अशेषं समस्तमेव नष्टं प्रतिभायाः बुद्धेः पटुत्वं यस्य अतएव स्रस्ताङ्गचेष्टः अपहृतदेहव्यापारः सुखानुभवात् विनिमीलितलोचनः स्वेदजलरोमाञ्चाभ्यां गम्यमानजीवः जनशब्दोऽत्र स्त्रीजातिवाचकः तेन दयितैरित्यत्र बहुत्वमदुष्टं गाढालिङ्गनकारित्वेन गौरवे बहुत्वं वा कान्तिरत्र गुणो दीप्तरसत्वात् ॥९॥ भ०

तम इत्यादि । कामुका अपि सुरतावस्थाया उत्तरकालं उपलब्धसंज्ञा विकल्पयन्ति तमो नु किमन्धकारं प्रसुप्तं नु किं प्रकर्षेण सुप्तं मरणं नु मरणावस्था नु सुखन्नु मूर्च्छा नु मनोभवस्य वा मायेति किं तद्भवति कथं वा केन प्रकारेण तत्स्यात् इत्येवं विकल्पयन्तोऽपि न सम्प्रतीयुः न परमार्थं ज्ञातवन्त इत्यर्थः ॥ १० ॥ ज० म०

वक्षस्तनाभ्यां मुखमाननेन गात्राणि गात्रैर्घटयन्नमन्दम् ।
स्मरातुरो नैव तुतोष लोकः पर्याप्तता प्रेम्णि कुतो विरुद्धा॥११॥
स्वस्ताङ्गयष्टिः परिरभ्यमाणा संदृश्यमानाप्युपसंहृताक्षी ।
अनूढमाना शयने नवोढा परोपकारैकरसैव तस्थौ ॥ १२ ॥

तम इत्यादि । कामुका अपि सुरतावस्थाया उत्तरकालमुपलब्धचैतन्याः सन्तो विकल्पयन्तीत्याह किं तमः प्रागन्धकारं दृष्टं वस्त्वन्तरानुपलम्भात् प्रसुप्तं वा प्रसुप्तिर्यत्र स्वप्नोऽपि न दृश्यते मरणं वा अचेष्टत्वात् सुखं वा अनुभूयमानत्वात् मूर्च्छा मोहो वा क्षत्यक्षाप्यस्मरणान्मनोभवस्य कामस्य माया वा किन्तद्भवत् केन प्रकारेण वेति एवं विकल्पयन्तोऽपि न संप्रतीयुः परमार्थं न निश्चितवन्तः पूर्ववदत्र माधुर्यंत्र गुणः ॥१०॥ भ०

वक्ष इत्यादि । वक्षोसुखगात्राणि स्वानि स्तनादिभिः स्त्रीसम्बन्धिभिर्घटयन् संश्लेषयन् अमन्दं दृढं ऽभीक्ष्णं सादचिङ्मुट् स्मरातुरो लोको नैव तुतोष तुष्टिं न जगाम यतः पर्याप्तता प्रेम्णि कुतो विरुद्धा नैव तस्याविरुद्धत्वात् ॥ ११ ॥ ज० म०

वक्ष इत्यादि । स्मरातुरो लोकः कामार्त्तो जनः स्वकीयं हृदयादि स्त्रीस्तनादिना अमन्दं दृढं घटयन् संश्लेषयन् नैव तुतोष न तृप्तिं जगाम कुत इत्याह प्रेम्णि पर्याप्तता इच्छाविच्छेदः कुतो भवेत् यतः सा विरुद्धा कान्तित्वापि गुणः ॥ ११ ॥ भ०

स्वस्ताङ्गयष्टिरित्यादि । काचिन्नवोढा परिरभ्यमाणा पत्या आलिङ्ग्यमाना स्वस्ताङ्गयष्टिः न प्रतीपमालिङ्गति संदृश्यमानापि सुखसुप्तमस्य उपसंहृताक्षी निमीलितलोचना न प्रतीपं पश्यति मानं नेवाचरतीति अनूढमानापि आहूतमानापि एवं विधापि सती परोपकारैकरसैव तस्थौ भर्तुरुपकारैकाभिप्रायैव अवस्थिता नात्मोपकाराय ॥ १२ ॥ ज० म०

स्वस्ताङ्गयष्टिरित्यादि । काचिन्नवोढा शयने शय्यायां परोपकारैकरसा पत्युपकारमात्राभिप्रायैव तस्थौ न तु स्वोपकाराय यतः परिरभ्यमाणा दयितेनालिङ्ग्यमाना स्वस्ताङ्गयष्टिर्न प्रत्यालिङ्गनं करोति नापि प्रतीपा सुखसुप्तमस्य संदृश्यमानापि उपसंहृताक्षी निमीलितनेत्रा न पश्यति मानमेवं करोतीति चेदाह अनूढमाना लज्जयैव अकृतमाना तथा करोतीत्यर्थः । पूर्ववन्माधुर्यादिगुणोऽत्र बोध्यः एवमग्रेऽपि ॥ १२ ॥ भ०

ASIATIC SOCIETY OF LIBRARY

आलिङ्गिताया: सहसा त्वपावांस्त्रासाभिलाषानुगतो रतादौ ।
विश्वासिताया रमणेन वञ्चा विमर्दरम्यो मदनो बभूव ॥१३॥
सामोन्मुखेनाक्कुरिता प्रियेण दत्ते ऽथ काचित्पुलकेन भेदे ।
अन्तःप्रकोपापगमाद्विलोला वशीकृता केवलविक्रमेण ॥ १४ ॥
गुरुर्दधाना पुरुषत्वमन्या कान्तापि कान्तेन्दुकराभिसृष्टा ।
प्रह्लादिता चन्द्रशिलेव तूर्णं क्षोभात् स्ववत्स्वेदजला बभूव॥१५॥

आलिङ्गिताया इत्यादि । कस्याश्चिद्वध्वा रताराक् रमणेन सहसा तत्क्षणं आलिङ्गितायास्त्वपावान्मदनो बभुव रतादौ रतारम्भे त्रासाभिलाषाभ्यामनुगतो बभूव विश्वासितायाः शनैर्विश्वासं कारितायाः विमर्दरम्यो बभूव त्रासाभावात् ॥ १३ ॥ ज० म०

आलिङ्गिताया इत्यादि । रतादौ रतात्पराक् रमणेन कान्तेन सहसा अकस्मादालिङ्गितायाः कस्याश्चिद्वध्वा मदनस्त्वपावान् लज्जावान् त्रासेनाभिलाषेण चानुगतश्च बभूव किंवा आलिङ्गनेन सहसा त्वपावान् रतादौ सुरतारम्भे त्रासाभिलाषाभ्यामनुगतः पश्चात् शनैःशनैर्विश्वासिताया विश्वासं प्रापितायाः तस्या एव मदनो विमर्देन रम्यो बभूव त्रासाभावात् ॥ १३ ॥ भ०

सामोन्मुखेनेत्यादि । अथ काचित्कोपान्मानवती प्रियेण सामोन्मुखेन सामपरेण प्रसादयता आकुरिताख्येन नखकर्मणा संसृष्टा सती पुलकेन रोमाञ्चेन भेदे उद्गमे दत्ते सति अन्तः प्रकोपस्यापगमात् विलोला विलोलबुद्धिः केवलविक्रमेण हठाद्गृहणेनैव वशीकृतोपभुक्तेत्यर्थः ॥ १४ ॥ ज० म०

सामोन्मुखेनेत्यादि । काचिन्मानिनी सामोन्मुखेन प्रसादनोद्यतेन प्रियेणाकुरिता आकुरिताख्येन नखकर्मणा सृष्टा अथानन्तरं पुलकेन रोमाञ्चेन भेदे उद्गमे दत्ते सति अन्तःप्रकोपस्यापगमात् विलोला चञ्चलबुद्धिः सा सुरते साभिलाषा वा केवलविक्रमेण हठाद्ग्रहणमात्रेण वशीकृता उपभुक्ता भावं ज्ञात्वा प्रसादनान्तरमकृतप्रसादनान्तरेण प्रियेण यद्यदुत्थलान्तरे अकुण्ठायनखेन ताड्यते तदाच्छुरितमुच्यते ॥ १४ ॥ भ०

गुरुरित्यादि । अन्यापि काचित् स्त्री कान्ता कमनीयरूपा गुरुः धीरा सोमोगुणवचनादिति वा ङीप्न भवति दधाना पुरुषत्वं नैष्ठ्यं कान्तेन भर्त्रा इन्दुनेव कराभिसृष्टा सती प्रह्लादिता सुखिता क्षोभात् चेतसोविकारात् तूर्णं स्ववत्स्वेदजला बभूव चन्द्रशिलेव चन्द्रमणिरिव सा गरीयसी कान्ता

शशाङ्कनाथापगमेन धूम्रां मूर्च्छापरीतामिव निर्विवेकाम् ।
ततः सखीव प्रथितानुरागा प्रबोधयत् द्यां मधुरारुणश्रीः ॥१६॥
अथोत्तृष्णोऽथ परस्परेण क्षणादिवायातनिशावसानः ।
दुःखेन लोकः परवानिवागात्स्वमुत्सुकः स्वप्ननिकेतनेभ्यः ॥१७॥

परुषत्वं काठिन्यं दधाना इन्दुना करामिमृष्टा प्रह्लादिता सुखितेव क्षोभात्स्वप्रकृतिविकारात् स्रवज्जला भवति ॥ १५ ॥ ज० म०

गुरुरित्यादि । अन्या कान्ता परुषत्वं नैष्ठुर्यं दधानापि कान्तेनेन्दुनेव कान्तस्य चन्द्रस्य वा करेण हस्तेन किरणेन चाभिमृष्टा सती ततः प्रह्लादिता आनन्दिता च सती क्षोभाच्चेतसो विकारात् तूर्णं स्रवत् खेदजला बभूव चन्द्रशिलेव चन्द्रकान्तमणिरिव कीदृशी गुरुर्गौरवान्विता चन्द्रशिलापि हि गुरुत्वाख्यगुणयुक्ता कान्ता मनोहरा परुषत्वं काठिन्यं दधानापि कान्तेन कमनीयेन इन्दुना करामिमृष्टा प्रह्लादिता प्रकाशिता च सती क्षोभात् स्वप्रकृतिविपर्ययात् स्रवज्जला भवति गुरुरिति गुणाद्दीर्घ इति पक्षे ईषत्प्रत्ययाभावः ॥ १५ ॥ भ०

शशाङ्केत्यादि । ततोऽनन्तरं यथा काचित् स्त्री नाथस्य भर्त्तुरपगमेन वियोगेन धूम्रा मलिना मूर्च्छापरीता निश्चेतना अतएव निर्विवेका विवेकुमशक्ता सती सखी प्रकाशितस्नेहया प्रबोध्यते तद्वद्यामाकाशं शशाङ्कनाथस्यापगमेन अस्तगमनेन धूम्रां धूसरतां गतां निर्विवेकां अविद्यमानविवेकां अरुणश्रीः आदित्यलक्ष्मीरिति मधुराभिनवा प्रथितानुरागा प्रबोधयत्प्रकाशितवती ॥ १६ ॥ ज० म०

शशाङ्केत्यादि । ततोऽनन्तरं अरुणस्य सूर्यस्य तत्सारथेर्वा श्रीर्द्यामाकाशं प्रबोधयत् प्रकाशितवती सखीव यथा सखी काचित् स्त्रियं प्रबोधयति कीदृशीं द्यां नाथस्य चन्द्रस्यापगमेन धूम्रां धूसरां स्त्री च नाथस्य भर्त्तुरपगमनेन विरहेण धूम्रा मलिना भवति मूर्च्छापरीतामिव अचेतनामिव सापि स्त्री मोहपरिगता भवति निर्विवेकां न विद्यते विवेको यत्र तादृशीं सापि स्त्री सदसद्विवेकशून्या सखी प्रबोधयते अरुणश्रीः कीदृशी प्रथितानुरागा प्रकाशितरक्तभावा मधुरा प्रिया अभिनवत्वात् सखी च प्रकाशितस्नेहा मधुरा प्रियभाषिणी च भवति ॥ १६ ॥ भ०

अथोत्यादि । अथानन्तरं लोकः परस्परेणान्योन्येन दयितो दयितया दयितापि दयितेन अतितृष्णः अनपगतसम्भोगाभिलाषः अतएव क्षणादिव

अर्द्धोत्थितालिङ्गितसन्निमग्नो रुद्धः पुनर्यान् गमनेऽनभीषुः ।
व्याजेन निर्याय पुनर्निवृत्तस्त्यक्तान्यकार्यः स्थित एव कश्चित् ॥१८॥
तालेन सम्पादितसाम्यशोभं शुभावधानं स्वरबद्धरागम् ।
पदैर्गतार्थं नृपमन्दिरेषु प्रातर्जगुर्मङ्गलवत्तरुण्यः ॥ १९ ॥

द्रुतमिवायातं निशावसानं यस्य ससुतसुकः उत्कण्ठितः परवानिव पराधीन इव स्वप्ननिकेतनेभ्यः वासगृहेभ्यो दुःखेन अगात् निर्गतवान् ॥ १७ ॥ ज० म०

अवीतेत्यादि । अथानन्तरं लोकः ससुतसुकः ससुतकण्ठितोऽपि परवान् पराधीन इव कार्यगौरवात् स्वप्ननिकेतनेभ्यः शयनगृहेभ्यो दुःखेनागात् निर्गतवान् यतः परस्परेण अन्योन्येन दयितो दयितया दयिता दयितेन अवीततृष्णः अविगतसम्भोगाभिलाषः अतएव क्षणादिव द्रुतमिवागतं निशावसानं यस्य स तथा सुखेन कालबहुत्वाज्ञानात् ॥ १७ ॥ भ०

अर्द्धोत्थितेत्यादि । शयनात् अर्द्धसुत्थितं यस्येत्यर्द्धोत्थितः आहिताग्न्यादिषु दृष्टव्यः शयनस्य वा अर्द्धादुत्थित इति योज्यं स चालिङ्गितो दयितया सन्निमग्नः शयने सुप्तः पुनर्यान्निर्गच्छन् रुद्धो विष्टतः गमने अनभीषुरपि निर्याय निमित्तव्याजेन पुनर्निवृत्तः प्रविष्टस्त्यक्तान्यकार्यः स्थित एव कश्चित्कामी ॥१८॥ज०म०

अर्द्धोत्थितेत्यादि। कश्चित् कामुकः शयनादर्द्धोत्थितो दयितया आलिङ्गितः सन् पुनः सन्निमग्नः सुप्तः पुनरपि यान् गन्तुमुद्यतः सन् दयितया रुद्धो वारितः अतएव गमनेऽनभीषुरिच्छारहितोऽपि गुर्वादिभयान्निर्याय निर्गत्य व्याजेन रोगादिछलेन पुनर्निवृत्तः सन् कार्यान्तरं त्यक्त्वा स्थित एव शयनगृह इत्यर्थात् अर्द्धोत्थित इति शयनादर्द्धसुत्थितं यस्येत्यन्याहितादित्वात् क्तान्तस्य विभाषया परनिपात इति परः स्मृते नियमानिर्देशादविरोध एव वा अर्द्धेनोत्थित इति विग्रहः । शयनस्यार्द्धादुत्थित इति वा अर्द्धोत्थितः सन् आलिङ्गितः सन् सन्निमग्न इति क्रमसमासः ॥ १८ ॥ भ०

तालेनेत्यादि । नृपमन्दिरेषु रावणादिराजवेश्मसु प्रभातकाले तरुण्यो मङ्गलवत् मङ्गलोपेतं जगुः गायन्ति स्म तालेन क्रियाकालमानेन सम्पादिता साम्यशोभा यत्र गायनक्रियायां शुभावधानं शोभनमवधानं चित्तैकाग्र्यता यत्र स्वरबद्धरागं षड्जादिभिः स्वरैर्बद्धो मागरागो यत्र पदैः सुप्तिङन्तैर्गतार्थं परिच्छिन्नार्थं निरर्थकपदरहितमित्यर्थः अनेन स्वरगतं पदगतं लयगतमवधानगतमिति चतुर्विधं गीतमाख्यातम् ॥ १९ ॥ ज० म०

दुरुत्तरे पङ्क इवान्धकारे मग्नं जगत्सन्ततरश्मिरज्जुः ।
प्रनष्टमूर्त्तिप्रविभागमुद्यन् प्रत्युज्जहारेव ततो विवस्वान् ॥२०॥
पीतोष्ठरागाणि हृताञ्जनानि भास्वन्ति लोलैरलकैर्मुखानि ।
प्रातः कृतार्थानि यथा विरेजुस्तथा न पूर्व्वेद्युरलङ्कृतानि ॥२१॥

तालेनेत्यादि । नृपमन्दिरेषु राजगृहेषु प्रातः प्रभातसमये तरुण्यो मङ्गलयुक्तं यथा स्यात्तथा जगुर्गायन्ति स्म तालेन चञ्चत्पुटादिना सम्पादिता साम्यस्य लयस्य शोभा यत्र गानक्रियायां तालः कालक्रियामानं लयः साम्यमथास्त्रियामित्यमरः साम्यं नृत्यगीतवाद्यानां समत्वमित्यर्थः शुभं शोभनमवधानं चित्तैकाग्र्यता यत्र स्वरैः षड्जादिभिर्बन्धोऽनुगतो रागो यत्र पदैर्विभक्तयन्तैर्गतः परिच्छिन्नोऽर्थो यत्र निरर्थकरहितमित्यर्थः तेन स्वरगतं लयगतं पदगतमवधानगतञ्चेति चतुर्विधं गीतमुक्तं नृपशब्दो राजनि रूढो रावणादिष्वपि प्रवर्त्तते ॥ १९ ॥ भ०

दुरुत्तर इत्यादि । अन्धकारे पङ्क इव दुरुत्तरे दुःखेनोत्तीर्य्यत इति मग्नं प्रविष्टं जगद्यतः प्रनष्टमूर्त्तिप्रविभागं प्रनष्टः स्थावरजङ्गममूर्त्तीनां प्रविभागो यस्मिन् तद्विवस्वानुद्यन् उद्गच्छन् सन्ततरश्मिरज्जुः प्रविततता रश्मयो मयूखा एव रज्जवो येन सः प्रत्युज्जहारेव उद्धृतवानिव तत इत्यन्धकारात् ॥ २० ॥ ज० म०

दुरुत्तर इत्यादि । विवस्वान् सूर्य्य उद्यन् उद्गच्छन् दुःखेनोत्तरितुं शक्ये पङ्के इवान्धकारे मग्नं जगत् ततोऽन्धकारात् प्रत्युज्जहारेव उद्धृतवानिव कीदृशो विवस्वान् सन्तता विस्तता रश्मयो रज्जव इव येन तादृशः अन्योऽपि मग्नं वस्तु रज्जुभिरुद्धरति जगत् कीदृशं प्रनष्टोऽदृश्यः स्थावरजङ्गममूर्त्तीनां प्रविभागो यत्र तादृशमन्धकारमग्नत्वात् दुरुत्तर इति दुःखेनोत्तीर्य्यते यदिति ईषद्दुःसोरिति कर्म्मणि खल् उद्यन्निति इनः शतरि यिणोऽन्त्यणाविति यत्वम् ॥ २० ॥ भ०

पीतोष्ठरागाणीत्यादि । मुखानि बधूनामित्यर्थात् यथा प्रातः प्रभाते विरेजुः तथा पूर्व्वेद्युः पूर्व्वस्मिन्नहनि अलङ्कृतानि न रेजुः तेषामकृतार्थत्वात् तानि पुनः कृतार्थानि कृतकार्य्याणि यतो दयितैः पीतोष्ठरागाणि ओष्ठचुम्बनात् हृताञ्जनानि चक्षुषोरपि चुम्बनात् अपगतकज्जलानि लोलैराकुलैरलकैः कचग्रहाकर्षणात् भास्वन्ति दीप्तिमन्ति ॥ २१ ॥ ज० म०

पीतोष्ठेत्यादि । मुखानि बधूनामित्यर्थात् प्रातःकाले यथा विरेजुः शुभ-

प्रजागरताम्रविलोचनान्ता निरञ्जनालक्तकपत्रलेखाः ।
तुल्या इवासन्परिखेदतन्वयो वासच्युताः सेवितमन्मथाभिः॥२२॥
आबद्धनेत्राञ्जनपङ्क्तिलेखस्ताम्बूलरागं बहुलं दधानः ।

भिरे न तथा पूर्व्वेद्युः पूर्व्वस्मिन् दिवसे अलङ्कृतानि कृतसाधनान्यपि विरेजुः अकृतार्थत्वेन तादृगुल्लासाभावात् प्रातस्तु कृतकार्य्याण्येव यतो दयितैः पीतौष्ठरागाणि ओष्ठचुम्बनात् पीत ओष्ठरागो यत्र हृताञ्जनानि आनन्दाश्रुपतनाच्चक्षुषोश्चुम्बनाद्वा अपगतकज्जलानि कामशास्त्रे नेत्रचुम्बनमभिहितं तथाहि नयनयुगकपोलं दन्तवासो मुखान्तः स्तनजघनललाटं चुम्बनस्थानमाहुरिति लोलैः करेण कचाकर्षणात् चञ्चलैः अलकैश्चूर्णकुन्तलैर्भास्यन्ति शोभमानानि ॥२१॥ भ०

प्रजागरा इत्यादि । भर्तृभिः सहैकत्र यच्छयनं स वासः तस्माच्च्युताः काश्चित् स्त्रियः सेवितमन्मथाभिः अनुष्ठितसुरताभिः तुल्या इवासन् यतः प्रजागरताम्रविलोचनान्ताः दयितागमनप्रतीक्षणाद्यैः प्रजागरत्वेन ताम्रनेत्रपर्य्यन्ताः नायात इति रटद्दीतप्रसाधनतया निरञ्जनालक्तकपत्रलेखाः यदि वा अन्यत्र शयित इति रोदनात् निरञ्जनाः चित्तोन्मादादितस्ततः पादविक्षेपात् विगतालक्तकाः शयने प्रतिक्षणवृद्धर्त्तनपरिवर्त्तनात्कपोलादिभ्यो निष्पत्रलेखा इति खेदाच्च तन्व्यः कृशाङ्ग्यः ॥ २२ ॥ ज० भ०

प्रजागरा इत्यादि । कान्तैः सहैकत्र शयनं वासस्तस्माच्च्युताः काश्चित् स्त्रियः सेवितमन्मथाभिरनुष्ठितसुरताभिस्तुल्या इव आसन् कीदृश्यः दयितस्यागमनप्रतीक्षणाद्यैः प्रजागरत्वेनाताम्रो विलोचनान्तो यासां उपभुक्तानामपि सुरतासक्तत्वादेव प्रजागरः निरञ्जना निरलका निष्पत्रलेखाश्च विरहेण प्रसाधनाभावात् किंवा रोदनान्निरञ्जनाः चित्तोन्मादादितस्ततः पादविक्षेपेण निरलक्तकाः शयने मुहुः परिवर्त्तनान्निष्पत्रलेखाः उपभुक्ता अपि चुम्बनादानन्दाश्रुपाताद्वा निरञ्जना विपरीतसुरतान्निरलक्तकाः चुम्बनताडनाभ्यां कपोलयोस्तनयोश्च निष्पत्रावलीका भवन्ति परिखेदात् विरहदुःखात् पक्षे सुरतामर्दात् कृशाङ्ग्यः जागर्त्तेर्घञि अलि वा जाग्र्योऽण्ङीनिति गुणे जागरः सेमक्षात्परोरिति अप्रत्यये स्त्रीत्वप्रसङ्गात् किंवा अप्रत्ययेऽभिधानं नियामकमित्युक्तेः स्त्रीत्वाधिक्ता केचित्तु अप्रत्ययान्तस्य स्त्रीत्वात् प्रजागरताम्रविलोचनान्ता इति समस्तपदं पठन्ति तन्निरर्थकं जागर्य्या जागरा द्वयोरित्यमरवचनात्॥२२॥भ०

आबद्धेत्यादि । कामाच्चिदङ्गनानां पतिभिः सहोषितानामप्यधरः लघुत्वं

चकार कान्तोऽप्यधरोऽङ्गनानां सद्दोषितानां पतिभिर्लघुत्वम् ॥२३॥
चक्षूंषि कान्तान्यपि साञ्जनानि ताम्बूलरक्तञ्च सरागमोष्ठम् ।
कुर्वन् सवासञ्च सुगन्धि वक्त्रं चक्रे जनः केवलपक्षपातम् ॥२४॥
क्षतैरसञ्चेतितदन्तलक्ष्यैः सम्भोगकालेऽवगतैः प्रभाते ।
अशङ्कतान्योन्यकृतं व्यलीकं वियोगबाह्योऽपि जनोऽतिरागात् ॥२५

दौर्भाग्यं चकार सूचितवानित्यर्थः यतस्ता ईप्सितसुरतात्प्राप्ता रुदितास्ततश्च बद्धो लग्नो नेत्राञ्जनपङ्कलेशो यस्य सोऽधरो दयितैरपीतत्वाच्च बद्धलं ताम्बूलरागं दधानः कान्तोऽपि लघुत्वं चकार ॥ २३ ॥ ज० म०

आबद्धेत्यादि । कासाञ्चिदङ्गनानां पतिभिः सद्दोषितानां स्वभावतः कान्तोऽपि अधरो लघुत्वं चकार दौर्भाग्यं सूचितवानित्यर्थः अनुपभुक्तत्वात् अधरः कीदृशः रोदनादाबद्धो लग्नो नेत्राञ्जनपङ्कस्य लेशोऽल्पभागो यत्र तादृशः दयितैरपीतत्वाद्बद्धलं प्रचुरं ताम्बूलरागं दधानः ॥ २३ ॥ भ०

चक्षूंषीत्यादि । कान्तान्यपि शोभनान्यपि चक्षुंषि विकचोत्पलद्युतित्वात् साञ्जनानि कुर्वन् स्त्रीजनः प्रातर्गृह्यमाणप्रसाधनत्वात् सरागं चोष्ठं स्वभावतो बिम्बफलाकारत्वात् ताम्बूलरक्तं कुर्वन् स्वभावतश्च सुगन्धि वक्त्रं सवासं सुखं वासयुक्तं कुर्वन् केवलपक्षपातं ममत्वं चक्रे अञ्जनादीनां निरर्थकत्वात् ॥२४॥ ज० म०

चक्षूंषीत्यादि । स्त्रीजनः स्वभावतः कान्तान्यपि नेत्राणि अञ्जनयुक्तानि कुर्वन् स्वभावतः सरागमोष्ठं ताम्बूलरक्तं कुर्वन् स्वभावतः सुगन्धि वक्त्रं सवासं कर्पूरादिसुखवाससयुक्तं कुर्वन् केवलं पक्षपातं प्रसादनस्नेहञ्चक्रे अञ्जनादीनां निरर्थकत्वात् ॥ २४ ॥ भ०

क्षतैरित्यादि । अस्या मया दत्तं अस्य च मयेति संभोगकाले रागान्धतया असंचेतितान्यज्ञातानि दन्तेभ्यो लब्धानि यानि क्षतानि चितसंचेतन इति स्वार्थिकखयन्तस्य रूपं प्रभातकाले अवगतैर्दृष्टैः वियोगबाह्योऽपि सम्भोऽपि कामिजनः अतिरागात् अतिस्नेहात् अन्योन्यकृतं अन्योन्येन कृतं व्यलीकं अपराधं अशंकत विकल्पितवान् लक्ष्मि रूपं किमस्यान्यया हताशया दत्तमिति योषिदशंकत पुरुषोऽपि किमन्येन धूर्तेनास्या इति ॥ २५ ॥ ज० म०

क्षतैरित्यादि । वियोगबाह्योऽपि विरहेणायुक्तोऽपि जनोऽतिरागादतिस्नेहात् क्षतैरन्योन्येन कृतं व्यलीकमपराधमशङ्कत शङ्कितवान् घ्यां रूपं किमस्यान्यया कान्तया दत्तं क्षतमिति योषिदशङ्कत पुरुषोऽपि किमस्या अन्येन प्रच्छन्न-

नेत्रेषुभिः संयुतपक्ष्मपत्रैः कर्णान्तकृष्टैरुरुकेशशूलाः ।
स्तनोरुचक्रास्ततकर्णपाशाः स्त्रीयोधमुख्या जयिनो विचेरुः ॥२६॥
पयोधरांश्चन्दनपङ्कदिग्धान् वासांसि चाश्लिष्टरजानि दृष्ट्वा ।
स्त्रीणां सपत्नयो जहृषुः प्रभाते मन्दायमानानुशयैर्मनोभिः ॥२७॥

कामुकेन दत्तं क्षतमिति शङ्कते स्म कुत इत्याह कीदृशैः क्षतैः सम्भोगकाले रागान्धतया असञ्ज्ञेतितानि अज्ञातानि दन्तेभ्यो लब्धानि यानि तैः चित्कसंज्ञाने प्रभातकालेऽवगतैर्ज्ञातैर्दर्शनात् ॥ २५ ॥ भ०

नेत्रेषुभिरित्यादि । नेत्राणि इषव इव तैः संयुतानि संयुक्तानि पक्ष्माख्येव पत्राणि येषां तैः कर्णान्तकृष्टैः कर्णान्तविश्रान्तैः उपलक्षिताः स्त्रियो योधमुख्या इव उरुकेशशूला उरवो महान्तः केशाः शूला इव येषां स्तनोरुचक्राः स्तनाः उरूणि चक्राणीव येषां ततकर्णपाशा ततः कर्णाः पाशाः इव येषां ते जयिनो लब्धविजया विचेरुः भ्रान्ताः ॥ २६ ॥ ज० भ०

नेत्रेषुभिरित्यादि । स्त्रियो योधमुख्या इव योद्धृश्रेष्ठा इव विचेरुर्भ्रमन्ति स्म संयुतानि संयुक्तानि पक्ष्माख्येव पत्राणि पक्षा यत्र तैः कर्णान्तकृष्टैः कटाक्षदृशायां कर्णान्तप्रेरितैर्नेत्रैरिषुभिरिव उपलक्षिता उरवो महान्तः केशाः शूलानीव येषां श्यामत्वात् दीर्घत्वात्कामपीडाकारित्वाच्च स्तना महाचक्राणीव येषां विशालपरिमाणत्वात् ततः कर्णाः पाशा इव येषां कामुकमानबन्धनयोग्यत्वात् अतएव जयिनः पुंजयनशीलाः ॥ २६ ॥ भ०

पयोधरानित्यादि । चन्दनपङ्कदिग्धान् आप्लुतचन्दनत्वात् वस्त्राणि च अश्लिष्टरजांसि अनपनीतशुद्धभावानि स्त्रीणां दृष्ट्वा प्रभाते तत्सपत्नयो मनोभिः न वाह्यं जहृषुः हृष्टाः अप्राप्तसुरतत्वान्मन्दायमानानुशयैः आभिः सह शयिता इति तासु ये अनुशयाः अज्ञानयो जाताः ते मन्दायमानाः शनैःशनैस्तनुभवन्तो येषु मनःसु तैरित्यर्थः ॥ २७ ॥ ज० भ०

पयोधरानित्यादि । स्त्रीणां चन्दनपङ्कैर्दिग्धान् लिप्तान् पयोधरान् स्तनान् दृष्ट्वा अश्लिष्टरजांसि अनपनीतशुक्रशुद्धभावानि वासांसि च वस्त्राणि च दृष्ट्वा प्रभाते तासां सपत्नयो मनोभिः करणभूतैः तैरुपलक्षिता वा जहृषुः हृष्टाः कीदृशैः मन्दायमानोऽनुशयः क्रोधो यत्र पूर्वं भर्त्रा सह सपत्नीनामेकत्रवासात् क्रोध उत्पन्नः पश्चात्तासां सम्भोगाभावज्ञानात् क्रोधस्य मन्दायमानत्वं हर्षश्च जातः सम्भोगे हि मर्दनात् चन्दनच्युतिर्वस्त्रमालिन्यञ्च स्यात्॥२७॥ भ०

स्मरातुरे चेतसि लब्धजन्मा रराज लोलोऽपि गुणापहार्य्यः ।
कुतूहलान्नेत्रगवाक्षसंस्थः पश्यन्निवान्योन्यमुखानि रागः ॥२८॥
गतेऽतिभूमिं प्रणये प्रयुक्ता न बुद्धिपूर्व्वं परिलुप्तसंज्ञः ।
आत्मानुभूतानपि नोपचारान्स्मरातुरः संस्मरति स्म लोकः ॥२९॥
वस्त्रैरनत्युल्बणरम्यवर्णैर्विलेपनैः सौरभलक्षणीयैः ।
आस्यैश्च लोकः परितोषकान्तैरसूचयल्लब्धपदं रहस्यम् ॥३०॥

स्मरातुर इत्यादि । दम्पत्योः प्रातरन्योन्यस्य मुखं पश्यतोः चक्षुषोरागो-वर्ण्यते स्मरातुरे कामातुरे चेतसि लब्धजन्मा लब्धोदयः रागो रक्तभावः नेत्र-गवाक्षसंस्थः नेत्रयोर्गवाक्षयोरिव स्थितः कुतूहलात् कौतुकात् अन्योन्यस्य मुखानि पश्यन्निव कीदृशं कामिन्यामुखं कामुकस्य मुखं वेति गुणापहार्यः तत्प्रतिपक्षेण शुक्लगुणेन अपनेयः अतएव लोलोऽपि अचिरस्थायपि रराज ॥२८॥ ज०म०

स्मरातुरे इत्यादि । दम्पत्योः प्रातरन्योन्यमुखं पश्यतोर्नेत्ररक्तिमा उल्लेख्यते रागो रक्तभावो नेत्रयोर्गवाक्षयोरिव स्थितः सन् कुतूहलादन्योन्यमुखानि पश्यन्निव कीदृशं कामिन्याः कामुकस्य वा मुखमिति विलोकयन्निव रराज शोभतेस्म कीदृशः स्मरातुरे चेतसि लब्धजन्मा लब्धोदयः गुणेन तत्प्रतिपक्षेण शुक्लरूपे-णापहार्योऽपनेयः अतएव लोलश्चञ्चलः अचिरस्थायपि रराजेत्युत्कर्षः किंवा रागोऽनुरागः गुणापहार्यो मुखसौन्दर्य्येण वशीकृतः ॥ २८ ॥ भ०

गत इत्यादि । प्रणये विश्रम्भे अतिभूमिं गते प्रकृष्टावस्थां प्राप्ते सति ये अबुद्धिपूर्व्वं अनिरूप्य स्वयं प्रयुक्ताः उपचारान् नखदन्तक्षतादयः तानात्मानु-भूतानपि प्रातर्न स्मरति स्म कामिलोकः इदमिदं मया प्रयुक्तमिति यतः सुरता-वस्थायां स्मरातुरतया विलुप्तसंज्ञो मूढ इति ॥ २९ ॥ ज० म०

गते इत्यादि । प्रणये प्रेम्णि अतिभूमिं प्रकृष्टावस्थां गते सति अबुद्धि-पूर्व्वमविचार्य्य सुरतकाले स्वयं प्रयुक्तान् कृतानपि उपचारान् नखदन्तक्षतादी-नात्मानुभूतानपि तदानीं स्मरातुरत्वेन परिलुप्तसंज्ञत्वात् लोकः प्रभाते न स्मरति स्म प्रणयः प्रेम्णि विश्रम्भे याच्ञाप्रसरयोरपीति रुद्रः ॥ २९ ॥ भ०

वस्त्रैरित्यादि । वस्त्रैः विलेपनैः सौरभलक्षणीयैः सुरभितया परिच्छेद्यैः आस्यैश्च व्यपगताधररागैः परितोषकान्तैर्लिङ्गभूतैः रहसि भवं सुरतं लब्धपदं प्राप्तचिह्नं लोकः प्रकाशयति स्म ॥ ३० ॥ ज० म०

प्रातस्तरां चन्दनलिप्तगात्राः प्रच्छाद्य हस्तैरधरान् वदन्तः ।
शाम्यन्निमेषाः सुतरां युवानः प्रकाशयन्ति स्म निगूहनीयम् ॥२१॥
जितेऽपि लोके मधुरेण वामे किंत्वुद्यतं भ्रूधनुरप्रसह्यम् ।
हन्तुं क्षमो वा वद लोचनेषुर्दिग्धो विषेणेव किमञ्जनेन ॥२२॥

वस्त्रैरित्यादि । लोको वस्त्रादिचिह्नैरहस्यं रहसि भवं सुरतमसूचयत् प्रकाशितवान् कीदृशं लब्धपदं प्राप्तचिह्नं कामिषु प्राप्तावसरं वा वस्त्रैः कीदृशैः रक्तपुल्लवणरक्तवर्णैः परिस्फुटितत्वादनुद्भटरमणीयवर्णैः अनतिविशदरक्तवर्णैर्वा अल्पश्लिष्टैरित्यर्थः उल्बणं विशदं स्फुटमिति कोषः विलेपनैः कीदृशैः सौरभलक्षणीयैः सौरभेण शरीरगतसुरभित्वमात्रेण लक्षणीयैरनुमेयैः आस्यैः कीदृशैः परितोषकान्तैरधररागपत्रावल्यादिलेपेऽपि परितोषेण कृतार्थताजनितानन्देन कमनीयैः ॥ २० ॥ भ०

प्रातस्तरामित्यादि । गुरुजनो नखदशनक्षतं मा द्राक्षीदिति युवानः प्रातस्तरां प्रत्यूषसि चन्दनलिप्तगात्रा हस्तैरधरान् प्रच्छाद्य वदन्तोऽपि शाम्यन्निमेषा अनिमिषितनेत्रा गूहनीयं सुतरां प्रकाशयन्ति स्म नूनमेते सत्कृताः येन एवमाचरन्तीति ॥ २१ ॥ ज० म०

प्रातस्तरामित्यादि । महति प्रातःकाले नखक्षतादिसङ्गोपनार्थं चन्दनेन लिप्तगात्रा अपि दन्तक्षतसङ्गोपनार्थं गुरुसमीपे हस्तैरधरं प्रच्छाद्य वदन्तोऽपि जागरणजनितनिद्राव्यपगमार्थं शाम्यन्निमेषा निमेषं वारयन्तोऽपि युवानः निगूहनीयं सङ्गोपनीयं सुरतं सुतरामतिशयेन प्रकाशयन्ति स्म सङ्गोपनेनैव नखक्षताद्यनुमानात् यद्वा शाम्यन्निमेषाः सन्तः प्रकाशयन्ति निमेषाणां भावत्यागदर्शनात् सौक्ष्म्यप्रभव गुणः तत्सौक्ष्म्यप्रभुच्यते यत्र सूक्ष्मार्थस्यापि दर्शनम् । अत्र सुरतस्य संगुप्ततया सूक्ष्मत्वम् ॥ २१ ॥ भ०

जित इत्यादि । हे वामे प्रतिकूलवर्त्तिनि मधुरेणाविकृतेन स्वाभ्या लोके अस्मद्विधे जितेऽपि वशीकृतेऽपि भ्रूधनुरप्रसह्यं प्रसोढुमशक्यं उद्यतं उत्क्षिप्तं अथवा विलोचनेषुर्नेत्रशरः खत एव हन्तुं क्षमः ततः किमञ्जनेनैव विषेण दिग्धो विषलिप्त इति वद कथय ॥ २२ ॥ ज० म०

जित इत्यादि । युवान इत्यूचुरित्यग्रिमश्लोकेनान्वयः हे वामे प्रतिकूलवर्त्तिनि लोके चास्मद्विधे मधुरेण माधुर्यगुणेन स्वभावसिद्धोपायेन प्रियवचनेन वा जितेऽपि पराभूतेऽपि वशीकृतेऽपि सोढुमशक्यं भ्रूरूपधनुः किमर्थमुद्यतमुत्क्षिप्तं

दन्तच्छदे प्रज्वलिताग्निकल्पे ताम्बूलरागस्तृणभारतुल्यः ।
न्यस्तः किमित्यूचुरुपेतभावा गोष्ठीषु नारीस्तरुणीर्युवानः॥२३॥

युग्मकम् ।

सुखावगाहानि युतानि लक्ष्म्या शुचीनि सन्तापहराण्युरूणि ।
प्रबुद्धनारीमुखपङ्कजानि प्रातः सरांसीव गृहाणि रेजुः॥२४॥

संघृष्टसिक्तार्चितचारुपुष्पैरामोदवद्द्रव्यसुगन्धभागैः ।
लक्ष्मीर्विजिग्ये भवनैः सभद्रैः सेव्यस्य देवैरपि नन्दनस्य॥२५॥

अयञ्च लोचनरूपशरः स्वयमेवाक्षान् हन्तुं क्षमः समर्थः तत्किं विषेणेवाञ्जनेन वा दिग्धो लिप्तः तत्त्वं वद वतेति पाठे खेदे स्वभावेनैव कार्यस्य सिद्धौ किमधिककल्पनया भाविकत्वमत्र गुणः अहं त्वदायत्त एवेत्यभिप्रायप्रकाशात् साभिप्रायोक्तिविन्यासो भाविकत्वं प्रचक्षते इति ॥ २२ ॥ भ०

दन्तच्छद इत्यादि । प्रज्वलिताग्निकल्पे स्वभावलोहितत्वात् दन्तच्छदे ओष्ठे ताम्बूलरागः किमिति न्यस्तः तृणभारतुल्यः निष्प्रयोजनत्वात् इत्येवमूचुर्युवानः प्रातरित्यर्थात् उपेतभावाः जातानुरागाः गोष्ठीषु स्थिता नारीस्तरुणीरिति ॥ २२ ॥ ज० भ०

दन्तेत्यादि । दन्तच्छदे ओष्ठे ताम्बूलरागः किमर्थं न्यस्तः कीदृशे प्रज्वलितवह्निसदृशे स्वभावतो लोहितत्वादसदृशकत्वाच्च कीदृशः तृणभारसमो निष्प्रयोजनत्वादत्युद्दीपकत्वाच्च वह्नौ तृणप्रक्षेपो भवत्युद्दीपको भवति इत्येवं युवानस्तरुणा उपेतभावा उपगतरागाः सन्तस्तरुणी नारी गोष्ठीषु स्त्रीसभासु स्थिता जगुः ॥ २२ ॥ भ०

सुखावगाहानीत्यादि । प्रातः प्रभाते गृहाणि सरांसीव रेजुः सुखावगाहानि निरुपद्रवत्वात् सुखेनावगाह्यन्ते युतानि लक्ष्म्या देवतारूपया शुचीनि पवित्राणि सन्तापहराणि घर्मादिक्लेशापहारीणि उरूणि महान्ति प्रबुद्धानि विनिद्राणि नारीमुखान्येव पङ्कजानि यत्रेति ॥ २४ ॥ ज० भ०

सुखेत्यादि । प्रातः प्रभातकाले गृहाणि सरांसीव रेजुः शोभन्ते स्म कीदृशानि सुखहेतुरवगाहो यत्र तानि लक्ष्म्या सम्पत्त्या शोभया वा युतानि शुचीनि पवित्राणि सन्तापहराणि घर्मादिक्लेशापहारीणि उरूणि महान्ति प्रबुद्धानि विनिद्राणि नारीमुखान्येव पद्मे तानीव पङ्कजानि येषु ॥२४॥ भ०

संघृष्टेत्यादि । देवैः सेव्यस्यापि नन्दनस्य लक्ष्मीर्भवनैः प्रातर्विजिग्ये

अक्ष्णोः पतन्नीलसरोजलोभाद्भृङ्गः करेणाल्पधिया निरस्तः ।
ददंश ताम्राम्बुरुहाभिसन्धिस्तृष्णातुरः पाणितलेऽपि धृष्णुः ॥२६॥
विलोलतां चक्षुषि हस्तवेपथुं भ्रुवोर्विभङ्गं स्तनयुग्मवल्गितम् ।
विभूषणानां क्वणितञ्च षट्पदो गुरुर्यथा नृत्यविधौ समादधे॥२७॥

विजिता आदौ संमृष्टरजांसि अपनीतरजांसि पश्चात्सिक्तानि पूर्व्वापरकाल-समासः अर्च्चितानि पूजितानि प्रशस्तानि चारूणि शोभनानि पुष्पाणि येषु भवनेषु संमृष्टसिक्तानि च तानि अर्च्चितचारुपुष्पाणि चेति विशेषणसमासः आमोदवन्ति यानि द्रव्याणि चन्दनादीनि तैः सुगन्धभाग एकदेशो येषां तैः गन्धस्येतदेकान्तग्रहणादित्वं न भवति सम्भङ्गैरामोदभृतत्वात् ॥२५॥ ज० म०

संमृष्टेत्यादि । देवैरिन्द्रादिभिरपि सेव्यस्य नन्दनवनस्य लक्ष्मीः सम्पत्तिः शोभा वा भवनैर्गृहैः प्रातर्विजिग्ये जिता कर्म्मणि ठी कीदृशैः पूर्व्वं संमृष्टानि अपनीतरजांसि पश्चात् सिक्तानि संमृष्टसिक्तानि पूर्व्वकालस्यापरकालेनेति कर्म्म-धारय इति परः स्वमते एकार्थतास्त्येव अर्च्चितानि पूजितानि चारूणि शोभ-मानानि पुष्पाणि येषु तानि पश्चात् संमृष्टसिक्तानि अर्च्चितचारुपुष्पाणि चेति पुनः कर्म्मधारयः आमोदवद्भिर्द्रव्यैश्चन्दनादिभिः सुगन्धा भागा एकदेशा येषां स्फुरभिपूतेरित्यादौ गन्धशब्दो गुणवाचीति टीकाकृद्वचनादभिधानाद्वा इप्रत्यया-भावः भङ्गैरामोदानुसारित्वाद्भ्रमरैः सह वर्त्तमानानि नन्दनमध्येवं भवति उदात्तता गुणोऽसंमृष्टसिक्तेत्यादिभिर्विशेषणैर्योगात् उक्तैर्विशेषणैर्योगो यस्तु साम्यादुदात्तता ॥ २५ ॥ भ०

अक्ष्णोरित्यादि । नीलसरोजलोभात् नीलकमलमेतदित्यक्ष्णोः पतन्निलीय-मानो भृङ्गः अल्पधिया अल्पबुद्धा कयाचित् करेण निरस्तः क्षिप्तः सन् ताम्राम्बुरुहाभिसन्धिः रक्तपद्ममेतदित्यभिसन्धिरभिप्रायो यस्य भृङ्गस्य स धृष्णुः प्रगल्भः पाणितलेऽपि ददंश दष्टवान् तामित्यर्थात् ॥ २६ ॥ ज० म०

अक्ष्णोरित्यादि। नीलसरोजमेतदिति मत्वा तल्लोभात् चक्षुषोः पतन् भृङ्गः कयाचिदल्पधिया मुग्धया करेण निरस्तः सन् पाणितलेऽपि तां ददंश दष्टवान् यतः करं दृष्ट्वा रक्तपद्ममित्यभिसन्धिरभिप्रायो यस्य कीदृशः तृष्णातुरः तृष्णा-व्याप्तः धृष्णुः प्रगल्भः सौकुमार्य्यमत्र गुणः अक्ष्णोः करस्य चोत्पलत्वेन निरू-पणात् अनिष्टत्वं यत् प्राङ्भिः सौकुमार्य्यं तदुच्यते ॥ २६ ॥ भ०

विलोलतामित्यादि । यथा गुरुर्नृत्याचार्य्यो नृत्यकर्म्मणि कस्याश्चिन्नृत्यकि

अथानुकूलान् कुलधर्म्मसम्पदो विधाय वेशान् सुदिवः पुरीजनः ।
प्रबोधकाले शतमन्युविद्विषः प्रचक्रमे राजनिकेतनं प्रति ॥३८॥
शैलेन्द्रशृङ्गेभ्य इव प्रवृत्ता वेगाज्जलौघाः पुरमन्दिरेभ्यः ।
आपूर्य्य रथ्याः सरितो जनौघा राजाङ्गनाम्भोधिमपूरयन्त ॥३९॥

विलोलतां चलतां हस्तवेपथुं हस्तकर्म्म भ्रुवोर्विभङ्गं नतोन्नतिं स्तनयुग्मवल्गितं प्रचलितं भूषणानां क्वणितं शिञ्जितं जनयति तद्दृष्ट्वा षट्पदोऽपि तत्समादधे विहितवान् ॥ ३७ ॥ ज० म०

विलोलतामित्यादि । यथा गुरुर्न्नृत्याचार्य्यो नृत्यकर्म्मणि शिक्षायां कस्याश्चिच्चक्षुषि विलोलतां चाञ्चल्यं हस्तयोर्वेपथुं कम्पं भ्रुवोर्विभङ्गमन्यथाकरणं स्तनयुगलस्य वल्गितं चलनं विभूषणानामलङ्काराणां क्वणितं शिञ्जितं समादधे जनयति तथा षट्पदोऽपि समादधे कृतवान् भ्रमरबाधया काचिन्नृत्यमिव चकारेत्यर्थः प्रौढिरत्र गुणश्चक्षुर्विलोलताप्रभृतिभिर्न्नृत्यस्य निर्व्वाहात् विवक्षितार्थनिर्व्वाहः काव्ये प्रौढिरिति स्मृता ॥ ३७ ॥ भ०

अथानुकूलानित्यादि । अथानन्तरं पुरीजनो लङ्कानिवासिजनः प्रतिदिनमवाप्तकल्याणत्वात् सुदिवः सुप्रातेत्यादिना समासान्तनिपातनं यथास्यं कुलधर्म्मस्य पुरस्य या सम्पद्विभूतिः तस्या अनुकूलान् वेशान्नेपथ्यानि विधाय कृत्वा शतमनुर्विद्विषो रावणस्य प्रबोधकाले राजनिकेतनं प्रत्यभिलक्ष्य प्रचक्रमे गन्तुं प्रवृत्तः प्रोपाभ्यां समर्थाभ्यामिति तङ् ॥ ३८ ॥ ज० म०

अथेत्यादि । अनन्तरं पुरीजनो लङ्कानिवासिजनो वेशान् विधाय कृत्वा शतमनुर्विद्विष इन्द्रशत्रो रावणस्य प्रबोधकाले निद्राभङ्गसमये राजगृहं प्रति लक्ष्यीकृत्य प्रचक्रमे गन्तुं प्रवृत्तः प्रोपादारभ्ये इति मं कीदृशान् कुलधर्म्मस्य कुलाचारस्य या सम्पद्विभूतिस्तस्या अनुकूलान् सदृशान् कुलोचितानित्यर्थः कीदृशः सुदिवः प्रतिदिनं प्राप्तकल्याणत्वात् शोभनं दिवा यस्य दिवाशब्दः सप्रत्ययान्तोऽव्यय इति ये वदन्ति तन्मते शोभनं दिवा दिवसे कर्म्म यस्येति विग्रहः राजादित्वात् सुदिवो निपातित इति कालापाः खादिभ्यो दिवादेरिति खप्रत्ययमाह क्रमदीश्वरः खमते स्वार्थे ष्णः तस्मात्सुदिवशब्दया इङ्गेरभावः ॥३८॥ भ०

शैलेन्द्रशृङ्गेभ्य इत्यादि । यथा जलानां पूराः शैलेन्द्रशृङ्गात् प्रवर्त्तन्ते तद्वत्पुरमन्दिरेभ्यः प्रवृत्ताः जनौघा रथ्याः सरित इवापूर्य्य राजाङ्गनमम्भोधिमिवापूरयन्त पूरितवन्तः ॥ ३९ ॥ ज० म०

प्रबोधकालात् त्रिदशेन्द्रशत्रोः प्रागूर्द्धघोषं परिघुष्यमाणाः ।
हीना महान्तश्च समत्वमीयुर्द्वास्थैरवज्ञापरुषाक्षिदृष्टाः ॥४०॥
गुरूरुचञ्चत्करकर्णजिह्वैरवज्ञयाग्राङ्गुलिसंगृहीतैः ।
रक्षांस्यनायासहतैरुपास्युः कपोललीनालिकुलैर्गजेन्द्रैः ॥ ४१ ॥

शैलेन्द्रेत्यादि । यथा जलानां वारीणामोघाः पूराः प्रवाहाः शैलेन्द्रशृङ्गेभ्यः प्रहृत्ताः सरितो नदीरापूर्य्य वेगात् सागरं पूरयन्ति तथा जनौघाः लोकसमूहाः पुरमन्दिरेभ्यो लङ्कागृहेभ्यः प्रहृत्ता रथ्याः प्रतोलीरापूर्य्य वेगात् राजाङ्गनं राज्ञो रावणस्य चत्वरमपूरयन् तवर्गपञ्चमोपान्तमङ्गलमिति विश्वः पृषोदरादित्वात् णत्वनिति पाणिनीयाः खमते मनीषादित्वाद्विभाषया णत्वम् ॥ ३९ ॥ भ०

प्रबोधकालादित्यादि । त्रिदशेन्द्रशत्रो रावणस्य प्रबोधकालात्प्राक् पूर्व्वं ऊर्द्धघोषं परिघुष्यमाणाः राजाङ्गने ऊर्द्धङ्गता एव प्रबोधकाले घोषं नीयमाना इति अन्तर्भावितण्यर्थो द्रष्टव्यः एवञ्च कृत्वा कर्म्मण्यात्मनेपदं अन्ये परिघोष्यमाणा इति णिचं पठन्ति ऊर्द्धं गुणीति गुणः हीनाः महान्तश्च सेवकाः समत्वं तुल्यत्वमीयुः द्वास्थैर्दौवारिकैः द्वारि तिष्ठन्तीति सुपिस्थ इति कः खरवसानयोर्विसर्जनीय इति विसर्जनीयस्य सः अवज्ञया अनादरेण परुषमस्निग्धं यदक्षि तेनाक्ष्णा दृष्टाः ॥ ४० ॥ ज० म०

प्रबोधेत्यादि । त्रिदशेन्द्रशत्रो रावणस्य प्रबोधकालात् निद्राभङ्गसमयात् प्राक् पूर्व्वं हीना महान्तश्च जनाः समत्वं तुल्यतां ईयुः प्राप्ताः दौवारिकैः सर्व्वत्र प्रवेशनिषेधात् कीदृशा ऊर्द्धघोषं परिघुष्यमाणाः ऊर्द्धघोषमिति यदुक्तं तद्विशेषेण सुखादिघोषणं सूचनार्थं ऊर्द्धात् घुषिपूरेः स्वार्थे क्त्रा णमिति परः किमयं करिष्यतीति त्वाशात् शुष्कास्यकण्ठतालुका आसन्नित्यर्थः द्वास्थैः दौवारिकैरवज्ञया अनादरेण यत्परुषं रूक्षमपि चक्षुरूपेण दृष्टा द्वारि तिष्ठतीति द्वास्थः हनजनादिति डः मनीषादित्वाद्विभाषया विसर्गलोपः कादियुक्तषषसेलुग्वेति क्रमदीश्वरसूत्रम् ॥ ४० ॥ भ०

गुरूरुचञ्चदित्यादि । गुरवोऽलघवः उरवो महान्तः चञ्चन्तश्चलन्तः कराः कर्णा जिह्वाश्च येषां गजेन्द्राणां तैरवज्ञया अग्राङ्गुलिसङ्गृहीतैः पदाङ्गुष्ठाग्रेण यत्स्थाने परिगृहीतैः अङ्गुलेरयमिति राजदन्तादित्वात् पूर्व्वनिपातः अनायासचलनैः शनैः शनैः प्रचोदितैः मत्तत्वात् कपोललीनालिकुलैः रक्षांसि उपास्युः सेवामकार्षुः ॥ ४१ ॥ ज० म०

निक्तत्तमत्तद्विपकुम्भमांसैः संपृक्तमुक्तैर्हरयोऽग्रपादैः ।
आनिन्यिरे श्रेणीकृतास्तथान्यैः परस्परं वालधिसन्निबद्धाः ॥४२॥
उपेक्षिता देवगणैस्तदङ्गनिर्णाचरैर्वीतभयैर्निकृत्ताः ।
तस्मिन्नदृश्यन्त सुरद्रुमाणां सजालपुष्पस्तवकाः प्रकीर्णाः ॥४३॥

गुर्व्वित्यादि । कतिचिद्रक्षांसि राक्षसा गजेन्द्ररूपास्तुः मत्तहस्तिनो गृहीत्वा रावणं सेवितवन्तः कीदृशैर्गुरवोऽलघवः उरवो महापरिमाणाः चञ्चलाः चञ्चलाः कराः शुण्डाः कर्णाः जिह्वाश्च येषां तैः अवज्ञया अनादरेण अङ्गुल्यग्रेण संगृहीतैः धृतैः अङ्गुलेरयं अग्राङ्गुलिरिति राजदन्तादिरिति परः क्षमते एकदेशेऽपि समुदायोपचारात् कर्म्मधारयः अग्रे अग्रतः स्थाने अङ्गुल्या पादाङ्गुष्ठेन संगृहीतैरिति केचित् अनायासेन धृतैः शनैः शनैः प्रेरितैर्मत्तत्वात् कपोले लीनानि भ्रमरकुलानि येषां तैः ॥ ४१ ॥ भ०

निक्तत्तेत्यादि । अन्यैः सेवार्थं हरयः सिंहाः आनिन्यिरे आनीताः निक्तत्तानि मत्तद्विपकुम्भमांसानि यैरग्रपादैः अतएव संपृक्तमुक्तैः लग्नकुम्भमुक्ताफलैः उपलक्षिताः श्रेणीकृता अश्रेणयः श्रेणयः कृताः श्रेण्यादय इति सः परस्परं वालधिसंनिबद्धाः अन्योन्यस्य पुच्छेन संयताः ॥ ४२ ॥ ज० म०

निक्तत्तेत्यादि । अन्यै राक्षसैर्हरयः सिंहा आनिन्यिरे आनीताः तथा पूर्व्वापेक्षया अग्रपादैः पाँड्वाद्यैरुपलक्षिताः कीदृशैः निक्तत्तानि छिन्नानि मत्तद्विपानां कुम्भमांसानि यैः संपृक्ताः संयुक्ताः गजकुम्भस्थमुक्ता यत्र कोट्यां श्रेणीकृता अश्रेणयः श्रेणयः कृता अभिधानं नियामकमित्युक्तेः ऋर्थे श्रेण्यादेः कृतादिना समासः इति बोध्यं परस्परमन्योन्यस्य पुच्छेन बद्धाः षष्ठ्या अभावेऽपि लोकोपचारादिति विद्यासागरः क्रियाविशेषणमिति केचित् क्षमते मनीषादित्वात् ॥ ४२ ॥ भ०

उपेक्षितेत्यादि । सुरद्रुमाणां पारिजातानां सजालाः कलिकासहिताः पुष्पस्तवकाः वीतभयैर्निशाचरैर्निकृत्ताः छिन्नाः वीतदयैरिति पाठान्तरं तत्र किमेतैः स्थितैरिति निर्दयैः सजाला एव छिन्नाः छिद्यमानाश्च देवगणैस्तदङ्गनिरूपेक्षिताः वाभ्यामेत्यादिना विकल्पेन श्यन् तस्मिन्नाजाङ्गने प्रकीर्णा अदृश्यन्त सेवकजनेन ॥ ४३ ॥ ज० म०

उपेक्षितेत्यादि । तस्मिन् राजाङ्गने सुरद्रुमाणां पारिजातादीनां प्रकीर्णा विच्छिन्नाः जालेन कलिकया सहिताः पुष्पस्तवका अदृश्यन्त दृष्टाः सेवकैरित्यर्थात्

निराकरिष्णुर्द्विजकुञ्जराणां तृणीकृताशेषगुणोऽतिमोहात् ।
पापाशयानभ्युदयार्थमार्च्छीत् प्राग्ब्रह्मरक्षःप्रवरान् दशास्यः ॥४४॥
मायाविभिस्त्रासकरैर्जनानामाप्तैरुपादानपरैरुपेतः ।
सतां विघातैकरसैरविक्षत् सदः परिक्षोभितभूमिभागम् ॥४५॥

कीदृशाः त्रसङ्क्षिप्तासं गच्छद्भिर्देवगणैरुपेक्षिताः अरक्षिताः क्रमलक्षमेत्यादिना त्रसेर्विकल्पेन श्यन् विहित इति पक्षे श्यप् वीतभयैर्विगतत्रासैर्निशाचरैर्निकृत्ताः छिन्नाः वीतदयैरिति पाठे किमेतैः स्थितैरिति निर्दयैः जालं गवाक्षे आनाये कोरके दम्भभेदयोरिति विश्वः ॥ ४३ ॥ भ०

निराकरिष्णुरित्यादि । दशास्यो विबुद्धः सन् अतिमोहादत्यन्ताज्ञानात् निराकरिष्णुर्निराकरणशीलः द्विजवरानित्यर्थात् द्विजकुञ्जराणां प्रशस्तद्विजानां अभ्युदयहेतूनां सम्बन्धिनोऽशेषाः गुणाः तृणीकृता येन स तृणीकृताशेषगुणः प्राक् पूर्वं सभाप्रवेशात् पापाशयान् पापचित्तवृत्तीन् ब्रह्मरक्षःप्रवरान् अभ्युदयार्थमार्च्छीत् ॥ ४४ ॥ ज० म०

निराकरिष्णुरित्यादि । दशास्यो रावणः प्रबुद्धः सन् सभाप्रवेशात्प्राक् पूर्वं पापाशयान् पापचित्तवृत्तीन् ब्रह्मराक्षसश्रेष्ठान् मातीनभ्युदयार्थमार्च्छीत् पूजितवान् कीदृशः अतिमोहात् अत्यज्ञानात् द्विजकुञ्जराणां विप्रश्रेष्ठानां निराकरिष्णुः द्विजश्रेष्ठान्निराकृत्य ब्रह्मराक्षसान् पूजितवानिति मोहः ढधेक्षतीत्यादिना उदनक्रत्योगे षष्ठी न भवतीति सम्बन्धे षष्ठी यद्वा द्विजकुञ्जराणां तृणीकृता अवधीरिताः सकला गुणा येनेति सम्बन्धः अतएव निराकरिष्णुस्तानित्यर्थात् ॥ ४४ ॥ भ०

मायाविभिरित्यादि । आप्तैरव्यभिचारिभिर्मायाविभिर्मन्त्रकैः परेषां त्रासकरैः जनानामतिरौद्रत्वात् उपादानपरैः सतां ब्रह्मार्गस्थितानां विघातैकरसैर्विनाशैकस्वभावैः उपेतो दशास्यः सदः सभामविक्षत् प्रविष्टः शलरगुपधानिटः क्रः कीदृशं राक्षसैश्वरणभागेन परिक्षोभितभूमिभागम् ॥४५॥ ज०म०

मायाविभिरित्यादि । दशास्यः सदः सभामविक्षत् प्रविष्टवान् इत्यर्थोऽनिमिति सक् कीदृशः आप्तैरात्मीयैरात्मसैरुपेतः उपगतः सन् कीदृशैर्मायाविभिर्मन्त्रकैर्जनानां त्रासकरैः अतिरौद्रत्वात् उपादानपरैः स्वार्थसम्पादनपरैः सतां साधूनां विघातमात्रैकरसैः सदः कीदृशं रावणचरणभरेण परिक्षोभितः सञ्चलितो भूमिभागो यत्र ॥ ४५ ॥ भ०

विधृतनिशितशस्त्रैस्तद्युतं यातुधानै-
रुरुजठरमुखीभिः संकुलं राक्षसीभिः ।
स्वगणिशतविकीर्णं वागुरावन् मृगीभि-
र्वनमिव सभयाभिर्देववन्दीभिरासीत् ॥ ४६ ॥
जलद इव तडित्वान् प्राज्यरत्नप्रभाभिः
प्रतिककुभमुदस्यन्निस्वनं धीरमन्द्रम् ।

विधृतेत्यादि । तत्सदो यातुधानैः विधृतनिशितशस्त्रैः गृहीतशस्त्रैर्युतं युक्तमासीत् तथा राक्षसीभिः उरुजठरमुखीभिः संकुलं व्याप्तं यथा वनं वागुरावत् सवागुरं स्वगणिकशतकीर्णं आखेटकशतच्छन्नं मृगीभिः सभयाभिः स्वगणिकेभ्यो जातभयाभिः व्याप्तमासीत् स्वगणा विद्यन्ते येषामिति स्वगणिका अत इति ठक् ॥ ४६ ॥ ज० म०

विधृतेत्यादि । तत्सदो वनमिवासीत् कीदृशं सदः विधृततीक्ष्णशस्त्रैर्यातुधानैराक्षसैर्युक्तं तथा राक्षसीभिः संकुलं व्याप्तं कीदृशीभिः उरु महत् जठरमुदरं मुखञ्च यासां ताभिः तदा देववन्दीभिर्हठात् हृतदेवस्त्रीभिः संकुलमिति सम्बन्धः स्वगणिशतविकीर्णमाखेटकशतच्छन्नं वागुरावत् वागुरा मृगबन्धनी रज्जुस्तद्युक्तं मृगीभिः संकुलं सभयाभिर्भययुक्ताभिरिति मृगीणां देववन्दीनाञ्च विशेषणं तत्सदोऽपि कुकुरधारिभिर्युक्तं तथा रज्जुबद्धमृगीभिर्युक्तं वनमपि राक्षसैः राक्षसीभिश्च युक्तं शुनां गणो विद्यते येषां ते स्वगणिन आखेटिका ॥ ४६ ॥ भ०

जलद इत्यादि । प्राज्यानां प्रभूतानां रत्नानां मणीनां प्रभाभिः तडित्वानिव जलदः प्रोन्नतात्मा सर्वेषामुपरि स्थितत्वात् प्रतिककुभं दिशि दिशि धीरमन्द्रं मन्द्रगम्भीरं निस्वनं, उदस्यन्निक्षिपन् सुमेरोः शिखरमिव हैममासनमुच्चैरुच्चं विविधमणिविचित्रं नानारूपैर्मणिभिर्विचित्रं नानावर्णकर्म्माध्यतिष्ठत् समारोहति स्म ॥ ४७ ॥ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां प्रसन्नकाण्डे माधुर्य्यप्रदर्शनो नाम द्वितीयोऽध्यायः ।

काव्यस्य प्रभातवर्णनो नामैकादशः सर्गः ।

शिखरमिव सुमेरोरासनं हैममुच्चै-
र्विविधमणिविचित्रं प्रोन्नतं सोऽध्यतिष्ठत् ॥ ४७ ॥

इति भट्टिकाव्ये एकादशः सर्गः ।

जलद इत्यादि । स रावणः सुमेरोः शिखरमिवोच्चैरुच्चं हैमं हिरण्य-मयमासनमध्यतिष्ठत् किं कुर्व्वन् विद्युद्युक्तो मेघ इव प्रतिककुभं दिशि दिशि भीरमन्द्रं गभीरतारं निस्वनं ध्वनिमुद्वमन् क्षिपन् प्रोन्नतः सर्व्वेषामुपरि स्थितः उन्नताकारो वा प्राज्यानां प्रभूतानां रत्नानां प्रभाभिरुपलक्षितः प्राज्यरत्नप्रभाभिः करणभूताभिस्तडित्वान् जलद इव इति वा आसनं कीदृशं विविधैर्नानावर्णै-र्मणिभिर्विचित्रं सुमेरुशिखरमध्येवं प्रोन्नतमिति पाठे उच्चैरिति रावणविशेषणं प्रतिककुभमिति ह्रपनदीति पक्षे अप्रत्ययः तडित्वानिति तद्वत्त्वाद्वित्यमात्रमत्र विवक्षितमुपमेये प्राज्यरत्नप्रभात्वाद्वित्यादतो नात्र पौनरुक्त्यम् ॥ ४७ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकान्तजश्रीभरतसेनकृतायां भट्टिटीकायां सुबोधिन्यां प्रसन्नकाण्डे गुणदर्शनं नाम द्वितीयः परिच्छेदः ।

काव्यस्य प्रभातवर्णनं नामैकादशः सर्गः ।

द्वादशः सर्गः ।

ततो विनिद्रं कृतदेवतार्चं दृष्ट्वैव चित्तप्रशमं किरन्तम् ।
आविष्कृताङ्गप्रतिकर्मरम्यं विभीषणं वाचमुवाच माता ॥ १ ॥

भाविकत्वमलङ्कारः प्रबन्धं विषय उक्तः नैकदेशिकं तस्य चित्तादयोऽर्थाः प्रवृत्तिहेतवः तथाचोक्तम्

भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।
प्रत्यक्षा इव दृश्यन्ते यत्रार्थाभूतभाविनः ॥
चित्तोदात्ताद्भुतार्थत्वं कथायाः स्वभिनीतता ।
शब्दानाकुलता चेति तस्य हेतुं प्रचक्षते ॥

इति तत्त्वं मन्त्रनिर्णयप्रबन्धे द्रष्टव्यमिति दर्शयन्नाह

तत इत्यादि । ततः प्रभातकालानन्तरं विभीषणं विनिद्रं प्रबुद्धं कृतदेवतार्चं कृतेष्टदेवतापूजनं दृष्ट्वैव चित्तप्रशमं किरन्तं प्रकाशयन्तं आविष्कृतं प्रदर्शितं यदङ्गस्य प्रतिकर्म प्रसाधनं तेन रम्यं माता नैकषी नाम वाचं वक्ष्यमाणामुवाच ॥ १ ॥ ज० म०

भाविकनामा गुणः प्रबन्धविषय एव मतः श्लेषादिवदेकदेशविषयोऽपि । तदुक्तं दण्डिना

तं भाविकमिति प्राहुः प्रबन्धविषयं गुणम् ।
भावः कवेरभिप्रायः काव्येष्वासीह्यवस्थितः ॥
परस्परोपकारित्वं सर्वेषां वस्तुपर्यणाम् ।
विशेषणानां व्यर्थानामक्रियास्थानवर्णना ॥
व्यक्तिरुक्तिक्रमवशाद्गम्भीरस्यापि वस्तुनः ।
भावयित्वमिदं सर्वमिति तं भाविकं विदुः ॥ इति कण्ठाभरणे तु भावतो वाक्प्रवृत्तियां भाविकं तदुदाहृतमिति शब्दगुणः । स्वाभिप्रायोक्तिविन्यासो भाविकत्वं निगद्यते इत्यर्थगुणः इति अन्यत्रापि

प्रबाधमानस्य जगन्ति धीमंस्त्वं सोदरस्यातिमदोद्धतस्य ।
आनन्दनो नाकसदां प्रशान्तिं तूर्णं विषस्याऽमृतवत् कुरुष्व ॥२॥

भाविकत्वसत्कारप्रवन्धविषयो गुणः ।
प्रत्यक्षा इव दृश्यन्ते पदार्थाभूतभाविनः ॥
चित्रोदात्ताद्भुतार्थत्वं कथाया अतिशीलता ।
शब्दानां कौशलञ्चापि तस्य हेतुः प्रचक्षते ॥ इति

स एवाधुना प्रदर्श्यते

तत इत्यादि । ततः प्रातःकालादनन्तरं माता नैकषी वक्ष्यमाणां वाचं विभीषणं उवाच कथितवती कीदृशं विगतनिद्रं विहितदेवार्चनं दृष्टिमात्रेण चित्तस्थितां प्रशान्तिं किरन्तं प्रकाशयन्तं शान्तमूर्त्तित्वात् आविष्कृतेन प्रकाशितेनाङ्गप्रतिकर्म्मणा शरीरसाधनेन रक्ष्यमेतेन सर्व्वलौकिल्यसुतं सेतुकखपफेवेति अस्य वाशब्दस्य व्यवस्थावाचित्वादत्र नित्यं वेः सकारः तस्य निष्पतन्त्य इति वत् मूर्द्धन्यत्वं दुर्निरावर्विर्हिःप्रादुश्चतुरां यः कखपफे इति परस्त्वं उवाचेत्यादिप्रयोगे वाचमित्यादिप्रयोगो व्यर्थत्वेऽपि न दुष्यति यदुक्तं कण्ठाभरणे

यदप्रयोजकं यच्च गदार्थं व्यर्थमेव वा ।
तस्यापि क्वापि निर्दोषः प्रयोगो दृश्यते यथेति ॥ १ ॥ भ०

प्रबाधमानस्येत्यादि । हे धीमन् त्वं नाकसदां देवानां आनन्दनः प्रमोदयिता सन् सोदरस्य भ्रातुर्दशाननस्य गर्भावस्थायां समानसदरं यस्येति योगविभागात्समासः अतिबलोद्धतस्य महता सामर्थ्येन दृप्तस्य जगन्ति लोकं प्रबाधमानस्य पीडयतः प्रशान्तिं प्रशमनं तूर्णं कुरुष्व अमृतवत् यथा अमृतं देवानामानन्दनं विषस्य कालकूटनाम्नः सोदरस्य एकस्मिन् समुद्रोदरे स्थितत्वात् जगन्ति प्रबाधमानस्य प्रशान्तिं कृतवदिति ॥ २ ॥ ज० म०

किमुवाचेत्याह

प्रबाधमानस्येत्यादि । हे धीमन् प्रशस्तबुद्धियुक्त त्वं अमृतवदमृतमिव विषस्य कालकूटस्य इव सोदरस्य रावणस्य प्रशान्तिं तूर्णं शीघ्रं कुरुष्व कीदृशस्य सोदरस्य जगन्ति लोकत्रयं प्रबाधमानस्य पीडयतः अतिबलेन महासामर्थ्येन उद्धतस्य तीव्रस्य विषमपि मथनकाले जगन्ति प्रबाधमानं स्वतेजसा उद्धतञ्च कीदृशः नाकसदां देवानामानन्दनः प्रमोदयिता अमृतमपि देवानामानन्दकं एकस्मिन् समुद्रोदरे स्थितत्वात् विषामृतयोरपि सोदरत्वं समानसदरं यस्येति सोदरः समानार्थस्य सहशब्दस्य सहःसोदेत्यनेन पक्षे सादेशः एवं

कुर्यास्तथा येन जहाति सीतां विषादनीहारपरीतमूर्त्तिम् ।
स्थितां क्षितौ शान्तशिखाप्रतानां तारामिव त्रासकरीं जनस्य॥३॥
यावन्न संत्रासितदेवसङ्घः पिण्डो विषस्येव हरेण भीष्मः ।
संग्रस्यतेऽसौ पुरुषाधिपेन द्रुतं कुलानन्द यतस्व तावत् ॥ ४ ॥
हता जनस्थानमदो निकायाः कृता जितोत्खातभटद्रुमा भूः ।
सदांसि दग्धानि विधेयमस्मिन् यद्बन्धुना तद्वटयस्व तस्मिन् ॥५॥

यत्र भ्राता सहोदर इत्यपि स्यात् रूपनामगोत्रेत्यादौ उदर्य्यशब्देनोदरशब्दोऽपि गृह्यत इति केचित् समानस्य समावो लोकोपचारादित्यन्ये ॥ २ ॥ भ०

कुर्या इत्यादि । तथाप्रकारमनुतिष्ठ त्वं येन सीतां जहाति विषादनीहार-परीतमूर्त्तिं विषादो नीहार इव तेन परिगतदेहां क्षितौ स्थितां निमग्नां शान्त-शिखाप्रतानां अनुज्ज्वलवेणीवन्धां जनस्य त्रासकरीं भयहेतुभूतां हेतौ टः तारामिव यथा कांचित्तारा क्षितौ स्थिता पतिता नीहारपरीतमूर्त्तिः शान्तशिखा-प्रताना ध्वस्तरश्मिजाला लोकत्रासकरी तद्वत्तामिति ॥ ३ ॥ ज० भ०

कुर्या इत्यादि । त्वं तथा तं प्रकारं कुर्याः यथा येन प्रकारेण स सीतां जहाति त्यजति जनस्य त्रासकरीं त्रासहेतुमुत्पाततारामिव प्रकरणात् राक्षसस्य त्रासं करिष्यतीति भावः विषादो नीहार इव तेन परिगतमूर्त्तिं क्षितौ स्थितां भूमिशयनात् नक्षत्रस्यापि भूमौ पाते उत्पातः सिद्धः यद्वा तारा पक्षे क्षितौ क्षयनिमित्तं स्थितामित्यर्थः शान्तशिखाप्रतानां ध्वस्तकेशप्रतानां केशोन्मुञ्चनात् तारापक्षे ध्वस्तकिरणजालाम् ॥ ३ ॥ भ०

यावदित्यादि । यथा सन्त्रासितदेवसङ्घः विषस्य कालकूटस्य पिण्डो भीष्मोऽतिरौद्रो हरेण संग्रस्तः पीतः तद्वद्यावदसौ रावणः पुरुषाधिपेन रामेण न संग्रस्यते न विनाश्यते तावत् हे कुलानन्द कुलानि ह्यानन्दयतीति कर्म्मण्यण् द्रुतं यतस्व सीतात्याजनाया यत्नं कुरु ॥ ४ ॥ ज० भ०

यावदित्यादि । हे कुलानन्द यावत्पुरुषाधिपेन रामेणासौ रावणो न संग्रस्यते न हन्यते यथा हरेण सहादेवेन विषस्य कालकूटस्य पिण्डो ग्रस्तः तावत्त्वं द्रुतं यतस्व यत्नं कुरु सीतात्यजनायेत्यर्थात् कीदृशो रावणो विषपिण्डश्च सन्त्रासितो देवगणो येन स तथा भीष्मो भयजनकः अतिरौद्र इत्यर्थः कुलमान-न्दयतीति कुलानन्दः ढात्पक्षिति घण् कुलस्यानन्दो यस्मादिति वा ॥४॥ भ०

हता इत्यादि । जनस्थानमदो दण्डकारण्यवासिनः निकायाः सरङ्गवृक्षा-

चिकीर्षिते पूर्वतरं स तस्मिन् क्षेमङ्करेऽर्थे मुहुरीर्ष्यमाणः ।
मात्रातिमात्रं शुभयैव बुद्ध्या चिरं सुधीरभ्यधिकं समाधात् ॥ ६ ॥
दौवारिकाभ्याहृतशक्रदूतं सोपायनोपस्थितलोकपालम् ।
साशङ्कभीष्माग्रविशन्निशाटं द्वारं ययौ रावणमन्दिरस्य ॥ ७ ॥

दीनां सङ्घा हताः सङ्घेत्यनौत्तराधर्य्य इति चिनोतेः घञ् ककारस्यादेशः पूर्व्व सङ्घा जितभटा उत्खातद्रुमा कृता सदांसि गृहाणि दग्धानि इति सर्व्वमेतत्त्वया श्रुतमेव अनेन प्रकारेण अस्माकमपि विनाशः स्यात् तदेतस्मिन्वस्तुनि यद्बन्धुना विधेयं अनुष्ठेयं तद्विधातुं घटयस्व यतस्व तस्मिन्वस्तुनि ॥ ५ ॥ ज० म०

हता इत्यादि । जनस्थानसदो दण्डकारण्यवासिनो निकायाः खरदूषणादीनां समूहाः हता मारिताः खदैधावोदेत्यादिना निपूर्व्वचिञोधञि समूहार्थे निकायो निपातितः पूर्व्वङ्गा जितभटा उन्मूलितवृक्षा च कृता सदांसि गृहाणि दग्धानि एवमपरस्यापि विनाशः स्यात् तस्मादेतस्मिन् वस्तुनि बन्धुना यद्विधेयं विधातुं योग्यं तत् घटयस्व कुरु तस्मिन् वस्तुनि रावणविषये वा ॥ ५ ॥ भ०

चिकीर्षित इत्यादि ॥ तस्मिन् सीताप्रत्यर्पणलक्षणेऽर्थे मातृरूपदेशात् पूर्व्वतरं पूर्व्वमेव चिकीर्षिते कर्त्तुमीप्सिते माता शुभयैव बुद्ध्या कल्याणया अतिमात्रमत्यर्थं शुद्धः क्षणमीर्ष्यमाणः प्रवर्त्तमानः स विभीषणः सुधीः प्राज्ञः चिरकालमभ्यधिकं समाधात् चिन्तितवान् इदमतिन्याय्यमिति गतिस्थेति सिचो लुक् इयता प्रबन्धेन उदात्तार्थाभिधानादुदात्तार्थत्वसङ्गं इत उत्तरं प्रहस्तरावणविभीषणमातामहकुम्भकर्णादीनां वचनप्रबन्धेषु चित्रादद्भुतार्थत्वं द्रष्टव्यं स्वविनीतता सुबोधता शब्दानाकुलता चेत्येतदुभयं कथायामेव मन्त्रनिर्णयाख्यायां द्रष्टव्यम् ॥ ६ ॥ ज० म०

चिकीर्षिते इत्यादि । तस्मिन् सीताप्रत्यर्पणरूपेऽर्थे पूर्व्वतरं मातृरूपदेशात् पूर्व्वमेव स्वयं चिकीर्षिते कर्त्तुमिष्टे यतः क्षेमङ्करे शुभदायके मात्रापि शुभया शोभनयैव बुद्ध्या अतिमात्रमत्यर्थं शुद्धः पुनः पुनः प्रेर्य्यमाणः सुधीः प्राज्ञः स विभीषणश्चिरमभ्यधिकं समाधात् न्याय्यमेवैतदिति चिन्तितवान् भूस्थाग्निवेति दासंसकात् सेर्लुक् इयता प्रबन्धेन उदात्तार्थत्वसङ्गं इत उत्तरं रावणविभीषणप्रहस्तादीनां वचनप्रबन्धेन चित्रादद्भुतार्थत्वं द्रष्टव्यं अतिशीलता शब्दानां कुशलताचेत्येतदुभयं मन्त्रनिर्णयकथायां द्रष्टव्यम् ॥ ६ ॥ भ०

दौवारिकेत्यादि । स विभीषणः रावणमन्दिरस्य द्वारं ययौ दौवारिकाः

दूरात् प्रतीहारनतः स वार्त्तां पृच्छन्ननावेदितसंप्रविष्टः ।
सगौरवं दत्तपथो निशाटैरैक्षिष्ट शैलाग्रमिवेन्द्रशत्रुम् ॥ ८ ॥
क्रशानुवर्ष्मण्यधिरूढमुच्चैः सिंहासने संक्षयमेघभीमम् ।
निसर्गतीक्ष्णं नयनस्फुलिङ्गं युगान्तवक्रेरिव धूमराशिम् ॥ ९ ॥

द्वारे नियुक्ताः द्वारादीनामित्यौव् तैरभ्याहताः शक्रदूता यस्मिन् द्वारे सोपायनाः गृहीतकौशलिकाः उपस्थिता औपढौकिता लोकपाला यत्र साशङ्काः सभयाः भीष्मा भयानकाः आप्ता विश्वस्तो निशाटा यत्रेति तदिति ॥७॥ ज०म०

दौवारिकेत्यादि । विभीषणो रावणमन्दिरस्य द्वारं ययौ कीदृशं द्वारं दौवारिकैर्द्वारपालैरभ्याहता निवारिताः शक्रदूता यस्मिन् सोपायनाः सोपहाराः सन्तः उपस्थिता लोकपाला यत्र साशङ्काः सभयाः सन्तो भीष्मा भयजनका आप्ता आत्मीया विश्वस्तो निशाटा राक्षसा यत्र तेन परेष्वात्मीयेष्वपि तस्य दृष्टत्वं दर्शितं द्वारि नियुक्तो दौवारिकः ढधेकादिति ष्णिकः द्वारस्वरेति उन णित्त्रिरिति वृद्धिः ॥ ७ ॥ भ०

दूरादित्यादि । स विभीषणः दूरादेव प्रतीहारेण नतः स्वामिनीव तत्र गौरवात् वार्त्तां पृच्छन् कुशली महाराज इति विभीषणो द्वारि तिष्ठतीति राज्ञे आनावेदित एव सम्प्रविष्टो निशाटैः सगौरवञ्च सविनयं दत्तपथो दत्तमार्गः इन्द्रशत्रुं रावणमैक्षिष्ट दृष्टवान् शैलाग्रमिव सिंहासनारूढस्य तस्योच्चत्वात् ॥ ८ ॥ ज० म०

दूरादित्यादि । दूरादेव प्रतीहारेण द्वारपालेन नतो नमस्कृतः राजा कुत्र तिष्ठति किं वा करोतीति वार्त्तां पृच्छन् विभीषणो द्वारि तिष्ठतीति राज्ञोऽनावेदित एव सम्प्रविष्टः निशाटैः राक्षसैः सगौरवं यथा स्यात्तथा दत्तः पन्था यस्य स विभीषण इन्द्रशत्रुं रावणं ऐक्षिष्ट दृष्टवान् शैलाग्रमिव पर्व्वतशिखरमिव सिंहासनस्थत्वात् गुरोर्भावो गौरवं विकारसङ्केति ष्णः ॥ ८ ॥ भ०

क्रशानुवर्ष्मणीत्यादि । सिंहासने उच्चैस्तुङ्गे क्रशानुवर्ष्मणि अग्नितुल्ये अधिरूढं उपविष्टं सञ्जयमेघवद्भीमं अतिभयङ्करं निसर्गतीक्ष्णं स्वभावरौद्रं नयनानि स्फुलिङ्गा इव यस्य तमैक्षिष्ट युगान्तवक्रेरिव धूमराशिं अग्नितुल्यसिंहासने उपरि स्थितत्वात् सोऽपि सञ्जयमेघवद्भीमः स्वभावतः कटुकत्वात् स्वभावतीक्ष्णः नयनानि विस्फुलिङ्गा यत्रेति ॥ ९ ॥ ज०म०

क्रशानित्यादि । कीदृशं रावणमैक्षिष्ट क्रशानुवर्ष्मणि अग्न्याकारे अग्नि-

प्रीत्यापि दत्तेक्षणसन्निपातं भयं भुजङ्गाधिपवद्दधानम् ।
तमःसमूहाकृतिमप्यशेषानूर्ज्जा जयन्तं प्रथितप्रकाशान् ॥ १० ॥
तं रत्नदायं जितमृत्युलोका रात्रिञ्चराः कान्तिभृतोऽन्वसर्पन् ।
प्रयुक्तमुक्ताफलमभ्युवाहं सञ्जाततृष्णा इव देवमुख्याः ॥ ११ ॥

सुन्दरे वा उद्दीप्तत्वादुच्चैस्तुङ्गे सिंहासनेऽधिरूढं वर्ष्म देहे प्रमाणे च सुन्दराकारयोरपीति विश्वः प्रलयकालीनमेघवद्भीममतिकृष्णत्वात् निसर्गेण स्वभावेन तीक्ष्णं रौद्रं नयनानि स्फुलिङ्गा अग्निकणा इव यत्र युगान्तवह्नेः प्रलयकालीनवह्नेर्धूमराशिमिव अग्नितुल्यसिंहासनस्थत्वात् धूमोऽपि मेघतुल्यः कटुत्वात्तीक्ष्णः स्फुलिङ्गवांश्च भवति ॥ ९ ॥ भ०

प्रीत्येत्यादि । यथा भुजङ्गाधिपः शेषः प्रीत्या स्नेहेन दत्तेक्षणसन्निपातः समर्पितनेत्रनिवहो भयमादधाति तद्वद्भयमादधानं तमःसमूहस्येवाकृतिर्यस्य तमपि प्रथितप्रकाशानशेषानर्कादीन् ऊर्जा बलेन जयन्तमभिभवन्तं ऊर्जेति भ्राजभासेत्यादिना क्विप् ॥ १० ॥ ज० म०

प्रीत्येत्यादि । पुनः कीदृशं भुजङ्गाधिपः शेषः प्रीत्यापि दत्तेक्षणसन्निपातः समर्पितनेत्रसमूहः सन् यथा भयं जनयति तथा भयं दधानं तमःसमूहस्य राङ्कवन्त्स्नेव अन्धकारचयस्येव वा आकृतिर्यस्य तथाभूतमपि ऊर्ज्जा बलेनाप्यशेषान् प्रसिद्धप्रकाशान् सूर्यादीन् जयन्तमभिभवन्तं ऊर्ज्जबलप्राणधारणयोः लासुसिति भावे क्विप् तमोऽन्धकारे स्वर्भानौ तमः क्लेशे गुणान्तरे इति विश्वः ॥ १० ॥ भ०

तं रत्नदायमित्यादि । यथा देवमुख्याः अमरत्वाज्जितमृत्युलोकाः कान्तिभृतो दीप्तिधराः सञ्जाततृष्णाः सन्तः प्रयुक्तमुक्ताफलमभ्युवाहमुपसर्पन्ति तद्वत्तं विभीषणं रत्नदायं रत्नं दास्यतीति अण् कर्मणि चेति भविष्यत्काले क्रियायां क्रियार्थायामित्यण् तत्र एककर्तृके भिन्नकर्तृके वेति विशेषाभावात् अथवा दयदानगत्योरित्यस्मात्कर्मण्यण् रत्नं दयते ददातीति कृत्वा रात्रिञ्चरा भग्नयमलोकाः अन्वसर्पन् ॥ ११ ॥ ज० म०

तमित्यादि । रात्रिञ्चराः सञ्जाताभिलाषाः सन्तो रत्नदायं तं विभीषणमन्वसर्पन् अनुगतवन्तः यथा देवमुख्या देवश्रेष्ठा जितमृत्युलोकाः कान्तिभृतः सञ्जाततृष्णाः सन्तः शुक्तिषु तोयप्रक्षेपेण प्रयुक्तमुक्ताफलं मेघमनुसर्पन्ति तद्वत् कीदृशा रात्रिञ्चराः जितमृत्युलोकाः अभिभूतयमलोकाः कान्तिं बिभ्रतीति क्विप् कान्तिभृतः तेजस्विनः देवमुख्या अपि अमरत्वात् जितमृत्युलोकाः कान्तिभृतश्च

स किङ्करैः कल्पितमिङ्गितज्ञैः सम्बाधकं पूर्व्वसमागतानाम् ।
सिंहासनोपाश्रितचारुवाङ्उरध्यास्त पीठं विहितप्रणामः ॥१२॥
ततो दशास्यः क्षुभिताहिकल्पं दोष्णाङ्गुलीयोपलमूढरत्नम् ।
अनेकचञ्चन्नखकान्तिजिह्वं प्रसार्य्य पाणिं समितिं बभाषे॥१३॥
शक्तैः सुहृद्भिः परिहृष्टकार्य्यैराम्नातिभिर्नीतिषु बुद्धिमद्भिः ।
युष्माद्विधैः सार्द्धमुपायविद्भिः सिध्यन्ति कार्य्याणि सुमन्त्रितानि॥१४

रत्नदायमिति रत्नं दास्यतीति भविष्यत्काले ढात्वर्थेति षण् तस्य कालविशेषानुक्तेष्विप कालेषु भवति अन्यकालेऽपि न क्षतिः यनञ्ण्यदिति यन् दयदाने इत्यस्य रूपं वा यद्वा त्रसव्यधेत्यादिना णः ततः षष्ठीसमासः ॥११॥ भ०

स किमित्यादि । स विभीषणः विहितप्रणामः कृतप्रणतिः पीठमध्यास्त निषसादवान् किङ्करैर्भृत्यैरिङ्गितज्ञैरभिप्रायवेदिभिः कल्पितमुपनीतं पूर्व्वसमागतानां प्रथममप्रविष्टानां सम्बाधकं सङ्कटकृत् सम्बाधत इति णुल् रावणस्य सिंहासने उपाश्रितः स्थितः चारुर्वाङ्उर्यस्य विभीषणस्येति सः ॥ १२ ॥ ज० भ०

स किङ्करैरित्यादि । स विभीषणो विहितप्रणामः कृतभक्त्यतिशयव्यञ्जकनतिः सन् पीठमध्यास्त अधिरूढवान् किंभूतमासनमिङ्गितज्ञैरावणाशयवेदिभिः किङ्करैर्भृत्यैः कल्पितमुपनीतं पूर्व्वसमागतानां प्रथमोपविष्टानां अन्येषां मन्त्रिणां सम्बाधकं सङ्कोचकारकं तेषां स्थाने अस्य पीठस्यार्पणात् स कीदृशः रावणसिंहासने उपाश्रितः स्थितश्चारुर्वाङ्उर्यस्य ॥ १२ ॥ भ०

तत इत्यादि । विभीषणनिवेदनादुत्तरकालं दशास्यः पाणिं क्षुभिताहिकल्पं क्षुब्धविस्तृतफणेन सर्पेण तुल्यं दीप्तो दीपनशीलोऽङ्गुलीयोपलोऽङ्गुलीयरत्नं यतः तत एव गूढरत्नं अनेकाश्चञ्चन्त्यश्चलन्त्यो नखकान्तयो जिह्वा इव यस्य तं प्रसार्य्य समितिं राक्षससमूहमभाषे ॥ १३ ॥ ज० भ०

तत इत्यादि । विभीषणोपवेशनादनन्तरं दशास्यः पाणिं प्रसार्य्य समितिं राक्षसानां सभां वक्ष्यमाणप्रकारेण बभाषे उवाच कीदृशं पाणिं क्षुभिताहिकल्पं क्षुब्धविस्तृतफणसर्पतुल्यं दीप्तो दीपनशीलोऽङ्गुलीयोपलो मुद्रिकारत्नं यत्र अतएवोढरत्नं अनेन सर्पसादृश्यं सूचितं अनेकाश्चञ्चन्त्यश्चलन्त्यो नखकान्तयो जिह्वा इव यस्य ॥ १३ ॥ भ०

शक्तैरित्यादि । समर्थैः सुहृद्भिर्मित्रैः परिहृष्टकार्य्यैः मा भूदहृष्टकर्म्मणां कर्म्मसु विषाद इति आम्नातिभिः अभ्यस्तनीतिशास्त्रैरित्यर्थः दृष्टादिभ्यश्चेति

उपेक्षिते वालिखरादिनाशे दग्धे पुरेऽस्मे निहते सभृत्ये ।
सैन्ये द्विषां सागरसुत्तितीर्षावनन्तरं ब्रूत यदत्र युक्तम् ॥१५॥
भुजांसवज्रःस्थलकार्मुकासीन् गदाश्च शूलानि च यातुधानाः ।
पराभ्यन्तः प्रथिताभिमानाः प्रोचुः प्रहस्तप्रमुखा दशास्यम्॥१६॥

इनि क्षेत्रविषयेति कर्म्मणि सप्तमी बुद्धिमद्भिः ज्ञानवद्भिः उपायविद्भिः सामादिकुशलैरित्यर्थः युष्मद्विधैः सह कार्य्याणि समन्वितानि सिध्यन्ति ॥१४॥ ज०म०

शक्तैरित्यादि । मन्त्रिणां प्रोत्साहनार्थमिदमुच्यते युष्मद्विधैर्भवादृशैः सह समन्वितानि कार्य्याणि सिध्यन्ति सिद्धं गच्छन्ति तत्र हेतुमाह शक्तैः समर्थैः न केवलं युष्माभिर्म्मन्त्रणा दीयते मन्त्रणां दत्वा तद्विस्रीतिकर्त्तव्यमपि क्रियत इति भावः स्वयमसमर्थाहि न स्वामिनो युद्धाद्यर्थं मन्त्रणां ददातीति वा सुहृद्भिर्म्मित्रैः न तु शक्तत्वेनाहङ्कारः नतु वा कुमन्त्रणा दीयत इति भावः परिदृष्टकार्य्यैरदृष्टकर्म्माणोहि शास्त्रविदोऽपि सुह्यन्ति नीतिषु आम्नातिभिरभ्यस्तनीतिशास्त्रैः न केवलं दर्शनादेव कार्य्यज्ञानं क्लेनाढे इति कर्म्मणि सप्तमी विषयविवक्षयेत्यन्ये बुद्धिमद्भिः अहापोहज्ञैः न शुक्रादिवत् अधीतवक्तृत्वं उपायविद्भिः सामदानादिकुशलैः उपायाज्ञानात् बुद्धिमन्तोऽपि सुह्यन्ति परिकरालङ्कारोऽयं विशेषणैर्यत्साकूतैरुक्तिः परिकरस्तु सः ॥ १४ ॥ भ०

उपेक्षित इत्यादि । वालिखरादिनाशेषूपेक्षितेषु द्विषाञ्च सैन्ये सागरसुत्तितीर्षावुत्तरितुमेषणयोले अनन्तरमिदानीं ब्रूत वदत यदत्र युक्तमिति उत्तितीर्षावितिं इकोचिम् विभक्ताविति तुब भवति क्तीयादिषु भाषितपुंस्कमिति पुम्बद्भावः ॥ १५ ॥ ज० म०

उपेक्षित इत्यादि । वालिनः खरादेश्च नाशे उपेक्षिते सति पुरे लङ्कायां दग्धे सति भृत्यैः सह अक्षनाम्नि कुमारे हते सति शत्रूणां सैन्ये समुद्रसुत्तितीर्षौ उत्तरितुमिच्छौ सति अनन्तरमिदानीं यूयं ब्रूत अत्र यद्युक्तमिति बभाषे इति पूर्व्वेणान्वयः उत्तितीर्षावितिं स्याद्वृद्धृरिति पक्षेऽनिम् पुम्बद्भावोक्तपुंस्कमिति पक्षे पुम्बद्भावात् तुच्चिक इति न तुन् ॥ १५ ॥ भ०

भुजांसेत्यादि । यदि वयं शत्रून् न व्यापादयामस्तदा किमेतैर्भुजादिरूढैरिति प्रथिताभिमानाः प्रकाशिताहङ्कारा भुजादीन् पराभ्यन्तः प्रहस्तप्रमुखा यातुधाना दशास्यं प्रोचुर्व्वक्तुमारब्धाः वचपरिभाषणे लिट् उस् ॥ १६ ॥ ज० म०

भुजांसेत्यादि । प्रहस्तप्रभृतयो यातुधाना दशास्यं वक्ष्यमाणं प्रोचुः किल-

अखण्डप्रमानं परिखण्डय शक्रं त्वं पण्डितमन्यमुदीर्णदण्डः ।
नराभियोगं नृभुजां प्रधान मन्त्रोन्मुखः किं नयसे गुरुत्वम् ॥१७॥
निर्यत्स्फुलिङ्गाकुलधूमराशिं किं ब्रूहि भूमौ पिनषाम भानुम् ।
आदन्तनिष्पीडितपीतमिन्दुं ष्ठीवाम शुष्कैक्षुलताश्मिकल्पम् ॥१८

र्श्यन्तः बाहून् स्कन्धान् वक्षःस्थलानि धनूंषि खड्गान् गदाः शूलानि च परामृशन्तः स्पृशन्तः ग्रथिताभिमानाः प्रकाशिताहङ्काराः ॥ १६ ॥ भ०

अखण्डप्रमानमित्यादि । शक्रमखण्डप्रमानं अनभिभवनीयाहङ्कारं अतस्व पण्डितमन्यं पण्डितमात्मानं मन्यमानं नान्यः पण्डितोऽस्तीति तादृशं परिखण्डय जित्वा त्वं नृभुजां राक्षसानां प्रधान उदीर्णदण्डो अभ्यर्चितबलस्त्वन् किमर्थं मन्त्रोन्मुखो मन्त्रप्रवणः नराभियोगं गुरुत्वं नयसे प्रापयसि सुमन्त्रितानि कार्याणि सिध्यन्तीति अत्र कर्तुर्गुणाभियोगेन क्रियाफलेन योगादात्मनेपदम् ॥१७॥ज०म०

किं प्रोचुरित्याह

अखण्डेत्यादि । हे नृभुजां राक्षसानां प्रधान अखण्डप्रमानं परैरनभिभवनीयमात्मानं पण्डितं मन्यमानं नान्यः पण्डितोऽस्तीति साहङ्कारं शक्रमपि परिखण्डय जित्वा त्वं उदीर्णदण्डो महाबलोऽपि सन्मन्त्रोन्मुखः सन् मन्त्रणां कुर्वन् नरस्याभियोगं युद्धं गुरुत्वं कथं नयसे प्रापयसि अनन्तरं ब्रूत यदत्र युक्तमिति वचनेऽत्र गौरवप्रसङ्गात् मन्त्र्यात्खार्थे इति स्वार्थे दण्डो यमे मानभेदे लगुडे दमसैन्ययोः । व्यूहभेदे प्रकाण्डेऽप्ये कोषस्याण्डोरपि स्मृतः अभिमानाग्रहे दण्डस्वण्डांशोः पारिपार्श्विके इति । प्रधानं स्यान्महामात्रे प्रकृतौ परमात्मनि । प्रसायाञ्च प्रधानं स्यादेकत्वे च सदैव तु इति च विश्वः प्रधाना हरितांजगा इति प्रयोगात् पुंलिङ्गोऽपि प्रधानशब्द इति श्रीपतिः ॥ १७ ॥ भ०

निर्यदित्यादि । ब्रूहि समादिश आस्तां तावन्नराभियोगः किं भानुं क्षितौ पिनषाम चूर्णयाम प्रश्ने लोट् रूधादिभ्यः श्नम् निर्यता निर्गच्छता स्फुलिङ्गेनाकुलो धूमराशिर्यस्य तं भानुं आ इति विकल्पे वर्त्तते दन्तनिष्पीडितपीतं इन्दुं वा पूर्वं दन्तैर्निष्पीडितं पश्चात्पीतं ष्ठीवाम निरस्याम. ष्ठीवृरूपधाया इति दीर्घः शुष्केक्षुयष्टेरश्मीव तत्सदृशम् ॥ १८ ॥ ज० म०

निर्यदित्यादि । आस्तां तावन्नराभियोगः ब्रूहि आदिश किं भूमौ भानुं पिनषाम चूर्णयाम धौपिषच्चूर्णने विधिनिमन्त्रणेत्यादिना संप्रश्ने गौ कीदृशं भानुं निर्यता निर्गच्छता स्फुलिङ्गेनाकुलो धूमराशिर्यस्य आः किंवा इन्दुं

सराघवैः किं वत वानरैस्तैर्यैः प्रातराशोऽपि न कस्यचिन्नः ।
सस्थाणुकैलासधराभिधत्स्व किं द्यौरधोऽस्तु क्षितिरन्तरीक्षे॥१९
चापल्ययुक्तस्य हरेः क्षयाय समेधितो बालधिभाक् त्वदीयैः ।

छीवाम छिवुक्ष्मायम इति दीर्घः भ्वाद्यादिण इत्यादौ छिववर्ज्जनात् न दन्त्यसकारत्वं कीदृशमिन्द्रं पूर्व्वं दन्तैर्निर्भीडितं पश्चात्पीतं सुधापानात् नीरसमित्ययेर्यदस्थि दृढभागस्तत्तुल्यं या इत्यव्ययं विकल्पे वर्त्तते इति जयमङ्गला आस्तु स्यात् कोपपीड्योरित्यमरः । आ सम्यक् दन्तैर्निर्भीडितमिति केचित् ॥ १८ ॥ भ०

सराघवैरित्यादि । सस्थाणुर्यः कैलासः तस्य धर इति सः धारयतीति धरः कर्त्तर्य्यच् हे सस्थाणुकैलासधर नोऽस्माकं मध्ये कस्यचिदेकस्य यैः सराघवैः प्रातराशोऽपि प्रातर्भोजनमपि न भवति तैः सराघवैर्वानरैः किं प्रयोजनं वतशब्दोऽनुशोचने अतोऽभिधत्स्व आदिश किं द्यौराकाशमधोऽस्तु भवतु क्षितिर्वा अन्तरीक्षे उपरिष्टादस्त्विति ॥ १९ ॥ ज० म०

सराघवैरित्यादि । हे सस्थाणुकैलासधर नोऽस्माकं मध्ये कस्यचिदेकस्यापि यैर्वानरै राघवाभ्यां सहितैः प्रातराशः प्रातर्भोजनमपि न भवति तैः किङ्कर्त्तव्यमत्रागत्येति शेषः वतेति खेदे आमन्त्रणे वा वतोऽभिधत्स्व आदिश किं द्यौराकाशं स्वर्गोवा अधो भवतु क्षितिरन्तरीक्षे उपरिष्टादस्तु तत्रैव कर्म्मणि सर्व्वे वयं भवद्भिर्नियोक्तुमुचिताः नत्वल्पकार्य्ये रामादिबधे इति भावः प्रलयेऽपि तिष्ठतीति स्थाणुः शिवः नाम्नन्ये इति मूर्द्धन्यणुप्रत्ययः तेन सह वर्त्तमानं कैलासपर्व्वतं धरतीति पचादित्वादच् त्वमद्भुतकर्म्मणि किं राजभिया मन्त्रणां करोषीति भावः अन्तरीक्ष्यते जगदस्मिन्निति अन्तरीक्षं छन्दसि छुरेकारमिति सर्व्वधरः शब्दभेदेष्वन्तरीक्षमिति हयशुक्लम् ॥ १९ ॥ भ०

यत्पुरं दग्धं तद्युद्धप्रमादेनैव नत्वतुशक्त्येति दर्शयन्नाह

चापल्येत्यादि । चपलस्य भावश्चापल्यं ब्राह्मणादित्वात् व्यञ्जनादिष्वपि दृश्यते तत्र चापलमिति रूपं तेन युक्तस्य हरेर्मर्कटस्य हे राजन् क्षयाय मध्यस्थ सतः यो बालधिः पुच्छं तद्भाक् समाश्रितः क्षयानुस्त्वदीयैः भृत्यैः समेधितो वर्द्धितः तैलघृतादिभिर्मृष्टात् घृष्टं गच्छतो गलन् पुच्छात्पतन् लङ्कामधाक्षीत् दग्धवान् एकाचोवशोभषित्यादिना धत्वं ज्वलन्नलक्षणा वृत्तिः क्षोढः क्षोढोः कक्षि । निजेन आत्मीयेन प्रमादेन ज्वालादर्शितलक्षणेन तदानीं तस्य यक्षत्वापादनमेव युक्तमिति ॥ २० ॥ ज० म०

शस्त्रेण वध्यस्य गलन्नधाक्षीद्राजन् प्रमादेन निजेन लङ्काम्॥२०॥
अथाञ्चितोरस्कमुदीर्णदृष्टिः कृत्वा विवक्षाप्रवणं शरीरम् ।
विदत्तपाणिर्विहितोत्तरार्थं विभीषणोऽभाषत यातुधानान्॥२१॥
युद्धाय राज्ञा सुभटैर्भवद्भिः सम्भावनायाः सदृशं यदुक्तम् ।

लङ्कादाहोऽयमाकमनवधानादेव नतु शत्रुसामर्थ्यादिति सूचयितुमिदमुच्यते चापल्येत्यादि । हे राजन् तव निजेनात्मीयेन प्रमादेनानवधानेन कथानुरग्निर्लङ्कामधाक्षीत् दग्धवान् कीदृशः कथानुर्हरेर्मर्कटस्य बालधिभाक् पुच्छभाग्भितः त्वदीयैर्भटैः स्वयमेधितरूक्षैलवस्त्रादिभिर्दीपितः गलन् हरेर्गृहाद्गृहान्तरगमनेन पतन् हरेः कीदृशस्य चापल्ययुक्तस्य चञ्चलतया युक्तस्य शस्त्रेण वध्यस्य वधार्हस्य चञ्चलस्य वध्यस्य वधमकृत्वा पुच्छे अग्निदानादेव एवं तव प्रमादः चपलस्य भावश्चापल्यं विकारसंघेति ष्ण्यः दहेरनिमित्वात् व्रजवदेत्यादिना ष्यां सौ त्रिः ॥ २० ॥ भ०

अथेत्यादि । प्रहस्तादिवचनानन्तरं अञ्चितोरस्कं विन्यस्तहारत्वात् पूजितोरस्कं उरःप्रभृतिभ्यः कप् अञ्चेः पूजायामितीट् नाञ्चेः पूजायामित्यनुनासिकलोपप्रतिषेधः तादृशं शरीरं विवक्षाप्रवणं वक्तुमिच्छाभिमुखं कृत्वा शरीरस्य सौष्ठवं उत्पाद्येत्यर्थः उदीर्णदृष्टिस्तदभिमुखदृष्टिः विदत्तपाणिस्तदभिमुखीकृतदक्षिणपाणिः विभीषणो यातुधानानभाषत विहितोत्तरार्थं विहितः प्रतिषिद्धः परैरुदितस्य वचनस्यार्थो यत्र भाषणे इति ॥ २१ ॥ ज० भ०

अथेत्यादि । प्रहस्तादिवचनानन्तरं विभीषणो विहितोत्तरार्थं यथा स्यात्तथा यातुधानान् अभाषत वक्ष्यमाणप्रकारेणोक्तवान् किं कृत्वा शरीरं देहं विवक्षाप्रवणं वक्तुमिच्छया अभिमुखं कृत्वा शरीरसौष्ठवमुत्पाद्येत्यर्थः शरीरं कीदृशमञ्चितोरस्कं विन्यस्तहारत्वात् पूजितवक्षसं क्षुधवसपूजार्थाच्च इति इम् नेदित् पूजार्थाञ्चेरिति नलोपाभावः अञ्चितं विस्तारितं उरो यत्रेति अप्रत्ययात् क इति केचित् पुंवत्कर्मधारयेऽपि पुंस्क इति ज्ञापकात् द्युतोऽन्यस्मादपि बहुव्रीहौ कप्रत्ययः स्यादिति गम्यते तेनात्र कः स्वार्थे क इत्यन्ये उरःप्रभृतिभ्यो बहुव्रीहौ नित्यं क इति परस्तूक्तं विभीषणः कीदृशः उदीर्णदृष्टिः प्रहस्तादीनां अभिमुखं दत्तदृष्टिर्विदत्तपाणिः तदभिमुखीकृतदक्षिणपाणिः विहितः प्रतिषिद्ध उत्तरस्य प्रतिवाक्यस्यार्थो येन भाषणेन ॥ २१ ॥ भ०

युद्धायेत्यादि । युद्धार्थं राज्ञा भवद्भिः सुभटैः सम्भावनायाः सम्भावितायाः तैः सुभटै-

तत्प्राणपण्यैर्वचनीयमेव प्रज्ञा तु मन्त्रेऽधिकृता न शौर्यम् ॥२२॥
यच्चापि यत्नादृतमन्त्रवृत्तिर्गुरुत्वमायाति नराभियोगः ।
वशीकृतेन्द्रस्य कृतोत्तरोऽस्मिन् विध्वंसिताशेषपुरो हनूमान् ॥२३॥
अग्निः प्रमादेन ददाह लङ्कां वध्यस्य देहे स्वयमेधितश्चेत् ।
विरञ्चिदृष्टेवधियाभिधत्त ब्रह्मास्त्रबन्धोऽपि यदि प्रमादः ॥२४॥

यदुक्तं भानुं पिनष्मीत्यादि कीदृशं सम्भावनायाः सदृशं तत्प्राणपण्यैर्वचनीयमेव मन्त्रे तु प्रज्ञाधिकृता न शौर्यम् ॥ २२ ॥ ज० म०

युद्धायेत्यादि । राज्ञा युद्धार्थमेव सुभटैः परिपुष्टैर्भवद्भिः सम्भावनाया अध्यवसायस्य सदृशं योग्यं यदुक्तं पिनष्मि भानुमित्यादिकं तद्वचनीयमेव वचनयोग्यमेव यतः प्राणाएव पण्या राजकृतेन भरणेन विक्रेया येषां तैः किञ्चिदं वचनं मन्त्रे नोपयुज्यते यतः प्रज्ञा बुद्धिर्मन्त्रेऽधिकृता नतु शौर्यम् ॥ २२ ॥ भ०

नराभियोगं किं नयसे गुरुत्वमित्यत्रोत्तरमाह

यच्चेत्यादि । वशीकृतेन्द्रस्य निर्जितशक्रस्य रावणस्य नराभियोगो यत्नादृतमन्त्रवृत्तिर्यत्नेनादृता मन्त्रवृत्तिर्यस्य सः तादृशो गुरुत्वमायातीति यच्चोक्तं अस्मिन् वस्तुनि हनूमान् कृतोत्तरो दत्तोत्तरः यतः प्रध्वंसिताशेषपुरः पुरं लङ्का पूः शब्दोवा कृतसमासान्तः यत्र कपिनाथभृत्येन ईदृशमनुष्ठितं स कथं नराभियोगो मन्त्रोत्सुखेन न निरूप्यत इति ॥ २३ ॥ ज० म०

नराभियोगं किं नयसे गुरुत्वमित्यत्रेदमुत्तरम्

यच्चेत्यादि । वशीकृतेन्द्रस्य निर्जितशक्रस्य रावणस्य यत्नेनादृता मन्त्रवृत्तियेत्र तादृशो नराभियोगो गुरुत्वमायातीति यच्चोक्तं अस्मिन् वस्तुनि हनूमानेव कृतोत्तरः दत्तप्रतिवाक्यो यतो विध्वंसितमशेषं पुरं येन यस्य दूतमात्रेणैवं कृतं तस्य नराभियोगः कथं लघुः स्यादतस्तत्र मन्त्रणा युक्तैव ॥ २३ ॥ भ०

प्रमादेनाग्निः लङ्कामधाक्षीदित्यत्रोत्तरमाह

अग्निरित्यादि । वध्यस्य वधार्हस्य देहे तदेकदेशेषु पुच्छादिषु प्रमादेन स्वयं युष्माभिरग्निरेधितो दीपितः लङ्कां ददाह चेत्तथात्राह अवध्योऽपि यदि प्रमादः तद्देवधिया दैवबुद्ध्या देवानां सात्विकत्वान्निर्मला बुद्धिः तया विरञ्चिस्य निरूप्याभिधत्त ब्रूत सोऽपि प्रमाद इति यतोऽसावमोघोऽपि विशेषितः अभिधत्तेति दधत्तथोश्चेत्यभ्यासदकारस्य भष धातोश्च खरिचत्वम् ॥ २४ ॥ ज० म०

अग्निरित्यादि । निजेन प्रमादेन ज्ञानाभावेन लङ्कामधाक्षीदित्यत्रेदमुत्तरं वध्यस्य

जगन्त्यमेयाद्भुतभावभाञ्जि जिताभिमानाश्च जना विचित्राः ।
कार्येषु तु यत्नं कुरुत प्रकृष्टं मा नीतिगर्भान् सुधियोऽवमध्वम् ॥२५॥
दृङ्नित्त्वयस्थानगतामजस्रं दृप्तिं जिगीषुः प्रसभीक्षमाणः ।

वधार्हस्य कर्मेदंहे खयमेधितो दीपितोऽग्निर्लङ्कां प्रमादेन ददाहेति चेत् यदि तदा यदि ब्राह्मास्त्रबन्धोऽपि प्रमादोऽनवधानकृतो भवति तर्हि वधिया देवानां सात्विकत्वान्निर्मला तत्त्वग्राहिणी या बुद्धिस्तादृग्धिया विमृश्य निरूप्य अभिधत्स्व ब्रूहि देवेति पृथक् पदं रावणसम्बोधनं वा यदि च ब्राह्मास्त्रबन्धो न प्रमादः तदा अग्निं दत्वा ब्राह्मास्त्रबन्धस्य स्थापितत्वात् कृतोऽग्निदानप्रमादो येन च खयमेव तादृशबन्धनं खण्डितं तस्य किमशक्यं कुतो वा वधः स्यादिति भावः डुधाञिधारणे पुष्टौ दाने अभिपूर्वो भावणार्थः ह्लादीरेहिरिति हित्वं खेर्झभखयेति खेर्दत्वं आद्योरित्यालोपः झभान्तस्येति खेर्धत्वं झषझषोरिति तः अभिधत्तेति पाठे धोर्दधोऽन्तलोपे तथि ॥ २४ ॥ भ०

पराभियोगः सर्वथा निरूपणीय इति दर्शयन्नाह

जगन्त्यित्यादि । असंख्यविचित्रभावभाञ्जि जगन्ति तत्रत्या अपि जनाः विचित्राः शक्तिदेशकालवशात् जिताभिमानाश्च अन्यैरुत्कृष्टैर्जीयतेऽभिमानस्तेषां तेनात्मन्यभिमानो न कर्त्तव्य इति दर्शयति कार्येषु तु प्रकृष्टमुत्तमं यत्नं कुरुत येन तत्तत्कार्यं सिध्यति तत्र च ये युक्तिमभिदधति तान्नीतिगर्भान् नीतिरेव षाङ्गुण्यादिज्ञानं गर्भे येषां अतएव सुधियो मावमंस्थं मा परिभूत तदयुक्तानुष्ठानात् हनश्जिति कित्त्वविधानसामर्थ्यात् अनुनासिकलोपाभावः धिचेति सिचोलोपः ॥ २५ ॥ ज० म०

पराभियोगः सर्वथा निरूपणीय इति दर्शयितुमिदमुच्यते

जगन्त्यित्यादि । जगन्ति भुवनानि अमेयानसंख्यान् अद्भुतानाश्चर्यान् भावान् भजन्ति तत्रत्याश्च जना अपि विचित्राः शक्तिदेशकालवशान्नानाविधा जिताभिमानाश्च भवन्ति अन्यैरुत्कृष्टैर्जनैर्जितोऽभिमानोऽहङ्कारो येषां ते तथा तस्मादभिमानो न कर्त्तव्य इति कार्येषु प्रकृष्टमुत्तमं यत्नं कुरुत तेनैव कार्यं सिध्यति तत्रवश्यया नीतिरेव गर्भोऽन्तर्गतो येषां तान् अतएव सुधियः पण्डितान् मा अवमध्वं तदवज्ञां न कुरुत मनेर्धसलोपो वेति सिलोपे वनतनाद्यनिमामिति नकारलोपः ॥ २५ ॥ भ०

यथा च विजिगीषुणा वर्त्तितव्यं तथोपदिशन्नाह

घटेत सन्ध्यादिषु यो गुणेषु लक्ष्मीर्न तं सृजति चञ्चलापि ॥२६॥
उपेक्षणीयैव परस्य दृष्टिः प्रनष्टनीतेरजितेन्द्रियस्य ।
मदादियुक्तस्य विरागहेतुः समूलघातं विनिहन्ति यान्ते ॥२७॥

दृङ्नीत्यादि । आत्मद्रव्यप्रकृतिसम्पन्नो न यस्याधिष्ठानं विजिगीषुः तस्य च दृङ्नित्रयस्थानमिति त्रीणि फलानि गुणाश्च सन्धिविग्रहयानासनसंश्रयद्वैधीभावाः षट् तत्र यस्मिन् गुणे स्थितः पश्येदिहस्थः पश्यामीति दुर्गसेतुवणिक्कृषिभूम्यनिवेशनवान् द्रव्यहस्तिवनकर्म्माण्यात्मनः प्रवर्त्तयितुं परस्य चैतानि हन्तुं गुणमातिष्ठेत् सा दृष्टिः यस्मिन् गुणे स्थितस्य कर्म्मणामुपघातं पश्येत् नेतरस्य तस्मिन्न तिष्ठेत् स नयः स्वकर्म्मणां दृष्टिगुणेनाभिपश्येदेतत् स्थानमित्यनेन मार्गेण यो विजिगीषुः दृङ्नित्रयस्थानगतामात्मनः परस्य च वृत्तिमजस्रं शश्वत् प्रसमीक्षमाणो निरूपयन् सन्ध्यादिषु षड्गुणेषु घटेत यतेत तं विजिगीषुं लक्ष्मीः राज्यश्रीः चञ्चलापि न सृजति गुणदृङ्नीलाबद्धत्वात् ॥ २६ ॥ ज० म०

नीतिरेव कीदृशीत्यपेक्षायामिदमुच्यते

दृङ्नीत्यादि । यो जिगीषुः सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रय इति षड्गुणा एषु घटेत चेष्टेत तं लक्ष्मीश्चञ्चलापि न सृजति गुणबद्धत्वात् चञ्चलशब्दो रूढः जिगीषुः कीदृशः अजस्रं सततं दृङ्नित्रयस्थानगतां तत्सम्बन्धिनीमात्मनः परस्य च वृत्तिं प्रसमीक्षमाणः विचारयन् दृङ्निर्व्वर्द्धनं कोषादेः क्षयोऽपचयः परकोषादेः स्थानं स्थितिमित्यदुर्गवणिक्पथादेः ॥ २६ ॥ भ०

अस्ति स कालो यत्र विजिगीषुणा परदृङ्निरूपेक्षणीयेति दर्शयन्नाह

उपेत्यादि । परः शत्रुः प्रनष्टनीतित्वादजितेन्द्रियः न मदादियुक्तं त्यजति किन्तु तेनैव युज्यते तस्यैवम्विधस्य या दृष्टिः सा सर्व्वस्यैव लोकस्य विरागहेतुः वैमुख्यकारणमुपेक्षणीयैव न तदभावाय तेनेदृशी यान्ते अवसाने समूलघातं सर्व्वं सर्व्वेण विनिहन्ति विनाशयति ॥ २७ ॥ ज० म०

दृङ्मादिगतां वृत्तिमेव निरूपयितुमिदमुच्यते

उपेक्षणीयेत्यादि । अजितेन्द्रियत्वादेव प्रनष्टनीतेर्मदादियुक्तस्य षड्रिपवश्यस्य परस्य दृष्टिरुपेक्षणीयैव यतः सा विरागहेतुः सर्व्वस्यैव लोकस्य वैमुख्यकारणं या दृष्टिरन्ते अवसाने समूलघातं विनिहन्ति समूलं नाशयति तव दृष्टिः समूलं विनिहन्ति सर्व्वेषां विरागहेतुत्वादजितेन्द्रियत्वात् दोषवत्त्वाच्च इति सूचितम् ॥ २७ ॥ भ०

जनानुरागेण युतोऽवसादः फलानुबन्धः सुधियात्मनोऽपि ।
उपेक्षणीयोभ्युपगम्य सन्धिं कामादिषड्वर्गजिताधिपेन ॥ २८ ॥
यदा विगृह्णन्न च सन्दधानो दृष्टिं क्षयञ्चानुगुणं प्रपश्येत् ।
आसीत राजावसरप्रतीक्षस्तदा प्रयासं वितथं न कुर्य्यात् ॥२९॥

तथास्ति सकालो यत्र विजिगीषुणाप्यात्मक्षय उपेक्षणीय इत्याह

जनेत्यादि । आत्मनोऽप्यवसादः क्षयः जनानुरागेण युतः सम्बद्धः अनुरक्तप्रकृतिमण्डलत्वाद्विजिगीषोः फलानुबन्धः फलमनुबध्नाति सुधिया विदुषा अधिपेन राज्ञा कामादिषड्वर्गजिता कामक्रोधलोभमोहमदेर्ष्याणां षण्णां वर्गः सञ्जिता उपेक्षणीयः तत्रापि परैः सन्धिमभ्युपगम्य कृत्वा अन्यथा क्षीणोऽयमिति वरोऽभियुञ्जीत ॥ २८ ॥ ज० म०

जनेत्यादि । अधिपेन राज्ञा आत्मनोऽप्यवसादः क्षय उपेक्षणीयः किं कृत्वा सन्धिमभ्युपगम्य यत्नेन सन्धिमनु कृत्वान्यथा क्षीणोऽयमिति परेणाभियुक्तः स्यात् अवसादः कीदृशः जनानामनुरागेण युतो बद्धोऽनुरक्तप्रकृतिमण्डलत्वात् फलानुबन्धः फलं दृष्टिमनुबध्नातीति ढाबुषक् कीदृशेनाधिपेन कामादीनां षण्णां वर्गं जितवता अतएव सुधिया नीतिज्ञेन कामक्रोधौ लोभमोहौ मद ईर्ष्या इतीह षडिति षड्वर्गं जयतीति कर्त्तरि क्विप् ॥ २८ ॥ भ०

यदा च विजिगीषुः सन्धिविग्रहाभ्यां फलं न पश्येत् तदा स्वदृष्टिग्राह्यमासनं कुर्य्यादित्युपदिशन्नाह

यदेत्यादि । यदा हि राजा विजिगीषावस्थितः विगृह्णन् विग्रहं कुर्व्वन् आत्मनोऽनुगुणामनुकूलां दृष्टिं न पश्येत् क्षयञ्च परस्यात्मनोऽनुगुणं न पश्येत् सन्दधान इति सन्धिञ्च कुर्व्वन्नात्मनोऽनुगुणं न पश्येत् तदा आसीत स्वदृष्ट्यर्थमासनं कुर्य्यात् न विग्रहं सन्धिं वा अवसरः कालस्तं प्रतीक्षत इति अवसरप्रतीक्षः कर्म्मण्यन् सन्धेर्विग्रहस्य वा स्वपरदृष्टिक्षयानुकूलं कालं प्रतीक्षमाणः इत्यर्थः न पुनः प्रयासं सन्धिविग्रहोद्यमं वितथं निष्फलं निष्प्रयोजनं कुर्य्यात् यदा तु परं विग्रहीतुमशक्तः तदा स्वावराद्धकलहं समानसुपदेक्ष्यति ॥ २९ ॥ ज० म०

यदेत्यादि । यदा राजा विगृह्णन् विग्रहं कुर्व्वन् सन्दधानः सन्धिं कुर्व्वाणोऽपि अनुगुणामनुकूलामात्मनो दृष्टिं न पश्येत् नचानुगुणमनुकूलं परस्य क्षयं पश्येत् तदा आसीत आसनं कुर्य्यात् जिगीषुः उपेक्षे विधौ क्षी

सन्धौ स्थितो वा जनयेत् स्वदृद्धिं हन्यात्परं वोपनिषत्प्रयोगैः ।
आश्रावयेदस्य जनं परैर्वा विग्राह्य कुर्य्यादवहीनसन्धिम् ॥२०॥
सन्दर्शितस्नेहगुणः स्वयत्नून् विद्वेषयन्नण्डलमस्य भिन्द्यात् ।
इत्यवमादि प्रविधाय सन्धिर्वृद्धेर्विधेयोऽधिगमाभ्युपायः ॥२१॥

अवसरप्रतीक्षः अवसरं वृद्धियोग्यकालं प्रतीक्षमाण इति क्षमीक्षाचरिभ्यो ण इति परस्मैपदेन णः क्षमते पचादित्वादन् किंवा अवसरे प्रतीक्षा यस्येति समासः वितथं निष्प्रयोजनं प्रयासं सन्धिविग्रहोद्यमं न कुर्य्यात् ॥ २९ ॥ भ०

सन्धिं कृतवतोऽपि विजिगीषोः परेण वा वियुज्यमानस्य विधिमुपदिशन्नाह

सन्धावित्यादि । सन्धौ स्थितो वर्त्तमानः जनयेत्स्वदृद्धिं यया अत्युच्छ्रितः तामभियुञ्जीत परं वा शत्रुं उपनिषत्प्रयोगैः रहस्यप्रयोगैः विषादिदानैः हन्यात् विनाशयेत् सन्धिना जातविश्वासत्वात् आश्रावयेदस्य जनं देशादिदानेनाकर्षयेत् बलवता अभियुज्यमानः परैः विग्राह्य कलहं कारयित्वा अवहीनसन्धिं व्याक्रान्तसन्धिं कुर्य्यात् तस्योपतापितत्वात् ॥ २० ॥ ज० म०

सन्धावित्यादि । सन्धिं कृत्वापि विजिगीषुर्न निश्चेष्टस्तिष्ठेत् किन्तु सन्धौ स्थितः सन् स्वदृद्धिं जनयेत् उत्पादयेत् यथा वृद्धिं प्राप्य परं हन्तुं क्षमते उपनिषत्प्रयोगैरभिचारैरहःप्रयुक्तैर्विषादिदानैर्वा परं हन्यात् सन्धिना जातविश्वासत्वात् भवेदुपनिषद्धर्म्मे वेदान्ते च रहस्यऽपीति विश्वः अस्य परस्य जनं वंशलोकं आश्रावयेत् देशादिदानेन आकर्षयेत् परैस्तदीयशत्रुभिर्वा विग्रहं कलहं कारयित्वा अवहीनसन्धिं त्यक्तसन्धिं कुर्य्यात् येन सह सन्धिः प्रागासीत् तेन सह सन्धिभङ्गं कुर्य्यादित्यर्थः ॥ २० ॥ भ०

सन्धित्से विजिगीषोः शत्रुमण्डलभेदं कुर्व्वतः सुकरः सन्धिरित्युपदिशन्नाह

सन्दर्शितेत्यादि । अस्मच्छत्रवोऽनेन सन्धानं मा कार्षुरिति तान्विद्वेषयन् विसुखानुत्पादयन् दर्शितस्नेहगुणः प्रकटीकृतानुरागगुणः अस्य शत्रोर्मण्डलं सामादिभिर्भिन्द्यात् इत्येवमादि प्रविधाय सन्दर्शितेत्येवमादिवाक्यार्थं कृत्वेत्यर्थः वृद्धेरधिगमाभ्युपायः प्राप्तिहेतुः सन्धिर्विधेयोऽनुष्ठेयः ॥ २१ ॥ ज० म०

सन्दर्शितेत्यादि । मण्डलभेदे सन्धिमुपदिशति अस्मच्छत्रवोऽनेन सन्धिं न कुर्युरिति तान् विद्वेषयन् विसुखान् कुर्वन् सन्दर्शितस्नेहगुणः प्रकटितानुरागः सन् अस्य शत्रोर्मण्डलं सामादिभिर्भिन्द्यात् इत्येवमादि उक्तप्रकारादि प्रविधाय कृत्वा वृद्धेरधिगमाभ्युपायः प्राप्तिहेतुभूतः सन्धिर्विधेयः ॥ २१ ॥ भ०

मत्वा सहिष्णूनपरोपजप्यान् स्वकानधिष्ठाय जलान्तदुर्गान् ।
द्रुमाद्रिदुर्लङ्घ्यजलाप्रधृष्यान् वर्द्धेत राजा रिपुविग्रहेण ॥२२॥
शक्नोति यो न द्विषतो निहन्तुं विहन्यते नाप्यबलैर्द्विषद्भिः ।
स श्वावराहं कलहं विदध्यादासीत दुर्गादि विवर्द्धयंश्च ॥२३॥

विग्रहोऽपि विजिगीषोरेव विजिगीषोर्न यस्य कस्यचिदित्युपदिशन्नाह

मत्वेत्यादि । स्वकानात्मीयाननुजीविनः सहिष्णून् समर्थान् अपरोपजप्यान् परैरभेद्यान् जलान्ते ये दुर्गाः प्रदेशाः तानधिष्ठाय तत्र स्थापयित्वा अधिशीङिति कर्म्मसंज्ञा कीदृशान् द्रुमैरद्रिभिर्दुर्लङ्घ्यजलैश्चाप्रधृष्यान् अगम्यान् वनपर्व्वतजलभेदात् त्रिविधं दुर्गं रिपुणा सह यो विग्रहः तेन हेतुना राजा वर्द्धेत हृद्युपचितः स्यात् ॥ २२ ॥ ज० म०

सन्धेर्दृद्धिहेतुत्वमुपदर्श्य विग्रहस्य वृद्धिहेतुत्वं कथ्यते

मत्वेत्यादि । अपरोपजप्यान् परैरभेद्यान् सहिष्णून् समर्थान् स्वकानात्मीयान् अनुजीविनो मत्वा निश्चित्य जलान्तदुर्गान् जलान्ते लोकान्ते दुर्गप्रदेशान् अधिष्ठाय तत्र स्थित्वा राजा रिपुविग्रहेण हेतुना वर्द्धेत उपचितः स्यात् नतु सहसा विग्रहमात्रं वृद्धिहेतुः कीदृशान् दुर्गान् द्रुमैरद्रिभिर्दुर्लङ्घ्यजलैश्च करणभूतैरप्रधृष्यान् परैरगम्यान् वृक्षपर्व्वतवारिभेदात् त्रिविधं दुर्गमुक्तं दुःखेन गम्यते यत्र तद्दुर्गं हनजनगमादेरिति आधारे डः क्रुद्धोःकर्मभाव इत्युक्तेः ॥२२॥ भ०

यदा अरिविजिगीषू परस्परं हन्तुं न शक्नौ तदा विजिगीषोरासनमुपदिशन्नाह

शक्नोतीत्यादि । यो विजिगीषुः अबलत्वात् द्विषतः शत्रूनभिहन्तुं विग्रहीतुं न शक्नोति अबलैर्द्विषद्भिर्न विहन्यते स विजिगीषुः श्वावराहं कलहं विदध्यात् अनुतिष्ठेत् श्वा च वराहश्च श्वावराहं तदीयमिव कलहं तस्येदमित्यण् यथा चण्डाला वराहं हन्तुमशक्ताः श्वानं विमुच्य योधयन्ति यद्वयं हतोऽनेन वा अयमिति तयोर्भक्ष्यत्वादुभयथा कार्य्यसिद्धेः तद्वद्वयोर्विद्विषतोः कलहं विदध्यात् स्वयञ्च दुर्गादि विवर्द्धयन् दुर्गसेतुवणिक्शून्यनिवेशनद्रव्यहस्तिवनकर्म्माण्युपचिन्वन् आसीत तिष्ठेत् ॥ २३ ॥ ज० म०

आसनकालः कथ्यते

शक्नोतीत्यादि । यो जिगीषुर्द्विषतः शत्रून् न निहन्तुं शक्नोति बलरहितैर्द्विषद्भिरपि न हन्यते च स श्वावराहं कुक्कुरशूकरसम्बन्धिनं कलहं कुर्य्यात् तच्चु-

प्रयाणमात्रेण परे प्रसाध्ये वर्त्तेत यानेन कृताभिरक्षः ।
अशक्नुवन् कर्त्तुमरेर्विघातं स्वकर्म्मरक्षाञ्च परं श्रयेत ॥ २४ ॥
एकेन सन्धिः कलहोऽपरेण कार्य्योऽभितो वा प्रसमीक्ष्य दृद्धिम् ।
एवं प्रयुञ्जीत जिगीषुरेता नीतोर्विजानन्नहितात्मसारम् ॥२५॥

ल्ययोर्युद्धं सम्पादयेदित्यर्थः यथा चण्डालाः स्वयं वराहं हन्तुमशक्ताः श्वानं विसृज्य योधयन्ति तत्र यदि शुना वराहो हन्यते वराहेण वा श्वा हन्यते उभयथापि तेषां कार्यसिद्धिर्द्वयोरपि तेषां भक्ष्यत्वात् तथोभयोर्द्विषतोः कलहैर्जिगीषोरिति भावः स्वयं दुर्गादि अष्टवर्गं विवर्द्धयेन्नासीत विग्रहञ्च त्यक्त्वा तिष्ठेत् कक्षविषिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् । खन्याकरधनादानं शुल्कानाञ्च निवेशनमित्येषोऽष्टवर्गः श्वा च वराहश्चेति द्वन्द्वे श्वावराहेवेति परसूत्रेण पूर्वपदस्य विकल्पेन दीर्घत्वं स्मरते विश्वराजोऽदेत्यस्य योगविभागात् पक्षे पूर्वपदस्यादन्तत्वं सिद्धं अत्र तु तदकरणेऽपि न क्षतिः विकारसंज्ञेत्यादिना इदमर्थेण इद्धावेष्टसिद्धेः विदध्यादित्यत्रान्तर्भूतजाद्यर्थो बोध्यः ॥ २३ ॥ भ०

यदा विजिगीषुर्यानमात्रसाध्यं शत्रुमात्मानं वा शक्तिहीनं मन्येत् तदा यायात् संश्रयेतेति गुणद्वयमुपदिशन्नाह

प्रयाणमात्रेत्यादि । प्रयाणमात्रेण प्रसाध्ये परे शत्रौ नापरं विग्रहमपेक्षते यानेन वर्त्तेत स्वदृद्धौ यतेत कृताभिरक्षः अभियास्यतः कर्म्मणां द्विविधत्वप्रतिविधानात् अरेर्विघातं दुर्गादिकर्म्मोपघातात् स्वकर्म्मरक्षां स्वेषां दुर्गादिकर्म्मणां अपरेणोपहन्यमानानां रक्षां कर्त्तुमशक्नुवन् शक्तिहीनत्वात् परं श्रयेत यमाश्रित्य क्षयस्थानात् स्थानवृद्धिमाप्नुयात् परो द्विविधः अभियोक्ता सद्विशिष्टबलोऽपरोऽन्य इति ॥ २४ ॥ ज० म०

यानाश्रययोः कालः कथ्यते

प्रयाणेत्यादि । परे शत्रौ प्रयाणमात्रेण प्रसाध्येऽभिभवनीये सति राजा यानेन वर्त्तेत स्वदृद्धौ यतेत कीदृशः सन् आत्मदेशस्य कृताभिसर्व्वतोभावेन रक्षायेन तादृशः अरेः शत्रोर्विघातं स्वेषां दुर्गादिकर्म्मणां परैरुपहन्यमानानाञ्च रक्षां कर्त्तुमशक्नुवन् असमर्थोभवन् परं श्रयेत यतो वृद्धिमाप्नोतीत्यर्थः ॥ २४ ॥ भ०

यदा तु सहायसाध्यं कार्यं पश्येत् तदा सन्धिविग्रहासनद्वैधीभावक्रमेणेत्युपदिशन्नाह

एकेनेत्यादि । अभित उभयपार्श्वयोः सन्धिना विग्रहेण वा वृद्धिं प्रस-

त्वया तु लोके जनितो विरागः प्रकोपितं मण्डलमिन्द्रमुख्यम् ।
रामे तु राजन् विपरीतमेतत् पश्यामि तेनाभ्यधिकं विपक्षम् ॥२६॥
एकेन वाली निहतः शरेण सुहृत्तमस्ते रचितश्च राजा ।

मीक्ष्य पश्चादेकेन यत्नेन स्वयमभियुक्तेन सन्धिः अपरेण सहायाभियुक्तेन विग्रहः कार्य्य एवशब्देन प्रकारेण अहितस्य शत्रोरात्मनश्च सारं बलाबलं विजिगीषुर्विजानन् एता नीतीः षाड्गुण्यलक्षणाः प्रयुञ्जीत ॥ २५ ॥ ज० म०

द्वैधीभावप्रकारः कथ्यते

एकेनेत्यादि । अमित उभयपार्श्वयोः सन्धिविग्रहाभ्यां खड्गिं प्रसमीक्ष्य निरूप्य पश्चादेकेन यत्नेन स्वयमभियुक्तेन सन्धिः अपरेणाभियुक्तेन स्वयं विग्रहस्य कार्य्यः वा शब्दः समुच्चये पूर्व्वश्लोकापेक्षया पक्षान्तरे वा एवशब्दप्रकारेणाहितस्य शत्रोरात्मनश्च सारं बलं विजानन् विजिगीषुरेता नीतीः षाड्गुण्यरूपाः प्रयुञ्जीत ॥ २५ ॥ भ०

त्वया पुनरेवं प्रयुक्ता इति दर्शयन्नाह

त्वयेत्यादि । त्वया पुनश्चतुर्वर्णोच्छेदकारिणा लोके जनितो विरागः इन्द्रमुख्यश्च शक्रप्रधानं मण्डलं प्रकोपितं रामे तु सर्व्वमेतद्विपरीतं अनुरागेण जनितं मण्डलञ्चानुरञ्जितं तेनाभ्यधिकं विपक्षं रामं पश्यामि ॥ २६ ॥ज०म०

उक्तरीत्या नीतितत्त्वं प्रदर्श्य रावणे तद्विपरीत्यात् सन्धिरेव युक्त इति प्रकृतमभिधीयते

त्वयेत्यादि । त्वया पुनर्लोके विरागो जनितः परद्रोहित्वात् इन्द्रादिकं राजमण्डलं प्रकोपितं तेनेयं भवतो दृढिरपि न शुभोदर्केति भावः हे राजन् रामे पुनः सर्व्वमिदं विपरीतं धार्म्मिकत्वेन सर्व्वजनानुरागस्य जनितत्वात् रक्षोघ्नत्वेनेन्द्रादिसम्मतत्वाच्च तेन विपक्षं शत्रुं रामं त्वत्तोऽभ्यधिकं पश्यामि विराग इति रक्षोवधजन्यस्य स्वदौधावोदेत्यादिना निपातितम् ॥ २६ ॥ भ०

नचेदानीमस्मवतः कार्य्यं विनष्टं अपि तु प्रागेवेति दर्शयन्नाह

एकेनेत्यादि । तव सुहृत्तमो वाली यदैव परेण रामेण कर्त्रा शरेणैकेन निहतः सुग्रीवस्य कपिस्वरूपं राजा रचितः स्थापितः तदैव विनष्टमिति ॥ २७ ॥ ज० म०

रावणस्य मित्रत्वं रामस्य मित्रोपचयं कर्म्मणामाधिक्यञ्च दर्शयितुमिदमुच्यते

एकेनेत्यादि । परेण यत्नेन रामेण कर्त्रा एकेन शरेण तव सुहृत्तमो

यदैव सुग्रीवकपिः परेण तदैव कार्यं भवतो विनष्टम् ॥ २७ ॥
प्राकारमात्रावरणः प्रभावः खरादिभिर्यो निहतैस्तवाभूत् ।
लङ्कामदाद्दात्तवधद्रुभङ्गैः क्लाम्यत्यसावप्यधुनातिमात्रम् ॥२८॥
षड्वर्गवश्यः परिमूढबन्धुरुच्छिन्नमित्रो विगुणैरुपेतः ।
मा पादयुद्धं द्विरदेन कार्षीर्नम क्षितीन्द्रं प्रणतोपभोग्यम्॥२९॥

वाली यदैव निहतो मारितः सुग्रीवश्च कपिर्यदैव राजा रचितः कृतः तदैव-भवतः कार्यं विनष्टं येन भवतो जेता वाली अल्पायासेन हतस्तेन भवज्जय-स्यातिसुकरत्वात् ॥ २७ ॥ भ०

अथ प्रतापवतो मम कथं कार्यं विनश्यति प्रतापादेव शत्रवो नश्यन्तीति चेदाह

प्राकारेत्यादि । तव त्रैलोक्यप्रभावो प्रताप आसीत् पुनः खरादिभि-र्निहतैः प्राकारमात्रावरणो जातः लङ्कायामेव समर्थत्वात् असावप्यधुना लङ्का-दाहेन अक्षवधेन दुर्धभङ्गेन अशोकवनिकाभङ्गेन च अतिमात्रमत्यर्थं क्लाम्यति ग्लानिमुपगच्छति ॥ २८ ॥ ज० म०

मत्प्रतापादेव कार्यं सिध्यतीत्याशङ्कामपनेतुमिदमुच्यते

प्राकारेत्यादि । यस्तव प्रभावः निहतैः खरादिभिः प्राकारमात्रावरणोऽभूत् प्राकारमात्रमावरणं यस्य तादृशो जातः पूर्वं त्रैलोक्यव्यापिनोऽपि तस्येदानीं लङ्कामात्रे पर्याप्तत्वात् असावपि अधुनेदानीं लङ्कायाः प्रदाहेनाक्षस्य वधेन दुर्धाणां भङ्गेन चातिमात्रमत्यर्थं क्लाम्यति ग्लानिमुपयाति ॥ २८ ॥ भ०

अतो रामेण सह युद्धं न घटते तदेव दर्शयन्नाह

षड्वर्गेत्यादि । षड्वर्गतो वश्यः कामादेर्वश्यः परिमूढबन्धुः मूर्खामात्यादि-परिवारः उच्छिन्नमित्रः वर्गेष्वसम्भवात् अरिगणैरुपेतः तद्विपरीतो रामः अतो द्विरदेन पादयुद्धमिव तेन ज्यायसा मा विग्रहं कार्षीः अपितु क्षितीन्द्रं रामं नम प्रणतोपभोग्यं अनेन हीनसन्धिमाह तथाचोक्तं प्रदत्तं मन्त्रिणाक्रान्तो राजा बलवता बलः । सन्धिनोपनमेच्चूर्णं दण्डकोपात्मभूमिभिरिति ॥२९॥ ज० म०

रामेण सह तव युद्धमनुचितमिति दर्शयितुमिदमुच्यते

षड्वर्गेत्यादि । त्वं द्विरदेन हस्तिना सह पादयुद्धं पादेन विग्रहं मा कार्षीः न कुरु - षड्वर्गवश्यत्वादिदोषहीनेन रामेण सह कलहो द्विरदेन युद्धस्य तुल्य इत्यर्थः द्विरदेन पादयुद्धमित्यनेन बलीयसा दुर्बलस्य युद्धमुपलक्ष्यते किन्तु क्षितीन्द्रं रामं नम प्रणम यस्मादसौ प्रणतैरेव जनैरुपभुज्यते वशीक्रियते त्वं

रामोऽपि दाराहरणेन तप्तो वयं हतैर्बन्धुभिरात्मतुल्यैः ।
तप्तस्य तप्तेन यथायसो नः सन्धिः परेणास्तु विमुञ्च सीताम् ॥४०॥
सन्धुक्षितं मण्डलचण्डवातैरमर्षतोक्ष्णं क्षितिपालतेजः ।
सामाम्भसा शान्तिमुपैतु राजन् प्रसीद जीवाम सबन्धुभृत्याः ॥४१
अपक्वकुम्भाविव भङ्गभाजौ राजन्नियातां मरणं समानौ ।

कीदृशः षड्वर्गस्य कामक्रोधलोभमोहमदेर्ष्यात्मकस्य वश्य आयत्तः वशं गतो वश्यः ढधेकादिति यः परिमूढबन्धुर्मूर्खपरीवारः उच्छिन्नमित्रः हतबालिखरादिमित्रः मित्ररहितोवा अतएव विगुणैरुपेतः येन गुणेन दोष उत्पद्यते तेन युक्तः नमेत्यत्र विधिनिमन्त्रणेत्यादिना प्राप्तकाले गौ ॥ ३९ ॥ भ०

युवयोः सन्धानकारणमस्त्येवेति दर्शयन्नाह

राम इत्यादि । यथा तप्तेनायसा तप्तस्यायसः सन्धिर्घटते तद्वदस्माकं तप्तानां तप्तेन रामेण सन्धिरस्तु अतो मुञ्च सीतां सन्धिनिमित्तम् ॥ ४० ॥ ज०म०

कथमावयोर्भिन्नधर्म्मयोः सन्धिः स्यादित्याशङ्क्यायमिदमुच्यते

राम इत्यादि । दारहरणेन सीतापहारेण रामस्तप्तो वयमप्यात्मतुल्यैर्हतैर्बन्धुभिरित्यादिभिस्तप्ताः यथा तप्तेन लौहेन तप्तस्य लौहस्य सन्धिर्घटना भवति तथा परेण रामेणापि नोऽस्माकं सन्धिरस्तु उभयोः सन्तप्तयोः सन्धिरिति न्यायात् अतः सीतां विमुञ्च त्यज ॥ ४० ॥ भ०

यदि च तेन तप्तेनापि सता ज्यायसा न सन्धानं तदा सर्वे वयं न जीवामः तव तेजसो विनाशकत्वादिति दर्शयन्नाह

सन्धुक्षितमित्यादि । क्षितिपालतेजः सीताविरोगजं इन्द्रादिमण्डलैश्चण्डवातैरिव सन्धुक्षितं दीपितं अमर्षतीक्ष्णं असहिष्णुतया सह्यं सामाम्भसा सान्त्वा सन्धिना अम्भसेव शान्तिमुपैतु हे राजन् प्रसीद किं संरम्भेण अन्यथा तमारण्योऽग्निरिव दुःखामर्षजन्तेजो विक्रमयतीति ॥ ४१ ॥ ज० म०

सन्धिं विनापि जीवनं नास्तीति दर्शयितुमिदमुच्यते

सन्धुक्षितमित्यादि । क्षितिपालस्य तेजः सान्त्वा सन्धिना अम्भसा जलेनेव शान्तिमुपैतु गच्छतु तेजःशब्देनात्र सीताविरहमन्युजोऽग्निरुपलक्ष्यते कीदृशं तेजः इन्द्रादिराजमण्डलैः प्रचण्डवातैरिव सन्धुक्षितं दीपितं अमर्षेण पराभवासहिष्णुतया तीक्ष्णमसह्यं तस्मात् हे राजन् प्रसीद किं क्रोधेन बन्धुभिर्भृत्यैश्च सह वयं जीवाम विधिनिमन्त्रणेत्यादिना प्रार्थनायां गौ ॥४१॥ भ०

SOCIETY

वीर्ये स्थितः किन्तु कृतानुरागो रामो भवांश्चोत्तमभूरिवैरी॥४२॥
दण्डेन कोषेण च मन्यसे चेत् प्रकृष्टमात्मानमरेस्तथापि ।

समानयोरपि सन्धानमेव युज्यते न विग्रहः किं पुनर्ज्यायसीत्यत्र हेतुं दर्शयन्नाह

अपक्वेत्यादि । हे राजन् यथा कुम्भावपक्वौ भङ्गभाजौ परस्पराभिहतौ विनश्यतः तद्वत् समानौ युध्यन्तौ मरणमियातां सार्वधातुकप्रकारत्वादिणो न दीर्घत्वं राजन्नियातामिति ङ्सोर्हस्वादचिङ्सुट् किन्तु रामो वीर्ये स्थितः उत्साहशक्तियुक्त इत्यर्थः विक्रमबलं चोत्साहशक्तिः कृतानुरागश्च अनुरक्तमण्डलत्वात् भवान् पुनः उत्तमभूरिवैरी उत्तमा इन्द्रादयो भूरयः प्रभूता वैरिणः शत्रवो यस्य अतस्तेन सन्धानमेव युक्तं न विग्रहः ननु च समज्यायोभ्यां सन्धीयेत हीनेनैव विगृह्णीयात् मन्त्रप्रभावोत्साहशक्तिभिर्युक्तो ज्यायानपचितो हीनः तुल्यशक्तिः समः तत्र ज्ञानबलं मन्त्रशक्तिः कोषदण्डबलं प्रभुशक्तिः विक्रमबलं उत्साहशक्तिः ॥ ४२ ॥ ज० म०,

समयोरपि विग्रहो न युक्तः सुतरां हीनाधिकयोरिति दर्शयितुमिदमुच्यते

अपक्वकुम्भावित्यादि । हे राजन् यथा अपक्वकुम्भौ परस्पराभिघातभङ्गभाजौ तथा समानौ युध्यमानौ मरणमियातां इयः खौ समानयोर्विग्रहः कथञ्चिद्युज्यतेऽपि किन्तु रामो वीर्ये स्थित उत्साहशक्तिसम्पन्नः कृतानुरागः सर्वलोकेष्विति शेषः भवान् पुनरुत्तमानां भूरीणां बह्वनामिन्द्रादीनां वैरी उत्तमा भूरयो बहवो वैरिणो यस्येति वा अतो हीनाधिकयोः सन्धिरेवोचित इति भावः ॥ ४२ ॥ भ०

सत्यामुत्साहशक्तौ शेषयोरभावात्तत्र हीनेन विग्रह एव युज्यत इत्याह

दण्डेनेत्यादि । दण्डेन चतुरङ्गेन बलेन कोषेण हेमरूप्यादिना यदि प्रकृष्टमात्मानमरेः सकाशान्मन्यसे तथाप्येवमपि न युक्तं यतो रिक्तस्य पूर्णेन भवता विनाशो भङ्गः इयं निष्फलः पूर्णस्य पुनर्भवतो भङ्गे बहु हीयत इति हीनेन बलवतोऽपि सन्धानं युक्तं रिक्तस्य भङ्गो मा भूत् ॥ ४३ ॥ ज० म०

शक्तयस्तिस्रः प्रभावोत्साहमन्त्रजा इति कोषः दण्डबलं प्रभुशक्तिः अधिकविक्रम उत्साहशक्तिः ज्ञानबलं मन्त्रशक्तिस्तत्र यद्यपि राम उत्साहशक्तिशाली तथापि प्रभुशक्तिहीनः अहन्तु उत्साहप्रभुमन्त्रशक्तिभिर्युक्तः अतो हीनेनाधिकस्य विग्रह एवोचितो न तु सन्धिरित्याशङ्क्य दूषयति

रिक्तस्य पूर्णेन वृथा विनाशः पूर्णस्य भङ्गे बहु हीयते तु ॥४३॥
क्लिष्टात्मभृत्यः परिमृग्यसम्पन्मानी यतेतापि ससंशयेऽर्थे ।
सन्देहमारोहति यः कृतार्थो नूनं रतिं तस्य करोति न श्रीः॥४४॥
शक्यान्यदोषाणि महाफलानि समारभेतोपनयन् समाप्तिम् ।
कर्म्माणि राजा विहितानुरागो विपर्य्यये स्याद्विपरीतयत्नः॥४५॥

दण्डेनेत्यादि । दण्डेन चतुरङ्गबलेन कोषेण च हेमरूप्यादिना चेत् यदि अरेः शत्रोः सकाशादात्मानं प्रकृष्टं मन्यसे तथापि रिक्तस्य कोषदण्डहीनस्य रामस्य पूर्णेन भवता हेतुना विनाशो वृथा निष्फलः पूर्णस्य भवतो रिक्तेन रारेण भङ्गे सति पुनर्बहु हीयते अतो यस्मिन् जिते किमपि फलं नास्ति तेन हीनेनापि सन्धिः कर्त्तुमुचितः वृथा सङ्कटप्रवेशानौचित्यात् दण्डो यमे मानभेदे लघुडे दमैक्यन्ययोरिति विश्वः ॥ ४३ ॥ भ०

अन्यद्विजयफलमस्तीति चेदाह

क्लिष्टेत्यादि । यो मानी क्लिष्टात्मभृत्यः चिरकालक्लिष्टशरीरः क्लिष्टभृत्यश्च परिमृग्यसम्पत् प्रार्थनीया विभूतिर्येन मृगयतेः स्वार्थिकण्यन्तादचो यत् संशयेऽर्थे स्यान्न स्यादिति यतेतापि यत्नं कुर्य्यात् यः कृतार्थो भवादृशः त्रैलोक्यविजयित्वात् सन्देहमारोहति सन्देहे प्रवर्त्तते तस्य नूनमवश्यं श्रीर्विभूतिः रतिं स्थितिं न करोति ॥ ४४ ॥ ज० भ०

रिक्तस्य भङ्गे मा भूदन्यत् किञ्चित् फलं विजयो वैरिनिर्यातनञ्च फलमस्तीत्याशङ्क्याह

क्लिष्टात्मेत्यादि । क्लिष्टो दुःखित आत्मा शरीरं भृत्यश्च यस्य स परिमृग्यसम्पत् प्रार्थनीयविभूतिर्मानी संशयेऽर्थे सन्दिग्धे अर्थे यतेतापि यत्नं कुर्य्यादपि यः पुनः कृतार्थो भवादृशस्त्रैलोक्यविजयित्वात् सन्देहमारोहति सम्भाव्यमानविनाशे सन्दिग्धकर्म्मणि प्रवर्त्तते तत्र नूनमवश्यं श्रीः लक्ष्मी रतिं स्थितिं प्रीतिं वा न करोति तस्येति क्वचित्पाठः मृगत्वकङ्तु मार्गणे तव्यानीयया इति कर्म्मणि यः ॥ ४४ ॥ भ०

कदा तर्हि विग्रह इत्याह

शक्यानीत्यादि । शक्यानि यानि कर्त्तुं पार्य्यन्ते अदोषाणि गुणानि महाफलानि कार्य्याणि राजा समारभेत विग्रहेणेत्यर्थात् उपनयन् समाप्तिं नयन् विहितानुरागोऽनुरक्तप्रकृतिः विपर्य्यये उक्तस्य अशक्यानि दोषाधिकानि खल-

जेतुं न शक्यो नृपतिः सुनीतिर्दोषः क्षयादिः कलहे ध्रुवश्च ।
फलं न किञ्चन्न शुभा समाप्तिः कृतानुरागं भुवि संत्यजारिम्॥४६
त्वन्मित्रनाशो निजमित्रलाभः समेतसैन्यः सच मित्रकृच्छ्रे ।

फलानि राजा समारभेत समाप्तिं च न नयति स वितथः प्रयासः निष्फलो विग्रहः ॥ ४५ ॥ ज० म०

तर्हि कदा विग्रहः कर्त्तव्य इत्याशङ्क्ष्योदुच्यते

शक्यानीत्यादि। राजा समाप्तिमुपनयन् फलान्नत्वमुपगच्छन् कर्म्माणि समारभेत प्रस्तुतानि कुर्य्याद्विग्रहेणेत्यर्थात् यदि विहितानुरागोऽनुरक्तप्रकृतिमण्डलो भवेत् कीदृशानि शक्यानि कर्त्तुमित्यर्थात् अदोषाणि पर्य्यन्तशुद्धानि महाफलानि बहुप्रयोजनानि विपर्य्यये उक्तस्य वैपरीत्ये विरक्तप्रकृतिमण्डलो राजा समाप्तिमकुर्व्वन् यद्यशक्यानि सदोषाणि निष्फलानि कर्म्माणि समारभेत तदा प्रयासो वितथो मिथ्या निष्फलः स्यात् समस्तपाठे वितथाः प्रयासा यस्य तादृशो राजा स्यात् ॥ ४५ ॥ भ०

ममापि रामविग्रहेण सर्व्वमस्तीति चैवाह

जेतुमित्यादि। नृपतौ रामः जेतुं न शक्यः विग्रहेण उत्साहशक्तियुक्तत्वात् तेन सह कलहे दोषः क्षयादिः ध्रुवोऽवश्यम्भावी विग्रहे वा सति क्षयस्य प्रयासप्रत्यवाया भवन्तीत्युक्तं फलं न किञ्चित् न शुभा समाप्तिः स्वबन्धुविनाशहेतुत्वात् अतो योऽधुनारिं जायांसं सन्त्यज भुवि कृतानुरागं त्वं पुनरकृतानुराग इति ॥ ४६ ॥ ज० म०

ममापि रामविग्रहे सर्व्वमेतदस्तीत्याशङ्क्ष्योदुच्यते

जेतुमित्यादि। नृपतौ रामो जेतुमभिभवितुं न शक्यो यतः सुनीतिस्तेन सह कलहे विग्रहे बन्धुक्षयादिर्दोषो ध्रुवः अवश्यम्भावी फलन्तु न किञ्चिद्राज्यादिलाभशून्यत्वात् समाप्तिरपि न शुभा न साध्वी विनाशहेतुत्वात् समाप्तिरशक्या वा तत्सैन्यस्याप्यनेकत्वात् अतो भुवि कृतानुरागं अरिं रामं सन्त्यज ॥४६॥ भ०

अन्यच्च वालिवध एव तस्यार्थसम्पज्जायायेति दर्शयन्नाह

त्वन्मित्रेत्यादि। वालिवधे सति शरेण रामस्य कोऽर्थो न प्रसाधितः अपि तु सर्व्व एव प्रश्न तथाहि त्वन्मित्रनाशः तस्य च मित्रलाभः मित्रञ्च तल्लाभश्चेति समेतसैन्यः कृच्छ्रे सङ्कटप्राप्तौ भृतः भोग्यः उपजीव्यः वशोऽनुकूल इति ॥ ४७ ॥ ज० म०

भोग्यो वशः पश्य शरेण शत्रोः प्रसाधितो वालिवधे न कोऽर्थः॥४७
लोभाद्भयाद्वाभिगतः कपीन्द्रो न राघवं येन भवेद्विभेद्यः।
स्थितः सतां वर्त्मनि लब्धराज्यः प्रतिप्रियं सोऽभ्यगमच्चिकीर्षुः॥४८॥
फलाशिनो निर्झरकुञ्जभाजो दिव्याङ्गनानङ्गरसानभिज्ञाः।
न्यग्जातयो रत्नवरैरलभ्या मुख्याः कपीनामपि नोपजप्याः॥४९॥

रामस्य सुनीतित्वं दर्शयितुमिदमुच्यते

त्वन्मित्रेत्यादि। पश्य निरूपय शरेण वालिवधे सति शत्रो रामस्य कोऽर्थो न प्रसाधितः न सम्पादितः अपि तु सर्व्व एव प्रथमं त्वन्मित्रस्य वालिनो नाशः निजमित्रस्य सुग्रीवस्य लाभः प्राप्तिः स चेति बुद्धिस्थं सुग्रीवं पराक्षिपति मित्रस्य क्लीवत्वात् किंवा लाभ इति कर्म्मणि घञ् मित्रञ्च तल्लाभश्चेति समासः स च मित्ररूपो लाभः मित्रस्य रामस्य कृच्छ्रे व्यसने समेतसैन्यः भोग्य उपजीव्यः वशोऽनुकूलः॥ ४७॥ भ०

तं विभिद्य साधयिष्यामीति चेदाह

लोभादित्यादि। क्रुद्धलुब्धभीतावमानितास्चत्वारो भेदाः परस्य भेदाः तत्र कपीन्द्रो राघवं लोभाद्भयाद्वा त्रासाद्वा नाभिगतः येन हेतुनाऽयं विभेद्यः स्यात् यस्मादसौ सतां मार्गे स्थितः सन् लब्धराज्यो लाभरतः प्रतिप्रियं चिकीर्षुः॥ ४८॥ ज० भ०

धनेन मित्रभेदं कृत्वा तं जेष्यामीत्याशङ्क्याऽऽहुश्च

लोभादित्यादि। क्रुद्धलुब्धभीतापमानितास्चत्वारो भेदा भवन्ति तत्र कपीन्द्रः सुग्रीवः सम्प्रति लोभाद्भयाद्वा राघवं रामं नाभिगतो येन लोभ्यमानो भीतो वा सन् विभेद्यो भेदार्हो भेत्तुं शक्यो वा भवेत् तेल्याः शक्यार्हे इति घ्यण् स कपीन्द्रः प्राप्तराज्यः साध्वाचारत्वात् सतां मार्गे धर्म्मे स्थितः सन् प्रतिप्रियं प्रत्युपकारं कर्त्तुमिच्छुरभ्यागमत् राममभिगतः लब्धराज्यत्वेन निर्लोभत्वं रामाभिगमेन निर्भयत्वं क्रोधोऽपमानश्चासम्भवान्नोक्तः॥ ४८॥ भ०

तदनुजीविनोऽपि न भेद्या इति दर्शयति

फलाशिन इत्यादि। कपीनामपि मुख्या मौलकुलादयोऽपि नोपजप्याः नोपजपितुं शक्याः यतः फलाशिनो मिष्टान्ननिरभेक्षाः निर्झरकुञ्जभाजः न रत्नप्रासादवासिनः दिव्याङ्गनानङ्गरसानभिज्ञाः दिव्याङ्गनासु योऽनङ्गरसः सुरतरसः तदनभिज्ञा न्यग्जातयः न्यञ्चन्तीति ऋत्विगित्यादिना क्विन्॥ ४९॥ ज० भ०

कृताभिषेको युवराजराज्ये सुग्रीवराजेन सुताविशेषम् ।
ताराविधेयेन कथं विकारं तारासुतो यास्यति राक्षसार्थम्॥५०॥
पश्यामि रामादधिकं समं वा नान्यं विरोधे यमुपाश्रयेम ।
दत्वा वरं सानुशयः स्वयम्भूरिन्द्रादयः पूर्व्वतरं विरुद्धाः ॥५१॥

तदनुजीविनोऽपि न भेद्या इति दर्शयन्नाह

फलाशिन इत्यादि । कपीनां सुखाः श्रेष्ठा हनूमन्नीलकुमुदादयो न उपजप्या न भेदार्हा भेत्तुं न शक्या वा यतः फलाशिनः मिष्टान्ननिरपेक्षाः निर्झरकुञ्जभाजः न सुवासितजलप्रासादसेविनः दिव्याङ्गनासु योऽङ्गरसः कामभोगस्तदनभिज्ञाः न्यग्जातयस्तिर्य्यग्योनयः अतएव रत्नवरैः इन्द्रनीलपद्मरागादिभिरपि न लभ्याः अपि शब्दः पूर्व्वश्लोकापेक्षया ॥ ४९ ॥ भ०

युग्मित्रपुत्रोऽङ्गदोऽभेद्य इति दर्शयन्नाह

कृतेत्यादि । सुग्रीवराजेन ताराविधेयेन ताराचित्तानुवर्त्तिना तारासुतोऽङ्गदः यौवराज्ये कृताभिषेकः सुताविशेषमिति क्रियाविशेषणं सुतनिर्विशेषं ममैवायं सुतो न वालिन इति तत्कथं राक्षसार्थं विकारं भेदं यास्यति नैवेत्यर्थः ॥ ५० ॥ ज० म०

अस्मन्मित्रपुत्रोऽङ्गदः पितृवधामर्षात् राज्यलोभाच्च भेद्यः अन्येऽपि कपयस्तत्सेवका एवेत्याशङ्क्याह दसुच्यते

कृतेत्यादि । तारासुतोऽङ्गदः कथं राक्षसार्थं राक्षसहेतुकं राक्षसप्रीत्यर्थं वा विकारं भेदं यास्यति यतः सुताविशेषं यथा स्यात्तथा सुग्रीवराजेन युवराजराज्ये कृताभिषेकः कीदृशेन सुग्रीवराजेन ताराविधेयेन ताराचित्तानुवर्त्तिना एतेन लब्धैश्वर्य्यत्वात् सुग्रीवायत्ततया मातुरधीनत्वाच्चाभेद्य एवायमिति दार्ढ्यं प्रतिपादितं सुतोऽविशेषो यत्रेत्यभिषेकक्रियाविशेषणं ममैवायं पुत्रो न वालिन इत्येवंरूपेणेत्यर्थः विधेयो विनयग्राहीत्यमरः । अर्थोऽभिधेये शब्दानां धनकारणवस्तुषु । प्रयोजने निवृत्तौ च विषये च प्रवर्त्तते ॥ ५० ॥ भ०

अन्यसमाश्रयादपि रामेण विग्रहो न युज्यत इति दर्शयन्नाह

पश्यामीत्यादि । रामादधिकं ज्यायांसं समानं वा न पश्यामि यं विरोधे विग्रहनिमित्तमुपाश्रयेम आश्रयं गच्छेम संप्रश्ने लिङ् स्वयम्भूर्ब्रह्मा तावत्साश्रयः यतो वरं दत्वा सानुशयः विप्रतीसारवान् जातः किमिदमकार्य्यमनुष्ठितं मयेति इन्द्रादयस्तु पूर्व्वतरं विरुद्धाः ॥ ५१ ॥ ज० म०

दुर्गाश्रितानां बहुनापि राजन् कालेन पार्ष्णिग्रहणादिहेतुः ।
दुर्गोपरोधं न च कुर्वतोऽस्ति शत्रोश्चिरेणापि दशास्य हानिः॥५२॥
शस्यं तरूर्वीधरमम्बुपानं वृत्तिः फलैर्नो गजवाजिनार्थ्यः ।
राष्ट्रं न पश्यान्न जनोऽभिरक्ष्यः किं दुःस्थमाचक्ष्व भवेत्परेषाम्॥५३

अन्यमाश्रित्य रामं जेष्यामीत्यत्रेदमुच्यते

पश्यामीत्यादि । रामादधिकं श्रेष्ठं समं तुल्यं वा अन्यं न पश्यामि विरोधे विग्रहनिमित्तं यमुपाश्रयेम आश्रयं गच्छेम विधिनिमन्त्रणेत्यादिना संप्रश्ने स्त्री तर्हि देवा एवाश्रीयन्तामित्यत आह स्वयम्भूर्ब्रह्मा वरं दत्वा सानुशयः पश्चात्तापान्वितः किमिदमकार्ष्यं मया कृतमिति अन्ये इन्द्रादयो देवाः पूर्वकालमेव विरुद्धा व्यरोधयन्न ॥ ५१ ॥ भ०

एवं दुर्गसमाश्रयोऽपि न युज्यत इति दर्शयन्नाह

दुर्गेत्यादि । दुर्गाश्रितानामस्माकं दुर्गोपरोधं कुर्वत शत्रोर्बहुनापि कालेन हे राजन् पार्ष्णिग्रहणादेः आदिशब्दादाटविकान्तपालादिप्रकोपस्य हेतुर्नास्ति यद्दशाडुपरोधो न भविष्यति अत्र स्थितानां त्वय एव केवलं न च शत्रोरुपरोधं कुर्वतः चिरेणापि हानिः ॥ ५२ ॥ ज० भ०

दुर्गमाश्रित्य रामं वञ्चयिष्यामि इत्यत्रेदमुच्यते

दुर्गाश्रितानामित्यादि । हे राजन् हे दशास्य दुर्गमाश्रितानामप्यस्माकं बहुनापि कालेन पार्ष्णिग्रहणमित्योद्यमादिरूपो हेतुरस्ति तस्मात् दुर्गस्थितानामपि त्वय एव यद्वा दुर्गाश्रितानामप्यस्माकं पार्ष्णिग्रहणादिहेतुका हानिरवश्यं बहुनापि कालेन भविष्यति जगद्वैरित्वादस्माकमस्मिन्नवसरे अन्येऽपि पार्ष्णिग्राहादयो हानिं करिष्यन्तीत्यर्थः । पार्ष्णिः स्याद्दुर्गमस्त्रियाम् । स्त्रियां द्वयोः सैन्यपृष्ठे पादग्राहे धनेऽपि चेति कोषः अस्मद्दुर्गोपरोधं कुर्वतस्तु शत्रोश्चिरेणापि कालेन न हानिर्नापचयो भविष्यति अस्मदतिरिक्तस्य तद्वैरिणोऽसत्वात् अतो दुर्गाश्रयोऽपि न युज्यते ॥ ५२ ॥ भ०

युद्धशरीरोपयोगिनां सर्वदा सम्भवात् तदेव दर्शयन्नाह

शस्यमित्यादि । तरवश्च उर्वीधराश्चेति जातिरप्राणिमात्रमिति एकवद्भावः तच्छस्यं न शूलखड्गादि पानमम्बु न मैरेयादि फलैर्वृत्तिर्नोदनादिभिः नो गजवाजिनार्थ्यः शरीरमात्रत्वान्निश्चिन्ताः राष्ट्रं देशो न पश्यात् अतएव तत्स्थो जनो नाभिरक्ष्यः एवं च सति परेषां किं दुःस्थं इत्याचक्ष्व कथय ॥५३॥ज०भ०

सन्धानमेवास्तु परेण तस्मात् नान्योऽभ्युपायोऽस्ति निरूप्यमाणः ।
नूनं विसन्धौ त्वयि सर्व्वमेतन्नेष्यन्ति नाशं कपयोऽचिरेण ॥५४॥
विभीषणोक्तं वहु मन्यमानः प्रोन्नम्य देहं परिणामनम्रम् ।
स्खलद्बलिर्वार्द्धककर्म्मभूर्द्धा मातामहो रावणमित्युवाच ॥५५॥

चिरेण युद्धोपयोगिनो वस्तुनः क्षयात्तेषामपि कथं न हानिरित्यत्रेदमुच्यते यस्मिन्नित्यादि । तरुर्वीधरं वृक्षपर्व्वतं सर्व्वेषां सुग्रीवादीनां शस्त्रं न खड्गादि तरवश्च उर्व्वीधराश्चेति समाहारद्वन्द्वः अप्राणिजातित्वात् समाहार इति परः शस्यते हन्यते अनेनेति शस्त्रं उपसर्गबधे त्रासुसिति त्रः अस्तु जलं पानं पेयं न मद्यादि पीयते इदमिति कर्म्मणि अनट् फलैर्वृत्तिर्जीविका नीवारादिभिः हस्तिनोऽश्वाः स्त्रियश्च न सन्ति अतः शरीरमात्रत्वान्निश्चिन्ताः राङ्कं देशोऽपि न यस्यादस्ति अतएव अलस्थो जनोऽपि रक्षणीयो नास्ति यदर्थं देशगमनं स्यात् एवं सति परेषां सुग्रीवादीनां किं दुःस्थं भवेत् तदाचक्ष्व कथय एतद्विपरीतमस्माकं सर्व्वमिति भावः ॥ ५३ ॥ भ०

अतो रामेण ज्यायसा सन्धिरेवास्तु न विग्रह इति तदेव दर्शयन्नाह

सन्धानमित्यादि । तस्मात्परेण सन्धिरेवास्तु अन्य उपायो नास्ति अन्यथा त्वयि विरुद्धबुद्धौ सर्व्वं कपयो विनाशयिष्यन्तीति ॥ ५४ ॥ ज० म०

सन्धानमित्यादि । तस्मात् पूर्व्वोक्तकारणात् परेण रामेण सह सन्धिरेव भवतु निरूप्यमाणः चिन्यमानोऽन्योऽभ्युपायो नास्ति त्वयि विसन्धौ सन्धिमकुर्व्वाणे सति एतत्सर्व्वं खाद्यादिकं कपयोऽचिरेणैव कालेन नाशं नेष्यन्ति प्रापयिष्यन्ति ॥ ५४ ॥ भ०

विभीषणोक्तमित्यादि । वहु मन्यमानः श्लाघमानो मातामहो मातुः पिता माल्यवान्नाम देहं परिणामनम्रं वयसः परिणामान्नमनशीलं प्रोन्नम्योत्क्षिप्य अतएव स्खलद्बलिः वार्द्धकेन वृद्धभावेन मनोज्ञादित्वात् वुञ् कर्म्मः कर्म्मनशीलो मूर्द्धा यस्य सः रावणमिति वक्ष्यमाणमुवाच ॥ ५५ ॥ ज० म०

विभीषणोक्तमित्यादि । विभीषणस्योक्तं वाक्यं वहु मन्यमानः श्लाघमानो मातामहो माल्यवान् देहं प्रोन्नम्य उत्क्षिप्य रावणमिति वक्ष्यमाणमुवाच कीदृशं देहं परिणामनम्रं वयसः परिणामाद्वार्द्धकान्नमनशीलं स कीदृशः स्खलद्बलिः देहोत्क्षेपात् स्खलन्ती वलिर्जरालक्षणं चर्म्म यस्य वलिश्यामरदच्छदे स्यात् जरसा क्षयचर्म्मणि वार्द्धकेन वृद्धत्वेन कर्म्मः कर्म्मनशीलो मूर्द्धा मस्तको यस्य

एकः पदातिः पुरुषो धनुष्मान् योऽनेकमायानि वियद्गतानि ।
रक्षःसहस्राणि चतुर्दशार्दीत् का तत्र वो मानुषमात्रशङ्का ॥५६॥
ब्रह्मर्षिभिर्नूनमयं सदेवैः सन्तापितैरात्तिचरक्षयाय ।
नराकृतिर्वानरसैन्यशाली जगत्यजय्यो विहितोऽभ्युपायः ॥५७॥
वज्राभिघातैरविरुग्णमूर्त्तेः फेणैर्जलानामसुरस्य मूर्द्धः ।

नमिकम्पिभ्यां हिंसदीपेत्यादिना रः कर्म्मण्यर्दतीति पाठे कर्म्मतीति पचाद्यचि वृद्धस्य भावो वार्द्धकं विकारसङ्घेति कण् खित्येत्रिरिति त्रिः मातुः पितेत्यर्थे मातृपितृभ्यां तस्मितरि डामहोऽभिधानात् ॥५५॥ भ०

एक इत्यादि । एकः असहायः पदातिः न हस्त्यादावारूढः पुरुषो मनुष्यः धनुष्मान् धनुर्म्मात्रायुधः चतुर्दश रक्षःसहस्राणि अनेकमायानि वियद्गतानि प्रयातुमशक्यानि परेषामित्यर्थात् आर्दीत् हिंसितवान् का तत्र वः युष्माकं मानुषमात्रशङ्का नैवेत्यर्थः ॥ ५६ ॥ ज० म०

एक इत्यादि । यो रामो राक्षसानां चतुर्दशसहस्राण्यार्दीत् जघान तत्र वो युष्माकं का मानुषमात्रशङ्का मनुष्योऽयमिति को वितर्कः नैवेत्यर्थः कीदृशः एकः असहायः तत्रापि पदातिः न हस्त्यश्वाद्यारूढः पुरुषः मनुष्यो न देवादिः धनुष्मान् धनुर्म्मात्रायुधः कीदृशानि अनेकमायानि बहुकपटयुक्तानि वियद्गतानि आकाशे स्थितत्वात् हन्तुमशक्यानि सहस्रशब्दस्यासंख्यामात्रवाचित्वेऽपि परम्परया गुणगुणिनोरभेदविवक्षया वा हननकर्म्मत्वं चतुर्दशसहस्रावच्छिन्नरक्षांसि आर्दीदित्यर्थः ॥ ५६ ॥ भ०

किन्तु दिव्योऽसाविति तदेव दर्शयन्नाह

ब्रह्मेत्यादि । सदेवैर्ब्रह्मादिभिः सन्तापितैः रात्तिचरक्षयाय नूनमयं राम उपायो विहितः उत्पादितः नराकृतिः आकृत्यैव केवलं नरः वानरसैन्यशाली आढ्यः अजय्यो जेतुमशक्यः ॥ ५७ ॥ ज० म०

यदि न मानुषमात्रं तर्हि कीदृशोऽयमित्यत्र भेद उच्यते

ब्रह्मर्षिभिरित्यादि । ब्रह्मर्षिभिर्भृग्वङ्गिरादिभिः रात्तिचराणां राक्षसानां क्षयाय नाशाय नूनमयं रामोऽभ्युपायो विहितः कृतः कीदृशैः सदेवैर्देवतासहितैः सन्तापितैः पीडितैस्त्वयेत्यर्थात् उपायविधाने बीजमिदं कीदृशो नराकृतिः मनुष्यरूपी देवविशेषः वानरसैन्येन युक्तः शोभमान इति विद्यासागरः जगति अजय्यः जेतुं न शक्यः ॥ ५७ ॥ भ०

चकार भेदं मृदुभिर्मरुद्भिरेन्द्रो यथा तथैतत्किमपीति बोध्यम्॥५८॥
क्व स्त्रीविसह्याः करजाः क्व वज्रो दैत्यस्य शैलेन्द्रशिलाविशालम् ।
सम्पश्यतैतत् द्युषदां सुनीतं विभेद तैस्तन्नरसिंहमूर्त्तिः ॥५९॥
प्रमादवांस्त्वं च्युतधर्म्मवर्त्मा गतो सुनीनामपि शत्रुभावम् ।
कुलस्य शान्तिं वज्र मन्यसे चेत् कुरुष्व राजेन्द्र विभीषणोक्तम्॥६०

इष्टस्यैवमप्रकारो देवानां मयेति दर्शयन्नाह

वज्रेत्यादि । असुरस्य नमुचेः वज्राभिघातैरपि अविरुग्नमूर्त्तेः अचूर्णितशरीरस्य सम्बन्धिनो मूर्द्धो जलफेणैर्मृदुभिः भेदं चकार यथा तथेदमपि शमे स्थितानामपि देवानां नराकृति वस्तु किमपीति बोद्धव्यम् ॥ ५८॥ ज०म०

इष्टस्यैवंविधप्रकारो देवानामिति दर्शयितुमिदमुच्यते

वज्रेत्यादि। वज्रस्याभिघातैरपि अविरुग्नमूर्त्तेरभग्नावयवस्य असुरस्य नमुचिनाम्नः सम्बन्धिनो मूर्ध्नो मस्तकस्य भेदं छेदं मृदुभिरपि जलानां फेणैर्मरुद्भिरेन्द्रश्चकार यथा तथा इदमपि नराकृति किमपि वस्तु देवानामपि बोध्यं ज्ञेयं भवद्भिरित्यर्थात् ॥ ५८ ॥ भं०

अन्यथा कथं फेणपिण्डैर्विनाश इत्याह

क्व स्त्रीत्यादि । स्त्रीविसह्याः स्त्रीभिः सोढुं शक्याः करजा नखाः क्व दैत्यस्य हिरण्यकशिपोः शैलेन्द्रशिलाविशालं वज्रः क्व च वज्रःकरजयोरपि दूरमन्तरं तथापि द्युषदां देवानां एतत्सुनीतं सुनयं सम्पश्यत यत् तैर्नखैर्नरसिंहमूर्त्तिः तद्वज्रो विभेद ॥ ५९ ॥ ज० म०

क्व स्त्रीत्यादि । क्व स्त्रीभिरपि विशेषेणाकृष्टेन सोढुं शक्याः करजा नखाः क्व दैत्यस्य हिरण्यकशिपोः शैलेन्द्रशिलावद्विशालं वज्रस्य क्व अत्यन्तासम्भवे कृत्यं तथापि द्युषदां देवानामेतत् सुनीतं सुनयं यूयं पश्यत यतस्तैः करजैस्तद्वज्रोनरसिंहमूर्त्तिर्देवो विभेद तद्वन्मनुष्योऽपि राजसान् हनिष्यतीति भावः दितेरपत्यमिति वार्ह्वाद्यतोऽत्रावादेरित्यादिना गर्गादित्वात् यञ्प्रः ॥ ५९ ॥ भ०

यत्नैवमुपायेन देवैर्निहन्यते तत्र त्वं कथं प्रमादी सुह्यसीत्याह

प्रमादवानित्यादि । त्वं यतः प्रमादी अजितेन्द्रियत्वात् च्युतधर्म्मवर्त्मा स्वकाचारः अतो सुनीनामपि शमे स्थितानां शत्रुत्वं गतः ईदृशोऽपि कुलस्य शान्तिं वज्र मन्यसे चेत् श्लाघसे यदि हे राजेन्द्र कुरुष्व विभीषणोक्तम् ॥ ६० ॥ ज० म०

घोषेण तेन प्रतिलब्धसंज्ञो निद्राविलाक्षः श्रुतकार्य्यसारः ।
स्फुरन्नभस्वानिवान्तरीक्षे वाक्यं ततोऽभाषत कुम्भकर्णः ॥६१॥
क्रियासमारम्भगतोऽभ्युपायो द्रव्यसम्पत्सहदेशकालौ ।
विपत्प्रतीकारयुतार्थसिद्धिर्मन्त्राङ्गमेतानि वदन्ति पञ्च ॥६२॥

प्रमादवानित्यादि । हे राजेन्द्र कुलस्य शान्तिं कल्याणं त्वं चेत् यदि भद्रं मन्यसे तदा विभीषणोक्तं कुरुष्व कोऽयस्त्वं प्रमादवान् असावधानस्त्यक्तधर्म्मपथोऽजितेन्द्रियत्वात् मुनीनां समदर्शिनामपि शत्रुत्वं प्राप्तः यदैव देवैरुपायेन हिरण्यकशिपुप्रभृतयोऽपि हन्यन्ते स्म तदा प्रमादिनस्ते कथं रक्षा स्यादिति भावः ॥ ६० ॥ भ०

घोषेणेत्यादि । प्रहस्तविभीषणमातामहानां वदतां यो घोषः तेन प्रतिलब्धसंज्ञो विबुद्धः कुम्भकर्णो निद्राविलाक्षः निद्रया कषायितचक्षुः श्रुतकार्य्यसारः श्रुतकार्य्यशरीरः ततः कार्य्यसारश्रवणानन्तरं वाक्यमभाषत यथा घनः साम्बुः सजलोऽन्तरीक्षे वियति स्फूर्ज्जति तद्वत् स्फूर्ज्जन्निति ॥ ६१ ॥ ज० म०

घोषेणेत्यादि । ततो मातामहवचनानन्तरं कुम्भकर्णो वाक्यं वक्ष्यमाणमभाषत उक्तवान् सजलो मेघ इव अन्तरीक्षे स्फुरन् अत्युच्चत्वादासन्नस्यान्तरीक्षतुल्यत्वाद्वा तेन प्रहस्तविभीषणमातामहानां घोषेण शब्देन प्रतिलब्धसंज्ञः विबुद्धः अतएव निद्राविलाक्षः निद्रया कलुषीकृतचक्षुः श्रुतकार्य्यसारः अवगतकार्य्यसारः ॥ ६१ ॥ भ०

कार्य्यं निश्चित्य सदसि भाषणानि न पञ्चाङ्गमन्त्रं विनेति साङ्गं तं तावदुपदर्शयन्नाह

क्रियेत्यादि । क्रियाणां दुर्गादिकर्म्मणां यः समारम्भस्तं गतः प्राप्तो योऽभ्युपायः कर्म्मणामारम्भोपाय इत्यर्थः इदमेकमङ्गं द्रव्यसम्पत् पुरुषाणां द्रव्याणाञ्च सम्पदिति द्वितीयं द्वयोरुक्तवचनं योगवाहित्वज्ञापनार्थं सहदेशकालेति यस्मिन् देशे काले च कार्य्यासिद्धिस्ताभ्यां सह वर्त्तत इति तृतीयं अत्रापि सहवचनं योगादेव कर्म्मणामनुष्ठीयमानानां या विपत्तस्याः प्रतीकारस्तेन युक्तेति चतुर्थं अर्थसिद्धिः कार्य्यसिद्धिरिति पञ्चमं एतानि पञ्च मन्त्रस्याङ्गानि वदन्ति नीतिज्ञाः ॥ ६२ ॥ ज० म०

मन्त्रणां विना कथनमयुक्तमिति साङ्गं मन्त्रमुपदिशति

क्रियेत्यादि । एतानि पञ्च मन्त्राङ्गं वदन्ति नीतिविदः क्रियाणां दुर्गादि-

न निश्चितार्थं समयञ्च देशं क्रियाभ्युपायादिषु योऽतियायात् ।
स प्राप्नुयान्मन्त्रफलं न मानी काले विपन्ने क्षणदाचरेन्द्र ॥६२॥
औष्ण्यं त्यजेन्मध्यगतोऽपि भानुः शैत्यं निशायामथवा हिमांशुः ।
अनर्थमूलं भुवनावमानी मन्ये न मानं पिशिताशिनाथ ॥६४॥

कर्म्मणां यः समारम्भस्तद्गतस्तत्सम्बन्धी योऽभ्युपायः येन कर्म्मारम्भो भवतीत्येकमङ्गं नृणां मनुष्याणां द्रव्याणाञ्च सम्पदिति द्वितीयं द्वयोः सङ्कथनं परस्परोपयोगसूचनार्थं सहदेशकाला देशकालाभ्यां सहिता सम्पदित्यन्वयः तेन यस्मिन् देशे यस्मिन् काले च सिद्धिस्तदुभयविशिष्टं तृतीयं अत्र सहवचनं योगवाहित्वसूचनाय अनुष्ठीयमानानां कर्म्मणां या विपत् तस्या यः प्रतीकारः तेन युक्ते सति चतुर्थं अस्य कार्य्यस्य सिद्धिरिति पञ्चमं मन्त्राङ्गमित्येकवचनेन मिलितानामेषामङ्गत्वं न तु प्रत्येकमिति सूच्यते सामान्यविशेषभाव इत्यन्ये॥६२॥ भ०

न निश्चितेत्यादि । विनिश्चितार्थोऽवश्यं सिध्यतीति यस्मिन् समये काले देशे च कार्य्यसिद्धिः तादृशं समयं देशं च यो विजिगीषुर्नातियायात् नातिक्रामेत् प्रतिषेधस्य द्वित्वात्प्रतिषेधद्वयं योज्यं समयं च देशमिति पाठान्तरे समुच्चयेनैक एव योज्यः क्रियाभ्युपायादिषु सत्सु आदिशब्दात् पुरुषद्रव्यसंपद्विपत्प्रतीकारे च स प्राप्नुयान्मन्त्रफलं हे क्षणदाचरेन्द्र न पुनर्मानी भवादृशः काले विपन्ने प्राप्तेति सहि देशकालौ ज्ञापयति ॥ ६३ ॥ ज० म०

न निश्चितार्थमित्यादि । क्रियाभ्युपायादिषु मध्ये निश्चितार्थं निश्चितोऽर्थोऽवश्यं सिध्यति यस्मिन् समये काले देशे च तादृशं समयं कालं देशञ्च यो जिगीषुर्नातियायात् नातिक्रामेत् हे राक्षसेन्द्र स एव मन्त्रफलमर्थसिद्धिं प्राप्नुयात् न पुनर्मानी भवादृशः काले विपन्नेऽतिक्रान्ते सति प्राप्नोति यदैव सीताहरणं कर्त्तुमिष्टं तदैव मन्त्रणा युक्ता मानित्वान्न कृता संप्रति किं मन्त्रेण साध्यमिति भावः ॥ ६३ ॥ भ०

औष्ण्यमित्यादि । हे पिशिताशिनाथ भानुर्मध्यगतोऽपि मध्याह्नेऽपि औष्ण्यमुष्णतां त्यजेत् सम्भावने लिङ् अथवा हिमांशुर्निशायामपि शैत्यं त्यजेत् भुवनावमानी पुनर्भुवनमवमन्तुं शीलमस्येति नास्ति मत्समः इति स भवादृशो मानं न त्यजेत् अनर्थमूलं अनर्थस्य कारणं एवं मन्ये जानामि ॥ ६४॥ ज०म०

औष्ण्यमित्यादि । हे पिशिताशिनाथ राक्षसानामीश्वर भानुर्नभोमध्ये गतोऽपि मध्याह्नस्थितोऽपि वा उष्णतां त्यजेत् अथवा हिमांशुश्चन्द्रो निशाया-

तथापि वक्तुं प्रसभं यतन्ते यन्महिधाः सिद्धिमभीप्सवस्त्वाम् ।
विलोमचेष्टं विहितावहासाः परैर्हि तत् स्नेहमयैस्त्वमोभिः ॥६५॥
क्रूराः क्रिया ग्राम्यसुखेषु सङ्गः पुण्यस्य यः संचयहेतुरुक्तः ।
निषेवितोऽसौ भवतातिमात्रं फलत्यवल्गु ध्रुवमेव राजन् ॥६६॥

मपि भीतत्वं त्यजेत् सम्भावने खौ कदाचिदेवमपि सम्भाव्यते न तु भुवनावमानो जगदवज्ञाशीलो भवादृशः अनर्थस्य मूलं कारणं त्यजेदित्यहं मन्ये एतेन संप्रत्यपि सीतासमर्पणादेव रक्षा तव त्वया मानिना कदापि न कार्येमिति भावः भुवनान्यवमन्यत इति अर्हादित्वाच्छिनु भुवनान्यवमन्तुं शीलं यस्येति परः ॥ ६४ ॥ भ०

तथापीत्यादि । तथापि एवमपि सति महिधाः सिद्धिं कार्यनिष्पत्तिमभीप्सवः आप्तुमेषणशीलाः यत्नां विलोमचेष्टं प्रतिकूलचेष्टितं प्रसभमाहत्य वक्तुं यतन्ते परैः दूतजनैः यत्नुजनैर्वा विहितावहासा एवंविध व्यपदिशन्तीति वाशब्दः पादपूरणे तत् स्नेहमयैः स्नेहस्वभावैस्त्वमोभिरज्ञानैः स्नेहतमसावृता ब्रुवन्नीत्यर्थः ॥ ६५ ॥ ज० म०

तथापीत्यादि । यद्यपि त्वमेवंविधस्तथापि कार्यस्य सिद्धिं प्राप्तुमिच्छवो महिधा विभीषणादयः परैरस्मदुक्तावज्ञापरैः प्रहस्तादिभिः यत्नुभिर्वा विहितावहासाः कृतोपहासा अपि सन्तः विलोमचेष्टं प्रतिकूलकारिणं त्वां प्रसभं बलाद्वक्तुं यत् यतन्ते तत् स्नेहमयैः स्नेहरूपैस्त्वमोभिरज्ञानैर्हेतुभिरेव स्नेहादेवमपि त्वां वक्तुं यतन्ते इत्यर्थः यद्वा यतो वक्तुं यतन्ते तस्मात् स्नेहमयैस्त्वमोभिरुपलक्षिता इत्यर्थः क्विप्शब्दोऽवधारणे पादपूरणे इत्यन्ये ॥ ६५ ॥ भ०

क्रूरा इत्यादि । क्रूराः क्रियाः परहिंसादयः ग्राम्यसुखेषु परदारोपभोगादिषु सङ्गः प्रसक्तिः यः पुण्यस्यार्जितस्य संचयहेतुरुक्तः विद्यादृद्धैः असौ भवतातिमात्रं सुष्ठु निषेवितः सन् हे राजन्निदानीं फलति फलं ददाति अवल्गु असारं ध्रुवमविनाशम् ॥ ६६ ॥ ज० म०

क्रूरा इत्यादि । क्रूराः क्रियाः हिंसात्मिकाः ग्राम्यसुखेषु परदारोपभोगादिषु सङ्गः आसक्तिरिति पुण्यस्य संचयहेतुर्विनाशकारणं य उक्तो वेदविद्भिः असौ भवता अतिमात्रमत्यर्थं निषेवितः सन् हे राजन् अवल्गु अमनोहरं कुत्सितं ध्रुवमेव फलति अवल्गु यथा स्यात्तथा फलति फलं दास्यतीति या भविष्यत्यानीप्ये वी अभिधानात् ॥ ६६ ॥ भ०

दत्तं न किं के विषया न भुक्ताः स्थितोऽस्मि वा कं परिभूय नोच्चैः ।
इत्थं कृतार्थस्य मम भुवं स्यान्मृत्युस्त्वदर्थे यदि किन्न लब्धम् ॥६७॥
किं दुर्नयैस्त्वय्युदितैर्मृषार्थैर्वीर्येण वक्ताऽस्मि रणे समाधिम् ।
तस्मिन् प्रसुप्ते पुनरित्यमुक्ता विभीषणोऽभाषत राक्षसेन्द्रम् ॥६८॥

तस्माद्विलोभचेष्टस्य भवतो हितोपदेशे मम न किञ्चित्प्रयोजनं तावत्तु स्यात् त्वदर्थं प्राणत्यागं इति दर्शयन्नाह

दत्तमित्यादि । तव प्रसादादन्येभ्यः किं न दत्तं के विषया न भुक्ताः सर्वे एवानुभूताः कं वा परिभूय तिरस्कृत्य उच्चैर्मंकृति पदे न स्थितोऽस्मि इत्यमनेन प्रकारेण कृतार्थस्य लब्धजन्मफलस्य मम यदि त्वदर्थे मृत्युरवश्यं स्यात् तदा किन्न लब्धं सर्वमेव जन्मफलं लब्धमित्यर्थः ॥ ६७ ॥ ज० म०

किं विलोभचेष्टस्य भवतो भोगप्रदेशेन त्वदर्थे प्राणा एव त्याज्या इति दर्शयित्वमिदमुच्यते

दत्तमित्यादि । किं न दत्तं बन्धुबान्धवादिभ्यो मया अपि तु सर्वं दत्तं तव प्रसादादिति वाक्यशेषः किंवा त्वया मह्यं किं न दत्तमपि तु सर्वं दत्तमेव के विषयाः शब्दचन्दनादयो मया न भुक्ता अपि तु सर्वं एवोपभुक्ताः किंवा उच्चैर्मंकृद्वस्तु परिभूय न स्थितोऽस्मि किंवा परिभूय उच्चैर्मंकृति पदे न स्थितोऽस्मीति वा कं नेति पाठे जनमिति शेषः अपि तु सर्वमेव तिरस्कृत्य स्थितोऽस्मीत्यर्थः इत्यमनेन प्रकारेण कृतार्थस्य लब्धजन्मफलस्य मम यदि त्वदर्थे मृत्युरवश्यमवश्यं स्यात्तदा किं न लब्धं सर्वमेव फलं प्राप्तमिति भावः ॥ ६७ ॥ म०

तव पुनरद्यापि विभीषणोक्तं युक्तं न प्रहस्तसुखोक्तमिति दर्शयन्नाह

किं दुर्नयैरित्यादि । अस्यापि स्थिते किं द्यौरधोऽस्त्वित्यादिना यान्युदितान्यनुक्तानि अलीकार्थानि तैर्दुर्नयैः किं न किञ्चित् फलं कस्यादिति चेत् यस्मात्तेषां समाधिं प्रतीकारं संप्राप्ते रामसम्बन्धिना वीर्येण वक्ताऽस्मि वदिताऽहं रामवीर्यप्रतीकारादीत्यर्थः इत्यमेवं तस्मिन् कुम्भकर्णे उक्ता पुनः भूयः प्रसुप्ते सति विभीषणो राक्षसेन्द्रमभाषत ॥ ६८ ॥ ज० म०

किं दुर्नयैरित्यादि । प्रहस्तादीनामुदितैर्वाक्यैः किं द्यौरधोऽस्त्वित्यादिभिरर्थैर्व्यलीकैर्दुर्नयैर्नीतिरहितैस्त्वयि विषये किं फलं यतस्तेषां वाक्यानां समाधिं प्रतीकारं रणे रामसम्बन्धिना वीर्येणाहं वक्ताऽस्मि वदिताऽस्मि रामविक्रमेणैवदचनानां मिथ्यात्वं ज्ञापयिष्यामीति यतो विभीषणवचनमेवोचितं न प्रहस्त-

निमित्तभूतैस्थगिता रजोभिर्दिशो मरुद्भिर्विकृतैर्विलोलैः ।
स्वभावहीनैर्मृगपक्षिघोषैः क्रन्दन्ति भर्तारमिवाभिपन्नम् ॥ ६९ ॥
उत्पातजं छिद्रमसौ विवस्वान् व्यादाय वक्त्राकृति लोकभीष्मम् ।
अत्तुं जनान् धूसररश्मिराशिः सिंहो यथा कीर्णसटोऽभ्युदेति ७०
मार्गं गतो गोत्रगुरुर्भृगूणामगस्तिनाध्यासितविन्ध्यशृङ्गम् ।

दिवचनमित्यर्थः । इत्येवमुक्त्वा तस्मिन् कुम्भकर्णे प्रसुप्ते निद्रिते सति विभीषणो राक्षसेन्द्रं पुनरभाषत ॥ ६८ ॥ भ०

निमित्तभूतैरित्यादि । रजोभिर्निमित्तभूतैः निमित्तैः दिशः स्थगिताः संच्छादिताः स्थगसम्वरणे मरुद्भिश्च विकृतैः परुषैर्विलोलैरनियतदिग्वर्त्तिभिः स्थगिताः खगपक्षिणाञ्च घोषैः स्वभावहीनैर्मन्दैर्भर्तारमिवाभिपन्नं मृतं शोकात् क्रन्दन्ति ॥ ६९ ॥ ज० भ०

सम्प्रति रावणस्य भयोत्पादनार्थं दुर्निमित्तं कथ्यते

निमित्तेत्यादि । दिशः स्वभावाद्धीनैर्विकृतैश्च गणां पक्षिणाञ्च घोषैः शब्दैः रभिपन्नं मृतं भर्तारं शोकात् क्रन्दन्ति इव कोऽर्थो दिशः निमित्तभूतैः प्राणिव्यापाररूपकारणभूतैः रजोभिर्धूलिभिः स्थगिता आच्छादिताः स्थगे संवृतौ मरुद्भिश्च स्थगिताः चकारोऽत्राध्याहार्यः किंवा वायुभिः कर्तृभिर्धूलिभिः करणभूताभिः स्थगिताः कीदृशैर्मरुद्भिर्विकृतैः प्रचण्डैर्विलोलैरनियतदिग्वर्त्तिभिः ॥ ६९ ॥ भ०

उत्पातजमित्यादि । असौ विवस्वान् छिद्रं उत्पातजं वक्त्राकृति लोकभीष्मं लोकस्य भयानकं व्यादाय प्रसार्य व्याङ्पूर्वस्य दादेः क्त्वोल्यपि रूपं जनानत्तुं भक्षयितुं धूसररश्मिराशिः सन् अभ्युदेति उद्गच्छति यथा सिंहः कीर्णसटः विक्षिप्तकेसरकलापः मुखं व्यादायात्तुमुद्गिरति तद्वदिति ॥ ७० ॥ ज० भ०

उत्पातजमित्यादि । असौ धूसरकिरणजालो विवस्वान् सूर्यः छिद्रं व्यादाय प्रसार्य जनानत्तुं भक्षयितुमभ्युदेति यथा सिंहः कीर्णसटः प्रसारितकेसरकलापः सन् मुखं व्यादाय भक्षयितुमुद्गिरति तद्वत् कीदृशं छिद्रमुत्पातजमुत्पाते अनिष्टे सति जातं वक्त्राकृति मुखसदृशं लोकस्य तीव्रं भयजनकं भीष्मं इति क्वचित्पाठः भीमसमं कचित् सूर्यं छिद्रं लोकसंक्षयाय भवतीति प्रसिद्धिः ॥ ७० ॥ भ०

संदृश्यते शुक्रपुरोहितोऽक्षि क्ष्मां कम्पयन्त्यो निपतन्ति चोल्काः;७१
मांसं हतानामिव राक्षसानामार्शंसवः क्रूरगिरो रुवन्तः ।
क्रव्याशिनो दीप्तकशानुवक्त्रा भ्राम्यन्त्यभीताः परितः पुरं नः॥७२
पयोघटोष्ट्रीरपि गा दुहन्ति मन्दं विवर्णं विरसञ्च गोपाः ।

मार्गमित्यादि । अगस्त्येन मुनिना यदध्यासितं विन्ध्यशृङ्गं तन्मार्गं भृगूणां गोत्रगुरुः शुक्रो गतः दक्षिणमार्गचारी शुक्र इत्यर्थः शुक्रपुरोहितोऽपि दृश्यते दिवसे संदृश्यते उल्काश्च क्ष्मां पृथिवीं कम्पयन्त्यः निपतन्ति ॥७१॥ ज०म०

मार्गमित्यादि । अगस्त्येन मुनिना अध्यासितमधिष्ठितं विन्ध्यपर्वतस्य शृङ्गं यत्र तदेव वर्त्म भृगूणां भृग्वपत्यानां गोत्रगुरुः कुलगुरुः शुक्रो गतः दक्षिणमार्गचारी शुक्रोऽनिष्टहेतुरिति प्रसिद्धिः नाम्नान्ये तिक्चेति अस्मतेस्तिक् अगस्त्यास्तिरगस्तिः मनीषादित्वादकारलोपः अगस्त्योऽगस्तिरिति शब्दभेदः भृगूणामिति भृग्वत्यप्रक्रिर इत्यादिना अपत्यप्रत्ययलोपः शुक्रपुरोहितो दृश्यतिरङ्क्ष्मां दिवसे संदृश्यते उल्काः क्ष्मां पृथिवीं कम्पयन्त्यो निपतन्ति ॥ ७१ ॥ भ०

मांसमित्यादि । राक्षसानां हतानामिव मांसमार्शंसवः आर्शंसनशीलाः समार्शंसभिक्ष उः मांसभुजः शृगालादयः क्रूरगिरः परुषस्वनाः उच्चलनसदृशवदनाः निर्भयाः परितो भ्रमन्ति ॥ ७२ ॥ ज० म०

मांसमित्यादि । क्रव्याशिनः शृगालादयः निर्भयाः सन्तो रुवन्तो नदन्तो नोऽस्माकं पुरं क्ष्मां परितः सर्व्वतो भ्राम्यन्ति भ्रमुजणचाले क्रमक्रमभ्रमेति पचे श्यन् श्यमादित्वाद्दीर्घः धिक्समयेत्यादिना परितो योगे द्वितीया क्रव्याशिनः क्रोडयाः हतानामिव राक्षसानां मांसं भक्षयितुमार्शंसवः आकाङ्क्षन्तः सन् भिक्षार्शंस उरित्युप्रत्ययः क्रूरगिरो भीषणनादाः दीप्तकशानुवक्त्राः उल्कामुखाः ॥ ७२ ॥ भ०

पय इत्यादि । क्षीरं विवर्णं दुर्वर्णं विरसं अस्वादु मन्दं अल्पं पयस्विनोरपि दुहन्ति अकथितं चेति द्विकर्मकता तथा शोभनेऽन्यनोऽप्यस्मिन्न दीप्यते कृष्येषु कृषनीयेषु हतादिषु सत्सु अचोयत् उपजननमुपजनः भावे घञ् अनिबध्योक्षेति न वृद्धिः कीटानामुपजनोऽस्येति कीटोपजनः सकेशैः सकेशः दह्यमानकीटकेश इत्यर्थः ॥ ७३ ॥ ज० म०

पय इत्यादि । गोपा घटोष्ट्रीरपि पीवरस्तनीरपि गा मन्दं अल्पं विवर्णं स्वाभाविकवर्णहीनं विरसमस्वादु पयो दुहन्ति मोचयन्ति घट इव अधस्तनो

हव्येषु कीटोपजनः सकेशो न दीप्यतेऽग्निः सुसमिन्धनोऽपि॥७३
तस्मात् कुरु त्वं प्रतिकारमस्मिन् स्नेहान्मया रावण भाष्यमाणः।
वदन्ति दुःखं ह्यनुजीविवृत्तेस्थिताः पदस्थं परिणामपथ्यम्॥७४॥
विरुग्णसंकीर्णविपन्नभिन्नैः प्रत्नुषसंक्लीर्णशिताग्रदंष्ट्रैः।
यावन्नरार्यैर्न रिपुः शवाशान् सन्तर्पयत्यानम तावदस्मै ॥७५॥

यासां स्नशोध इति रैप् सस्य नकारश्च गवां गणाः प्रस्नुतपीवरोधस इत्यादि प्रयोगास्तु रैप्येव सस्य नकारभावात् सदानोऽक्नोप इति अनोऽक्नोपः गां पान्ति रक्षन्तीति गोपाः हनजनादिति डः हव्येषु हवनीयेषु हतादिषु केशैः सह कीटोपजनः कीटजन्म भवति घञि जन्वधं इति ह्रस्वः शोभनसमग्निन्धनयुक्तोऽपि अग्निर्न दीप्यते न ज्वलति कोचित्तु हव्येषु सत्स्वपि अग्निर्न दीप्यते कीदृशः कीटस्योपजनो यत्रेति व्याचक्षते ॥ ७३ ॥ भ०

तस्मादित्यादि । यस्मादेवं विनाशसूचकानि निमित्तानि दृश्यन्ते तस्मात् हे रावण स्नेहान्मया त्वं भाष्यमाणः अस्मिन् वस्तुनि प्रतीकारं सीताप्रत्यर्पणेनैव सन्धानं कुरु उपसर्गस्य घञीति वक्तव्यं दीर्घः कस्मादेवं भाष्यत इति चेत् यस्मादनुजीविवृत्तेऽवस्थिताः यद्वचनं दुःखं दुःखहेतु तदा कटुकत्वात् परिणाम-पथ्यं आयत्यां हितं तत्पदस्थं स्वामिपदे स्थितं वदन्ति ॥ ७४ ॥ ज० म०

तस्मादित्यादि । यत एवं विधानि विनाशसूचकानि निमित्तानि दृश्यन्ते तस्मात् हे रावण मया स्नेहाद्भाष्यमाणस्त्वं अस्मिन् प्रकृते वस्तुनि प्रतीकारं सीताप्रत्यर्पणे सन्धिं कुरु कृत एवमप्रियं कथ्यत इत्याह हि यस्मादनुजीविवृत्ते सेवककर्मणि स्थिता जना दुःखमापाततः कटुत्वात् दुःखजनकमपि परिणाम-पथ्यमुत्तरकाले हितं वचः स्वामिपदे स्थितं जनं वदन्ति दुःखहेतावपि दुःखशब्द-प्रयोगो दृश्यते यथा कष्टं व्याकरणं पदे तिष्ठतीति हनजनादिति डः ॥७४॥भ०

विरुग्णेत्यादि । यावद्रिपुः नरार्यैः राक्षसैः शवाशान् शवभक्षणशीलान् शवमश्नन्तीति कर्मण्यण् न सन्तर्पयति न प्रीणयति तावदस्य रिपोः आनम चरणावित्यर्थात् कीदृशैः विरुग्णैर्भिन्नाग्रैः ओदितश्चेति निष्ठानत्वं सङ्कीर्णैः कृतसमो विलिप्तैः विपन्नैर्मृतैर्भिन्नैर्विदारितदेहैः प्रत्नुषैः एभ्यो रदाभ्यामिति नत्वं संक्लीर्णैर्ज्ञप्तैः वयमेवमवस्था नीता इति ग्लितेन तीक्ष्णेन अग्रेण दृक्णैः छिन्नैः यहिज्यादिसम्भसारणं संयोगादिलोपः कुत्वञ्च ओदित्वान्नत्वम्॥७५॥ज० म०

विरुग्णेत्यादि । यावत् रिपूरामो नरार्यै राक्षसैः शवाशान् मृतभक्षकान्

भ्रूभङ्गमाधाय विहाय धैर्यं विभीषणं भीषणरक्तचक्षुः ।
गिरं जगादोग्रपदामुदग्रः स्वं स्फावयन् शक्ररिपुः प्रभावम् ॥७६॥
शिला तरिष्यत्युदकेन पर्णं ध्वान्तं रवेः स्रंस्यति वह्निरिन्दोः ।
जेता परोऽहं युधि जेष्यमाणस्तुल्यानि मन्यस्व पुलस्त्यनप्तः ॥७७॥

ग्रहगणादीत्र सन्तर्पयति तावदस्य रिपोस्त्वमानं प्रणमं अस्येति समर्थनेत्यादिना कर्मणि षष्ठी अस्य समीपे आनम नमो भव समीपलक्षणया षष्ठीयमिति विद्यासागरः चरणावित्यध्याहरन्यन्ये कीदृशैर्विरुग्णैः भग्नाङ्गैः रुजो शौभङ्गे क्लत्वाद्योदिदिति ओदित्त्वात् क्तस्य नत्वं सङ्गीर्णैरितस्ततो विक्षिप्तैः कथ विक्षेपे कदिरणावितीर्व्यनच्तयीति दीर्घः पूर्वेण रेफात् क्तस्य नत्वं विपक्षैर्भग्नैः यौपदङ्गतौ विपूर्वो विपत्तिमाह पूर्वेण दकारात् क्तस्य नत्वं भिन्नैर्विदारितदेहैः अधोभिदिर्भिदि भिद्विदारणं प्रणुन्नैः संपिष्टैः अधोक्षुदिर्क्षुदि क्षुत् संचूर्णनं संक्षोभैर्लज्जितैर्वयमपीदृशीं दशां प्राप्ता इति मत्वा ह्रीलज्जे ह्रीभावोन्देति क्तस्य पक्षे नत्वं शितासृग्दृक्पङ्क्तिभिः असृग्रुधिरे असेः कड्वेति क्तस्य नत्वं कड्वस्य कत्वे तन्निमित्तस्य षस्य सत्वे स्तादेः सो लोपः यरश्चस्पाद्योरिति जिः ॥ ७५ ॥ भ०

भ्रूभङ्गमित्यादि । शक्रारिपुर्दशाननः विभीषणवचनात् क्रुद्धः भ्रूभङ्गं भ्रुकुटिमाधाय आबध्य धैर्यं विहाय त्यक्त्वा भीषणरक्तचक्षुः भयानकप्रदृप्तचक्षुः उग्रः उद्गमितदेहः स्वं प्रभावं विक्रमं स्फावयन् वर्द्धयन् स्फायोव इति वौ क्वं विभीषणं अगाद् गिरं वाचं उग्रपदां संश्लिष्टनानां स्वरूपतोऽर्थतश्च परुषत्वात् ॥ ७६ ॥ ज० म०

भ्रूभङ्गमित्यादि । एवं विभीषणवचनात् कोपेन भ्रूभङ्गं भ्रुकुटीं आधाय आबध्य धैर्यं विहाय त्यक्त्वा शक्रारिपूः रावणः प्रभावं स्वकीयं विक्रमं स्फावयन् वर्द्धयन् विभीषणं गिरं वाचं अगाद् कीदृशः भीषणं भयानकं रक्तं प्रदृप्तं चक्षुर्यस्य तादृश उग्रः उद्गमितदेहः गिरं कीदृशीं उग्रपदां संश्लिष्टनानां स्वरूपतोऽर्थतश्च कठोरत्वात् उग्राणि पदानि यत्र स्फायीऽसंश्लिष्टौ धातिस्फायोरिति वङ् ॥ ७६ ॥ भ०

शिलेत्यादि । उदके शिला तरिष्यति न पुनः पर्णं रवेः स्रंस्यात् ध्वान्तमन्धकारं स्रंस्यति स्रविष्यति स्रन्दू प्रस्रवणे इत्यस्मात् न द्रवार्थतुर्थ इतोट न भवति स्रदि चेति सत्वं तथा वह्निरिन्दोः स्रंस्यति अङ्गमस्येव परं उत्कृष्टः जेता युधि संग्रामे जेष्यमाण इत्येतानि चत्वारि हे पुलस्त्यनप्तः विभीषण तुल्यानि

अनिर्वृतं भूतिषु गूढवैरं सत्कारकालेऽपि कृताभ्यसूयम् ।
विभिन्नकर्माशयवाक् कुले नो मा भ्रातिचेलं भुवि कस्यचिद्भूः ॥७८
दुरुच्छ्रयभ्रीक्षणं क्षयमात्मनोऽपि न भ्रातयस्तुल्यकुलस्य लक्ष्मीम् ।
नमन्ति शत्रून्न च बन्धुदृद्धिं सन्तप्यमानैर्हृदयैः सहन्ते ॥७९॥

मन्यस्व अवगच्छ लोटिरूपं यदि जेताभ्यहं परेण जीये शिलातरणादीन्यपि भविष्यन्ति ॥ ७७ ॥ ज० म०

शिलेत्यादि । उदके जले प्रस्तरस्तरिष्यति न तु पर्णं पत्रं तरति रवेः सकाशात् ध्वान्तं न स्थास्यति गलिष्यति इन्दोः सकाशात् वह्निः स्थास्यति स्यन्दूङ्द्रवणतौ इङ्गो नेमूयेरसनोरिति इन्प्रत्ययनिषेधः अतएव युधि परोऽन्य उत्कृष्टो वा जेता अहन्तु जेष्यमाणः हे पुलस्त्यनप्तः हे पुलस्त्यसुनिपौत्र एतानि शिलातरणादीनि तुल्यानि मन्यस्व यदि शिलातरणादिकं भवेत् तदा मे पराजय इत्यर्थः पुलस्त्यब्राह्मणस्य भोक्त्याप्नृत्वमपि तादर्थ्यमिति नप्तृसम्बोधनेन सूच्यते ॥ ७७ ॥ म०

अनिर्वृतमित्यादि । भूतिषु भ्रातिसम्बन्धिनीषु अनिर्वृतमसुखिनं गूढवैरं काले क्षणिष्यामीति सम्भृतापकारार्थं सत्कारकालेऽपि पूजाकालेऽपि कृताभ्यसूयं विभिन्नाः कर्माशयवाचो यस्य तद्विभिन्नकर्माशयवाक् आशयोऽन्यो वाङ्मनसी चान्ये यस्येति दृढयं भ्रातिचेलं गर्हितभ्रातिरस्माकं कुले मा भूत् कस्यचिदन्यस्य वा मा भूत् चेलशब्दो गर्हिते वर्त्तते ॥ ७८ ॥ ज० म०

अनिर्वृतमित्यादि । भुवि दृढयं भ्रातिचेलं गर्हितो भ्रातिर्नोऽस्माकं कुले कस्यचिन्मा भूत् न भवतु अस्माकमिवान्यस्यापि कस्यचित् कुले इत्यर्थो वा कीदृशं भूतिषु भ्रातिसम्बन्धिनीषु सम्पत्तिषु अनिर्वृतं सुखरहितं गूढवैरं काले क्षणिष्यामीति गूढहेतुं सत्कारकालेऽपि पूजासमयेऽपि कृताभ्यसूयं कृतामर्षं गुणेऽपि दोषाविष्करणमसूया विभिन्नाः परस्परविरोधिन्यः कर्माशयवाचो यस्य क्रूरत्वादाशयोऽन्यो वाङ्मनसी चान्ये इत्यर्थः चेलोनीचेऽन्यवस्त्रेलमंशुके गर्हितेऽन्यवदिति विश्वप्रकाशे यद्यपि चेलशब्दस्य गर्हिते वाच्यलिङ्गत्वमुक्तं तथापि गर्हितेऽवसाने च चेलमाचक्षते बुधैरित्यनुशासनादत्र क्लीबत्वं सामान्यविवक्षया नपुंसकत्वमिति विद्यासागरः विशेषवचस्य क्वचित् परनिपातोऽभिधानात् ॥७८॥म०

किं मया कृतं येनैवमुच्यत इति चेदाह

दुरुच्छ्रयेत्यादि । भ्रातयः आत्मनः क्षयं विनाशमिच्छन्ति न पुनस्तुल्य-

त्वयाद्य लङ्काभिभवेऽतिहर्षात् दुष्टोऽतिमात्रं विदितोऽन्तरात्मा ।
धिङ्मां मृषा ते मयि दुस्थबुद्धिर्वदन्निदं तस्य ददौ स पार्ष्णिम् ॥८०
ततः स कोपं क्षमया निगृह्णन् धैर्य्येण मन्युं विनयेन गर्वम् ।
मोहं धियोत्साहवशादशक्तिं समं चतुर्भिः सचिवैरुदस्थात् ॥८१॥
उवाच चैनं क्षणदाचरेन्द्रं सुखं महाराज विना मयास्म ।

कुलस्य एकहेतुगोत्रस्य लक्ष्मीं श्रियं तथा शत्रुं कामं नमन्ति न पुनर्बन्धुवृद्धिं बन्धुसन्ततिं सहन्ते सन्तप्यमानैर्हृदयैः ईर्ष्यया दह्यमानैः ॥ ७९ ॥ ज० म०

इच्छन्तीत्यादि । भ्रातरो वरमात्मनोऽपि क्षयमभीक्ष्णं पुनः पुनरिच्छन्ति न पुनः समानकुलोत्पन्नस्य भ्रातादेर्लक्ष्मीमिच्छन्ति तथा वरं शत्रून् नमन्ति न पुनर्बन्धूनां वृद्धिं सन्तप्यमानैरीर्षादह्यमानैर्हृदयैः सहन्ते ॥ ७९ ॥ भ०

किं मया कृतं येनैवमुच्यत इति चेदाह

त्वयेत्यादि । लङ्कापरिभवे लङ्कोपरोधे अतिहर्षात् हर्षेण दुष्टान्तरात्मा अतिमात्रं सुष्ठु त्वयाद्य विदितः प्रकाशितः मयि दुस्थबुद्धिः अस्माद्विषये दुस्थोऽभियुक्तोऽयमिति बुद्धिः ते मृषा मिथ्यातस्त्वां धिगिति वदन् स दशाननः तस्य विभीषणस्य सिंहासनोपाश्रितबाहोः पार्ष्णिं पादप्रहारं शिरसि ददौ॥८०॥ज०म०

पूर्व्वश्लोकद्वयार्थं विभीषणे घटयितुमिदमुच्यते

त्वयेत्यादि । लङ्काया अभिभवे दाहादौ सति त्वया अतिहर्षात् दुष्टोऽतिमात्रं अतिशयेन दुष्टोऽन्तरात्मा प्रकाशित एतावन्तं कालं गुप्त आसीदिति भावः मय्यस्माद्विषये दुःस्थोऽयमरिभिरभियुक्तोऽयमिति ते तव बुद्धिर्मृषा मिथ्या अतस्त्वां धिगिति वदन् स दशाननस्तस्य विभीषणस्य पार्ष्णिं पादप्रहारं ददौ ॥८०॥ भ०

तत इत्यादि । पार्ष्णिप्रहारादनन्तरं स विभीषणः कोपं क्षमया क्षान्त्या निगृह्णन् अभिभवन् तथा धैर्य्येण मन्युं शोकं विनयेन गर्वं मोहं वैचित्त्यं प्रज्ञया उत्साहवशादशक्तिमसामर्थ्यं निगृह्णन् अपमानेन कोपादीनां सम्भवात् चतुर्भिः सचिवैरमात्यैः समं सार्द्धमुदस्थात् आसनादुत्थितः ॥ ८१ ॥ ज० म०

तत इत्यादि । पार्ष्णिप्रहारानन्तरं स विभीषणः क्षमया क्षान्त्या कोपं निगृह्णन् अभिभवन् धैर्य्येण मनुजं शोकं निगृह्णन् विनयेन गर्वं दर्पं निगृह्णन् धिया बुद्ध्या मोहं वैचित्त्यं निगृह्णन् उत्साहवशादशक्तिमसामर्थ्यं निगृह्णन् चतुर्भिः सचिवैरमात्यैरुदस्थादासनादुत्थितवान् ॥ ८१ ॥ भ०

उवाचेत्यादि । उत्थितस्यानन्तरं रावणमुवाच हे महाराज मया विना

मूर्खातुरः पथ्यकटून्ननन्नन् यत्तामयोऽसौ भिषजां न दोषः॥८२॥
करोति वैरं स्फुटमुच्यमानः प्रतुष्यति श्रोत्रसुखैरपथ्यैः।
विवेकशून्यः प्रभुरात्ममानी महाननर्थः सुहृदां वतायम् ॥८३॥
क्रीडन् भुजङ्गेन गृहानुपातं कश्चिद्यथा जीवति संशयस्थः।
संसेवमानो नृपतिं प्रमूढं तथैव यज्जीवति सोऽस्य लाभः ॥८४॥

सुखमास्व तिष्ठ आस्तेर्लोट् तवात्र दोषो न ममेत्युपदेष्टुः यस्मान्मूर्खातुरः मूर्खो य आतुरः पथ्यकटून्ननन्नन् अभक्षयन् यत्तामयः रोगवान् भिषजां वैद्यानां न दोषः किन्तु तस्यैव ॥ ८२ ॥ ज० म०

उत्थितो विभीषणो रावणं वाचसुवाच किमुवाचेत्याह

उवाचेति । हे महाराज मया विना सुखं आस्व सुखेन तिष्ठेत्यर्थः ङित्लासङ् उपवेशे गो तवैवात्र दोषो न ममेत्युपदिशन्नाह मूर्ख आतुरो रोगी पथ्यान् कटून् अनन्नन् अभक्षयन् सामयो रोगी यत्तिष्ठत्यसौ भिषजां वैद्यानां न दोषः किन्तु तस्यैव ॥ ८२ ॥ भ०

करोतीत्यादि । प्रभुर्विवेकशून्यो निर्विवेकः आत्ममानी मत्समोऽन्यो नास्तीति आत्मानं श्लाघमानं आत्ममाने इनिः स्फुटमुच्यमानो वैरं करोति स्नेहं न करोति पथ्यमनेनोक्तमिति श्रोत्रसुखैः तदर्थमनोहारिभिः अपथ्यैस्तुष्यति तस्मादयं प्रभुः सुहृदामाश्रितानां महाननर्थः अनर्थहेतुत्वात् वत शब्दः खेदे ॥ ८३ ॥ ज० म०

करोतीत्यादि । प्रभुरीश्वरो विवेकशून्यः सदसद्विचाररहितः आत्ममानी मत्समो नास्तीत्यात्मानं श्लाघमानो वत खेदे अयमेव सुहृदां महाननर्थो दुःखहेतुः कथमित्याह तादृक् प्रभुः स्फुटं यथार्थ उच्यमानः क्रोधं करोति नतु पथ्यमनेनोक्तमिति स्नेहं श्रोत्रसुखैः कर्णसुखकारिभिः अपथ्यैरप्येतदुःखजनकैः प्रहृष्यति तुष्यति अतस्तस्य विनाश एव स्यात् आत्मानमेव मन्यत इति यहादित्वाच्छिन् ॥ ८३ ॥ भ०

क्रीडन्नित्यादि । यथा कश्चित्सर्पग्राही गृहानुपातं गृहं गृहमनुपत्य विधिपतीत्यादिना णमुल् भुजङ्गेन सह क्रीडन् जीवति संशयस्थः सन्देहे वर्त्तमानः किमयं खादिष्यति न वेति तथैव प्रमूढं मूर्खमधिपतिं संसेवमानो यज्जीवति सोऽस्य लाभः आत्मन्यो लाभ इति ॥ ८४ ॥ ज० म०

क्रीडन्नित्यादि । यथा कश्चिद्व्यालग्राही गृहानुपातं गृहं गृहमनुपत्य गत्वा

दत्तः खदोषैर्भवता प्रहारः पादेन धर्म्ये पथि मे स्थितस्य।
स चिन्तनीयः सह मन्त्रिमुख्यैः कस्यावयोर्लाघवमादधातु ॥८५

इति वचनमसौ रजनिचरपतिं
बङ्गुणमसकृत् प्रसभमभिदधत्।
निरगमदभयः पुरुषरिपुपुरा-
न्नरपतिचरणौ नवितुमरिनुतौ ॥ ८६ ॥

भुजङ्गेन सर्पेण क्रीडन् संशयस्थः किमयं खादिष्यति न वेति सन्देहे वर्त्तमानो जीवति तथैव प्रमूढमतिमूर्खमधिपतिं सेवमानो यज्जीवति अस्य सेवकस्य स एव लाभः एतेन मूर्खस्य तव सेवायां मम जीवनमेव लाभ इत्याशयः गृहानुपातमिति चणप्वेत्यस्य योगविभागात् साकल्ये चणम् गृहा अनुपत्यन्ते यस्मिन् इति क्रीडनविशेषणं वा तस्य कर्म्मणि घञ् ॥ ८४ ॥ भ०

दत्त इत्यादि। खदोषैरविवेकत्वादिभिर्भवता पादप्रहारः यो मम धर्म्मे धर्म्मादनपेते मार्गे स्थितस्य दत्तः स मन्त्रिमुख्यैरेतैः सह चिन्तनीयः आवयोर्मध्ये कस्य लाघवमादधातु करोत्विति यावन्निरूप्यमाणस्तवैवेति भावः ॥८५॥ ज०म०

दत्त इत्यादि। भवता खदोषैरात्मनोऽविवेकत्वादिभिः पादेन प्रहारो भवता मम दत्तः मम क्रीडतश्च धर्म्मादनपेते पथि वर्त्तमानस्य स पादप्रहारो मन्त्रिमुख्यैः सह त्वया चिन्तनीयो निरूप्यमाणः सन् आवयोर्मध्ये कस्य लघुत्वं करोतु निरूप्यमाणस्तवैव विवेकशून्यत्वख्यातिरूपं लाघवमुत्पादयिष्यतीति भावः॥ ८५ ॥भ०

इतीत्यादि। इत्येवं वचनं बङ्गुणं अर्थावगाढत्वात् असकृत् बहुत्वात् प्रसभं आहत्य रजनिचरपतिमभिदधत् ब्रुवन् नाभ्यस्ताच्छतुरिति नुमभावः रजनिचर इति छापोः संज्ञाच्छन्दसो बहुलमिति संज्ञायां ह्रस्वत्वं पुरुषरिपुपुरात्लङ्कातः निरगमत् निष्क्रान्तः अभयः सन् नरपतिचरणौ रामस्य पादौ अरिभिरपि नुतौ शूरत्वात् अक इतीट्प्रतिषेधः नवितुं प्रणामपूर्व्वकं स्तोतुं अनेकार्थत्वाद्धातूनां नन्तुमित्यर्थः ॥ ८६ ॥ ज० म०

इतीत्यादि। असौ विभीषण इत्युक्तप्रकारं वचनं असकृद्वारं वारं प्रसभं बलात् रजनिचरपतिं रावणं अभिदधत् वदन् नरपते रामस्य चरणौ नवितुं स्तोतुं पुरुषरिपो राक्षसस्य पुरात् लङ्काया निरगमत् निर्गतवान् वचनं कीदृशं बङ्गुणं औदार्य्यादिगुणयुक्तं असौ कीदृशः अभयः न विद्यते भयं यस्य रामचरणौ कीदृशौ अरिभिरपि नुतौ स्तुतौ तुलस्तुतौ वेमूदित्यादिना वेमत्वात् नेमडीश्चोदि-

अथ तमुपगतं विदितसुचरितं
पवनसुतगिरा गिरिगुरुहृदयः ।
नृपतिरमदयन्मुदितपरिजनं
स्वपुरपतिकरैः सलिलसमुद्भवैः ॥ ८७ ॥

इति श्रीभर्तृहरिकृते भट्टिकाव्ये द्वादशः सर्गः ।

नेम इति इमन्निषेधः नुश्लिलमिति पाठे नूशिल्लवन इत्यस्य रूपं रजनिचर इति संज्ञाशब्दः तेन संज्ञायां बहुलं लुक इति केचित् रजनिशब्द औणादिको लुकान्त इति विद्यासागरः वस्तुतोऽप्येवमेव रजनिजनितगुरुजागररागकषायितमलसनिमेषमिति जयदेवः सखि रजनिरद्य गतवतीति कालिदासः दीर्घान्तता तु पाल्लोनादीत्यादिना पक्षे रैर्विधानात् । प्रहरणकलिका नाम छन्दः तल्लक्षणं यथा नणभनलगिति प्रहरणकलिका ॥ ८६ ॥ भ०

अथेत्यादि । अनन्तरं विभीषणमुपेतं सेतुबन्धचिन्ताकाले रामसुपगतवानिति द्रष्टव्यं अन्यथा वक्ष्यमाणप्रभातकथनं विरुध्येत पवनसुतगिरा हनूमद्वचनेन सच्चरितोऽयमिति विदितं सुचरितं येन नृपतिः रामः गिरिगुरुहृदयः गिरिवत् गुरु अप्रकम्पं हृदयं यस्य सलिलसमुद्भवैः जलपूर्णघटे स्थितैः स्वपुरपतिकरैः लङ्काधिपतिं कुर्व्वन्तीति हेतौ टः अमदयत् हर्षितवान् मदीहर्ष इत्यस्य हेतुमण्यन्तस्य घटादित्वान्मित्त्वे हुखत्वं मुदितपरिजनं स्वामी लङ्काधिपत्येऽभिषिच्यत इति तस्य हृष्टा अनुजीविन इत्यर्थः ॥ ८७ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलाख्यायां प्रसन्नकाण्डे भाविकत्वप्रदर्शनं तृतीयः परिच्छेदः काव्यस्य विभीषणागमनो नाम द्वादशः सर्गः ।

अथेत्यादि । अनन्तरं उपगतं तं विभीषणं नृपति रामः सलिलसमुद्भवैरभिषेकजलसमूहैर्हेतुभिरमदयत् हर्षितवान् तं कीदृशं पवनसुतस्य हनूमतो गिरा वचनेन विदितं ज्ञातं शोभनचरितं यस्य मुदिता लङ्काधिपतित्वे स्वामी अभिषिक्त इति तुष्टाः परिजना अमात्याश्चत्वारो यस्य नृपतिः कीदृशः गिरिवद्गुरु निष्कम्पं हृदयं यस्य स तथा सलिलसमुद्भवैः कीदृशैः स्वपुरपतिकरैः लङ्काधिपत्यं कुर्व्वद्भिः मदीभिर्यज्ञि हर्षे ञिः प्रेरणे घटादित्वात् मुखः लञः स्वकुष्ट इति टः पूर्व्ववत् छन्दः ॥ ८७ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनविरचितायां सुबोधिन्यां भट्टिटीकायां विभीषणागमनो नाम द्वादशः सर्गः ।

चयोदशः सर्गः ।

चारुसमीरणरमणे हरिणकलङ्किरणावलीसविलासा ।
आवद्धरागमोहा वेलामूले विभावरी परिक्षीणा ॥ १ ॥

काव्यं संस्कृतप्राकृतापभ्रंशभेदात्त्रिविधं तत्र शब्दभवदेशीयपदयोः प्राकृतभाषयोरपभ्रंशस्य च संस्कृतभाषायां समावेशासम्भवात् शब्दसमायाः प्राकृतभाषायाः समावेशः तमार्यागीत्या स्वाभ्यकलक्षणया दर्शयन्नाह

विभीषणागमनात् प्राक् यद्वृत्तं रामस्य तदाह

चार्वित्यादि । रामो रात्रौ निद्रावान् पल्लवशयनमध्यशादित्युक्तं तस्य नियमपूर्वं सुप्तवतः प्रभातमभूदिति कथयति वेलामूले पारसमीपे प्राकृते पुंलिङ्गनपुंसकयोराकारान्तस्य 'यदस्य सप्तम्या एकवचने मित्वमेत्वं वा रूपं चारु समीरणरमणे रमयतीति रमणं नन्द्यादिभ्योल्युः समीरणेन रमणं चारु च तत्समीरणरमणं चेति तत्र विभावरी रात्रिः परिक्षीणा क्षीणा हरिणकलङ्कस्य याः किरणावल्यः ताभिः सविलासा सविभ्रमा अतश्चावद्धो रामस्य मोहो मूर्च्छा यया इति क्तादिकारादक्तिन इत्यनेन आवलिरावलीत्युभयमपि संस्कतप्राकृतयोः प्रयुज्यते ॥ १ ॥ ज० म०

अथ भाषासमावेशः । काव्यं संस्कृतप्राकृतापभ्रंशभेदात्त्रिविधं प्राकृतोऽपि संस्कृतभवः संस्कृतसमोदेशी चेत्यनेकविधः अत्र देशिसंस्कृतभवयोः प्राकृतयोरपभ्रंशस्य चासाधुशब्दत्वेनाधर्मजनकत्वात् उपक्रान्ते संस्कृतबन्धे समावेशासम्भवाच्च महाकविर्भर्तृहरिः असामर्थ्यं बोधयन् शब्दसमायाः प्राकृतभाषायाः संस्कृतबन्धे समावेशं दर्शयति अयञ्च भाषाश्लेष एव तथाच रुद्रटः वाक्ये यत्रैकस्मिन्नेकभाषानिबन्धनं क्रियते । अयमपरो मतिमद्भिर्भाषाश्लेषोऽत्र विज्ञेय इति प्राकृतशास्त्रे तालव्यशकारो मूर्द्धन्यषकारश्च नास्ति तत्र हि शब्दोऽस इति रूपं एवं दन्त्यो नकारो नास्ति णोऽण इति रूपं एवमन्त्यस्थयकारो नास्ति यस्य ज इति च रूपं एवमादिबहुतरमुन्नेयम् । सेतुबन्धार्थं कृतनियमेन रामेण पल्लशय्यायां रात्रिर्गमितेति ज्ञापयितुं प्रभातवर्णनामधिकरोति

बद्धो वासरसङ्गे भीमो रामेण लवणसलिलावासे ।
सहसा संरम्भरसो दूरारूढरविमण्डलसमो लोले ॥ २ ॥
गाढगुरुपुङ्खपीड़ा सधूमसलिलारिसम्भवमहावाणे ।
आरूढा सन्देहं रामे समहीधरा मही सफणिसभा ॥ ३ ॥

चार्च्चित्यादि । वेलामूले वेलायाः समुद्रजलस्य मूले तटे विभावरी रात्रिः परिहीणा विगता कीदृशे वेलामूले चारुणा मन्दशीतसुगन्धिना समीरणेन वायुना रमणे आनन्दने चारु मनोज्ञञ्च तत्समीरणरमणञ्चेति कर्म्मधारयो वा रमयतीति रमणं रमन्तेऽत्रेति वा क्रीडथौ विभावरी हरिणकलङ्कस्य चन्द्रस्य किरणावल्या रश्मिपङ्क्त्या सविलासा शोभमाना सविभ्रमा वा आबद्धो रामस्य मोहो यया प्राकृते आकारात्, परस्य सप्तम्येकवचनस्य ङेरिंनित्यादेशौ भवतस्तत्र ङेपक्षे संस्कृतसमत्वं स्तब्धकाच्छन्दः तल्लक्षणं यथा चौमत्ता अट्ठगणा पुव्वद्धे उत्तद्धे वि होन्ति समरूआ । सो खन्धआ विआणह पिङ्गल पभणेइ सुद्धिवअ्ड संभेआ इति ॥ १ ॥ भ०

बद्ध इत्यादि । नियमस्थितेऽपि मयि नासौ समुद्र उत्थित इति वासरसङ्गे प्रभातकाले रामेण लवणसलिलावासे समुद्र इति विषयसप्तमी सहसा तत्क्षणं संरम्भरसः क्रोधरसो वीराख्यः भीमो दुःप्रेक्ष्यः बद्धो जनितः दूरारूढरविमण्डलसमो लोल इति दूरमारूढो मध्याह्नस्थो यो रविः तस्य मण्डलं तेन समस्तुल्योऽतितीक्ष्णत्वात् लोले चञ्चले समुद्रे प्रभातवातेन क्षोभ्यमाणत्वात् ॥ २ ॥ ज० भ०

बद्ध इत्यादि । वासरस्य सङ्गः सम्बन्धो यत्र प्रभाते वासरस्य दिवसस्य सङ्गे सम्बन्धे सति वा रामेण लवणसलिलावासे लवणसमुद्रे संरम्भरसः क्रोधरसः सहसा तत्क्षणात् बद्धः कृतः कृतोपवासेऽपि मयि नायं प्रकटीभूत इति मत्वा संरम्भरसः क्रीदृशः भीमो भयदः दूरमारूढस्य मध्याह्नस्थितस्य रवेः सूर्य्यस्य मण्डलेन समोऽतितीक्ष्णत्वात् समुद्रे क्रीदृशे लोले चञ्चले रामभयेन प्रभातवातेन वा क्षोभ्यमाणत्वात् प्राकृतशास्त्रे लवणशब्दस्य मध्यव्यञ्जनस्य खरेण सहोत्वं पक्षे विहितं तेन लोणं लवणमिति द्वयमपि स्यात् गाथावत् स्कन्धकायामपि षष्ठो गणो मध्यगुरुश्चतुर्लघुर्वा अत्र पूर्व्वार्द्धे चतुर्लघुः षष्ठो गणः ॥ २ ॥ भ०

गाढेत्यादि । गाढं सुष्ठु गुरोः पुङ्खस्य या पीडा पीडनं अङ्गुष्ठाभ्यां तया हेतुभूतया सधूमसलिलारेः अग्नेः सम्भवो यत्र स महावाणो यस्य रामस्य

घोरजलदन्तिसङ्कुलमट्ठमहापङ्ककाहलजलावासम् ।
आरीणं लवणजलं समिद्धफलवाणविद्धघोरफणिवरम् ॥४॥

तस्मिन् सति महासन्देहमारूढा संशयं प्राप्ता समहीधरा मही सफणिसभा सह भुजङ्गसमूहेन धारयन्तीति धराः अत्र धकारस्य पदमुखे वर्त्तमानस्य हकारो न भवति प्राकृते पदमध्यान्तयोर्विधीयमानत्वात् महीधर इति समस्तपदेऽपि न प्रवर्त्तते अत्र पूर्व्वपदमुत्तरं पदमिति व्यपदेशात् एवञ्च सति गोधरवज्रधर-चक्रधरशङ्खधरादिषु न प्रवर्त्तते महीधरो महिधर इत्युभयमपि प्राकृते प्रयुज्यते असहानां विकल्पेन हस्वदर्शनात् ॥ २ ॥ ज० म०

गाढेत्यादि । गाढा दृढा गुरुपुङ्खस्य या पीडा अङ्गुष्ठतर्ज्जनीभ्यामाकर्षणं तया सधूमस्य सलिलारेरग्नेः सम्भवो यत्र तादृशो महान् वाणो यस्य तादृशे रामे सति मही पृथिवी सन्देहं विनाशसंशयं आरूढा प्राप्ता कीदृशी समहीधरा पर्व्वतैः सह वर्त्तमाना फणिसभया सर्पसमूहेन सहिता प्राकृते महीधरपदे हस्वो न भवति तत्र बहुलाधिकारात् खधथभामिति धकारस्य हकारो न भवति तत्र प्रायोऽधिकारात् पीडेति डोल इति लत्वं न भवति प्रायोग्रहणात् पीलेति पाठोवा संस्कृतेपि मनीषादित्वादैक्यस्मरणात् ॥ ३ ॥ भ०

घोरेत्यादि । रामेणाग्नेये शरे क्षिप्ते सति लवणजलमारीणं समन्तात् शुष्कं रीङ्स्रवण इत्यस्मात् निष्ठातकारस्य खादय ओदित इति नत्वं अट्कुप्विति णत्वं रीणमित्यप्रयोगः प्राकृते महाराष्ट्रे तस्माप्रयोगात् घोरैः रौद्रैर्जलदन्तिभिः सङ्कुलं व्याप्तं अट्टः शुष्को यो महापङ्कः तेन काहला विह्वला जलावासा मत्स्यादयो यत्र अट्ट अतिक्रमर्हिंसनयोरित्यस्य रूपं समिद्धफलेन दीप्तफलेन वाणेन विद्धाः घोराः फणिवरा महासर्पा यत्रेति ॥ ४ ॥ ज० म०

घोरेत्यादि । रामेणाग्नेयास्त्रे क्षिप्ते सति लवणजलं आरीणं समन्तात् शुष्कं ओरीङ्यत्तरणे सुल्लाद्योरिति क्त्रस्य नत्वं कीदृशं जलं घोरैर्भीमैर्जलहस्तिभिः सङ्कुलं व्याप्तं अट्टः शुष्कोऽत्यर्थो वा यो महापङ्कस्तेन काहलाः शुष्का जलावासा मत्स्यादयो यत्र अट्टऽतिक्रमे बधे इत्यस्येदं रूपं अट्टं भग्ने च शुष्के च त्रौमेऽत्यर्थे गृहान्तरे । काहली तु तरुण्यां स्यात् काहलं भग्नशुष्कयोरिति च विश्वः काहलं विह्वलेऽपि स्यादित्यन्ये प्राकृतपद्ये कातरशब्दस्य काहलमिति भवति कातरवितस्तिमातलङ्केष्वित्यनेन तकारस्य हादेशात् हरितादित्वेन रेफस्य लत्वाच्च दीप्तफलेन वाणेन विद्धा घोराः फणिवराः सर्पश्रेष्ठा यत्र ॥ ४ ॥ भ०

सभयं परिहरमाणो महाहिसञ्चारभासुरं सलिलगणम् ।
आरूढो लवणजलो जलतीरं हरिबलागमविलोलगुहम् ॥५॥
चञ्चलतरुहरिणगणं बद्धकुसुमाबन्धबद्धरामावासम् ।
हरिपल्लवतरुजालं तुङ्गोरुसमिद्धतरुवरहिमच्छायम् ॥ ६ ॥
वरवारणं सलिलभरेण गिरिमहीमण्डलसम्वरवारणम् ।

सभयमित्यादि । सलिलगणं सलिलसमूहं सभयं महाहीनां सञ्चारेण भासुरं भासनशीलं तच्छिरोमणिद्योतितत्वात् परिहरमाणः परित्यजन् कर्त्रभिप्राये तङ् लवणजलः समुद्रः लवणं जलमस्येति जलतीरं तटं यत्र रामस्तिष्ठति तदारूढः संप्राप्तो मूर्त्तिमान् हरिबलागमेन वानरसैन्यागमेन विलोला व्याकुला गुहा यत्रेति ॥ ५ ॥ ज० म०

सभयमित्यादि । लवणं जलमस्य स लवणजलः समुद्रः जलतीरं आरूढः संप्राप्तो मूर्त्तिमान् भूत्वा किं कुर्वन् सभयं यथा स्यात्तथा सलिलगणं जलराशिं परिहरमाणः परित्यजन् सभयमित्यत्र प्राकृते प्रायोग्रहणात् यलोपाभावः कगचजेति यलोपे अवर्णेयश्रुतिरिति यकारश्रवणमित्यन्ये कीदृशं सलिलगणं महाहीनां महासर्पाणां सञ्चारेण भासुरं तत् शिरोमणिभिर्दीप्तं कीदृशं जलतीरं हरिबलागमेन वानरसैन्यागमनेन विलोला व्याकुला गुहा यत्र विलोचनतरुमिति क्वचित्पाठः ॥ ५ ॥ भ०

चञ्चेत्यादि । चञ्चलश्चपलः तरुहरिणानां वानराणां गणो यत्र जलतीरे बद्धकुसुमानां वृक्षाणामाबन्धेन परस्परसंश्लेषेण बद्धो घटितो रामावासो यत्र हरिपल्लवानि तरुजालानि यत्र तुङ्गा उरवः परिमण्डलाः समिद्धा उज्ज्वला ये तरुवरास्तैर्हिमा शीतला छाया यत्र तज्जलतीरम् ॥ ६ ॥ ज० म०

चञ्चलेत्यादि । कीदृशं जलतीरमारूढः चञ्चलस्तरुहरिणानां वानराणां गणो यत्र बद्धानि कुसुमानि येषां तेषां वृक्षाणां आबन्धेन परस्परसंश्लेषेण बद्धो घटितो रामस्यावासो वासस्थानं यत्र हरयः पिङ्गलाः पल्लवा यस्य तादृशं तरुजालं वृक्षसमूहो यत्र तुङ्गा उच्चा उरवोऽत्यर्थविस्तीर्णमण्डलाः समिद्धा उज्ज्वला ये तरवस्तैः शीतला छाया यत्र ॥ ६ ॥ भ०

वरेत्यादि । वरा उत्कृष्टा वारणा यत्र सलिलभरेण सलिलसमूहेन यो गिरीणां महीमण्डलस्य च सम्वरः सम्वरणमावरणं अहेत्यादिनाण् तस्य वारणं निषेधकं समुद्रस्य वेलातिक्रमात् वसु द्रव्यं तस्य धारयं धारकं अनुपसर्गादिति

वसुधारयं तुङ्गतरङ्गसङ्गपरिहीणलोलवसुधारयम् ॥७॥ कुलकम्

एतानि सप्त सङ्कीर्णानि ।

प्रणिपत्य ततो वचनं जगाद हितमायतौ पतिर्वारीणाम् ।
गङ्गावलम्बिबाहुं रामं बहलोरुहरितमालच्छायम् ॥ ८ ॥

पूर्व्वार्द्धं निरवद्यम् ।

निजन्ताच्छः तुङ्गाः अभ्रंलिहा ये तरङ्गास्तैः सह यः सङ्गः संश्लेषः तस्मात् परिहीणो नष्टो लोलो वसुधायां तत्सम्बन्धिन्यां रयो वेगो यत्र तज्जलतीरमारूढः गणितक्रममेतत् । एतानि सप्त सङ्कीर्णानि संस्कृतप्राकृतयोरविशिष्टत्वात् ॥ ७ ॥ ज० म०

वरवारणमित्यादि । पुनः कीदृशं वरा उत्कृष्टा वारणा हस्तिनो यत्र सलिलभरेण जलातिशयेन गिरीणां महीमण्डस्य च सम्वरः सम्वरणं तस्य वारणं निषेधकं समुद्रेण वेलाया अतिक्रमात् वसुधारयं द्रव्यस्य धारकं साहिसातीति धारे यः तुङ्गानां उच्चानां तरङ्गानां यः सङ्गः संश्लेषः तेन परिहीणो भ्रष्टो लोलो वसुधायां तत्सम्बन्धिन्यां रयो वेगो यत्र तरङ्गेन जलवेगनिरासात् । एतानि सप्त सङ्कीर्णानि संस्कृतप्राकृतयोरविशिष्टस्वरूपत्वात् ॥ ७ ॥ भ०

प्रणिपत्येत्यादि । ततस्तीरप्राप्तेरनन्तरं वारीणां पतिः समुद्रः रामं प्रणिपत्य वचनं जगाद हितमात्मनो रामस्य पथ्यमायतावागामिनि काले गङ्गावलम्बी गङ्गावलम्बनशीलः संपूर्णत्वाद्बाहुर्यस्य स गङ्गावलम्बिबाहुः संस्कृते द्वयोपे पूर्व्वस्य दीर्घो नः प्राकृते तु पुंलिङ्गे उकारस्य दीर्घत्वं विभक्तिसकारस्य च लोपः उरुर्महान् हरिः हरितो यस्तमालः बहला घना तस्येव छाया यस्य तमिति पूर्व्वार्द्धं निरवद्यमिति पूर्व्वस्मिन्नर्द्धे प्राकृतस्याभावात् निरवद्यं पश्चादर्द्धं तु संकीर्णमेव ॥ ८ ॥ ज० म०

प्रणिपत्येत्यादि । ततस्तीरप्राप्यनन्तरं वारीणां पतिः समुद्रः रामं प्रणिपत्य प्रणम्य वचनं जगाद कीदृशं वचनं आयतावुत्तरकाले हितं आत्मनो रामस्य च पथ्यं कीदृशः समुद्रः गङ्गावलम्बनशीलो बाहू यस्य संस्कृते रिचोऽवे रत्यनेन ऋतरेफस्य द्वोद्वीति लोपः पूर्व्वस्य दीर्घत्वं प्राकृते तु पुंलिङ्गे उकारस्य दीर्घत्वं विलोपश्च रामं कीदृशं बहला निविडा उर्व्वीमहतोहरितमालयोरिव शुकपत्रविशेषयोरिव छाया कान्तिर्यस्य शुकाहिकपिभेकेषु हरिर्न कपिले तन्त्रिलयमरः प्राकृते हरिश्चन्द्रस्य तलोपोऽन्त्येभ्यञ्जनस्येत्यनेन पूर्व्वार्द्धं निरवद्यमिति वचन-

तुङ्गा गिरिवरदेहा अगमं सलिलं समीरणो रसहारी ।
अहिमो रविकिरणगणो माया संसारकारणं ते परमा ॥ ९ ॥
आयाससम्भवारुण संहर संहारहिमहरसमच्छायम् ।
वाणं वारिसमूहं सङ्गच्छ पुराणचारुदेहावासम् ॥ १० ॥
असुलभहरिसञ्चारं जलमूलं वहलपङ्करुद्धायामम् ।

शब्दस्य दन्त्यान्तत्वात् प्राकृतस्य पूर्व्वार्द्धेन सम्भवः तेन केवलसंस्कृतत्वान्निरवद्यं उत्तरार्द्धन्तु सङ्कीर्णमेव ॥ ८ ॥ भ०

तुङ्गा इत्यादि । गिरिवरदेहाः कुलपर्व्वतकायाः तुङ्गाः प्रांशवः अगमं सलिलं अगम्यं यहेत्यादिनाप् समीरणो रसहारी अपासुच्छोषकः अहिम उष्णः रवेः किरणगणः एतत्सर्व्वं तव माया परमा महती संसारस्य कारणं सर्व्वथा त्वं विष्णुः त्वत्कृतेषु को रोष इति ॥ ९ ॥ ज० म०

तुङ्गा इत्यादि । गिरिश्रेष्ठानां देहास्तुङ्गा उच्चाः सलिलं समुद्रादि अगम्यं समीरणो वातो रसहारी जलशोषकः रवेः किरणगणोऽहिम उष्णः इत्यादिकं यत् सर्व्वं संसारस्य कारणं हेतुः तत्ते तव परमा माया महाकपटं एतेन त्वं विष्णुः स्वयं सृष्टे मयि रोषोऽनुचित इति सूचितम् ॥ ९ ॥ भ०

आयासेत्यादि । यस्मात्संसारकारणं यदगम्यं सलिलं कृतं तस्मात्त्वं हे आयाससम्भवारुण रोषसम्भवेन रक्तीभूत संहारे प्रलये हिमहरा आदित्यास्तैः समा छाया यस्य वाणस्य तं संहर उपशमय वारिसमूहं सङ्गच्छ अङ्गीकुरु सकर्म्मकत्वात्समोगमित्यात्मनेपदं न भवति पुराणः शाश्वतः दर्शनीयो यो देहः तस्य वासमवस्थानम् ॥ १० ॥ ज० म०

आयासेत्यादि । हे आयाससम्भवारुण आयाससम्भवेन दुःखजनितेन क्रोधेनारुण रक्ताङ्ग त्वं वाणं संहर उपशमय कीदृशं वाणं संहारे प्रलये हिमहराः सूर्य्या वह्नयो वा तैः समा छाया कान्तिर्य्यस्य तं त्वं वारिसमूहं सङ्गच्छ अङ्गीकुरु रक्षेति भावः समोगमच्छेति न मं सकर्म्मकत्वात् यतः पुराणस्य पूर्व्वकालीनस्य चारोर्मनोज्ञस्य स्वदेहस्यावासं स्थानं आवासमित्यत्र प्राकृते मोविन्दुरित्यनुस्वार एव भवति संस्कृते तु यद्यपि मकारस्थितिरेव स्यात् तथा श्रुतेरभेदाद्भाषासमावेश इति वृद्धा इति विद्यासागरः वा विरामे इत्यन्ये ॥ १० ॥ भ०

असुलभेत्यादि । अन्यच्च यदेतज्जलमूलं जलस्यावस्थानं आग्नेयशरशोषितत्वाज्जलपरिहीणं सत् तत् किं सुखेन गम्यत इति भण ब्रूहि यतो

भण किं जलपरिहीणं सुगमं तिमिकम्बुवारिवारणभीमम् ॥ ११ ॥
गन्तुं लङ्कातीरं बद्धमहासलिलसञ्चरेण सहेलम् ।
तरुहरिणा गिरिजालं वहन्तु गिरिभारसंसहा गुरुदेहम् ॥ १२ ॥
हरहासरुद्धविगमं परकरणगणं महाहवसमारम्भे ।
छिन्दन्तु रामबाणा गम्भीरे मे जले महागिरिबद्धे ॥ १३ ॥

बहलः सान्द्रो यः पङ्कस्तेन रुद्ध आयामो दैर्घ्यं यत्र तिमयो मत्स्याः कम्बवः शंखाः वारिवारणाः जलहस्तिनः तैर्भीमं एवं च सति असुलभो दुर्लभः हरिसञ्चारो वानरपर्य्यटनं यत्रेति ॥ ११ ॥ ज० म०.

असुलभेत्यादि । एतज्जलमूलं आग्नेयास्त्रेण जलपरिहीणमपि किं सुगमं सुखेन गम्यते इति भण ब्रूहि अपि तु नैव यतो बहलः सान्द्रो यः पङ्कस्तेन रुद्ध आयामो दैर्घ्यं यस्य कापि पङ्काभावो नास्ति तिमिभिर्मत्स्यैः कम्बुभिः शङ्खैः वारिवारणैर्जलहस्तिभिर्भीमं एवं सति असुलभो दुर्लभो हरिसञ्चारो वानरपर्य्यटनं यत्र तिमिर्मीन इति हलायुधः अस्ति मत्स्यस्तिमिर्नाम दशयोजनविस्तृत इत्यन्ये असुलभेत्यत्र हकारादेशो न भवति प्राकृते प्रायो बहुलानुदृत्तेः ॥ ११ ॥ भ०

गमनोपायमाह

गन्तुमित्यादि । सञ्चरत्यनेनेति सञ्चरः गोचरसञ्चरेति टच् बद्धो घटितो महासलिले यः सञ्चरः तेन सेतुना सहेलं एकप्रहृत्या लङ्कातीरं लङ्कोपलक्षितं तटं गन्तुं तरुहरिणा वानरा गिरिभारस्य संसहाः क्षमाः संसहन्ते इत्यच् गिरिजालं गिरिसमूहं वहन्तु प्रापयन्तु गुरुदेहः शरीरं यस्य गिरिजालस्य ॥ १२ ॥ ज० म०

गन्तुमित्यादि । बद्धो घटितो यो महासलिले सञ्चरः सेतुस्तेन सहेलं सकौतुकं यथा स्यात् तथा लङ्कासम्बन्धितीरं गन्तुं गुरुदेहं महाकायं गिरिजालं पर्व्वतसमूहं वहन्तु कीदृशाः गिरिभारसंसहाः पर्व्वतवहनक्षमाः सञ्चरत्यनेन लोक इति सञ्चरः करणेऽण् ॥ १२ ॥ भ०

हरेत्यादि । मम जले गम्भीरे अगाधे महागिरिभिर्बद्धे सति यो महाहवस्य समारम्भः प्रवर्त्तनं तस्मिन् परस्य शत्रोः करटगणं गजासमूहं हरस्य तदत्यादि यो हासः तेन रुद्धो विगमश्छेदो यस्य तं रामशराश्छिन्दन्तु आशिषि लोट् ॥ १३ ॥ ज० म०

गच्छन्तु चारुहासा वीररसावन्धरुद्धभयसम्बन्धम् ।
हन्तुं बद्धबाहुबलं हरिकरिणो गिरिवरोरुदेहं सहसा ॥१४॥

एतानि षट् सङ्कीर्णानि ।

जिगमिषया संयुक्ता बभूव कपिवाहिनी मते दाशरथेः ।
बुद्धजलालयचित्ता गिरिहरणारम्भसम्भवसमालोला ॥ १५ ॥

पूर्वार्द्धं निरवद्यम् ।

हरेत्यादि । मम गम्भीरेऽगाधे जले महागिरिभिर्बद्धे सति महायुद्धस्य समारम्भे प्रवृत्ते परस्य दशाननस्य कण्ठसमूहं रामस्य बाणाश्छिन्दन्तु आशिषि गौ क्रीडगं हरस्य हासेन रुद्धो निवारितो विगमोऽपायो यस्य रावणो महादेवस्य प्रीतये स्वशिरांसि क्षिप्तवान् ततस्तुष्टस्य महादेवस्य हासो जात इति प्रसिद्धिः ॥ १३ ॥ भ०

गच्छन्त्वित्यादि । बहवो बाहव एव वनं यस्य बाहूनां तरूणामिव बहुत्वात् तं रावणं वीररसस्य शौर्यस्य य आवन्धः सन्ततप्रवर्त्तनं तेन रुद्धो निवारितो भयसम्बन्धस्त्रासस्तस्मर्को यस्य तं गिरिवरोरुदेहं गिरिवन्महाकायं सहसा हन्तुं तत्क्षणं हनिष्याम इति हरिकरिणः कपिहस्तिनः चारुहासाः मम जले बद्धे सति गच्छन्तु ॥ १४ ॥ ज० भ०

एतानि षट् संकीर्णानि ।

गच्छन्त्वित्यादि । हरिकरिणो वानरश्रेष्ठा आयासाभावात् सकौतुकाः सन्तः बद्धबाहो रावणस्य बलं सैन्यं हन्तुं सहसा विरोधेन गच्छन्तु कीदृशं बलं वीररसस्य शौर्यस्य य आवन्धः सततप्रवर्त्तनं तेन रुद्धो निवारितो भयसम्बन्धस्त्रासस्तस्मर्को यस्य गिरिवरस्येव उरुर्महान् देहो यस्य ॥ १४ ॥ भ०

एतानि सङ्कीर्णानि संस्कृतप्राकृतयोस्तुल्यत्वात् ।

जिगमिषयेत्यादि । दाशरथेर्मतेऽभिप्राये सति कपिवाहिनी कपिसेना जिगमिषया गन्तुमिच्छया संयुक्ता बभूव बुद्धजलालयचित्ता विदितसमुद्राभिप्राया गिरीणां यदाहरणमानयनं तस्य य आरम्भसम्भवः तेन समा लोला आकुला इत्येतदर्द्धं निरवद्यम् ॥ १५ ॥ ज० भ०

जिगमिषयेत्यादि । दाशरथे रामस्य मते इच्छायां सत्यां कपिसेना जिगमिषया गन्तुमिच्छया संयुक्ता बभूव कीदृशी बुद्धं अवगतं जलालयस्य समुद्रस्य चित्तं यया गिरीणां यत् हरणमानयनं तस्य य आरम्भसम्भवोऽनुष्ठानं तेन समा

गुरुगिरिवरहरणसहं संहारहिमारिपिङ्गलं रामबलम् ।
आरूढं सहसा खं वरुणालयविमलसलिलगणगम्भीरम् ॥१६॥
अवगाढं गिरिजालं तुङ्गमहाभित्तिरुद्धसुरसञ्चारम् ।
अभयहरिहासभीमं करिपरिमलचारुबहलं कन्दरसलिलम्॥१७
अलिगणविलोलकुसुमं सकमलजलमत्तकुरररवरण्डवगणम् ।
फणिसङ्कुलभीमगुहं करिदन्तसमूढसरसवसुधाखण्डम् ॥१८॥

रामाज्ञानन्तरमेव चलितेति भावः लोला चञ्चला । पूर्व्वार्द्धं निरवद्यं संस्कृतमात्रत्वात् जिगमिषयेत्यादौ मूर्द्धन्यषादिश्रवणात् ॥ १५ ॥ भ०

गुर्व्वित्यादि । ततो रामबलं सहसा तत्क्षणं खमारूढं गुरूणां गिरिवराणां यदाहरणमानयनं तत्सहत इति मूलविभुजादित्वात् कः तस्य वा सहं शक्तं सहत इत्यच् संहारे प्रलये यो हिमारिरग्निः तद्वत्पिङ्गलं वरुणालयस्य समुद्रस्य यो विमलसलिलगणः निर्मलजलसमूहः तद्वद्गम्भीरं खमिति॥१६॥ज०भ०

गुरुगिरीत्यादि । ततो रामबलं कर्त्तृ सहसा तत्क्षणं खमाकाशं आरूढं आरुरोह रुहः कर्त्तरि क्तः कीदृशं बलं गुरूणां गिरिवराणां यत् हरणमानयनं तत्सहं सहते इति पचादित्वादच् संहारे प्रलयकाले यो हिमारिरग्निस्तद्वत् कपिलं तेजस्वित्वमपि तादृशं सूचितं खं कीदृशं वरुणालयस्य समुद्रस्य यो विमलः सलिलगणस्तद्वद्गम्भीरं दुरवगाहम् ॥ १६ ॥ भ०

अवेत्यादि । खमारुह्य रामबलेन गिरिजालमवगाढं अवष्टब्धं तुङ्गाभिरुच्छ्रिताभिर्महतीभिः परिणाहवतीभिर्भित्तिभीरुद्धः सुराणां सञ्चारो यस्मिन् तेषामुन्नतत्वात् अभया ये हरयः सिंहास्तेषां रासेन शब्देन भीमं भयानकं करिणां यः परिमलः संमर्दस्तेन चारु शोभनं बहलं घनं कन्दरसलिलं यस्मिन् ॥ १७ ॥ ज० भ०

अवगाढमित्यादि । खमारुह्य रामबलेन गिरिवृन्दमवगाढं अवष्टब्धं तुङ्गाभिरुच्चाभिर्महतीभिः परिणाहवतीभिर्भित्तिभीरुद्धो निराकृतः सुरस्य सञ्चारो येन यत्र वा अभयानां हरीणां सिंहानां रासेन शब्देन भयानकं करिपरिमलेन हस्तिसंमर्दजनितमदगन्धेन चारु शोभनं बहलं प्रचुरं कन्दरसलिलं यत्र ॥ १७ ॥ भ०

अलिगणेत्यादि । अलिगणैर्विलोलानि कुसुमानि यत्र सकमलेषु जलेषु मत्ताः कुररराणां कारण्डवानाञ्च गणा यत्र फणिभिः सङ्कुला व्याप्ताः सत्यो

अरविन्दरेणुपिञ्जरसारसरवहारिविमलबद्धचारुजलम् ।
रविमणिसम्भवहिमहरसमागमाबद्धबद्धलसुरतरुधूपम् ॥१९॥
हरिरवविलोलवारणगम्भीराबद्धसरसपुरुसंरावम् ।
घोणासङ्गमपङ्काविलसुबलभरसहोरुवराहम् ॥ २० ॥

एतानि पञ्च कङ्कीर्णानि ।

भीमा गुहा यत्र करिदन्तैः समुत्खिन्नं सरसं सान्द्रं वसुधायाः खण्डं यत्र ॥ १८ ॥ ज० म०

अलिगणेत्यादि । कीदृशं गिरिजालं अलिगणैर्भ्रमरसमूहैर्विलोलानि कुसुमानि यत्र सकमलेषु जलेषु मत्ताः कुरराणां कारण्डवानाञ्च पक्षिविशेषाणां गणाः समूहा यत्र फणिभिः सर्पैः संकुला व्याप्ता अतएव भीमा गुहा यत्र करिदन्तैः समूढसमुत्खिन्नं सरसमार्द्रं वसुधायाः खण्डं यत्र ॥१८॥ भ०

अरविन्देत्यादि । अरविन्दरेणुभिः पिञ्जराः पिङ्गला ये सारसास्तेषां रवेण हारि मनोहारि विमलं बद्ध चारु जलं यत्रेति रविमणिसम्भवः सूर्यकान्तमणिसम्भवः यो हिमहरः अग्निः तेन यः समागमः संश्लेषस्तेनाबद्धो जनितो बद्धलः सुरतरुधूपो यत्र ॥ १९ ॥ ज० म०

अरविन्देत्यादि । पुनः कीदृशं गिरिजालं अरविन्दानां रेणुभिः पिञ्जराः पिङ्गला ये सारसाः पक्षिभेदास्तेषां रवेण मनोहारि निर्मलं बद्ध चारु जलं यत्र रविमणिसमुत्पन्नेन हिमहरेणाग्निना यः समागमस्तेनाबद्धो जनितो विपुलः सुरतरुधूपो देवदारुधूपो यत्र तादृशं पोव इति प्राकृतसूत्रे बद्धलाधिकारान्न वकारादेशः ॥ १९ ॥ भ०

हरिरवेत्यादि । हरीणां सिंहानां यो रवस्तेन विलोलास्तरलवो ये वारणास्तैर्गम्भीरो मन्द्र आबद्धो जनितः सरसो भयानकरसयुक्तः पुरुर्महान् संरावो यत्र धोणासम्पर्कात् सम्भवो यस्य पङ्कस्य घोणासमुद्भूतो यः पङ्क इत्यर्थः तेनाविलाः लिप्ताङ्गाः सुबला तत एव भरसहाः उरवश्च वराहा यत्र तद्गिरिजालमवगाढमिति ॥ २० ॥ ज० म०

एतानि पञ्च कङ्कीर्णानि ।

हरिरवेत्यादि । पुनः कीदृशं गिरिजालं हरीणां सिंहानां रवेण शब्देन विलोलाश्चञ्चला ये वारणा हस्तिनस्तैर्गम्भीरमाबद्धो जनितः सरसो भयानकरसान्वितः पुरुर्महान् संरावः शब्दो यत्र घोणाया नासिकायाः सम्पर्कात्

ATIC SOCIETY

उज्झखुः परिरब्धान् कपिसंघा वाङ्भिस्ततो भूमिभृतः।
निस्थिष्टशेषमूर्द्धः शृङ्गविकीर्णोष्णरश्मिनक्षत्रगणान्॥ २१॥

सर्वं निरवद्यम्।

तुङ्गमहागिरिसुभरा वाङ्समारुह्वभिदुरटङ्का बङ्धा।
लवणजलबन्धकामा आरूढा अम्बरं महापरिणाहम्॥ २२॥

सम्भवो यस्य तेन पङ्केनाविला लिप्ताङ्गाः सुबला अतएव भरसहा उरवो महान्तो वराहा यत्र॥ २०॥ भ०

एतानि सङ्कीर्णानि प्राकृततुल्यत्वात्।

उज्झखुरित्यादि। ततोऽवगाहादनन्तरं वाङ्भिः परिरब्धान् समाश्लिष्टान् भूमिभृतः पर्व्वतान् कपिसंघा उज्झखुः उत्खातवन्तः गमहनेत्युपधालोपः निस्थिष्टशेषमूर्द्धः व्याप्तपातालमूलत्वात् चूर्णितनागराजमस्तकान् शृङ्गैः शिखरैर्विकीर्णा उष्णरश्मिरादित्यो नक्षत्रगणश्च यैर्दिवं व्याप्य स्थितत्वात् सर्व्वं निरवद्यमिति अत्र प्राकृतस्थाप्रयुक्तत्वात्॥ २१॥ ज० म०

उज्झखुरित्यादि। ततोऽवगाहानन्तरं कपिसंघाः कपिसमूहा वाङ्भिः परिरब्धान् समाश्लिष्टान् भूमिभृतः पर्व्वतान् उज्झखुः उत्खातवन्तः कीदृशान् निस्थिष्टाचूर्णिताः शेषस्यानन्तस्य मूर्द्धानो मस्तका यैः पातालमूलत्वात् शृङ्गैः शिखरैर्विकीर्णो विच्छिन्न उष्णरश्मिः सूर्यो नक्षत्रगणश्च यैर्दिवं व्याप्य स्थितत्वात्॥ २१॥ भ०

तुङ्गेत्यादि। तुङ्गा उच्चा महान्तः परिणाहवन्तो ये गिरयस्तैः सुभरा जातभरणाः कपयः वाङ्भिः समारुह्वाभिदुराः विदारणशीलाः टङ्का उन्नतप्रदेशा यैस्ते बङ्धा अनेकप्रकारं लवणजलबन्धकामाः एवमेवं बङ्धव्यमिति जातेच्छाः आरूढाः अम्बरं महापरिणाहं अप्रमेयदिग्विभागम्॥ २२॥ ज०म०

तुङ्गेत्यादि। लवणजलस्य समुद्रस्य बन्धनं कामयन्तोऽभिलषन्तो वानरा अम्बरमाकाशमारूढा बङ्धा अनेकप्रकारेण कीदृशाः तुङ्गैरुच्चैर्महद्भिः सपरिणाहैर्गिरिभिः सुभरा बङ्धभारान्विताः वाङ्भिः समारुह्वा गृहीताभिदुरास्तेषां वाङ्सम्बन्धात् स्वयमेव वा भिद्यमानाष्टङ्का उन्नतप्रदेशायैः किङ्किदिद इति कुरः कर्म्मकर्त्तर्येव कुर इति केचित् भिदुरो विदारणशील इत्यन्ये कीदृशमम्बरं महापरिणाहं अप्रमेयदिग्विभागं कामा आरूढा इति प्राकृते पदयोः सन्धिर्वेति प्रश्ने सन्ध्यभावः॥ २२॥ भ०

बद्धधवलवारिवाहं विमलायसगुरुमहासिदेहच्छायम् ।
बद्धविहङ्गममालं हिमगिरिमिव मत्तकुररवसम्बद्धम् ॥२३॥
चारुकलहंससङ्कुलमचण्डसञ्चारसारसाबद्धरवम् ।
सकुसुमकणगन्धवहं समयागमवारिसङ्गविमलायामम् ॥२४॥
सहसा ते तरुहरिणा गिरिसुभरा लवणसलिलबन्धारम्भे ।

बद्धेत्यादि । बहवो धवला वारिवाहा यत्राम्बरे विमलायसः अयसो विकारः गुरुरलघुर्महान् योऽसिः खड्गः तस्य यो देहः तस्य छायेव छाया यस्य बद्धा विरचिता विहङ्गानां माला पङ्क्तिर्यत्र मत्तानां कुरराणां रवेण सम्बद्धं युक्तं अतो हिमगिरिमिवाम्बरमारूढा इति ॥ २३ ॥ ज० म०

बद्धधवलेत्यादि । पुनः कीदृशमम्बरं बहवो धवला वारिवाहा मेघा यत्र विमल आयसो लोहविकारो गुरुर्महान् योऽसिः खड्गः तच्छरीरस्येव छाया शोभा यस्य बद्धा विरचिता सम्बद्धा वा विहङ्गमानां पक्षिणां माला पङ्क्तिर्यत्र मत्तानां कुरराणां रवेण सम्बद्धं संयुक्तं हिमगिरिमिव हिमालयमिव ॥२३॥ भ०

चारुकलेत्यादि । चारुभिः कलहंसैः सङ्कुलं व्याप्तं अचण्डसञ्चारैः अल्पैः सञ्चरद्भिः सारसैराबद्धो रवो यस्मिन् सकुसुमकणः सपुष्परेणुर्गन्धवहो वायुर्यत्रेति वहतीति वहः कर्त्तर्यच् गन्धस्य वह इति सः समयस्य प्रावृट्कालस्य य आगमः तेन यो वारिसङ्गः तेन प्रक्षालितत्वात् विमला आयामा यत्र तदम्बरमारूढा इति ॥ २४ ॥ ज० म०

चारुकलेत्यादि । पुनः कीदृशमम्बरं चारुभिः कलहंसैः राजहंसैः कादम्बैर्वा सङ्कुलं व्याप्तं कलहंसस्तु कादम्बे राजहंसे नृपोत्तम इति विश्वः अचण्डसञ्चारैः अल्पैः अल्पैः सञ्चरद्भिः सारसैराबद्धो रचितो रवो यत्र सकुसुमकणः पुष्पावयवसहितो गन्धवहो वायुर्यत्र समयस्य वर्षाकालस्य आगमनेन यो वारिसङ्गस्तेन प्रक्षालितत्वात् विमल आयामो दैर्घ्यं यस्य सम्प्रति मेघशून्यत्वात् ॥ २४ ॥ भ०

सहसेत्यादि । ते तरुहरिणाः शाखामृगाः गिरिभिः सुभराः सन्नः लवणसलिलबन्धारम्भे समुद्रबन्धनारम्भे सहसा तत्क्षणं तीरगिरिं तटस्थितं पर्वतमारूढाः अत्र संस्कृतपक्षे संहिताया अविवक्षितत्वात् तीरगिरिमारूढा इति नोक्तं अन्ये आरूढास्तीरगिरिमिति विपर्ययमस्य पठन्ति तदयुक्तं संस्कृतपक्षे असम्भवात्तत्वं नास्ति अतो विसर्जनीयस्य सकार एव स्यात् रामस्य य आगम-

तीरगिरिमारूढा रामागमरुद्धसभयपरसञ्चारम् ॥ २५ ॥

एतानि चत्वारि सङ्कीर्णानि ।

ततः प्रणीताः कपियूथमुख्यैर्न्यस्ताः क्षणानोस्तनयेन सम्यक् ।
अकम्प्रब्रध्नाग्रनितम्बभागा महार्णवं भूमिभृतोऽवगाढाः ॥ २६ ॥

निराख्यातनिरवद्यम् ।

स्तेन रुद्धः सभयानां रिपूणां शत्रूणां सञ्चारो यत्र तीरगिरौ राम आगत इति तत्र भयात् सञ्चारं त्यक्तवन्त इति ॥ २५ ॥ ज० म०

एतानि चत्वारि सङ्कीर्णानि ।

सहसेत्यादि । ते तरुहरिणा वानरा गिरिभिः सुभरा महाभारान्विताः सन्तो लवणसलिलस्य समुद्रस्य बन्धनारम्भे सहसा तत्क्षणं तीरे स्थितं गिरिमारूढाः कीदृशं गिरिं रामस्यागमनेन रुद्धो निरस्तः सभयानां परेषां शत्रूणां सञ्चारो यत्र तीरगिरौ राम आयात इति भयात्तत्र शत्रवो न सञ्चरन्तीत्यर्थः तीरे गिरिमारूढा इति पाठो बहुप्राचीनपुस्तके दृश्यते आरूढास्तीरगिरिमिति पाठे प्राकृते विसर्गलोपात् सङ्कीर्णत्वं न स्यात् लुप्तविसर्गपाठे संस्कृतत्वभङ्ग इति मन्यमानाः प्राञ्च स्तीरे गिरि आरूढा इति तीरपदमसमस्तं गिरिपदेन च समासं कृत्वा विसन्धिं पठन्ति यद्यपि वेकस्वरवर्णेऽसे इति समासे नित्य एव सन्धिस्तथापि ओवातोऽौरिति डित्करणेन सन्धेरनित्यत्वज्ञापनात् मात्स्वर्षावुञ इति दर्शनाच्च समासेऽपि क्वचित् सन्धिर्न भवतीति बोध्यं समासेऽपि क्वचिद्विसन्धिरिति पाणिनीयाः इकस्वासवर्णे नित्यसमासवर्ज्जमिति क्रमदीश्वरसूत्रे नित्यसमासवर्जनाद्विकल्पसमासेऽत्र पक्षे प्रकृतिभावः स्फुट एव एवं परसञ्चारमित्यत्र परसञ्चारे इति पठित्वा तीरविशेषणं वदन्ति तीरगिरिमारूढा इति पाठो न शुद्धश्छन्दोभङ्गात् ॥ २५ ॥ भ०

एतानि चत्वारि सङ्कीर्णानि प्राकृतसमानत्वात् ।

तत इत्यादि । ततोऽनन्तरं भूमिभृतः पर्व्वताः कपियूथमुख्यैर्नीलादिभिः क्षणानोस्तनयस्य नलस्य प्रणीताः अर्पिताः सन्तस्तेनैव क्षणानुतनयेन सम्यक् साधु न्यस्ताः सन्तः महार्णवं अवगाढाः अवष्टब्धवन्तः अकम्प्राः स्थिराः ब्रध्नाग्यनितम्बानां भागा येषान्ते ब्रध्नो मूलम् इखिजजिदी डप्यविभ्यो नगित्यधिकृत्य बन्धेर्मधि बुधीचेत्यौणादिको नक् इदं निराख्यातं तिङन्तपदाभावात् निरवद्यञ्च प्राकृताभावात् ॥ २६ ॥ ज० म०

तेनेऽद्रिबन्धो वरुधे पयोधिस्तुतोष रामो मुमुदे कपीन्द्रः ।
तत्रास शत्रुर्ददृशे सुवेलः प्रापे जलान्तो जहृषुः प्लवङ्गाः ॥२७॥

एकान्तराख्यातनिरवद्यम् ।

भेसुर्ववल्गुर्नदतुर्ज्जजक्षुर्ज्जगुः समुत्प्लुप्लुविरे निषेदुः ।
आस्फोटयाञ्चक्रुरभिप्रणेदूरेजुर्ननन्दुर्विययुः समीयुः ॥ २८ ॥

आख्यातमाला ।

तत इत्यादि । तदनन्तरं कपिबोधसुखैर्नलादिभिः प्रणीता दत्ता ज्ञशानो-रज्ज्वेस्तनयेन नलेन सम्यक् साधु न्यस्ता अर्पिता भूमिभृतः पर्व्वताः महार्णवं अवगाढाः आच्छादयामासुः कीदृशाः अकम्पाः अकम्पनशीलाः स्थिरा ब्रह्माग्र-नितम्बभागा येषां मूलं ब्रह्मोऽङ्घ्रिनामक इत्यमरः बुध्यौऽवेदने नान्नाम्न्येतिक् चेति क्रः दृधुङ्लृदृङ्भ्यो इत्यक्षात् क्र इति केचित् ब्रह्मशब्दोऽपि दृश्यते अयं श्रङ्गं नितम्बो मध्यम् निराख्यातमाख्यातप्रत्ययरहितं निरवद्यं केवलसंस्कृत-त्वात् तालव्यशादित्वात् ॥ २६ ॥ भ०

तेन इत्यादि । अद्रिबन्धस्तेने शनैर्विस्तारं गतः अतएव वरुधे पयोधिः वृद्धिं गतः गिरिभिः पूर्य्यमाणोदरत्वात् तीरं प्लावयति स्म तुतोष रामस्तुष्टवान् सुकरमिदानीं शत्रुव्यापादनमिति मुमुदे कपीन्द्रः हृष्टवान् प्राप्तो मे प्रत्युपकार-काल इति तत्रास शत्रुः त्रासमुपगतः सेतुं बद्ध्वानिदानीमायातो राम इति ददृशे सुवेलः ढौकमानैः सर्व्वैर्दृष्टः जालान्तश्च प्रापे प्राप्तः ततो जहृषुः हृष्टाः प्लवङ्गाः खाम्यादेशः सम्पादित इति । एतदेकान्तराख्यातं सुवन्तपदैर्व्यवधानात् निरवद्यञ्च प्राकृतभावात् ॥ २७ ॥ ज० भ०

तेन इत्यादि । अद्रीणां बन्धस्तेने वानरैर्विस्तारितः पयोधिर्वरुधे वृद्धिं गतः पर्व्वतैः पूर्य्यमाणत्वात् तीरं प्लावितवानित्यर्थः रामस्तुतोष तुष्टः सुकर-मिदानीं शत्रुव्यापादनमिति मत्वा कपीन्द्रः सुग्रीवो मुमुदे हृष्टः प्राप्तो मे प्रत्युपकारकाल इति मत्वा शत्रुर्दशाननस्त्रत्रास भीतः अत्रापि राम आगत इति मत्वा सुवेलो ददृशे वानरैर्दृष्टः यतो जलस्यान्तोऽवसानं प्रापे प्राप्तः अतएव प्लवङ्गा वानरा जहृषुर्हृष्टाः स्वाम्यादेशः सम्पादित इति मत्वा । एतदेकान्तरा-ख्यातं स्वाद्यन्तपदैर्व्यवधानात् निरवद्यञ्च प्राकृतभावात् ॥ २७ ॥ भ०

भेसुरित्यादि । ते पारं प्राप्य केचित्प्रदेशदर्शनोत्सुकाः भेसुः भ्रान्ताः अन्ये ववल्गुः तोषङ्गतवन्तः उख उखीत्यव वल्गतिर्गतौ पठ्यते केचिदतिहर्षात् ननृतुः

गिरिपङ्कचारुदेहं कक्कोलवङ्गवङ्गसुरभिपरिमलम् ।
बहुबहलोरुतरङ्गं परिसरमारूढमुद्धुरं लवणजलम् ॥ २९ ॥

अन्ये रावणपराक्रमान् न्यक्कुर्वन्तो जजक्षुः हसितवन्तः बुभुक्षया वा फलानि भक्षितवन्तः जक्षभक्षहसनयोः केचित् जगुः गायन्ति स्म केचित्ससृत्पुप्लुविरे उत्प्लुत्योत्प्लुत्य गच्छन्ति स्म केचित् भ्रान्ता निषेदुः निषण्णाः केचिदास्फोटयाञ्चक्रुर्वयं युध्याम इति आस्फोटं कुर्वन्तीति ख्यन्नाक्षिण्याम् केचित्तोषादभिप्रणेदुः सुष्ठु नादितवन्तः केचिद्रेजुः दीप्तवन्तः केचिन्ननन्दुर्ध्वयमीदृशं कर्म कृतवन्त इति अन्ये वियथुरितस्ततो गच्छन्ति स्म केचित्समीयुः एकत्र सङ्गताः आख्यातमालेति तिङन्तमाला ॥ २८ ॥ ज०म०

सेतुरित्यादि । सेतुना पारं प्राप्य केचित् क्षेमुः प्रदेशदर्शनोत्सुका इतस्ततो गताः अपरे ववल्गुः वल्गितवन्तः वल्गुव्रजे अनेकार्थत्वात् हर्षादिहेतुकप्रलापार्थेऽपि वर्त्तते अन्ये ननृतुः हर्षात् नृत्यं चक्रुः अन्ये जजक्षुः फलानि भक्षितवन्तः हर्षात् हसितवन्तो वा जक्षभक्षहसनयोः केचित् जगुः गायन्ति स्म केचित् ससृत्पुप्लुविरे उत्प्लुत्य गतवन्तः केचिन्निषेदुः श्रमापनोदनार्थमुपविष्टाः केचिदास्फोटमहङ्कारं चक्रुः लेः कृत्याख्याने जिः अन्येऽभिप्रणेदुः पुरीसान्निध्ये शब्दं चक्रुः केचित् रेजुः पुष्पादिना शोभितवन्तः अन्ये ननन्दुः कृतकृत्यत्वात् हर्षं प्राप्ताः केचित् विययुः यूथादन्यत्र गताः कौतुकात् अपरे समीयुः एकत्र सम्भूय स्थिताः आख्यातमालेति पुष्पतुल्यानां क्रियापदानां ग्रथनात् उपसर्गस्य लिङ्गत्वेऽपि पृथक् स्थितत्वाभावात् क्रियाद्योतकत्वेनाख्यातत्तुल्यतया व्यपदेशः ॥ २८ ॥ भ०

गिरीत्यादि । गिरीणां प्रक्षिप्यमाणानां यः पङ्कः गैरिकादिधातुकर्दमः तेन चारुदेहं कक्कोलवङ्गाभ्यां बङ्गः सुरभिः परिमलो गन्धो यस्मिन् बहवः प्रभूता बहलाः स्थूला उरवः उच्चास्तरङ्गा यस्य तदीदृशं लवणजलं उद्धुरं उद्धृतं कर्दभूतं परिसरं तटमारूढं सेतुना निवारितगतित्वात् ॥२९॥ ज०म०

गिरिपङ्केत्यादि । लवणजलं कर्दं परिसरं प्रत्यन्नभवं तटमारूढं प्राप सेतुना निवारितगतित्वात् कीदृशं जलं गिरीणां प्रक्षिप्यमानां यो गैरिकादिधातुपङ्कस्तेन चारु देहं यस्य वर्णान्तरोत्पादनात् कक्कोलैर्वङ्गैश्च गन्धद्रव्यविशेषैर्बङ्गो रचितः सुरभिः परिमलो विमर्दोत्थो गन्धो यत्र बहवः प्रचुरा बहलाः स्थूला उरव उच्चास्तरङ्गा यस्य उद्धुरं मर्यादामतिक्रान्तं प्राकृते कक्कोलशब्दस्य नानुस्वारविधिः कक्कोलशब्दस्यैव तत्रोल्लेखात् यत्तु कर्पूरमञ्जर्यां कङ्कोलीकुलं कुपित

लोलं कूलाभिगमे खे तुङ्गामलनिबद्धपुरुपरिणाहम् ।
सुरगङ्गाभरणसहं गिरिबन्धवरेण लवणसलिलं रुद्धम् ॥२०॥
आरूढश्च सुवेलं तरुमालाबन्धहारिगिरिवरजालम् ।
रावणचित्तभयङ्करमापिङ्गललोलकेसरं रामबलम् ॥ २१ ॥
लङ्कालयतुमुलारवसुभरगभीरोरुकुञ्जकन्दरविवरम् ।

इति तत्रापि कक्कोलीत्येव पठनीयं लेखकप्रमादादनुस्वारपाठः वैकल्पिकोऽयमनुस्वार इत्यन्ये ॥ २९ ॥ भ०

लोलमित्यादि । कूलाभिगमे तटगमने लोलं चञ्चलं खे आकाशे तुङ्गश्च तदमलश्चेति तुङ्गामलं निबद्धः संयुक्तः पुरुर्महान् परिणाहो यस्य तुङ्गामलश्च तन्निबद्धपुरुपरिणाहश्चेति वियति आरोहपरिणाहाभ्यां युक्तमित्यर्थः सुरगङ्गायाः मन्दाकिन्याः यद्भरणं पूरणं तत् सहं यत्तं तादृशं लवणजलं गिरिबन्धवरेण सेतुना रुद्धम् ॥ २० ॥ ज० म०

लोलमित्यादि । गिरिबन्धवरेण सेतुना लवणजलं रुद्धं कीदृशं कूलाभिगमे तटागमने लोलं चञ्चलं खे आकाशे तुङ्गश्च तदमलश्चेति तुङ्गामलं निबद्धः संयुक्तः पुरुर्महान् परिणाहो विशालता यस्य तुङ्गामलश्च तत् निबद्धपुरुपरिणाहश्चेति विग्रहः खे आरोहपरिणाहाभ्यां युक्तमित्यर्थः सुरगङ्गाया मन्दाकिन्याः पूरणे समर्थं विदङ्गत्वात् प्राकृते कूलाभिगमे इत्यत्र भकारस्य फकारो न भवति प्रायोग्यकृणात् ॥ २० ॥ भ०

आरूढमित्यादि । रामबलं तटे स्थित्वा आरूढश्च सुवेलं पर्व्वतं भकारस्य प्राकृते खरयेषता न भवति पदमध्यान्त्ययोरवर्त्तमानत्वात् तरुमालाया य आबन्धः तेन हारि मनस्तुष्टिकरं तादृशं गिरिवराणां पर्व्वतगिरीणां जालं यस्य सुवेलस्य रावणचित्तस्य भयङ्करं रामबलं आपिङ्गलानि लोलानि केसराणि यस्य तदिति ॥ २१ ॥ ज० म०

आरूढमित्यादि । रामबलं ससुग्रहस्तीर्त्वा सुवेलं पर्व्वतमारूढं भकारस्य प्राकृते लोपो न भवति पदमध्यान्त्ययोरवर्त्तमानात् कीदृशं सुवेलं तरुमालाया आबन्धेन वेष्टनेन हारि मनोहारि पर्व्वतगिरिवरजालं यस्य यत्र वा रामबलं कीदृशं रावणचित्तस्य भयजनकं आपिङ्गलानि लोलानि चञ्चलानि केसराणि यस्य केसरयुक्तो दन्तसमूहः ॥ २१ ॥ भ०

लङ्केत्यादि । लङ्कालयानां राक्षसानां यत्तुमुलो महानारवः तेन सुभगाः

वीणारवरससङ्गमसुरगणसङ्कुलमहातमालच्छायम् ॥ २२ ॥
सरसबहुपल्लवाविलकेसरहिन्तालबद्धबहलच्छायम् ।
ऐरावणमदपरिमलगन्धवहाबद्धदन्तिसंरम्भरसम् ॥२३॥
तुङ्गतरुच्छायारुहकोमलहरिहारिलोलपल्लवजालम् ।
हरिणभयङ्करसकुसुमदावसमच्छविविलोलदाडिमकुञ्जम् ॥२४॥

परिपूर्णाः गम्भीरोरुकुञ्जा गम्भीरमहागहनानि कन्दरविवराणि च यत्र सुवेले वीणारवे यो रसस्तृष्णा तेन सङ्गमः समागमो येषां सुरगणानां सुरगणास्तैरिति सः तैः सङ्कुला व्याप्ता महातमालच्छाया यत्रेति ॥ २२ ॥ ज० म०

लङ्केत्यादि । कीदृशं लङ्कालयानां राक्षसानां यस्मुखलो महानारवस्तेन सुभराणि परिपूर्णानि गम्भीराणि उरूणि महान्ति कुञ्जानि कन्दराणि विवराणि च यस्य यत्र वा वीणारवस्य रसेनेच्छया यः सङ्गमः परस्परमिलनं तेन हेतुना सुरगणैः संकुला व्याप्ता महातमालतरुच्छाया यत्र वीणारवरसेन सङ्गमो येषां सुरगणानामित्यन्ये ॥ २२ ॥ भ०

सरसेत्यादि । सरसाः सार्द्राः ये बहवः पल्लवाः तैराविला अन्धकारिता ये केसरवृक्षाः हिन्तालवृक्षाश्च तैर्बद्धा बहला घना छाया यत्र सुवेले ऐरावणस्य ऐरावतस्य हस्तिनो मदपरिमलो यस्मिन् गन्धवहे तादृशेन गन्धवहेन बद्धो दन्तिनां हस्तिनां संरम्भरसः क्रोधरसो यत्रेति ऐरावण ऐरावत इत्युभयमपि प्राकृते साधु ॥ २३ ॥ ज० म०

सरसेत्यादि । पुनः कीदृशं सुवेलं सरसैः स्निग्धैर्बहुभिः पल्लवैराकुला व्याप्ता ये केसरा हिन्तालाश्च वृक्षास्तैर्बद्धा जनिता बहला निविडा छाया यत्र पल्लवाविलकेसरेति पाठे आविला अन्धकारिताः ऐरावणसम्बन्धिनो मदस्य परिमलो यत्र तादृशेन गन्धवहेन बद्धो जनितो दन्तिनां क्रोधरसो यत्र ऐरावत ऐरावण इत्युभयं प्राकृते साधु यद्यप्यैकारस्य प्राकृते नित्यमेकारादेश उक्तस्तथापि वैदेत्ता च केषाञ्चिदित्युक्तत्वात् तन्मते नेदमुदाहृतं अथके ऽरण्यकै अधानीति ॥ २३ ॥ भ०

लङ्केत्यादि । लङ्कतरूणां या छाया तस्यां रोहन्तीति रुयुपधलक्षणः कः लङ्कतरुच्छायारुहाः विटपाः तेषां कोमलं हरिद्धरितं हारि तुष्टिकरं लोलं पल्लवजालं यत्र हरिणानां भयङ्करादावसदृशत्वात् सकुसुमा दावसमच्छवयः दावाग्नितुल्याः लोलदाडिमकुञ्जा यत्र ॥ २४ ॥ ज० म०

कलहरिकण्ठविरावं सलिलमहाबन्धसङ्कुलमहासालम् ।
चलकिसलयसम्बद्धं मणिजालं सलिलकणमयं विवहन्तम् ॥२५॥
तुङ्गमणिकिरणजालं गिरिजलसङ्घट्टबद्धगम्भीररवम् ।
चारुगुहाविवरसभं सुरपुरसममरचारणसुसंरावम् ॥२६॥

तुङ्गेत्यादि । पुनः कीदृशं सुवेलं तुङ्गानां तरूणां छायासु रूढं जातं अतएव कोमलं मृदु हरिद्वर्णं हारि मनोहरं लोलं चञ्चलं पल्लवानां जालं समूहो यत्र हरिणानां भयङ्करो दावसादृश्याद्भयजनकः सकुसुमः पुष्पैः सह वर्त्तमानः अतएव दावेन वनाग्निना समा रूढिस्तुल्यकान्तिर्विलोलसञ्चलो दाडिमकुञ्जो यत्र अग्निशिखापि लोला भवति दवौ दावौ वनारण्यवह्नी इत्यमरः रूहेरिजुङत्वात् कण्टत्ताप्रीजुङ् इति कः पल्लववासमिति केचित् पठन्ति तदा संस्कृते बालशब्दस्य नवार्थस्य विशेषणस्य परनिपातोऽभिधानात् कर्त्तुं शक्यते प्राकृते तु पूर्व्वनियम एव तस्मात् पल्लवं बलति धारयतीति ढात्षस्थिति षण् प्राकृते ऋविशब्दे वकारलोपो न भवति तत्र प्रायोग्रहणात् दाडिमेत्यत्र दालिमेति क्वचित्पाठः संस्कृते डलयोरलयोरैक्यमिति परः स्वमते मनीषादित्वात्तादूप्यं प्राकृते डोल इति लत्वं क्वचिन्न भवति तत्र प्रायोग्रहणात् हेमचन्द्रेण तु टवर्गस्य बाल इत्युक्त्वा दाडिमं दालिममित्युदाहृतम् ॥ २४ ॥ भ०

कलेत्यादि । कलो मनोहरः हरीणां कण्ठविरावो यत्र सलिलस्य यो महाबन्धस्तेन सङ्कुला महान्तः साला: सालवृक्षा यत्र चलकिसयेषु सम्बद्धं संलग्नं सलिलकणमयं सलिलकणरूपं मणिजालं मणिसमूहमिव विवहन्तं धारयन्तम् ॥ २५ ॥ ज० म०

कलहेत्यादि । पुनः कीदृशं सुवेलं कलोऽव्यक्तमधुरो हरेः सिंहस्य कण्ठविरावो यत्र सलिलमहाबन्धेन सेतुना संकुलाः पयोव्याप्ता महान्तः सालवृक्षा यत्र चञ्चलैः किसलयैः पल्लवैः संयुक्तं मणिजालं विवहन्तं विशेषेण धारयन्तं मणिजालं कीदृशं सलिलकणान् मिनोति अतिस्निग्धत्वात् प्रक्षिपतीति प्रचादित्वादन् सलिलकणाः प्रस्तुता यत्रेति वा अभिधानात् प्रस्तुतवृत्तेर्मयट् सलिलसालकिसलयशब्दादन्त्यान्विताः ॥ २५ ॥ भ०

तुङ्गेत्यादि । तुङ्गमणीनां किरणजालं यत्रेति गिरिजलानि निर्झरजलानि तेषां यः सङ्घट्टः परस्परसंश्लेषस्तेन बद्धो गम्भीरो रवो यत्र चारु गुहाविवरमेव

विमलमहामणिटङ्कं सिन्दूरकलङ्कपिञ्जरमहाभित्तिम् ।
वीरहरिद्दन्तिसङ्गमभयरुद्धविभावरीविहारसमीहम् ॥२७॥
समहाफणिभीमबिलं भूरिविहङ्गतुमुलोरुघोरविरावम् ।
वारणवराहहरिवरगोगणसारङ्गसङ्कुलमहासालम् ॥२८॥

सभा शाला यत्र अमरचारणानां गन्धर्वाणां गायतां शोभनः संरावो यत्र अतएवामरपुरसमम् ॥ २६ ॥ ज० म०

तुङ्गभिणीत्यादि । पुनः कीदृशं तुङ्गं मणिकिरणजालं यत्र गिरिजालानां सङ्घट्टेन मिथोऽभिघातेन वह्नो जनितो गम्भीररवो यत्र चारु गुहाविवरमेव सभा गृहं यत्र अमरचारणानां गन्धर्वाणां शोभनः संरावो यत्र अतएव अमरपुरस्य समानमिति ॥ २६ ॥ भ०

विमलेत्यादि । विमलमहामणीनां पद्मरागादीनां टङ्काः छेदा यत्र अतश्च सिन्दूरकलङ्केन लाञ्छनेन पिञ्जरा इव महाभित्तयो यस्य वीराणां हरीणां दन्तिनाञ्च यः सङ्गमोऽन्योन्यगमनं तस्माद्भयत्नेन रुद्धा निवारिता विभावर्य्यां विहारसमीहा विहरणेच्छा यत्र ॥ २७ ॥ ज० म०

विमलेत्यादि । पुनः कीदृशं तुवेलं विमला महामणीनां टङ्काश्छेदा यत्र अतएव सिन्दूरस्य कलङ्केन लाञ्छनेन पिञ्जरा महाभित्तयो यत्र वीराणां सिंहानां दन्तिनाञ्च यः सङ्गमो मिथः संसर्गस्तस्माद्भयेन रुद्धा निरस्ता विभावर्य्यां रात्रौ विहारसमीहा विहरणेच्छा यत्र विभावर्य्याः पुंवल्ला विहारसमीहा यत्रेति वा विभावरी हरिद्रायां कुट्टिन्यां चन्द्रयोषितीति विश्वः प्राकृते भकारस्य हकारो न भवति तत्र प्रायोग्रहणात् ॥ २७ ॥ भ०

समेत्यादि । समहाफणीन्यतएव भीमानि विलानि विवराणि यत्र भूरीणां विहङ्गमानां तुमुलोऽनेकप्रकार उरुर्महान् घोरो रौद्रो विरावो यत्र वारणादिभिः स्वाभक्षणार्थिभिः सङ्कुला महासाला यत्र ॥ २८ ॥ ज० म०

समहाफणीत्यादि । पुनः कीदृशं तुवेलं महाफणिसहितानि अतएव भीमानि विलानि विवराणि यत्र भूरीणां बह्वीनां विहङ्गानां तुमुलोऽनेकरूपो व्याकुलो वा उरुर्महान् घोरो रौद्रो विरावो यत्र हस्तिभिः शूकरैः सिंहवरैर्गोगणैर्हरिणैश्च सङ्कुलाः स्वान्धकण्डूयनार्थं व्याप्ता महान्तः सालवृक्षा यत्र नाम्नश्चेतिक् चेति सर्वैरङ्गैः प्रत्ययः सारङ्गोदन्त्यादिः ॥ २८ ॥ भ०

चलकिसलयसविलासं चारुमहीकमलरेणुपिञ्जरवसुधम् ।
सकुसुमकेसरवाणं लवङ्गतरुतरुणवल्लरीवरहासम् ॥३९॥
अमलमणिहेमटङ्कं तुङ्गमहाभित्तिरुद्धरुरुपङ्गमम् ।
अमरारूढपरिसरं मेरुमिवाविरलसरसमन्दारतरुम् ॥ ४० ॥
फलभरमन्थरतरुवरमविदूरविरूढहारिकुसुमापीडम् ।

चलेत्यादि । चलैः किसलयैः हस्तैरिव सविलासं प्रारभ्यनृत्यं चारूणां महाकमलानां स्थलजानां रेणुभिः पिञ्जरा वसुधा यत्र सकुसुमाः केसराः वाणाश्च यत्र लवङ्गतरोस्तरुणा या वल्लर्यः प्ररोहास्ता एव वरो हासो विकाशाख्यो यत्र ॥ ३९ ॥ ज० म०

चलेत्यादि । पुनः कीदृशं सुवेलं चञ्चलैः किसलयैर्हस्तैरिव सविलासं प्रारब्धनृत्यमिव चारुमहीकमलानां शोभनस्थलपद्मानां रेणुभिः पिञ्जरा वसुधा यत्र सकुसुमाः केसराः पुन्नागा वाणाभिधाख्यो यत्र लवङ्गतरोर्नायकत्वं मञ्जर्यास्च नायिकात्वं व्यङ्ग्यम् ॥ ३९ ॥ भ०

अमलेत्यादि । अमलमणीनां हेमादीनां टङ्काम्छेदा यत्र तुङ्गा उच्चा महती विस्तारवती या भित्तिस्तया रुद्धो रुरूणां मृगाणां पङ्गमः पङ्गेन गमनं यत्र गमेर्यङ्हेत्यादिना अप् । वङ्गमम इति पाठान्तरं तत्र रुद्धा कुटिलो गमो यत्र वंकिकौटिल्ये इत्यस्य रूपं अमरैरारूढाः परिसरास्तटा यत्र अविरलाः सरसा मन्दारतरवो देवदत्ता यत्र तमित्थं मेरुमिव ॥ ४० ॥ ज०म०

अमलमणीत्यादि । पुनः कीदृशं सुवेलं अमलानां निर्मलानां मणीनां हेम्नाश्च टङ्काम्छेदा यत्र पूर्वं मणिटङ्कमात्रमुक्तं सम्प्रत्युभयटङ्क इति भेदः किंवा अमला मणयो यत्रेति विग्रहः तुङ्गा उच्चा महती विस्तीर्णा या भित्तिस्तया रुद्धो रुरूणांमृगविशेषाणां पङ्के गमो गमनं यत्र वङ्गमामिति पाठे वङ्गः कुटिलो गमो यत्र वंकिङ् कौटिल्ये इत्यस्य रूपं अमरैरारूढः परिसरः पर्य्यन्तभूर्यस्य अविरला घनाः सरसा मन्दारतरवो देवदत्ता यत्र अतएव मेरुमिव ॥ ४० ॥ भ०

फलेत्यादि । फलभरेण मन्थरा ईषन्नतास्तरुवरा यत्र अविदूरे विरूढा हारिणः कुसुमापीडा यत्र पुष्पस्तवकानां हस्त्याद्यात्वात् हरिणकलङ्कमणिः महाचन्द्रकान्तः तस्मात् सम्भवो यस्य वज्रवारिणः तेन सुरभाः परिपूर्णा

हरिणकलङ्कमणिसम्भवबद्धवारिभरसुगम्भीरगुहम् ॥४१॥
जलकामदन्तिसंकुलसहेमरसचारुधवलकन्दरदेहम् ।
अङ्कुररोहसमच्छविरुरुगणसंलीढतरलहरिमणिकिरणम् ॥४२
गाढसमीरणसुसहं भीमरवोत्तुङ्गवारिधरसंघट्टम् ।
भवलजलवाहमालासम्बन्धाबद्धहिमधराधरलीलम् ॥ ४३ ॥

गम्भीरा गुहा यस्या अत्र मणिमहत्तया वारिमहत्वात् गम्भीरगुहापूरणमिति ॥ ४१ ॥ ज० म०

फलभरेत्यादि । पुनः कीदृशं सुवेलं फलभरेण मन्थरा ईषन्नताश्च द्रुवरा यत्र अविदूरे समीपे विरूढा उत्पन्ना हारिणो मनोहराः कुसुमापीडाः पुष्पस्तवका यत्र हरिणकलङ्कमहामणेश्चन्द्रकान्तात् सम्भवो येषां तादृशैर्बद्धुभिर्वारिभिः सुभरा परिपूर्णा गम्भीरगुहा यस्य मणिबाहुल्येन वारिबाहुल्यं तेन गम्भीरस्थानपूरणं प्राकृते आपीडशब्दे पकारस्य वकारादेश ईकारस्य लोपो भवति यथा आवड इति तथापि बहुलाधिकारान्न भवति ॥ ४१ ॥ भ०

जलेत्यादि । जलमेतदित्येवं कामैर्दन्तिभिः सङ्कुलाः सहेमरसा सह हेमरसेन वर्त्तमानाः चारवः शोभनाः धवलाः कन्दरगेहाः कन्दरसन्निवेशा यत्र रोहणं रोहः अङ्कुरादारोहो यस्य प्रस्तस्य तेन समच्छवयस्तुल्यवर्णा रुरुगणास्तैः संलीढाः तरलाश्चञ्चलाः हरिमणिकिरणा मरकतमयूखा यत्र ॥ ४२ ॥ ज०म०

जलकामेत्यादि । पुनः कीदृशं सुवेलं जलं कामयन्ते जलकामा हस्तिनस्तैः संकुला व्याप्ताः सहेमरसाः सुवर्णपारदसहिताः चारवः शोभना धवलाः शुक्लाः कन्दरदेहा गुहासन्निवेशा यत्र अङ्कुरात् रोहः सम्भवो यस्य प्रस्तस्य अङ्कुरस्य प्ररोहो वा तेन समच्छवयस्तुल्यवर्णाः अतएव भ्रमात् रुरूणां मृगविशेषाणां गणैः संलीढा जिह्वया स्पृष्टास्तरलाश्चञ्चला हरिमणीनां इन्द्रनीलमणीनां किरणा यत्र हरिच्छब्दो हरितपर्य्यायः ॥ ४२ ॥ भ०

गाढेत्यादि । गाढो महान् यः समीरणः तं सुसहत इति मूलविभुजादित्वात्कः भीमरवास्तुङ्गा ये वारिधरास्तेषां संघट्टो यत्र धवला ये जलवाहास्तेषां मालाया यत्सम्बद्धं यः सम्बन्धः सम्बन्धनं भावे क्तः तेन करणभूतेन आबद्धा अनुकृता हिमधराधरस्य हिमवतो धराधरस्य लीला विभ्रमो येन तं सुवेलं आरूढम् ॥ ४३ ॥ ज० म०

गाढसमित्यादि । पुनः कीदृशं सुवेलं गाढो महान् यः समीरणो वायुस्तस्य

लवणजलवन्धसरसं तरुफलसम्पत्तिरुद्धदेहायासम् ।
लङ्घातोरणवारणमारूढं समरलालसं रामबलम् ॥ ४४ ॥
उरुपणववेणुगुञ्जाभेरीपेरोरुझल्लरीभीमरवम् ।
ढक्काघण्टातुमुलं सन्नद्धं परबलं रणायाससहम् ॥ ४५ ॥

सुसहं पचादित्वादन् अतिस्थिरत्वात् भीमरवा उत्तुङ्गाश्च ये वारिधरा मेघास्तेषां सङ्घट्टः संश्लेषो यत्र भीमरवेति उत्तुङ्गेति सङ्घट्टविशेषणं वा वरोत्तुङ्गेत्यत्र यद्यपि प्राकृते लोपोऽच इत्यनेन अचि परे अचो लोपे रवुत्तुङ्गेति स्यात् तथापि बहुलाधिकाराद्भवति लोपः धवलानां मेघानां मालया यत्सम्बद्धं भात्रेक्षः सम्बन्धेति क्वचित्पाठः तेन करणभूतेनावद्धा कृता हिमधराधरस्य हिमालयपर्वतस्य लीला विभ्रमो येन तं सुवेलमारूढं रामबलमिति सम्बन्धः ॥ ४३ ॥ भ०

त्रयोदशश्लोकैरादिकुलकम् ।

रामबलं कीदृशमित्याह

लवणेत्यादि । लवणजलबन्धाद्धेतोः सरसं सहर्षं तरुफलसम्पत्त्या रुद्रोऽपनीतः देहायासः क्षुत्पीडा यस्य लङ्घातोरणस्य वारणं निषेधकं आलोलं चञ्चलं समरलालसं रणसतृष्णं रामबलं तं सुवेलमारूढमिति पूर्वेण योज्यम् ॥ ४४ ॥ ज० म०

लवणेत्यादि । रामबलं आरूढं सुवेलमिति पूर्वोक्तमिहापि योज्यं विशेषाभिधानाय पुनरुक्तमदोषत्वात् आरूढमित्यत्रालोलमिति पाठे रामबलं समरलालसं जातमित्येवं साध्यं कीदृशं रामबलं लवणजलबन्धात्सरसं सहर्षं तरुफलसम्पत्त्या रुद्रोऽपनीतो देहायासो बुभुक्षापीडा यस्य तरुफलसम्पत्तिबद्धदेहाभोगमिति क्वचित्पाठः तदा भोगशब्दस्य प्राकृते गकारलोपो न भवति प्रायोग्रहणात् लङ्घायास्तोरणस्य बहिर्द्वारस्य वारणं निषेधकं किंवा सुवेलमारुह्य लङ्घातोरणं वारणतुल्यं बहिर्द्वारस्थितहस्तिनं वा आरूढमित्यन्वयः समरे लालसा महतीच्छा यस्य ॥ ४४ ॥

तस्मिन्नारूढे परबलं सन्नद्धमित्यं प्रवृत्तमित्यर्थः इत्थं कथं तदाह उरुपणवेत्यादिना ।

उर्ध्वित्यादि । उरुपणवादीनां भीमो रवो यस्मिन् परबले तत् उरुपणवो महान् पणवः भेला वाद्यविशेषः उरुझल्लरी महती झल्लरी ढक्काघण्टयोस्तुमुलः संमूर्च्छितः शब्दो यत्रेति रणायाससहं रणक्लेशसहम् ॥ ४५ ॥ ज० म०

आरूढबाणघोरं विमलायसजालगूढपीवरदेहम् ।
चञ्चलतुरङ्गवारणसंघट्टावद्धचारुपरिणाहगुणम् ॥ ४६ ॥
असितोमरकुन्तमहापट्टिसभल्लवरबाणगुरुपुरुमुसलम् ।
वीररसालङ्कारं गुरुसञ्चारहयदन्तिसमहीकम्मम् ॥ ४७ ॥
ते रामेण सरभसं परितरला हरिगणा रणसमारम्भे ।

उरुपणवेत्यादि । परस्य रावणस्य बलं सन्नद्धं युद्धायोद्यतमित्यर्थः कीदृशं उरूणां पणवादीनां उरुभल्लयोश्च भीमो रवो यत्र समौ पणवमर्दलौ गुञ्जापि पटहे प्रोक्ता काकवल्लयां कलध्वनाविति विश्वः ढक्कानां घण्टानाञ्च तुमुलः संमूर्च्छितः शब्दो यत्र रणायासहं संग्रामक्लेशसहम् ॥ ४५ ॥ भ०

आरूढेत्यादि । धनुषि आरूढबाणत्वात् घोरं परबलं विमलेनायसजालेन वर्म्मणा गूढम्छन्नः पीवरः स्थूलो देहो यस्य चञ्चलानां तुरङ्गाणां वारणानाञ्च यः परस्परसंघट्टः श्लेषणं तेनाबद्धश्चारुः परिणाहगुणः विस्तार एव गुणो यस्य तत्परबलं संनद्धम् ॥ ४६ ॥ ज० म०

आरूढेत्यादि । कीदृशं परबलं आरूढं अर्थाद्धनूंषि बाणा यस्य तच्च तद्घोरं रौद्रञ्चेति विग्रहः आरूढो बाणो यत्र तेन धनुषा घोरं वा विमलेनायोविकारेण वर्म्मणा कवचेन गूढ आच्छादितः स्थूलो देहो यस्य वर्म्मेत्यत्र जालपदं पठित्वा विमलेनायसेन जालतुल्येन सन्नाहेनेत्यन्ये प्राहुः चञ्चलानां तुरङ्गानां हस्तिनाञ्च यः संघट्टः संश्लेषस्तेनाबद्धश्चारुपरिणाहगुणो यत्र॥४६॥भ०

असीत्यादि । असादीनां वरबाणपर्य्यन्तानां द्वन्द्वः तैरसादिभिः गुरु अनभिभवनीयं पुरु महन्मुसलं यत्र असादिगुरु च तत् पुरु मुसलं चेति सः वीररस एवालङ्कारो यस्य गुरुः सञ्चारो येषां हयदन्तिनां महाकायत्वात् तैः समहीकम्मं सह महीकम्मेन वर्त्तमानं परबलं संनद्धम् ॥ ४७ ॥ ज० म०

असीत्यादि । पुनः कीदृशं परबलं असिभिः खड्गैः तोमरैः शक्तिभिः कुन्तैः प्रासैः महापट्टिसैर्लौहदण्डविशेषैः भल्लैः श्रेष्ठबाणैश्च गुरु अनभिभवनीयं पुरु महत् मुसलं यत्र वीररस एवालङ्कारो यस्य गुरुः सञ्चारो येषां तादृशैर्हयैर्दन्तिभिश्च हेतुभिर्महीकम्मसहितं तोमरोऽस्त्रीलौहदण्डः शक्तिः कान्तस्य सर्व्वला । पट्टिशो लौहदण्डोयस्तीक्ष्णधारः क्षुरोपमः । मुसलशब्दो दन्त्यमध्योऽपि चन्द्रबिन्दौ दुर्गटीकायां प्रत्युदाहृतत्वात् मुषस्ते य इत्यस्य दृषलादित्वात् मुषल इति वर्णदेशनायासक्तत्वाच्च अत्र सङ्कीर्णत्वाद्दन्त्यमध्यः ॥४७॥ भ०

रुद्धा लङ्कापरिसरभूधरपरिभङ्गलालसाधीररवम् ॥४८॥युग्मकम्
जलतीरतुङ्गतरुवरकन्दरगिरिभित्तिकुञ्जविवरावासम् ।
भीमं तरुहरिणबलं सुसमिद्धहिमारिकिरणमालालोलम्॥४९॥
रावणबलमवगन्तुं जलभरगुरुसलिलवाहगणसमच्छायम् ।

ते रामेणेत्यादि । ते हरिगणाः कपिगणाः रणसमारम्भे रणप्रवर्त्तनिमित्तं सरभसं सम्भ्रमपूर्व्वकं परितरलाः स्थातुमशक्नुवन्तः लङ्कापरिसरे लङ्कासमीपे ये तरवः तेषां परिभङ्गे चूर्णने लालसाः सतृष्णाः सन्तो रामेण रुद्धाः प्रतिषिद्धाः माभाङ्क्षुरिति धीररवं धीरो रवो यस्यां प्रतिषेधनक्रियायामिति ॥ ४८ ॥ ज० म०

ते रामेणेत्यादि । ते हरिगणा वानरसमूहाः रामेण रुद्धाः प्रतिषिद्धाः कीदृशाः सरभसं सकौतुकं यथास्यात्तथा रणसमारम्भे सति तन्निमित्तं वा परितरलाश्चञ्चलाः लङ्कायाः परिसरे समीपे ये पर्व्वतास्तेषां परिभङ्गे लालसा महतीच्छा येषां तादृशाः अतएव रुद्धाः घोरो रवो यत्रेति प्रतिषेधक्रियाविशेषणम् ॥ ४८ ॥ भ०

जलेत्यादि । 'तरुहरिणबलं कपिबलं निषिद्धं सत् भीमं भयानकं जलतीराद्यैरावासो यस्य तत्सुसमिद्धस्य हिमारेरग्नेरादित्यस्य वा या किरणमाला तद्वल्लोलं समारूढमिति वक्ष्यमाणेन सम्बन्धः ॥ ४९ ॥ ज० म०

जलतीरेत्यादि । तरुहरिणबलं कपिसैन्यं रामेण निषिद्धं सत् अट्टादिषु समारूढमिति वक्ष्यमाणेन सम्बन्धः कीदृशं जलतीरेषु तुङ्गतरुवरेषु कन्दरेषु गिरिभित्तिषु कुञ्जविवरेषु च आवासो यस्य भीमं भयानकं सुसमिद्धस्य हिमारेः सूर्य्यस्य वह्नेर्वा या किरणमाला तद्वल्लोलं चञ्चलम् ॥ ४९ ॥ भ०

रावणेत्यादि । रावणबलं अवगन्तुं कीदृशमिति जलभरेण गुरुर्यः सलिलवाहगणो जलधरसमूहः तेन समच्छायं तुल्यच्छायं रावणबलं अट्टादिषु समारूढम् ॥ ५० ॥ ज० म०

एतानि द्वाविंशतिः सङ्कीर्णानि ।

इति भट्टिकाव्यटीकायां जयमङ्गलाख्यायां प्रसन्नकाण्डे भाषासमावेशश्चतुर्थः परिच्छेदः ।

काव्यस्य सेतुबन्धो नाम त्रयोदशः सर्गः ।

समाप्तं चेदमसन्नकाण्डं तृतीयम् ।

अट्टतरुमञ्चमन्दिरतोरणमालासभासु समारूढम् ॥ ५० ॥

इति भट्टिकाव्ये प्रसन्नकाण्डे भाषासमावेशो नाम चतुर्थः काव्यस्य त्रयोदशः सर्गः ।

रावणबलमित्यादि । रावणस्य बलं सैन्यं कीदृक् द्रष्टवगन्तुं ज्ञातुं तरुहरिणबलं अट्टादिषु समारूढं अट्टसुपरितनं गृहं रावणबलं कपिबलं वा कीदृशं जलभरेण गुरुर्यः सलिलवाहगणो मेघसमूहस्तेन समच्छायं तुल्यकान्ति ॥ ५० ॥ भ०

एतानि द्वाविंशतिः सङ्कीर्णकानि ।

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मज श्रीभरतसेन-विरचितायां सुप्रबोधिन्यां भट्टिटीकायां सेतुबन्धो नाम त्रयोदशः सर्गः ।

चतुर्दशः सर्गः ।

ततो दशास्यः स्मरविह्वलात्मा
चारप्रकाशीकृतशत्रुशक्तिः ।
विमोह्य मायामयराममूर्ध्ना
सीतामनीकं प्रजिघाय योद्धुम् ॥ १ ॥

सुप्तिङन्तव्युत्पत्तौ यद्यौष्ठवं तदपि काव्यस्याङ्गमुक्तं अतः प्रसन्नकाण्डानन्तरं तिङन्तकाण्डं शब्दलक्षणप्रयोगार्थं कथ्यते तत्र लसस्थाने तिवादयः लकाराश्च नव लेटश्छन्दोविषयत्वादिति अत्र नवविलसितानि विलसितञ्च नानारूपता तत्र भूतार्थत्वतो लिटोऽधिकृत्य तद्विलसितमाह

तत इत्यादि । ततः स्वपरबलयोरनन्तरकालं दशास्यः स्मरविह्वलात्मा कामवशीकृतदेहः भर्त्तरि निराशा सती सीता ममानुकूला भविष्यतीति मायामयेन मायास्वभावेन राममूर्ध्ना छिन्नेन सीतां विमोह्य मोहयित्वा चारैः प्रणिधिभिः प्रकाशीकृता शत्रुशक्तिः वैरिसामर्थ्यं यस्मै योद्धुमनीकं सैन्यं प्रजिघाय प्रहितवान् हेरचिलिङीति कृत्वं भूतानद्यतनपरोक्षे सर्व्वत्र लिट् ॥१॥ ज०म०

स्याद्यन्तव्युत्पत्तौ यद्यौष्ठवं तदपि काव्यस्याङ्गमुक्तं ततः प्रसन्नकाण्डादनन्तरं त्याद्यन्तकाण्डमुच्यते तत्रार्थवशात् प्रथमं ठी प्रदर्श्यते पाणिनिमते त्याद्यन्तस्य तिङन्त इति संज्ञा ठीलस्य लिडिति संज्ञा

तत इत्यादि । अनन्तरं दशास्यो रावणः स्मरविह्वलात्मा कामविह्वलचित्तः सन् भर्त्तर्नाशे सीतानुकूल्यं यास्यतीति मत्वा मायामयेन मायास्वरूपेण रामसम्बन्धिना मस्तकेन सीतां मोहयित्वा चारैः प्रकाशीकृता शत्रूणां रामादीनां शक्तिः सामर्थ्यं येन तथाभूतः सन् योद्धुं युद्धं कर्त्तुं अनीकं सैन्यं प्रजिघाय प्राहिणोत् हिनस्त्यर्त्तिप्रीणनयोर्गतौ भवद्भूतभव्ये लिट इति भूतसामान्ये ठी धुर्दिष्यञ्जीति द्वित्वं झझखथहधेति खेर्हस्य जत्वं हेःखेरनङिचिरिति धिः ज्ञ्णित्यन्नेजुङतोरिति त्रिः यस्मायवायाव इति आय ॥ १ ॥ भ०

कम्बूनथ समादध्मुः कोणैर्भेर्यो निजघ्निरे ।
वेणून् पुपूरिरे गुल्गा जुगुञ्जुः करघट्टिताः ॥ २ ॥
वायद्याञ्चक्रिरे ढक्काः पणवा दध्वनुर्हताः ।
काहलाः पूरयाञ्चक्रुः पूर्णाः पेराश्च सस्वनुः ॥ ३ ॥

कम्बूनित्यादि । अथ सैन्यप्रेषणानन्तरं कम्बून् समादध्मुः शब्दितवन्तः शङ्खिकाः कोणैर्वाद्यवादनैः काष्ठमयैः भेर्यो निजघ्निरे ताडिताः कर्मणि लिट् वेणून् वंशान् पुपूरिरे सुखमरुता पूरितवन्तः पूरी आप्यायन इति दैवादिकोऽनुदात्तात्तेत् गुल्गाः समवामनाः करघट्टिताः अङ्गुलिघृष्टाः जुगुञ्जुः शब्दितवत्यः गुजि अव्यक्ते शब्दे ॥ २ ॥ ज० म०

कम्बूनित्यादि । अथ प्रेषणादनन्तरं सैनिकाः कम्बून् शङ्खान् समादध्मुः शब्दायितवन्तः ध्मा अग्नियुतौ ध्वनौ उस् द्वित्वं झभखथर्हेति खेर्हुखत्वं धस्य दश्च खेदाद्यचो लोप्य इति खेर्मलोपः ज्खेचीति प्रकृतेरालोपः कैश्चित् भेर्यो हतत् ढक्काः कोणैर्निजघ्निरे ताडिताः हन्तेः कर्मणि ठी हनगमित्युङ्लोपः खेर्होर्घोऽणिति चेति प्रकृतेर्हस्य घत्वं हनोऽ इति म्नादेशः कोणशब्देन वाद्यवादनकाष्टदण्डादय उच्यन्ते वेणून् वंशान् केचित् सुखमारुतैः पुपूरिरे पूरितवन्तः पूरीयङ्पूर्त्तौ करेण घट्टिता अभिहता गुल्गा वाद्यभेदा जुगुञ्जुः शब्दं चक्रुः गुजिकूजने हसुङ्नलोपोऽणाविति विधीयमानो न लोपो नेदित्पूजार्थाञ्चोरित्यनेन प्रतिषिध्यते अतएवेदितोनुण् लभ्यते ॥ २ ॥ भ०

वादेत्यादि । ढक्का वाद्याञ्चक्रिरे वादितवन्तः ढक्कावादका इत्यर्थः वदेर्हेतुमण्यन्तात् आमि अयामन्नित्यादेशः आम्नित्ययवदिति क्रञोऽनुप्रयोगस्यात्मनेपदञ्चेति आम्नित्ययादात्मनेपदस्य विहितत्वात् पणवाः वाद्यविशेषाः हताः पाणिकैस्ताडिताः दध्वनुर्ध्वनिताः काहलाः गोपुच्छसंस्थानाः पूरयाञ्चक्रुः पूरितवन्तः पूरि आप्यायन इति चौरादिकस्योदात्तेत्ततोरूपं पेराः खरमुखाकाराः पूर्णा सुखमरुता सस्वनुः फणाश्च सप्तानामिति लिटि एत्वविधानस्य विकल्पितत्वात् नैत्वम् ॥ ३ ॥ ज० म०

वादयामित्यादि । केचित् ढक्काः वादितवन्तः वदेर्जिःर्बिजादीत्यादिना त्यान्तत्वादाम् भक्त्रन्नाम इति क्रञोऽनुप्रयोगः पणवा वाद्यभेदा हतास्ताडिताः सन्तो दध्वनुः शब्दञ्चक्रुः केचित् काहला सुखमारुतैः पूरयाञ्चक्रुः चुरादेः पूरधातोरूपं पूरीयङ् पूर्त्तौ पुरक् चेति चकारात् पूर्त्तौ ह्रस्वतितयदीर्घौ स्यात्

मृदङ्गा धीरमास्वेनुर्हतैः स्वेने च गोमुखैः ।
घण्टाः शिग्रिञ्जिरे दीर्घं जह्लादे पटहैर्भृशम् ॥ ४ ॥
हया जिहेषिरे हर्षाद्गम्भीरं जगर्जुर्गजाः ।
संत्रस्ताः करभा रेटुश्चुक्रुवुः पत्तिपङ्क्तयः ॥ ५ ॥

धुस्तूरकुसुमोपमा । शुद्धताम्रमयी मध्यशुषिरा काहला मतेति नाट्यदर्पणे भेराः खरमुखाकाराः मुखमारुतैः पूर्णाः सन्तः स्वस्वनुः शब्दञ्चक्रुः स्वनभिशब्दे स्वनण् चकारात् शब्दे णिच्वात् फणादिः तृफलेत्यादिना विभाषया अत एत्वं खिलोतश्च तद्भावपक्षे रूपमिदम् ॥ ३ ॥ भ०

मृदङ्गा इत्यादि । मृदङ्गा सुरजाः धीरं आस्वेनुः गम्भीरं ध्वनिताः एत्वपक्षे रूपं गोमुखैर्वाद्यविशेषैः हतैः स्वेने शब्दितं भावे लिट् घण्टाः दीर्घं शिग्रिञ्जिरे उच्चैः शब्दितवत्यः पटहैर्भृशमत्यर्थं जह्लादे शब्दितं भावे लिट् ॥ ४ ॥ ज० भ०

मृदङ्गा इत्यादि। मृदङ्गा धीरं गम्भीरं यथा स्यात्तथा आस्वेनुः शब्दञ्चक्रुः तृफलेत्यादिना स्वनेरत एत्वं खिलोपश्च चर्म्मणा नद्धवद्नो मध्ये चैव पृथुर्भवेत् । मृत्तिकानिर्म्मितश्चैष मृदङ्ग इति कीर्त्तित इति भरतः हतैस्ताडितैर्गोमुखैः स्वेने शब्दितं भावे ठी घण्टा दीर्घमुच्चैः शिग्रिञ्जिरे शिजि न किङ् अस्फुटध्वनौ पटहैर्भृशमत्यर्थं जह्लादे शब्दितं ह्लादङ् च स्वने भावे रूपम् ॥ ४ ॥ भ०

हया इत्यादि । हया अश्वाः हर्षात् जिहेषिरे हेषितवन्तः हेष अव्यक्ते शब्दे भौवादिकोऽनुदात्तेत् अभ्यासस्य इति एत इङ्गवति गजा गम्भीरं मन्द्रं जगर्जुः गर्जितवन्तः गजगर्जीशब्दार्थौ करभा उष्ट्राः सन्त्रस्ताः नानावादित्रश्रवणात् रेटुः शब्दं कृतवन्तः रटपरिभाषण इति शब्दार्थः पत्तिपङ्क्तयः पदातिसंहतयः चुक्रुवुः शब्दितवत्यः गच्छत किन्निष्ठतेति क्रुशब्द इत्युदात्तेत्॥५॥ज०भ०

हया इत्यादि । हया अश्वा हर्षात् जिहेषिरे शब्दं चक्रुः हेषृङ्सर्पणे ऽहेषृचखने अश्वानामिति चकारात् हेषृङपि अश्वानां स्वने गजा गम्भीरं यथास्यात्तथा जगर्जुः गर्जनं चक्रुः गर्जन्ति स्मेति वा गजगर्जे गजि च स्वने इति चकारात् गजस्वने करभा उष्ट्रा नानावाद्यश्रवणात् संत्रस्ताः सन्तः शब्दं चक्रुः रटे च वाचि तृफलेत्यादिना अत एत्वं खिलोपश्च पत्तिपङ्क्तयः पदातिसमूहाः चुक्रुवुः शब्दं चक्रुः क्रुङ्शब्दे कुल चेति चकारात् शब्दे किट्टीढोपमिति अभिट्टाः कित्त्वादगुणत्वे भ्रुध्वोरखचीति उव् ॥ ५ ॥ भ०

तुरङ्गाः पुस्फुटुर्भीताः पुस्फुरुर्हृषभाः परम् ।
नार्य्यश्चुक्षुभिरे मल्लुर्मुमुहुः शुशुचुः पतीन् ॥ ६ ॥
जगर्जुर्जह्रषुः शूरा रेजुस्तुष्टुविरे परैः ।
बबन्धुरङ्गुलित्राणि सन्नेद्धः परिनिर्ययुः ॥ ७ ॥

तुरङ्गा इत्यादि । तुरङ्गा अश्वा भीता वादित्रश्रवणात् पुस्फुटुः स्फुटिताः भयादितस्ततो गताः स्फुटविसरणे हृषभाः परं पुस्फुरुः सुष्ठु वलिताः स्फुरचलने नार्य्यश्चुक्षुभिरे अस्माकमायातो वियोग इति क्षोभमुपगताः व्यस्तचित्ता जाता इत्यर्थः काश्चिदामल्लुः स्म गात्रत्वये मुमुहुः काश्चिन्मोहमुपगताः पतीन् काश्चित् शुशुचुः शोचितवत्यः हा कष्टं नियतं विनष्टा इति ॥ ६ ॥ ज० म०

तुरङ्गा इत्यादि । गजादिदर्शनाद्भीतास्तुरङ्गाः पुस्फुटुरितस्ततो गताः स्फुटद्विकासे हृषभाः परमत्यर्थं पुस्फुरुश्चलिताः स्फुरणस्फूर्त्तौ चले नार्य्यश्चुक्षुभिरे पतिमरणशङ्कया क्षोभं प्रापुः क्षुभस्वाङ्गसञ्चले अतएव मल्लुः कान्तिरहिता बभूवुः म्लै कान्तिसंक्षये एचोऽयित्येति आ उस्येचीत्यालापः ततो मुमुहुः मोहं प्रापुः मुह्वल्जिवैचित्त्ये पतीन् शुशुचुः शोचितवत्यः शुचशोके ॥६॥ भ०

जगर्जुरित्यादि । शूरा जगर्जुः अस्माभिर्हृष्टाः शूराः का यास्यन्तीति शब्दितवन्तः तथा जह्रषुः तुष्टाः चिरमायातः समर इति हृषतुष्टौ अतएव रेजुः शोभन्ते स्म रणाच्च सम्पानामित्येत्वाभ्यासलोपौ परैरन्यैस्तुष्टुविरे स्तुताः भवतामग्रतः समरे के तिष्ठन्तीति अङ्गुलित्राणि बबन्धुः बध्नन्ति स्म बधबन्धने तथा परे सन्नेद्धः कवचानि बध्नन्ति स्म णहबन्धने परिनिर्ययुः निष्क्रान्ताः ॥ ७ ॥ ज० म०

जगर्जुरित्यादि । शूरा जगर्जुः जेष्याम इति शब्दं चक्रुः गर्जशब्दे तथा जह्रषुः चिरात् प्राप्तः संग्राम इति मत्वा तुष्टाः हृषु हृष्यञ्जितुष्टौ रेजुः शुशुभिरे राजृञदीप्तौ णित्त्वात् रणादिः तृफलेत्यादिना अत एवं खिलोपश्च परैरन्यैस्तुष्टुविरे स्तुताः ष्टुञस्तुतौ कर्म्मणि ठौ खेराद्यच इत्यादिना शसादिखपान्तत्वात् खेरादिलोपः भ्वाद्यादिष्ण इति षस्य सत्वात् किलादिति षः अङ्गुलित्राणि बबन्धुः बध्नन्ति स्म बन्धौगबन्धकृधक्वन्धे स्नात्द्यपिल्किदेति किन्त्वाभावपक्षे हलङ्गलोपोऽणावित्यस्याप्रवृत्तेर्नलोपाभावः यद्वा स्नात्द्यपिल्किदेत्यत्र वाशब्दो व्यवस्थावाची तेन मन्थादेर्विभाषया किन्त्वं बन्धादेन्तु किन्त्वाभाव एव तेन ममन्थुः ममन्थुः सस्वजे सस्वञ्जे इत्यादिरूपद्वयं दृश्यते बबन्धुः बभञ्जुः ददंशु-

धनूंष्यारोपयाञ्चक्रुरारुरुक्षू रथादिषु ।
असीनुद्वहदुर्दीप्तान् गुर्वीरुज्झित्तिपुर्गदाः ॥ ८ ॥
शूलानि भ्रमयाञ्चक्रुर्वाणानादर्दिरे शुभान् ।
भ्रेमुश्चुकुर्दिरे रेसुर्ववल्गुश्च पदातयः ॥ ९ ॥

रित्यादयो नित्यं परे तु इन्धो लिटि च सञ्ज्ञो वेति नकारलोपार्थं सूत्रं कुर्वन्ति इन्धधातोरामि न स्यात् आमोऽभावपक्षे नित्यं नलोपः सनूजस्सुवा अन्यत्र सां नलोपाभाव इति अङ्कुलिं त्रायत इति कनजनादिति डः सन्नेङ्डः सन्नाहं कृतवन्तः सन्नह्यौ बभे परिनिर्ययुः निर्गताः यालगतौ ॥ ७ ॥ भ०

धनूंषीत्यादि । धनूंषि आरोपयाञ्चक्रुः आरोपितगुणानि कृतवन्तः रुहः-मोन्यतरस्यामिति सौ पादेशः आरुरुक्षवारोहन्ति स्म रथादिषु द्वितीया न कृता अधिकरणत्वेन विवक्षितत्वात् दीप्तान्निष्कलङ्कानसीन् वहन्तः क्रोशंदाकृष्य उद्यतान् कृतवन्तः वहेरुद्यमने गुर्वीर्गदा उज्झित्तिपुः उत्क्षिप्तवन्तः ॥ ८ ॥ ज० म०

धनूंषीत्यादि । धनूंषि रथे हस्ते वा आरोपयाञ्चक्रुरारोपितवन्तः आरोपितगुणानि चक्रुरिति केचित् जिरुहौजन्यांजिः रुहःषड्वेति षड्ः णुधूङ् इति गुणः त्यान्तत्वादाम् रथादिषु आरुरुक्षवः आरोहन्ति स्म कर्मणोऽधाराविवक्षया न द्वितीया दीप्तान् असीन् खड्गान् उद्वहन्तरुद्यतान् चक्रुः वहेरुद्यमे भभखघेत्यादिना खेर्हकारस्य अकारः गुर्वीर्महतीर्गदाश्चिक्षिपुः उत्क्षिप्तवन्तः क्षिपगजौक्षिप्यो नुदि खेराद्यच इत्यादिना खेः षकारस्य लोपः भभखघेत्यादिना खेः कस्य चत्वम् ॥ ८ ॥ भ०

शूलानीत्यादि । शूलानि भ्रमयाञ्चक्रुः भ्रमयन्ति स्म मान्तत्वान्मित्त्वे ह्रस्वत्वं बाणान् शुभान् युद्धयोग्यानादर्दिरे गृहीतवन्तः आजोर्दासस्य विहरण इति तङ् पदातयश्च भ्रेमुः इतस्ततो याताः चुकुर्दिरे शब्दपाणयः क्रीडितवन्तः कुर्दखुर्दगुर्दक्रीडायामेव रेसुः भयकृते निनादान् कृतवन्तः रसशब्दे ववल्गुः प्रसृताः वल्गतिरुख उखीत्यत्र पठ्यते ॥ ९ ॥ ज० म०

शूलानीत्यादि । शूलानि भ्रमयाञ्चक्रुः भ्रमयन्ति स्म भ्रमुजणचाले जिः वृद्धिः घटादिजनीत्यादिना अमन्तत्वात् ह्रस्वः शुभान् शोभमानान् बाणान् आदर्दिरे गृहीतवन्तः आङ्पूर्वोदादातिर्ग्रहणे आदाजोऽखप्रहार इति मं पदातयो भ्रेमुः इतस्ततो गच्छन्ति स्म चुकुर्दिरे क्रीडन्ति स्म कुर्दङ्क्रीडायां रेसुः शब्दं चक्रुः रसशब्दे ववल्गुः धावन्ति स्म वल्गुत्रगिलगित्रजे ॥ ९ ॥ भ०

समुत्पेतुः कषाघातैरश्वग्राकर्षैर्ममङ्क्रिरे ।
अश्वाः प्रद्रुद्रुवुर्मोक्षे रक्तं निजगरुः श्रमे ॥ १० ॥
गजानां प्रददुः शारीन् कम्बलान् परितस्तरुः ।
तेनुः कक्षां ध्वजांश्चैव समुच्छिश्रियुरुच्छिखान् ॥ ११ ॥
विशिश्वासयिषाञ्चक्रुरालिलिङ्गुश्च योधितः ।

समुत्पेतुरित्यादि । कषाघातैः चर्म्मलताप्रहारैः अश्वाः समुत्पेतुः उत्प्लुताः रश्मग्राकर्षैः प्रग्रहाकर्षणैः ममङ्क्रिरे शोभन्ते स्म सङ्कोचितघोणत्वात् मङ्गिमखण्डने मोक्षे रश्मीनां प्रसारणे प्रदुद्रुवुः वेगेन गताः श्रमे सति खलीनप्रभवं रक्तं निजगरुः पीतवन्तः गॄनि गरणे क्रुच्छ्रुतामिति गुणः ॥ १० ॥ ज०म०

समुत्पेतुरित्यादि । अश्वादेस्ताडनी कषा तदभिघातैरश्वाः समुत्पेतुः उत्प्लुताः पतनोत्पजगत्यां रश्मग्राकर्षैः प्रग्रहाकर्षणैर्ममङ्क्रिरे शुशुभिरे संकुचितवेगत्वात् मकिङ्भूषे किरणप्रग्रहौ रश्मी इत्यमरः मोक्षे रश्मिसंयोजनकरणे प्रदुद्रुवुः धावन्ति स्म द्रुगतौ श्रमे सति खलीनप्रभवं रक्तं निजगरुः पीतवन्तः उज्जगरुरिति पाठे क्रुकणीभ्यां रक्तसङ्गीर्णवन्तः गॄनिगरणे क्रतोर्णुः कित्त्वामिति गुणः ॥ १० ॥ भ०

गजानामित्यादि । गजानां शारीन् प्रददुः पृष्ठेषु आरोपितवन्तो हस्तिपका इत्यर्थात् तथा कम्बलान् नानावर्णविचित्रान् परितस्तरुः आस्तीर्णवन्तः कक्षां रेमादिमयीं तेनुः विस्तारितवन्तः उच्छ्रितान् उद्गतशिखान् ध्वजान् समुच्छिश्रियुः उत्क्षिप्तवन्तः ॥ ११ ॥ ज० म०

गजानामित्यादि । हस्त्यारोहा गजानां शारीन् युद्धोपकरणानि प्रददुः पृष्ठे आरोपितवन्तः शारिर्युद्धोपकरणे तथा शाकुनिकान्तरे इति विश्वः कम्बलान् परितस्तरुः आस्तीर्णवन्तः कुथांश्चेति पाठे चित्रकम्बलानित्यर्थः कुथः स्याच्चित्रकम्बल इति विश्वः स्तृञ्आच्छादन इत्यस्य क्रतोर्णुः कित्त्वामिति गुणः कक्षां उदराद्यवस्थितां रज्जुनेतुर्विस्तारितवन्तः तनदृञ्विस्तृतौ कक्षोदराद्यालका काञ्चीप्रकोष्ठगजरज्जुरिति विश्वः उन्नतशिखान् ध्वजदण्डान् समुच्छिश्रियुः उत्क्षिप्तवन्तः श्रिञ्सेवने उत्पूर्व्वोऽयमुत्क्षेपणेऽपि क्षुध्वारण्यचौति इयः ॥ ११ ॥ भ०

विशिश्वासयिषाञ्चक्रुरित्यादि । योधितः आत्मीया विशिश्वासयिषाञ्चक्रुः विश्वासयितुमिच्छन्तः मय्यन्यथा न भवनीयमिति ख्यापनस्य रूपं आलिलिङ्गुश्च श्लिष्यन्ति स्म विनिर्गमत्यर्थः आङ्पूर्व्वः परिष्वङ्गे वर्त्तते बालान् शिशून् आजघ्नुः

आजघ्रुर्मूर्ध्नि बालांश्च चुचुम्बुश्च सुतप्रियाः ॥ १२ ॥
गम्भीरवेदिनः संन्नाह्यजा जग्मुरक्षताः।
वव्रधे शुशुभे चैषां मदो हृष्टैश्च पुप्लुवे ॥ १३ ॥
मृगाः प्रदक्षिणं सस्रुः शिवाः सव्यववाशिरे।
अवामैः पुस्फुरे देहैः प्रसेदे चित्तवृत्तिभिः ॥ १४ ॥

शिरसि आघ्रातवन्तः तथा चुचुम्बुश्च चुम्बितवन्तः सुतप्रियाः सुता प्रिया येषामिति ॥ १२ ॥ ज० म०

विशीत्यादि। योधा योधितः स्त्रियो विशिश्वासयिषाञ्चक्रुर्विश्वासयितुं यान्तयितुमिष्टवन्तः स्वप्राणने जिः सन् त्यान्तत्वादाम् तथा आलिलिङ्गुः आलिङ्गनञ्चक्रुः लिगिगतौ आङ्पूर्व्व आश्लेषमाह सुताः प्रिया येषां ते बालान् मूर्ध्नि आजघ्रुः शिरसि आघ्रातवन्तः घ्रागन्धग्रहणे झभखथेत्यादिना खेर्धस्यात अत्वं ततो जत्वं चुचुम्बुश्च चुम्बितवन्तश्च चुविकि चुम्बने स्त्रिय आलिङ्ग्य बालकानाभाष्य रणाय जग्मुरित्यर्थः ॥ १२ ॥ भ०

गम्भीरवेदिन इत्यादि। ये गजा मत्तत्वादङ्कुशैर्दृढमाहताः गम्भीरं विन्दन्तीति ते गम्भीरवेदिनः तस्मिन् काले संन्ना युद्धोपयिकीर्जग्मुः गृहीतवन्तः अक्षताश्चोत्तांकुशैरनाहताः सन्तः हृष्टैश्च गजैः पुप्लुवे प्लुतं भावे लिट् हर्षादेषां मदो वव्रधे वर्द्धते स्म शुशुभे च शोभते स्म ॥ १३ ॥ ज० म०

गम्भीरेत्यादि। अङ्कुशैर्दृढमाहन्यमाना अपि ये न विषीदन्ति ते गम्भीरवेदिनो गजा अक्षता अङ्कुशैरहता अपि संन्नां युद्धोपयुक्तां जग्मुः युद्धकुशलत्वात् यह उपादाने व्यथमहेत्यादिना खेर्जिः ग्रहकारस्य झभखथेत्यादिना अत्वं यहस्वपाद्योरिति ग्रहतेर्जिः अक्षता इति क्षणक्षिणदुजवधे क्ते वनतनादिनिमामिति नलोपः। त्वग्वेधादुधिरस्रावादन्तरव्यथनादपि। संन्नां न लभते यस्तु गजो गम्भीरवेद्यसौ। एषां हस्तिनां मदो ववृधे शुशुभे च दृधङ्वृद्धौ शुभक्लृप्तौ मत्तैर्गजैर्हृष्टैः पुप्लुवे वेगेन गतं प्लुङ् सर्पणे भावे रूपम् ॥ १३ ॥ भ०

मृगा इत्यादि। एवं संनह्य चलतां मृगाः दक्षिणपार्श्वेन गताः सव्यववाशिरे वामपार्श्वस्थाः शिवाः शब्दितवत्य इत्यर्थः वाश्शब्दे अवामैर्दक्षिणैर्देहैर्भुजादिभिः पुस्फुरे स्फुरितं भावे लिट् चित्तवृत्तिभिर्मनोवृत्तिभिः प्रसेदे प्रसन्नं पूर्व्ववत्सेर्भावे लिट् ॥ १४ ॥ ज० म०

मृगा इत्यादि। मृगाः प्रदक्षिणं सस्रुर्गमनं चक्रुः मृगतौ शिवाः मृगालाः

प्राच्यमाञ्जिघिषाञ्चक्रे प्रहस्तो रावणाज्ञया।
द्वारं ररङ्क्तुर्याम्यं महापार्श्वमहोदरौ ॥ १५ ॥
प्रययाविन्द्रजित्प्रत्यगियाय स्वयमुत्तरम्।
समध्यासिसिषाञ्चक्रे विरूपाक्षः पुरोदरम् ॥ १६ ॥

सव्यदक्षिणपार्श्वस्थाः सव्यो ववासिरे शब्दं चक्रुः रा रुशब्दे वाश्डम्पीति अपि शब्दात् शब्दे शिवाशब्दः पुंस्यृगालेऽपि स्त्रीलिङ्ग एव अवामैर्दक्षिणैर्दैर्भुजादिभिः पुस्फुरे स्फुरितं चित्तवृत्तिभिरपि प्रसेदे प्रसन्नं स्फुरश्चिस्फूर्त्तौ चले षदजौ विषादे शरणे गतौ प्रपूर्वः प्रसन्नतामाह भावे रूपद्वयम् ॥ १४ ॥ भ०

प्राच्यमित्यादि। एवं शुभनिमित्तोत्साहितः प्रहस्तो रावणाज्ञया प्राच्यं प्राचि भवं पूर्वद्वारं घुप्रागिति यत् आञ्जिघिषाञ्चक्रे गन्तुमिष्टवान् अहिगतावित्यस्योदात्ततः सनीट् अजादेर्द्वितीयस्येति द्विर्वचनं नन्द्रेति नकारो न हिरुच्यते आत्मनेयवदित्यात्मनेपदं तथा महापार्श्वमहोदरौ राक्षसौ याम्यं द्वारं दक्षिणं यमो देवता अस्येति दित्यदित्यादित्य यमाच्चेति वक्तव्यमिति उक्तं तेन प्राग्दीव्यतीयेर्थे ण्यप्रत्ययः ररङ्क्तुः गतौ रघिगताविति अस्य रूपम् ॥ १५ ॥ ज०म०

प्राच्यमित्यादि। एवं शुभनिमित्तं दृष्ट्वा प्रहस्तो रावणाज्ञया प्राच्यं द्वारं पूर्वद्वारं आञ्जिघिषाञ्चक्रे गन्तुमिषेष अहिङ्गतौ सन् वसोऽरस्येतीम् स्वादौ नवद्रोऽये नाजन्तादेरादिर्द्विरिति वचनात् सन् यङ्लो हिरिति हिसभागस्यैव द्वित्वं ल्यान्तत्वादाम् प्राच्यां भवमिति ढधेकादिति ण्यः महापार्श्वमहोदरौ याम्यं दक्षिणं द्वारं ररंघतुः जग्मतुः रघि गत्यां यमो देवता अस्येति विकारसङ्केत्यादिना ण्यः ॥ १५ ॥ भ०

प्रययावित्यादि। प्रत्यक् पश्चिमद्वारं इन्द्रजित् प्रययौ गतवान् प्रतीच्यान्द्वारमिति सप्तम्यादिना विहितस्यास्तातेरञ्लुक् भसंज्ञाभावात् अच इत्यकारलोपो निवर्त्तते चाविति दीर्घत्वञ्च स्वयमिति रावण उत्तरद्वारमियाय गतः विरूपाक्षो राक्षसः पुरोदरं पुरमध्यं समध्यासिसिषाञ्चक्रे समध्यासितुमिष्टवान् आस्तेरनुदात्ततः सनि इटि अजादिः पूर्ववत्सन इत्यात्मनेपदं अनुप्रयोगस्यात्मनेपदम् ॥ १६ ॥ ज० म०

प्रययावित्यादि। इन्द्रजित् प्रत्यक् पश्चिमं द्वारं प्रययौ यालगतौ णवातांडौरिति ढौः टेर्लोपोडितीत्यालोपः प्रतिपूर्वादञ्चतेः क्विबन्तात् दिक्शब्दात् दिग्देशकालेत्यादिति सप्तम्याः स्तात् तस्य लोपः प्रतीच्यां दिशीत्यर्थः स्वयं रावण उत्तरं द्वारं इयाय गतः इणालगतौ अणित्यन्तोजिति वृद्धौ खेर्योरियुवण इतीयः

शुश्राव रामस्तत्पूर्वं प्रतस्थे च ससैनिकः ।
विस्फारयाञ्चकारास्त्रं बबन्धाथ च वाणधी ॥ १७ ॥
ईक्षाञ्चक्रेऽथ सौमित्रिमनुजज्ञे बलानि च ।
नमश्चकार देवेभ्यः पर्णतल्पं सुमोच च ॥ १८ ॥

विरूपाक्षः पुरोदरं लङ्कामध्यभागं समध्यासितुमिष्टवान् जिलास उपवेशने समधिपूर्वात् सन् इम् सिषभागस्य द्वित्वं त्यान्तत्वादाम् ॥ १६ ॥ भ०

शुश्रावेत्यादि । अथानन्तरं रामस्तत्पूर्वं रावणचेष्टितं शुश्राव श्रुतवान् प्रतस्थे च गन्तुं प्रवृत्तः समरप्रविभ्यःस्थ इति तङ् ससैनिकः सह योधैः सेनायां समवेता इति सेनया वेति पक्षे ठक् अस्त्रं धनुर्विस्फारयांचकार आरोथाक्षष्टवान् स्फूरतेश्चि स्फुरोर्णावित्यात्वं बबन्ध च वाणधी तूणीरे बभ्राति स्म वाणा धीयन्तेऽस्मिन्निति कर्म्मण्यधिकरणे वेति किः ॥ १७ ॥ ज० म०

शुश्रावेत्यादि । अथानन्तरं रामस्तत्पूर्वं रावणचेष्टितं दूतद्वारा शुश्राव श्रुतवान् श्रुत्वा सैनिकैः सह प्रतस्थे प्रस्थितः स्वास्थाने प्रपूर्व्वो गतिमाह प्रतिज्ञानिर्णयेत्यादिना मं सेनायां समवैतीति ठेकादिति ष्णिकः सेनायां समवेता ये सैन्यास्ते सैनिकाश्च ते इत्यमरः अस्त्रं धनुर्विस्फारयांचकार आरोप्य कृष्टवान् स्फुरश्चि स्फूर्त्तौ चले जिः क्रीजीङ्नोऽजाचिस्फुरेति पक्षे उकारस्यात्वं स्फुरधातो रूपं वा वाणधी तूणइंयञ्च बबन्ध वाणा धीयन्ते यत्रेति ढाड्ढे इति किः । १७ ॥ भ०

ईक्षामित्यादि । सौमित्रिञ्च युद्धाय ईक्षांचक्रे दृष्टवान् ईक्षेरनुदात्तेत् इजादेरित्यात् बलानि च अनुजज्ञे अनुज्ञातवान् अनुपूर्व्वो जानातिरनुज्ञाने वर्त्तते तस्य परस्मैपदित्वात् अनुपसर्गादिति वचनादात्मनेपदं उपसर्गेण युक्तत्वात् नमश्चकार देवेभ्यः नमःशब्दयोगे चतुर्थी पर्णतल्पं पर्णशयनीयं सुमोच मुक्तवान् ॥ १८ ॥ ज० म०

ईक्षाञ्चक्र इत्यादि । रामः सौमित्रिं ईक्षाञ्चक्रे ददर्श ईक्षङ् दर्शने ष्विजादीत्यात् बलानि सैन्यानि च अनुजज्ञे अनुज्ञातवान् युद्धायेत्यर्थात् ज्ञागबोधने उपसर्गप्रतिरूपकोऽयमनुशब्दः तेन जिज्ञप्त्रेत्यादिना मं किम्वा सौमित्रिं बलानि च ईक्षाञ्चक्रे अनुजज्ञे च अढादिति मं शब्दीह्याकाङ्क्षा शब्देनैव प्रपूर्य्यत इति कर्म्मविषयेऽपि कर्म्मानुक्तेः किम्वा अनुजज्ञे अनुज्ञातो रामेण विभक्तिव्यत्ययेन भावे रूपं देवेभ्यो नमश्चकार यक्तार्थेत्यादिना चतुर्थी

चकासाञ्चक्रुरुत्तस्थुर्नेदुरानशिरे दिशः ।
वानरा भूधरान् रेधुर्वभञ्जुश्च ततस्तरून् ॥ १९ ॥
ददाल भूर्नभो रक्तं गोष्पदप्रं ववर्ष च ।
मृगाः प्रसस्रुपुर्व्यामं खगाश्चुक्रुविरेऽशुभम् ॥ २० ॥

ननु कथमत्र उपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायात् द्वितीया न स्यादिति चेन्न अत्र नमःशब्दस्य वाचकत्वं तेनैव क्रियोऽन्वयान्न द्वितीया प्राप्तिः यदा तु क्रियः प्रणामार्थत्वं नमःशब्देन द्योत्यते तदा तन्न्यायात् द्वितीया यथा नारायणं नमस्कृत्येत्यादि पर्णतल्पं पल्लवरचितशय्यां सुमोच तत्याज पर्णशालमिति क्वचित्पाठः ॥ १८ ॥ भ०

चकासाञ्चक्रुरित्यादि । तदोऽनुज्ञानानन्तरं वानरा उत्तस्थुः उत्थिताः नेदुः शब्दितवन्तः दिश आनशिरे व्याप्ताः अश्नोतेश्चेत्यभ्यासस्य नेट् अत आदेरिति दीर्घत्वं भूधरान् पर्वतान् रेधुः उन्मूलितवन्तः राधोर्हिंसायामित्येत्वाभ्यासलोपः तरूंश्च वभञ्जुः भग्नवन्तः एवञ्च ते चकासाञ्चक्रुः शोभन्ते स्म कासृदीप्तावित्यस्मात् ॥ १९ ॥ ज० म० ।

चकासामित्यादि । ततोऽनन्तरं वानराश्चकासाञ्चक्रुः चकासृदीप्तौ विजादीत्वात् अनेकाचत्वात् उत्तस्थुः उत्थिताः नेदुः नदस्थिष्टोक्तौ दिश आनशिरे व्याप्नुवन्ति स्म अश्नूङ् व्याप्तिसंहत्योः स्वान्नादाद्दाद्यश्नोरिति खेरान् भूधरान् रेधुः उन्मूलितवन्तः राध्नोतेर्वृद्धौ अस्य हिंसार्थे तफलेत्यादिना पक्षे ऋत एवं खिलोपश्च तरूंश्च वभञ्जुः भनजोर्धोमोटने स्वादयपीदिति पक्षे क्ङित्त्वाभावान्नलोपाभावः ॥ १९ ॥ भ०

ददालेत्यादि । श्लोकद्वयं रावणवयोर्ब्रह्मास्त्रबन्धसूचनार्थमनिमित्तप्रदर्शनं भूर्ददाल विदीर्णा नभश्च रक्तं रुधिरं ववर्ष वृष्टवत् लिटः पित्त्वाद्कित्त्वे धातोर्गुणः कियत्प्रमाणं गोष्पदप्रं यावता गोष्पदं पूरयित्वा वर्षप्रमाणमित्यादिना णसुल् अलोपश्च मृगाः प्रसस्रुपुर्व्यामं वामपार्श्वेन गता इत्यर्थः खगाः पक्षिणोऽशुभान् अनिष्टांश्चुक्रुविरे शब्दितवन्तः कुङ्शब्दे अशुभमिति पाठान्तरं तत्र क्रियाविशेषणं वेदितव्यम् ॥ २० ॥ ज० म०

ददालेत्यादि । रामलक्ष्मणयोर्नागपाशबन्धनसूचनार्थं अमङ्गलं श्लोकद्वयेनोच्यते भूमिर्ददाल दलमिभेदे नभ आकाशं गोष्पदप्रं गोष्पदं पूरयित्वा रक्तं ववर्ष ष्टुञ् सेचने ष्टुञ्चेति चकारान् सेचनं पूरीआप्यायने इत्यस्मादर्षप्रमाणे क्वाणम्

उल्का ददृशिरे दीप्ता रुरुवुश्चाशिवं शिवाः ।
चचाल च मही रामः शशङ्के चाशुभागमम् ॥ २१ ॥
रावणः शुश्रुवान् शत्रून् राक्षसानभ्युपेयुषः ।
स्वयं युयुत्सयाचक्रे प्राकाराग्रे निषेदिवान् ॥ २२ ॥
निरासुः राक्षसा बाणान् प्रजङ्घः शूलपट्टिसान् ।
असींश्च वाहयाञ्चक्रुः पाशैश्चाचक्षुरुत्तैः ॥ २३ ॥

अक्षोपश्चेति परः खमते गोप्यदं प्राति पूरयतीति गोप्यदप्रं रक्तस्य विशेषणं गोप्यदपूरणेनैव रक्तवर्षप्रमाणं गम्यते प्रालपूर्त्तौ कृनजनादिति डः, वृगा वामं दिग्भागं प्रसरुपुर्गताः लरुपोर्गतत्वं अशुभाः खगा उलूकादयः चुक्रुविरे कुङ्शब्दे अशुभमिति पाठे क्रियाविशेषणम् ॥ २० ॥ भ०

उल्का इत्यादि । दीप्ता उल्का ददृश्रिरे दृष्टाः अशिवा अनिष्टाः शिवा गोमायवः रुरुवुः अब्दितवन्तः मही च चचाल कम्पिता ह्लाय्योर्विधूनन इत्यनुदात्तेत् रामश्चाशुभागमनमनिष्टप्राप्तिमाशशङ्के शङ्कते स्म चेतसः पर्य्याकुलत्वात् इदमप्यनिष्टमेव ॥ २१ ॥ ज० म०

उल्का इत्यादि । दीप्ता उल्का दृश्यन्ते स्म शिवाः शृगालाः अशुभं रवं चक्रुः अशुभा इति पाठे अनिष्टा इत्यर्थः अशिवमिति क्वचित्पाठः रुलध्वनौ मही चचाल कम्पिता ह्लाय्योर्विधूनने रामश्च अशुभस्यागमनं शशङ्के शङ्कितवान् अकुशलदर्शनेन पर्य्याकुलत्वात् शकिङ्लासशङ्कयोः ॥ २१ ॥ भ०

रावण इत्यादि । राक्षसानभ्युपेयुषोऽभिमुखमुपगतवन्तो ये शत्रवो रामादयस्तान् रावणः शुश्रुवान् स्वयञ्च प्राकाराग्रे निषेदिवान् निषण्णः सन् भाषायां सदवसेत्यादिना क्वसुः युयुत्सयाचक्रे योद्धुमिच्छन्तं प्रयोजितवानित्यर्थः रुनन्तण्यन्तस्य रूपम् ॥ २२ ॥ ज० म०

रावण इत्यादि । राक्षसानभ्युपेयुषोऽभिमुखमागतान् शत्रून् रामादीन् शुश्रुवान् रावणः स्वयं प्राकारस्याग्रे निषण्णः सन् राक्षसान् योद्धुमिच्छां कारयामास युध्योऽयुद्धे सन् जिः आम् इणगतौ ठोपमवदिति क्वसुः वसोर्घसेकाङ्ङिणात इति इम् यिणोऽच्यणाविति यः खेः कितीति दीर्घः वसोर्व्वसेमिति इमसहितस्य वस्य उत्वं सदेः क्वसौ तफलेत्यादिना अतएत्वं ह्रिखलेपश्च ॥२२॥ भ०

निरासुरित्यादि । रावणप्रचोदिता राक्षसा बाणान्निरासुः क्षिप्रवन्तः

भल्लैश्च विभिदुस्तीक्ष्णैर्विविधुस्तोमरैस्तथा ।
गदाभिश्चूर्णयाञ्चक्रुः शितैश्चक्रैश्च चिच्छिदुः ॥ २४ ॥
वानरा मुष्टिभिर्जघ्नुर्ददंशुर्दशनैस्तथा ।
निरास्यंश्च गिरींस्तुङ्गान् द्रुमान् विचकरुस्तथा ॥ २५ ॥

शूलपट्टिशान् शूलसहितान् पट्टिशान् शाकपार्थिवादित्वात्समासः ह्रस्वे तु जातिरप्राणिनामित्येकवद्भावः स्यात् तान् प्रजघ्नुः त्यक्तवन्तः ओहाक्त्यागे असींश्च खड्गान् वाहयाञ्चक्रुः व्यापारितवन्तः ण्यन्तस्य रूपं पाशैस्ततैर्विस्तृतैः आचक्षुः आकृष्टवन्तः किन्त्वे गुणप्रतिषेधः ॥ २३ ॥ ज० भ०

निरास्यन्नित्यादि । राक्षसा बाणान् निरास्यन् चिक्षिपुः अस्यतेर्लृटि शूलपट्टिशान् प्रजघ्नुः यतोरुपरि त्यक्तवन्तः ओहाक्त्यागे शूलानि च पट्टिशानेति इतरेतरद्वन्द्वः परे तु शूलसहिताः पट्टिशा इति शाकपार्थिवादिः द्वन्द्वे हि अप्राणिजातित्वान्नपुंसकत्वं स्यादित्याहुः असीन् खड्गान् वाहयाञ्चक्रुः वहेर्ण्योः प्रापणे जिः ततैर्विस्तृतैः पाशैराचक्षुराकृष्टवन्तः क्षपौ आकृषि ॥ २३ ॥ भ०

भल्लैरित्यादि । भल्लैर्विभिदुर्विदारितवन्तः तीक्ष्णैस्तथा तोमरैर्विविधुस्ताडितवन्तः व्यधेर्प्रहिज्यादिना सम्प्रसारणं गदाभिश्च चूर्णयाञ्चक्रुः चूर्णितवन्तः सत्येत्यादिना णिच् चूर्णप्रेरणे इति चौरादिकत्वाद्वा चिच्छिदुः छिन्नवन्तः राक्षसयुद्धमेतत् ॥ २४ ॥ ज० भ०

भल्लैरित्यादि । राक्षसास्तीक्ष्णैर्भल्लैर्विभिदुः भिदिर्ज्रधौभिदि तथा तोमरैर्विविधुः व्यध्यौताड़े व्यथयतेति खेर्जिः ग्रहस्वपादीरिति प्रकृतेर्जिः गदाभिश्चूर्णयाञ्चक्रुश्चूर्णितवन्तः चूर्णकर्षे चूर्णशब्दाद्वा लेः कृत्याख्याने जिरिति जिः शितैस्तीक्ष्णैश्चक्रैश्चिच्छिदुः छिदिरौञ् छेदे ॥ २४ ॥ भ०

वानरा इत्यादि । वानरा मुष्टिभिर्जघ्नुः हतवन्तः राक्षसानित्यर्थात् ददंशुः दष्टवन्तः गिरीन्निरास्यन् क्षिप्तवन्तः द्रुमान् विचकरुर्विक्षिप्तवन्तः कविक्षेपे कृञ्छ्रतामिति गुणः ॥ २५ ॥ ज० भ०

वानरा इत्यादि । एवं राक्षसेषु युध्यमानेषु वानरा मुष्टिभिर्जघ्नुर्हतवन्तः राक्षसानित्यर्थात् हनलोगतौबधे हनगमित्यङ् लोपः तथा दन्तैर्ददंशुर्दशन्ति स्म दन्तौदंशने तुङ्गान् उच्चान् गिरीन् निरास्यन् क्षिप्तवन्तः तथा द्रुमान् वृक्षान् विचकरुः विक्षिप्तवन्तः कृञविक्षेपे कृतो णुः कित्त्वामिति णुः ॥ २५ ॥ भ०

लाङ्गूलैर्लोठयाञ्चक्रुः शालैर्निघ्नंश्च संचयम् ।
नखैश्च चक्रतुः क्रुद्धाः पिपिषुश्च क्षितौ बलात् ॥ २६ ॥
संबभूवुः कबन्धानि प्रोद्धः शोणिततोयगाः ।
तेरुर्भटास्यपद्मानि ध्वजैः फेणैरिवाबभे ॥ २७ ॥
रक्तपङ्के गजाः सेदुर्न प्रचक्रमिरे रथाः ।

लाङ्गूलैरित्यादि । लाङ्गूलैर्लोठयाञ्चक्रुः लाङ्गूलैर्व्यापादितवन्तः रुठलुठ-प्रतिघाते परस्मैपदिनो ण्यन्तस्य रूपं तलैर्हस्ततलैः सङ्घातं विनाग्रहस्तैर्निघ्नुः नीतवन्तः नखैश्च चक्रतुरुच्छिन्नवन्तः क्षतोच्छेदने क्रुधाः वानराः बलात् रुषात् क्षितौ पिपिषुश्चूर्णितवन्तः ॥ २६ ॥ ज० म०

लाङ्गूलैरित्यादि । वानराः लाङ्गूलैः राक्षसान् ताडितवन्तः लुठवादिवदित्यत्र वादिवदिति रुठधातोरर्थे प्रतीघाते उपघाते चेत्यर्थः धावतो हन्ति भाषार्था अकितो वा चुरादय इत्युक्तेः स्वार्थे जिः तलैश्चपेटैश्च संघातं निघ्नुः प्रापितवन्तः घीजप्रापणे शुध्योरित्यादिना यत्वं नखैरपि चक्रतुः क्षतोग्रपक्षिदि क्रुधाः सन्तः बलात् क्षितौ पिपिषुः धौपिञ्श्लूचूर्णने ॥ २६ ॥ भ०

संबभूवुरित्यादि । कबन्धानि संबभूवुः संभूतानि प्रतिसङ्घं व्यापादनात् कबन्धस्यैकस्योत्पादनात् शोणिततोयगाः शोणितनद्यः प्रोद्धः प्रकर्षेण प्रवृत्ताः वहेर्यजादित्वात् संप्रसारणं भटास्यपद्मानि योधमुखपद्मानि तेरुः प्लुतानि तृफलेत्यादिना एत्वाभ्यासलोपौ फेणैरिव ध्वजैः शोणितनदीषु आबभे शोभितं भावे च लिट् ॥ २७ ॥ ज० म०

संबभूवुरित्यादि । कबन्धानि संबभूवुः संभूतानि भूसत्तायां भुवोवन् टीत्वचीति वन् भुवोऽङ्त्वामिति खेरङ् कबन्धोऽस्त्री क्रियायुक्तमपमूर्द्धकलेवरमित्यमरः. रक्तनद्यः प्रोद्धः प्रवहन्ति स्म प्रवृत्ता इत्यर्थः वहेर्जौप्रापणे ऐदित्वात् यजादिः व्यथग्रहेत्यादिना खेर्जिः ग्रहस्वादीरिति मूलस्य जिः भटानां योधानां मुखपद्मानि अत्र नद्यां तेरुः प्लवने स्म ततरेऽभिभवे प्लुत्यां कृतो घुः तृफलेत्यादिना एत्वं खिलोपोऽपि पतितैर्ध्वजैस्तत्र नद्यां फेणैरिव आबभे शोभितं भालषदीप्तौ भावे रूपम् ॥ २७ ॥ भ०

रक्तेत्यादि । रक्तपङ्के गजाः सेदुः निषण्णाः रक्तपङ्कस्य बहुलत्वात् तथा रथा न प्रचक्रमिरे न गन्तुमारब्धाः प्रोपाभ्यामित्यात्मनेपदं तुरङ्गा निममज्जुः निमग्नाः भटाश्च गन्तुं नोत्तेष्ठिरे नोत्सहन्ते स्म ॥ २८ ॥ ज० म०

निममज्जुस्तुरङ्गाश्च गन्तुं नोत्सेहिरे भटाः ॥ २८ ॥
कोष्ट्या कोष्ट्या पुरद्वारमेकैकं रुरुधे द्विषाम् ।
षट्त्रिंशद्वरिकोष्ट्यश्च निवव्रुर्वानराधिपम् ॥ २९ ॥
तस्तनुर्जज्वलुर्मम्लुर्जग्लुर्ललुठिरे क्षताः ।
मुमूर्च्छुर्ववमू रक्तं तत्रषुश्चोभये भटाः ॥ ३० ॥

रक्तपङ्क इत्यादि । रक्तानां पङ्के गजा हस्तिनः सेदुरवसादं प्रापुः षद्लृजौ विषादे शरणे गत्यां तत्र रथा अपि गन्तुं न प्रारब्धाः क्रमगतौ मोपादारभ्य इति मं तुरङ्गाश्च तत्र निमग्नाः मस्जौ शुद्धौ स्नाने झषझसोरिति सस्य दत्वे स्तुभिष्ट्वात् भटा योधा गन्तुं न उत्सहन्ते स्म सहेस्तफलेत्यादिना एत्वं खिलुक् च ॥ २८ ॥ भ०

कोष्ट्येत्यादि । द्विषामेकैकं पुरद्वारं वानराणां कोष्ट्या कोष्ट्या रुरुधे रुद्धं कर्मणि लिट् षट्त्रिंशद्वरिकोष्ट्यः वानरकोष्ट्यो वानराधिपं सुग्रीवं निवव्रुः व्याप्य स्थिताः ॥ २९ ॥ ज० भ०

कोष्ट्येत्यादि । द्विषां राक्षसानां एकैकं पुरद्वारं वानराणां कोष्ट्या कोष्ट्या रुरुधे रुद्धं रुधिर्धोञि व्याप्तौ कर्मणि ठी षट्त्रिंशद्वानरकोष्ट्यः वानराधिपं सुग्रीवं निवव्रुराप्तवन्तः वृञ्वृतौ संख्यामात्रवृत्तित्वात् कोष्ट्येत्येकवचनं वीप्सायां द्वित्वं लोकतः सिद्धम् ॥ २९ ॥ भ०

तस्तनुरित्यादि । उभये भटा रामरावणसम्बन्धिनो योधाः क्षताः सन्तस्तस्तनुः स्तनितवन्तः जज्वलुः चलिताः ज्वलज्वलचलने मस्जुः स्नाताः ग्लैगात्रक्षये जग्लुः हर्षक्षयकृताः लुलुठिरे भूमौ लुठन्ति स्म रुठलुठतिप्रवाते लुदादावात्मनेपदी पक्षाते सुमूर्छुः मोहमुपगताः रक्तं ववमुः गोर्धवन्तः तत्रषुः तृष्यन्ति स्म एतत् संकुलयुद्धमाह ॥ ३० ॥ ज० भ०

तस्तनुरित्यादि । उभये भटा रामरावणसम्बन्धिनः क्षताः सन्तः स्तनन्ति स्म स्तनमिशब्दे जज्वलुः कोपेनेत्यर्थात् ज्वल्यचलत्वियोः मस्जुः ग्लैकान्तिसंक्षये जग्लुः ग्लैक्लमे लुलुठिरे भूमौ लुठन्ति स्म सुमूर्छुः मोहं गताः मूर्च्छा संमोहे उच्छ्राये सुसुङ्करिति क्वचित्पाठः रक्तं ववमुर्वमन्ति स्म टुवमु उद्गिरणे तृफलेत्यादिना विभाषया एत्वं खिलोपश्च तद्भावपक्षे रूपमिदं तत्रषुः तृष तृषि रुट् पिपासा तत्रसुरिति पाठे त्रासं गताः तृष्यभये उभय इति संकुलयुद्धसङ्गमम् ॥ ३० ॥ भ०

सम्पातिना प्रजङ्घस्तु युयुधेऽसौ द्रुमाहतः ।
चकम्पेऽतीव चुक्रोश जीवनाशं ननाश च ॥ २१ ॥
उज्जघ्राते नलेनाजौ स्फुरत्प्रतपनाक्षिणी ।
जम्बुमाली जहौ प्राणान् ग्रावणा मारुतिना हतः ॥ २२ ॥
मित्रघ्नस्य प्रचुक्षोद गदयाङ्गं विभीषणः ।
सुग्रीवः प्रघसं नेभे वह्नन्रामस्ततर्द च ॥ २३ ॥

सम्पातिनेत्यादि । प्रजङ्घो नाम राक्षसः सम्पातिनाम्ना वानरेण सह युयुधे युध्यते स्म असौ प्रजङ्घो द्रुमाहतश्चकम्पे कम्पते स्म अतीव अत्यर्थं चुक्रोश क्रोशति स्म जीवनाशं ननाश जीवेन विनष्टः कर्तोर्जीवपुरुषयोर्नशिवहो इति णिच्॥ २१ ॥ ज० म०

सम्पातिनेत्यादि । प्रजङ्घनामा राक्षसः सम्पातिनाम्ना वानरेण सह युयुधे युद्धं कृतवान् युधौऽयुद्धे असौ प्रजङ्घो द्रुमेणाहतः सन् चकम्पे कपिङ्चाले अतीव अत्यर्थं चुक्रोश शब्दं चकार क्रुशजौ रोदे इतौ जीवनाशं ननाश जीवन् सन्नष्टः नशूलयूनाशे कर्तरूपाज्जीवान्नशो गतार्थे णमिति परः स्वमते जीवनस्य नाशोऽदर्शनं यस्मादिति नाशक्रियाविशेषणम् ॥ २१ ॥ भ०

उज्जघ्राते इत्यादि । स्फुरन् चलन् प्रतपनो नाम राक्षसः तस्याक्षिणी स्फुरतीव प्रतपनाक्षिणी नयने नलेन वानरेण उज्जघ्राते उत्खाते कर्मणि लिट् गमहनेत्युपधालोपः मारुतिना हनूमता ग्रावणा पाषाणेन हतो जम्बुमाली राक्षसः प्राणान् जहौ त्यक्तवान् ॥ २२ ॥ ज० म०

उज्जघ्राते इत्यादि । नलनाम्ना वानरेणाजौ युद्धे स्फुरतः प्रतपननाम्नो राक्षसस्य अक्षिणी चक्षुषी उज्जघ्राते उत्खाते खनुञ् विदारे कर्मणि हूपं हनगमित्युङ्लोपः जम्बुमाली राक्षसो मारुतिना हनूमता ग्रावणा प्रस्तरेण हतः सन् प्राणान् जहौ त्यक्तवान् ओहाक्त्यागे ॥ २२ ॥ भ०

मित्रघ्नस्येत्यादि । मित्रघ्नस्य राक्षसस्य अङ्गमङ्गदया विभीषणः प्रचुक्षोद प्रघसनाम राक्षसं सुग्रीवो नेभे हिंसितवान् नभ्राभ्रहिंसायामित्यनुदात्तेत् रामश्च बह्वन् राक्षसान् ततर्द हिंसितवान् ऋदृदीहिंसानादरयोः ॥ २३ ॥ ज० म०

मित्रघ्नस्येत्यादि । विभीषणो गदया मित्रघ्नस्य राक्षसस्य अङ्गं प्रचुक्षोद चूर्णयामास अधौजुदिर्दुदि क्षुद् क्षेषणं सुग्रीवः प्रघसं राक्षसं नेभे जघान

वज्रमुष्टेर्विशिश्लेष मैन्देनाभिहतं शिरः ।
नीलश्चकर्त्त चक्रेण निकुम्भस्य शिरः स्फुरत् ॥ २४ ॥
विरूपाक्षो जघ्ने प्राणैस्तृढः सौमित्रिपत्त्रिभिः ।
प्रमोचयाञ्चकारास्रून् द्विविदस्त्वग्निप्रभम् ॥ २५ ॥
गदां शक्रजिता जिघ्ये तां प्रतीयेष वालिजः ।
रथं ममन्थ सहयं शाखिनास्य ततोऽक्रुदः ॥ २६ ॥

नभतुभलडङ् चेति चकाराद्धिंसे लडौ भेरभ्यनुबन्धौ रामस्य बलून् राक्षसान् ततर्द जघान तर्द हिंसे लटुजधिर्नादरेत्यस्य वा रूपम् ॥ २३ ॥ भ०

वज्रेत्यादि । वज्रमुष्टे राक्षसस्य शिरो मैन्देन वानरेण अभिहतं सत् विशिश्लेष विश्लिष्टं निकुम्भस्य शिरः स्फुरत् चलत् नीलो वानरश्चक्रेण चक्रेण चकर्त्त छिन्नवान् ॥ २४ ॥ ज० म०

वज्रमुष्टेरित्यादि । वज्रमुष्टे राक्षसस्य शिरो मैन्देन वानरेणाभिहतं सत् विशिश्लेष विश्लिष्टं श्लिषौयस्त्रजिश्लेषे विपूर्व्वः पृथग्भावमाह नीलो वानरो निकुम्भस्य राक्षसस्य स्फुरत् शिरस्तदीयेन चक्रेण चकर्त्त विच्छेद कृती छेदने ॥ २४ ॥ भ०

विरूपाक्ष इत्यादि । विरूपाक्षो राक्षसः सौमित्रिपत्त्रिभिर्लक्ष्मणशरैः तृढः हत इत्यर्थः तृहहिंसार्थः इति तौदादिकस्योदित्वाच्छायामितीट्प्रतिषेधः प्राणैर्जघ्ने त्यक्तः कर्म्मणि लिट् द्विविदो वानरः अग्निप्रभं राक्षसं प्राणान् प्रमोचयाञ्चकार त्याजितवान् सुचेर्यङ्लुप्तस्य लिटि रूपम् ॥ २५ ॥ ज० म०

विरूपाक्ष इत्यादि । सौमित्रेः पत्त्रिभिर्बाणैस्तृढो हतो विरूपाक्षः प्राणैर्जघ्ने त्यक्तः ओहाक्त्यागे कर्म्मणि रूपं तृहधञ्जर्हिंसे क्तः ह्रोढः ढभात्तथोरिति धः ष्टुभिरिति ढः द्रोद्रीति ढलुक् तत्र ऋकारवर्जनान्न दीर्घः द्विविदो वानरः अग्निप्रभं राक्षसं असून् प्राणान् प्रमोचयाञ्चकार त्याजितवान् सुचल्लृपञ्जौ मोक्षे ञ्यन्तः अत्र सुचिर्म्रोचनपूर्व्विकायां गतौ वर्त्तमानत्वेन धोऽञौजेरित्यादिना प्रयोज्यस्य कर्म्मत्वं योगविभागाद्वा आपिशलिस्तु गत्यर्थादिषु कर्म्मैव नोक्ताद्यादिषु कर्त्तृता ॥ २५ ॥ भ०

शेषेषु कर्म्मकर्त्तृ वा यथासम्भवमिष्यत इत्याह

गदेत्यादि । शक्रजिता इन्द्रजिता गदा जिघ्ये प्रहिता हिनोतेः कर्म्मणि लिट् हेरचङ्नोति कुत्वं तां गदां वालिजोऽङ्गदः प्रतीयेष प्रतीष्टवान् इषेरभ्यास-

तत्कर्म्म वालिपुत्रस्य दृष्ट्वा विश्वं विसिस्मिये ।
संत्रेसुः राक्षसाः सर्व्वे बभ्रु मेने च राघवः ॥ ३७ ॥
सुग्रीवो सुमुदे देवाः साध्वित्यूचुः सविस्मयाः ।
विभीषणोऽभितुष्टाव प्रशशंसुः प्लवङ्गमाः ॥ ३८ ॥
ह्रीं चित्रं लक्ष्मणेनोचे रावणिश्च तिरोदधे ।
विचकार ततो रामः शरान् संतत्रसुर्द्विषः ॥ ३९ ॥

श्यामवर्णं द्वितीयङ् ततोऽनन्तरं अस्य शक्रजितो रथं सहयं साश्वं शाखिना तरुणा ममन्थ चूर्णितवान् मथिहिंसासंक्लेशयोः ॥ ३६ ॥ ज० म०

गदेत्यादि । इन्द्रजिता गदा जिघ्ये प्रेषिता हिंसार्थेन गतौ हेः खेरन-डिभिः भ्रुध्वोरित्यादिना यत्वं वालिजोऽङ्गदस्तां गदां प्रतीयेष जघाह दूषेः खेर्यौरियुवर्ण इति इय् ततोऽनन्तरं शाखिना वृक्षेण अङ्गदोऽस्य शक्रजितः सहयं रथं ममन्थ चूर्णितवान् ॥ ३६ ॥ भ०

तत्कर्म्मेत्यादि । तत्कर्म रथस्य चूर्णणं दृष्ट्वा विश्वं त्रैलोक्यं विसिस्मिये विस्मितं राक्षसाः सर्व्वे त्रेसुः राघवश्च बभ्रु मेने अङ्गदं साधितवानित्यर्थः ॥ ३७ ॥ ज०म०

तत्कर्म्मेत्यादि । वालिपुत्रस्य अङ्गदस्य तत्कर्म गदामन्थनरूपं दृष्ट्वा विश्वं त्रैलोक्यं विसिस्मिये विस्मितं खिङोभ्रुध्वोरितीय् सर्व्वे राक्षसाः संत्रेसुः संत्रस्ताः त्रस त्रसीणभये तृफलेत्यादिना एत्वं खिलोपश्च राघवश्च बभ्रु मेने अङ्गदं साधितवान् मनदङ् बोधे मन्यौङ् च ॥ ३७ भ०

सुग्रीव इत्यादि । सुग्रीवो सुमुदे हृष्टवान् देवाः साध्वित्यूचुः वचिस्वपीति सम्प्रसारणं विभीषणोऽभितुष्टाव अभिष्टुतवान् स्तुञ्ष्टुस्तुतौ उपसर्गादित्यादिना षत्वं प्लवङ्गमाः प्रशशंसुः प्रशंसां कृतवन्तः ॥ ३८ ॥ ज०म०

सुग्रीव इत्यादि । तत्कर्म्म दृष्ट्वा सुग्रीवो सुमुदे जिमुदङ् हर्षे देवाः साध्वित्युक्तवन्तः विभीषणोऽभितुष्टाव अभिमुखीभूय स्तुतिं कृतवान् ष्टुञ्ष्टुस्तुतौ गोकःसुस्तुभेति षत्वं वानराः प्रशशंसुः मनुष्टुहिंसास्तुत्योः ॥ ३८ ॥ भ०

ह्रीं चित्रमित्यादि । ह्रीमिति विस्मये चित्रमाश्चर्यमिति लक्ष्मणेनोक्तं वर्त्तमाने लिट् यजादित्वात्सम्प्रसारणं रावणिः इन्द्रजित् रावणस्यापत्यं अभीतरज् तिरोदधे अदृश्योऽभूत् ततः अदर्शनानन्तरं रामः शरान्विचकार विक्षिप्तवान् कुविक्षेपे द्विषतः सं तत्रसुः संत्रस्ताः ॥ ३९ ॥ ज०म०

विभिन्ना जुघुरुर्घोरं जघ्नुः क्रव्याशिनो हतान् ।
चुस्रोत व्रणिनां रक्तं छिन्नास्त्रेलुः क्षणं भुजाः ॥ ४० ॥
क्षत्तैरपि दृढक्रोधो वीरवक्त्रैर्न तत्यजे ।
पलायाञ्चक्रिरे शेषा जिह्रियुः शूरमानिनः ॥ ४१ ॥
राघवो न दयाञ्चक्रे दधृर्धैर्यं न केचन ।

ह्री चित्रमित्यादि । ह्री विस्मये लक्ष्मणेन चित्रमिदं कर्म्मत्यूचे रावणपुत्र इन्द्रजित् तिरोदधे मायया अदृश्यो जातः रावणस्यापत्यमिति वाह्वाद्यत इति ण्यिः ततोऽनन्तरं रामः शरान् विचकार विक्षिप्तवान् कृशविक्षेपे द्विषः संतत्तसुः सन्तप्ताः तृफलेत्यादिना विभाषया एत्वविधानादत्र तदभावः ॥ ३९ ॥ भ०

विभिन्ना इत्यादि । शरैर्विभिन्ना जुघुरुः घोरं भीमशब्दं कृतवन्तः घुर-भीमार्थशब्दयोः क्रव्याशिनः शृगालादयो हतान्विनष्टान् जघ्नुः भक्षितवन्तः लिख्यन्यतरस्यामित्यदेर्घत्वं हल्ङ्यादिना उपधालोपः खरिचेति चत्वं व्रणिनां शरैः कृत-व्रणानां रक्तं चुस्रोत व्रणादित्यर्थात् कर्त्तरि लिटः णित्त्वादकित्त्वे गुणः भुजा-श्छिन्नाः सन्तः क्षणमात्रं चेलुश्चलिताः ॥ ४० ॥ ज० भ०

विभिन्नेत्यादि । द्विषो रामबाणैर्विभिन्नाः सन्तो घोरं जुघुरुः शब्दञ्चक्रुः घुरशब्दनौ भीमार्थे क्रव्याशिनः शृगालादयो हतान् द्विषो जघ्नुः भक्षितवन्तः अदोऽनभ्यवे ग्रस्यतीति घसादेशः भक्षेर्लृवर्णसौत्रस्य वा रूपं हनगमित्युङ्लोपः ऋपभसोरिति घस्य कत्वे किलादिति षः व्रणिनां शरैः क्षतानां द्विषां रक्तं चुस्रोत स्रुतिरत्वरणे भुजाश्छिन्नाः सन्तः क्षणं चेलुः चल गमने ॥ ४० ॥ भ०

क्षत्तैरित्यादि । वीरवक्त्रैः शूरमुखैः क्षत्तैरपि छिन्नैरपि दृढो घनः क्रोधो न तत्यजे न त्यक्तः दृष्टौष्ठभ्रूकुट्यादीनां तथावस्थानात् कर्म्मणि लिट् पलाया-ञ्चक्रिरे पलायिताः दयायासश्चेत्याम् उपसर्गस्यायतावित्यत्वं शेषा ये न पला-यिताः ते शूरमानिनः मन इति णिनिः जिह्रियुः लज्जन्ते स्म ॥ ४१ ॥ य० म०

क्षत्तैरित्यादि । शूराणां मुखैश्छिन्नैरपि दृढक्रोधो न तत्यजे न त्यक्तः सन्दष्टाधरभ्रूकुट्यादीनां तथैव विस्कारात् त्यजोहानौ कर्म्मणि रूपं केचित् पलायाञ्चक्रिरे पलायिताः अयङ् गतौ परापूर्वः विजादीत्याम् ढौरल इत्यत्व योगविभागात् लत्वमभिधानात् शेषा ये न पलायितास्ते शूरामानिनो जिह्रियुः ह्रीलज्जे अध्वारित्यादिना इय् शूरं अर्थादात्मानं मन्यत इति अहादित्वा-स्मिन् ॥ ४१ ॥ भ०

मम्ले पतङ्गवद्वीरैर्हाहेति च विचुक्रुशे ॥ ४२ ॥
तिरोबभूवे सूर्य्येण प्रापे च निशयास्पदम् ।
जग्रसे कालरात्रीव वानरान्राक्षसांश्च सा ॥ ४३ ॥
चुकोपेन्द्रजिदत्युग्रं सर्पास्त्रं चाजुहाव सः ।
आजुड्डवे तिरोभूतः परानीकं जहास च ॥ ४४ ॥

राघव इत्यादि । राघवो न दयाञ्चक्रे न दयांकृतवान् पूर्ववदास् न केचन न केचित् धैर्य्यं दधुः धारितवन्तः सर्व्व एव अहमहमिकया प्रवृत्ताः यदि वा न केचन केचिद्धैर्य्यं न दधुः अपितु दधुरेव पतङ्गवत्पतङ्गैरिव वीरैर्मम्ले मृतं भावे लिट् हाहेति च विचुक्रुशे रुदितम् ॥ ४२ ॥ ज० म०

राघव इत्यादि । रामो न दयाञ्चक्रे जिदयग्रहणे गतौ बधे दानेऽवनेर्विजादीत्याम् केचित् धैर्य्यं न दधुः धृतवन्तः सर्व्व एव व्याकुला इत्यर्थः डुधाञ्-ल्धारणे उस्येचीत्यालोपः वीरैः पतङ्गवत् शलभैरिव मम्ले मृतं मृङ्-शमृतौ भावे रूपं हाहेति च विचुक्रुशे रुदितं क्रुशजौरोदे ह्रुतौ भावे रूपम् ॥ ४२ ॥ भ०

तिर इत्यादि । सूर्य्येण तिरोबभूवे तिरोभूतं अस्तङ्गतमित्यर्थः भावे लिट् निशा निशया च आस्पदं प्रतिष्ठामिति निपातनं प्रापे प्राप्तं कर्म्मणि लिट् सा च निशा कालरात्रीव कालः कृतान्तस्तेन प्रयुक्ता रात्रिरिति शाकपार्थिवत्वात्सः रात्रेश्चाजसाविति ङीप् वानरान् राक्षसांश्च जग्रसे ग्रसते स्म भक्षितवतीत्यर्थः ॥ ४३ ॥ ज० म०

तिर इत्यादि । सूर्य्येण तिरोबभूवे अस्तं गतं भावे रूपं भुवोऽङ्ग्यामिति पक्षे खरङ् निशया आस्पदं स्थानं प्रापे प्राप्तं कर्म्मणि रूपं आङः पदे सुट् आस्पदं स्थाने प्रभुत्वे चेति परः स्वमते मनोषादित्वात् सा निशा कालरात्रिरिव वानरान् राक्षसांश्च जग्रसे भक्षितवती ग्रसग्लसुङ्भक्षे कालोयमस्तेन प्रयुक्ता रात्रिः कालरात्रिः शाकपार्थिवादिरिति परः स्वमते सम्बन्धविवक्षया षष्ठीसमासः पाक्षोनादीत्यादिना पक्षे ङीप् ॥ ४३ ॥ भ०

चुकोपेत्यादि । रामव्यापारं दृष्ट्वा इन्द्रजित् तिरोहितः सन् चुकोप कुपितवान् अत्युग्रञ्च सर्पास्त्रं सर्पमस्त्रमिव आजुहाव आहूतवान् आह्वयते शब्दे वर्त्तमानस्य अभ्यस्तस्य चेति हिर्वचनात् प्राक् सम्प्रसारणं ततो हिर्वचनं परानीकञ्च रामबलं आजुड्डवे सर्ज्जते स्म सर्ज्जायामाङ् इत्यात्मनेपदं पूर्ववत् सम्प्रसारणं यजादित्वाद्वा तत उवङादेशः जहास च विहसितवान् ॥ ४४ ॥ ज० म०

बबाधे च बलं कृत्स्नं निजग्राह च सायकैः ।
उत्ससर्ज्ज शरांस्तेऽस्य सर्पसात्त्र प्रपेदिरे ॥ ४५ ॥
आचिचाय स तैः सेनामाचिकाय च राघवौ ।
वभाण च न मे मायां जिगायेन्द्रोऽपि किं त्वभिः ॥ ४६ ॥
आचिक्याते च भूयोपि राघवौ तेन पन्नगैः ।
तौ मुमुहतुरुद्विग्नौ वसुधायाञ्च पेततुः ॥ ४७ ॥

चुकोपेत्यादि । रामपराक्रमदर्शनात् इन्द्रजित् चुकोप कुम्भदर कोपे चत्वय सर्परूपमस्त्रं आजुहाव 'आङ्हृतवान् तिरोभूतः सन् परानीकं शत्रुसैन्यं आजुह्वे सर्द्धितवान् सर्द्धायामाङ इति मं ह्लेजैस्पर्द्धे शब्दे च उभयत्र व्यथयहेति खेर्जिः जहास च हसितवांश्च हसे हासे ॥ ४४ ॥ भ०

बबाध इत्यादि । बबाधे च अभिभूतवान् बाध विलोडने निजग्राह च निगृहीतवान् शायकैः लोहयुक्तैः सर्पास्यैः उत्ससर्ज शरान् क्षिप्तवान् ते उत्सृष्टाः शरा अस्य बलस्य सर्पसात् कार्त्स्न्येन सातिः सम्प्रपेदिरे सम्प्रपद्यन्ते स्म ॥ ४५ ॥ ज० म०

बबाध इत्यादि । स इन्द्रजित् सर्वं रामबलं बबाधे अभिभूतवान् बाधृङ्-विलोडने सायकैः शरैर्निगृहीतवांश्च अथो यान् शरान् उत्ससर्ज क्षिप्तवान् सृजोऽविसर्गेऽथसृजौशचेति चकाराद्विसर्गे ते शराः अस्य रामबलस्य सर्पसत्ता सर्पभूताः प्रपेदिरे सम्प्रपद्यन्ते स्म कार्त्स्न्यायत्योरिति षसात् यौपदङ्गतौ तफलेति अत एत्वं खिलोपश्च ॥ ४५ ॥ भ०

आचिचायेत्यादि । स इन्द्रजित् सर्पास्त्रैर्वानराणां सेनामाचिचाय छन्नवान् विभाषा चेति अकृत्वपक्षे रूपं राघवौ च रामलक्ष्मणावाचिकाय कृत्वपक्षे रूपं वभाण च भणति स्म मम मायामिन्द्रोऽपि न जिगाय न जितवान् सल्लिटो-र्जेरिति कृत्वं किं त्वभिः न किञ्चित्प्रयोजनमित्यर्थः ॥ ४६ ॥ ज० म०

आचिचायेत्यादि । स इन्द्रजित् तैः शरैः रामसेनां आचिचाय राघवौ रामलक्ष्मणौ चाचिकाय आच्छादितवान् चिनचिञ्चित्यां चेःकिर्वासनञ्योरिति विभाषया किः एवञ्च वभाण उक्तवान् त्वभणचेति चकारात् शब्दे किं वभाणेत्याह मम मायां इन्द्रोऽपि न जिगाय त्वभिर्मानुषैः किं न किञ्चित्प्रयोजनमित्यर्थः जेर्गिःसन्झोरिति ग्यादेशः ॥ ४६ ॥ भ०

आचिक्याते इत्यादि । तेनेन्द्रजिता भूयोऽपि राघवावाचिक्याते छन्नौ

ततो रामेति चक्रन्दुस्त्रेसुः परिदिदेविरे ।
निश्श्वसुश्च सेनान्यः प्रोचुर्धिगिति चात्मनः ॥४८॥
मन्युं शेकुर्न ते रोद्धुं नाम्नं संरुरुधुः पतत् ।
विविदुर्नेन्द्रजिन्मार्गं परीयुश्च प्लवङ्गमाः ॥ ४९ ॥
दधावाङ्गिरसतच्चक्षुः सुग्रीवस्य विभीषणः ।

कर्मणि लिट् तौ पापतुः सुसुहतुः मोहं गतौ उद्विग्नौ समीहितानिष्पत्तेः वसुधायाञ्च पेततुः पतितौ बन्धपरवशीकृतत्वात् ॥ ४७ ॥ ज० म०

आचिक्याते चेत्यादि । तेन इन्द्रजिता भूयः पुनरपि पन्नगैः सर्पास्त्रैः राघवौ आचिक्याते आच्छादितौ कर्मणि चिञो रूपं च पादपूरणे वक्ष्यमाण-क्रियापेक्षया सुसुप्सये वा तौ च तत उद्विग्नौ व्याकुलौ सुसुहतुः मोहं प्रापतुः सुह्यलजिर्वैचित्त्ये भूमौ च पेततुः पतितौ पतत्लजगत्याम् ॥ ४७ ॥ भ०

तत इत्यादि । ततः पतनादनन्तरं सेनान्यः सुग्रीवादयः एरनेकाच इति यण् रामेति नाम्नाहं चक्रन्दुः रुदितवन्तः त्रेसुः भीताः परिदिदेविरे परिदेवनं कृतवन्तः देवदेवने अनुदात्तेत् निश्श्वसुः कोष्णं निश्वासानुत्ससृजुः आत्मनश्च धिगिति प्रोचुः गर्हितवन्तः । धिग्योगाद्द्वितीया ॥ ४८ ॥ ज० म०

तत इत्यादि । पतनानन्तरं सेनापतयो नीलादयो रामेति चक्रन्दुः शब्दं चक्रुः क्रदि रोदने आह्वाने त्रेसुर्भयं प्रापुः त्रस त्रसीणभये परिदिदेविरे परिदेवनं चक्रुः देवडुतदेवने भभखथर्हर्धेति खेरेकारस्य हखडकारः एचोयुत्वमिति वचनात् निश्श्वसुः निश्वासं त्यक्तवन्तः श्वसप्राणने आत्मनो धिगिति च प्रोचुः उक्तवन्तः धिक्समयेति द्वितीया ॥ ४८ ॥ भ०

मन्युमित्यादि । मन्युं शोकं रोद्धुं वारितुं न शेकुः पारितवन्तः अस्रङ्ग लोचनेभ्यः पतत् न संरुरुधुः न संरुद्धवन्तः इन्द्रजितो मार्गं न विविदुः न ज्ञातवन्तः क्वासौ तिष्ठतीति प्लवङ्गमाश्च परीयुः समन्ताद्गतवन्तः क्वासावगमदिति ॥ ४९ ॥ ज० म०

मन्युमित्यादि । ते वानरसेनान्यः मन्युं शोकं रोद्धुमावरीतुं न शेकुर्न शक्ताः शक्लृशक्तौ रुधिधौञ्जिञ्जाद्यतौ पतदस्रं रोदनजलं न संरुरुधुः न वारितवन्तः इन्द्रजितो मार्गं पन्थानं न विविदुः न जानन्ति स्म कुतो गत इति विदलृमतौ प्लवङ्गमाः परीयुः सर्वतोगताः क्वासावगमदिति इणगतौ ॥ ४९ ॥ भ०

दधावेत्यादि। ततोऽनन्तरं विभीषणः सुग्रीवस्य मन्त्रभूताभिरङ्गिरसतच्चक्षुर्दधाव

विदाञ्चकार धौताक्षः स रिपुं खे ननर्द च ॥ ५० ॥
उज्जुगूरे ततः शैलं हन्तुमिन्द्रजितं कपिः ।
विहाय रावणिस्तस्मादानंहे चान्तिकं पितुः ॥ ५१ ॥
आचचक्षे च वृत्तान्तं प्रजहर्ष च रावणः ।
गाढं चोपजुगूहैनं शिरस्युपशिशिङ्ग च ॥ ५२ ॥

प्रक्षालितवान् सुग्रीवः धौताक्षः प्रक्षालितचक्षुः वक्ष्यमाणौ सकृथऽक्ष्णोरिति समासान्तष्टच् रिपुमिन्द्रजितं खे स्थितं विदाञ्चकार ज्ञातवान् उभविदेत्यादिना आम् ननर्द च गर्ज्जितवान् केदानीं यास्यसीति ॥ ५० ॥ ज० म०

दधावेत्यादि । ततोऽनन्तरं विभीषणः सुग्रीवस्य चक्षुरङ्गिजलैर्दधाव प्रक्षालितवान् धावुअजवे म्वजि सुग्रीवः धौताक्षः प्रक्षालितचक्षुः सन् खे आकाशे स्थितं रिपुमिन्द्रजितं विदाञ्चकार ज्ञातवान् ञाम्वाक्यामिति ञाम् ननर्द च कुत्रेदानीं यास्यसीति नर्दयन्दे ॥ ५० ॥ भ०

उज्जुगूर इत्यादि । ततोऽनन्तरं कपिः सुग्रीवः इन्द्रजितं हन्तुं शैलमुज्जुगूरे उत्क्षिप्तवान् गूरृ हिंसागत्योरिति दैवादिकोऽनुदात्तेत् तस्य गतौ वर्त्तमानस्य रूपं रावणिरिन्द्रजित् विहाय अर्थाद्युद्धं विहाय तस्मादाकाशात्पितुरन्तिकमानंहे गतः अर्हिगतौ तस्मात्तुदुहिहल इति तुट् ॥ ५१ ॥ ज०म०

उज्जुगूरे इत्यादि । ततोऽनन्तरं कपिः सुग्रीवः इन्द्रजितं हन्तुं शैलं उज्जुगूरे उत्क्षिप्तवान् गूरीयङ्बधेगत्यां उत्पूर्व उत्क्षेपणेऽपि वर्त्तते शिगेरङ्कउद्यमहत्यसौ तु हुस्रोपधः रावणपुत्रस्तस्माद्विभाय भयं प्राप जिभीलिभीत्यां भीतः सन् पितुरन्तिकं समीपं आनंहे गतः अर्हिङ्गतौ स्मान्नादीति खेरान् विभायेत्यत्र विहायेति पाठे युद्धं त्यक्त्वा तस्मादाकाशात् पितुरन्तिकमानंहे इत्यर्थः ॥ ५१ ॥ भ०

आचचक्ष इत्यादि । नागपाशेन राघवौ बद्धाविति वृत्तान्तमाचचक्षे आख्यातवान् रावणः प्रजहर्ष तुष्टवान् एनञ्च रावणिञ्च उपजुगूह दृढमाश्लिष्टवान् अत्र स्त्रियामश्लत्यादिवर्जितत्वात् तङ् न भवति उदुपधायागोहदित्यौत्वं शिरसि उपशिशिङ्ग आघ्रातवान् शिविआघ्राणने ॥ ५२ ॥ ज० म०

आचचक्षे चेत्यादि । स इन्द्रजिद्रामवन्धनरूपं वृत्तान्तं आचचक्षे पितरमित्यर्थात् चक्षिङ्ख्यवदे आंवेति पक्षे कथाङ्ख्याजादेशाभावः रावणश्च प्रजहर्षे प्रकृष्टहर्षं प्राप कृत्यञ्जिरर्तुष्टौ एनं पुत्रं गाढं उपजुगूह च आलिङ्गितवांश्च

ध्वजानुदूदुधुवुस्तुङ्गान् मांसं चेमुर्जगुः पपुः ।
कामयाञ्चक्रिरे कान्तास्ततस्तुष्टा निशाचराः ॥ ५३ ॥
दर्शयाञ्चक्रिरे रामं सीतां राज्ञश्च शासनात् ।
तस्या मिमीलतुर्नेत्रे लुलुठे पुष्पकोदरे ॥ ५४ ॥
प्राणा दध्वंसिरे गात्रं तस्तम्भे च प्रिये हते ।
उच्छ्वास चिराद्दीना रुरोदासौ ररास च ॥ ५५ ॥

तुङ्गजसंहतौ उपपूर्वआलिङ्गनमाह तुङ्गोणोरूरिति दीर्घत्वं शिरसि उपशिशिङ्क च आघ्रातवांश्च स्ने ह्वाविस्कारोऽयं शिधिआघ्राणे ॥ ५२ ॥ भ०

ध्वजानित्यादि । ततो निशाचरा अपि श्रुत्वा तुष्टाः सन्तः ध्वजांस्तुङ्गानुदुधुवुः उत्क्षिप्तवन्तः मांसञ्चेमुः खादितवन्तः चस्रक्षमुक्षदने जगुर्गीतवन्तः पपुः मद्यं पीतवन्तः कान्ताः कामयाञ्चक्रिरे कमेर्णिङन्तादाम् ॥ ५३ ॥ ज०म०

ध्वजानित्यादि । निशाचरा अपि रामवन्धनात्तुष्टाः सन्तः तुङ्गान् ध्वजान् उद्धुवुः उत्क्षिप्तवन्तः धुञ कम्पने धूशिक् कम्पे धूनगिधूञचेत्यस्य वा रूपं मांसं चेमुः भक्षितवन्तः चमूचमक्षमजमजिमभक्षुभक्षे जगुर्गानं कृतवन्तः गै गाने पपुर्मद्यादिकं पीतवन्तः पा पाने कान्ताः कामयाञ्चक्रिरे कामितवन्तः कमुकङ् स्पृहि वाञ्छे इति पाणिनीयाः त्यान्तत्वादाम् ॥ ५३ ॥ भ०

दर्शयामित्यादि । तथाभूतं रामं दृष्ट्वा सीता मम विधेया स्यादित्यभिप्रायवतो राज्ञो रावणस्य आज्ञया राक्षसाः अशोकवनिकातः पुष्पकमारुह्य सीतां रामं दर्शयाञ्चक्रिरे दर्शितवन्तः अभिवादिदृशोरात्मनेपदेऽपरुक्षानमिति विकल्पेन द्विकर्मकता तस्याः सीतायाः नेत्रे मिमीलतुः निमीलिते मील निमेषणे पुष्पकोदरे पुष्पकमध्ये मूर्छया लुलुठे लुठिता ॥ ५४ ॥ ज० म०

दर्शयामित्यादि । तादृशं पतिं दृष्ट्वा सीता ममानुकूला स्यादित्यभिप्रायं कुर्वतो राज्ञः रावणस्य शासनादाज्ञया राक्षसाः पुष्पके आरोप्य सीतां रामं दर्शितवन्तः घोऽर्त्तिरित्यादिना प्रयोज्यस्य कर्मत्वं तस्याः सीतायाः नेत्रे मिमीलतुः सुप्तं प्रापतुः मील निमेषे सीता पुष्पकरथमध्ये लुलुठे पतिता लुलुठुङ् प्रतीयाते ॥ ५४ ॥ भ०

प्राणा इत्यादि । प्रिये रामे हते प्राणा वायवः दध्वंसिरे ध्वस्ताः गात्रञ्च तस्तम्भे काष्ठवत् निश्चलमभूत् इभिस्कभि प्रतिबन्धे चिरादुच्छ्वास उच्छ्वसितवती

लौहबन्धैर्बबन्धे नु वज्रेण किं विनिर्म्मिते ।
मनो मे न विना रामाद्यत्पुस्फोट सहस्रधा ॥ ५६ ॥
उत्तेरिथ समुद्रं त्वं मदर्थेऽरीन् जिहिंसिथ ।
ममर्थ चातिघोरां मां धिग्जीवितलघूकृताम् ॥ ५७ ॥

असौ लब्धसंज्ञा दीना दुःखिता रुरोद रुदितवती रराम च वक्ष्यमाणञ्च विलापं कृतवती ॥ ५५ ॥ ज० म०

प्राणा इत्यादि । प्रिये रामे हते सति तस्याः प्राणा दध्वंसिरे ध्वस्ताः ध्वंस्रु लङ् गतौ अंशे गात्रञ्च तस्मिन्ने काष्ठवत् निश्चलमभूत् स्रंभिङ् स्तब्धे चिरादुच्छ्वास श्वासं त्यक्तवती श्वसघ्लु प्राणने ततो दीना दुःखिता रुरोद क्रन्दितवती रुद रोदे रराम च वक्ष्यमाणं विलापं चकार रस शब्दे ॥ ४५ ॥ भ०

लौहेत्यादि । लोहस्येमे लौहाः तैर्बन्धैर्मनो हृदयं मम बबन्धे बद्धं कर्म्मणि लिट् नुशब्दो वितर्के उत वज्रेण विनिर्म्मिते निर्म्मितं भाङ् भाव इत्यस्मात्कर्म्मणि क्विट् आतो लोपस्य द्विर्व्वचने चेति स्थानिवद्भावात् द्विर्व्वचने हुश्नुत्वे च रूपं यद्यस्मात् विना रामात् रामेण विना पृथग्विनेति पञ्चमी न पुस्फोट न स्फुटितं सहस्रधा सङ्ख्याविधार्थे धा ॥ ५६ ॥ ज० म०

लौहबन्धैरित्यादि । लोहविकारैर्बन्धैर्म्मम मनः किं बबन्धे बद्धं अर्थात् विधात्रा बन्धौगवश्वक्वधक् बन्धे नु वितर्के किंवा वज्रेण तन्निर्म्मितं भाल भावे कर्म्मणि रूपद्वयं यस्माद्रामेण विना सहस्रप्रकारेण न स्फुटितं स्फुटिर्विसरणे विशब्दो रहितार्थः अन्यारभ्येति पञ्चमी संख्याया धाच् प्रकारे इति धाच् ॥ ५६ ॥ भ०

उत्तेरिथेत्यादि । मदर्थं मन्निमित्तं समुद्रमुत्तेरिथ उत्तीर्णोऽसि तृफलेत्यादिना एत्वाभ्यासलोपौ तथा अरीन्निजघ्निथ निहतवानसि थलि रूपं यतो मदर्थं ममर्थ मरणावस्थाङ्गतोऽसि अतोऽतिघोरामतिरौद्रां मान्धिक् जीवनलघूकृतां जीवत्याजितमहत्त्वात् ॥ ५७ ॥ ज० म०

उत्तेरिथेत्यादि । हे प्रिय मदर्थं मत्प्रयोजननिमित्तं त्वं समुद्रं उत्तीर्णवान् तृतरेऽभिभवे तृन्त्यां तृफलेति अतएत्वं खिलोपश्च वृतोवेमद्वत्वं अठीढीपसेरित्युकेरिमोदीर्घाभावः अरीन् निजघ्निथ हतवानसि हनलो गतौ वधे सृजदृशघ्वराजत्यशभ्राजभासधुर्विद्युतोर्जपृधामदः सोहः पाठाच्छत इति पक्षे हन् हनगमित्यादौ अणावित्यस्य क्वचिद्वधाभिचारादुङोलोपः जिहिंसिथेति पाठे हिंसधर्कि हिंसे इत्यस्य रूपं ममर्थ च मृतोऽस्यसि मृङ् प्राणत्यागे

न जिजीवासुखी तातः प्राणता रहितस्त्वया ।
मृतेऽपि त्वयि जीवन्त्या किं मयानकभार्य्यया ॥ ५८ ॥
सा जुगुप्सां प्रचक्रेऽस्थून् जगर्ह लक्षणानि च ।
देहभाञ्जि ततः केशान् लुलुञ्च लुलुठे मुहुः ॥ ५९ ॥
जग्लौ दध्यौ वितस्तान क्षणं प्राण न विव्यथे ।
दैवं निनिन्द चक्रन्द देहे चातीव मन्युना ॥ ६० ॥

मृडन्टीढ्रमर्मिति नियमादन्यत्र पं नेमृतस्यपोऽवस्कुरित्यनेन नेमसुमित्यादिना मामद्रम् प्रतिषेध्यते मदर्थ इति सर्वत्र योज्यं अतोऽतिघोरां स्वामिघातकत्वेन मां धिक् जीवत्वेन लघूकृतां स्वामिनाशेऽपि जीवनाल्लघुत्वम् ॥ ५७ ॥ भ०

न जिजीवेत्यादि । त्वया प्राणता जीवता अन प्राणने रहितो वियुक्तस्तातो दशरथो न जिजीव न जीवितः त्वयि मृतेऽपि जीवन्त्या मया न किञ्चित्प्रयोजनं अणकभार्य्यया प्रापाणक इति सः ॥ ५८ ॥ ज० म०

न जिजीवेत्यादि । हे प्रिय प्राणता जीवतापि त्वया रहितः सन् वियुक्तः सन् तव तातो दुःखितो न जीवितवान् जीवत्प्राणने त्वयि मृतेऽपि जीवन्त्या अनकभार्य्यया कुत्सितभार्य्यया मया किं प्रयोजनमित्येवं ररास चेति पूर्वेण सम्बन्धः कुपूयकुत्सितावद्यखेटगर्ह्यांतकाः समा इत्यमरः ॥ ५८ ॥ भ०

सा जुगुप्सामित्यादि । सा सीता पूर्वोक्तकारणादेव अस्थून् प्राणान् जुगुप्सान् प्रचक्रे निन्दितान् कृतवती जुगुप्सायन्त इति घञ् तदन्तस्य सनि रूपं आमि प्रत्यये तु प्रचक्रदित्यनुप्रयोगो न घटते देहभाञ्जि शरीरस्थानि लक्षणानि अवैधव्यसूचकानि च जगर्ह गर्हते स्म गर्हगल्भ कुत्सने मुहुः केशान् लुलुञ्च अपनीतवती यथा लुलुठे पतिता ॥ ५९ ॥ ज० म०

सेत्यादि । सा सीता प्राणान् निनिन्द प्रियेण विनावस्थानात् गुपुङ् गोपनजुगुप्सयोः कित्त्वजगुप इति सन् इत्वाभावश्च क्रमादेतेऽत्वेत्यादिना अर्थनिन्दार्थनियमः त्यान्तत्वादाम् सोपसर्गस्य त्वजोऽनुप्रयोगः किम्वा जुगुप्सामात्मनो निन्दां प्रचक्रे संस्यादित्यः अस्थून् लक्षणानि च जगर्ह इत्यनेनान्वयः देहस्थितानि अवैधव्यचिह्नानि निन्दितवती गर्हङ् कुत्सने मुहुर्वारं वारं केशानुत्पाटितवती लुञ्चापनयने गतौ तथा लुलुठे पतिता ॥ ५९ ॥ भ०

जग्लावित्यादि । शोकभारात् जग्लौ ग्लानिङ्गता दध्यौ ध्यातवती पुनः किं मया द्रष्टव्योऽसीति तस्तान पीडया शब्दं कृतवती स्तन शब्दे न प्राण न

आश्वासयाञ्चकाराथ त्रिजटा तां निनाय च ।
ततः प्रजागराञ्चक्रुर्वानराः सविभीषणाः ॥ ६१ ॥
चिचेत रामस्तत्कृच्छ्रमोषाञ्चक्रे शुचाथ सः ।
मन्युश्चास्य समापिप्ये विरुराव च लक्ष्मणम् ॥ ६२ ॥
समीहे मर्त्तुमानर्च्छ तेन वाचाखिलं बलम् ।

मूर्छिता न जिजीव निःसंज्ञत्वात् अन प्राणने अन आदेरिति दीर्घत्वं विव्यथे लब्धसंज्ञा पीडिता व्यथोलिटीत्यभ्यासस्य सम्प्रसारणं दैवं निनिन्द निन्दितवती दैवविरूपमाचरितं त्वयेति चक्रन्द रुदिता पुनर्म्लान्या शोकेन देहे दग्धा कर्म्मणि लिट् ॥ ६० ॥ ज० म०

जग्लावित्यादि । सा जग्लौ ग्लानिं प्राप ग्लै ह्लमे दध्यौ चिन्तितवती ध्यै चिन्तने नितस्तान शब्दं चक्रे स्तनमि शब्दे स्तनं न प्राण मूर्च्छया निस्पन्दत्वात्र जीवितवती अनघ्लु प्राणने प्राग्वद्दीर्घ इत्यादिना पाक्षिकं णत्वं विवधे लब्धसंज्ञा सती दुःखं प्राप व्यथयमङ दुःखे चाले व्यथयतेति खेर्ज्जिः दैवं निनिन्द निन्दितवती निदिकुत्वने चक्रन्द रुरोद मन्युना शोकेन अत्यर्थं देहे दग्धा दह्यौ दाहे कर्म्मणि रूपम् ॥ ६० ॥

आश्वासयामित्यादि । अथानन्तरं त्रिजटा रावणभगिनी तां सीतामाश्वासयाञ्चकार आश्वासितवती विष्णुरसौ दाशरथिः कथमस्य विरूपं भविष्यतीति निनाय च तस्मात्पुष्पकान्नीतवती तत उत्तरकालं वानरा विभीषणेन सह प्रजागराञ्चक्रुः आलोचनां कृतवन्तः अत्मानुप्रयोगे नात्मनेपदं पूर्व्वस्यानात्मनेपदित्वात् ॥ ६१ ॥ ज० म०

आश्वासयामित्यादि । अथानन्तरं रावणस्य भगिनी त्रिजटा राक्षसी तां सीतां आश्वासयाञ्चकार तव प्रियो न मृत इति अशोकवनिकां नीतवती च ततोऽनन्तरं विभीषणेन सह वानरा जाग्रति स्म राघवयोरर्थमालोकयाञ्चक्रुरित्यन्ये गाढजागरे दरिद्राकाश्यकासजाग्र्युष इति पाक्षिक आम् ॥ ६१ ॥ भ०

चिचेतेत्यादि । तत्कृच्छ्रं शरबन्धदुःखं रामश्चिचेत ज्ञातवान् चिती संज्ञाने इत्युदात्तेत् शुचा शोकेन ओषाञ्चक्रे कर्म्मणि लिट् उपविदेत्याम् स च मन्युः शोकः अस्य रामस्य समापिप्ये दृष्टिकृतः ओषायी दग्धौ तस्य लिटि आयः पीति पीभावः एरनेकाच इति यण् लक्ष्मणश्च विरुराव शब्दितवान् वत्स जीवसीति ॥ ६२ ॥ ज० म०

आपृच्छे च सुग्रीवं स्वं देशं विससर्ज च ॥ ६३ ॥
आदिदेश स किष्किन्धां राघवौ नेतुमङ्गदम् ।
प्रतिजज्ञे स्वयञ्चैव सुग्रीवो रक्षसां वधम् ॥ ६४ ॥
नागास्त्रमिदमेतस्य विपक्षस्यार्च्छसंस्मृतिः ।

चिचेतेत्यादि । रामस्तत्कृच्छ्रं नागपाशबन्धनरूपं चिचेत ज्ञातवान् चिती संज्ञाने अथानन्तरं शुचा शोकेन स रामः ओषाञ्चक्रे दग्धः उषु देहे दरिद्राकाशकासेत्याम् अस्य रामस्य मन्युः शोकः समापिप्ये संदृब्धः आधायीङ् दृब्धौ धायः पीयङ्ध्योः लक्ष्मणश्च विरराव आह्वतवान् रल ध्वनौ ॥ ६२ ॥ भ०

समीहे इत्यादि । मर्त्तुं प्राणांस्त्यक्तुं समीहे इच्छति स्म तेन रामेणाखिलं समस्तं बलं वाचा आनर्च्च पूजितं भवद्भिः साध्वनुष्ठितं अस्माङ्गाग्यमत्यापराध्यतीति कर्म्मणि लिट् तस्मादुट्टिहल इति नुट् सुग्रीवञ्चापृच्छे आपृच्छति स्म आमन्त्रितवानित्यर्थः एहि तावद्दर्शनं मे देहि मां परिष्वजस्वेति आङिनुप्रच्छोरुपसंख्यानमिति तङ् स्वञ्च देशं किष्किन्ध्यां विससर्ज प्रहितवान् ॥ ६३ ॥ज० भ०

समीहे इत्यादि । तेन रामेण मर्त्तुं समीहे समीहितं ईहङ् चेष्टे भावे रूपं कर्त्तरीत्यन्ये गुर्व्विजादेरामोऽनित्यत्वं ये वदन्ति तन्मते रूपमिदं समीहे ईडिमे समीहिरे इत्यादयश्चिन्त्या इति केचित् रूपविवचनादिति केचित् न्यासकृदादयोऽपि गुर्व्विजादे रामोऽनित्यत्वमाहुः समीषे इति पाठे दृशुवाच्छे तेन रामेण वाचा बलं आनर्च्च पूजितं मत्कृते भवद्भिः किं न कृतं मद्भाग्यान्तु सर्व्वं निष्फलमभूदिति अर्च्चिकृपूजेजर्च्चेति चकारात् पूजेश्चान्तादादीति खेरान् कर्म्मणि रूपं रामः सुग्रीवं आपृच्छे आमन्त्रितवान् एहि मित्र मां परिष्वजस्वेति प्रश्नेऽयं क्षेपे विपराजीति मं त्वां नवेप्रच्छामिति जिनिषेधः स्वदेशं किष्किन्ध्यां विससर्ज्ज सुग्रीवं प्रस्थापयितुमारेभे इत्यर्थः सृजोश्च विसर्गे ॥ ६३ ॥ भ०

आदिदेशेत्यादि । सुग्रीवो राघवौ किष्किन्ध्यां नेतुमङ्गदमादिदेश स्वयं च रक्षसां विनाशं प्रतिजज्ञे अहमेव व्यापादयामीति सम्मतिभ्यामिति तङ् सकर्म्मकार्थं वचनम् ॥ ६४ ॥ ज० भ०

आदिदेशेत्यादि । स सुग्रीवो राघवौ किष्किन्ध्यां नेतुं अङ्गदं आदिदेश उक्तवान् दिशङ् योचे चकाराह्वाने वर्त्तते आङ्पूर्वः कथनार्थः मनोरमाकृत्तु दिश अतिसर्जने इति पठित्वा व्याचष्टे अतिसर्जनं दानं विज्ञानं कथनं वेति स्वयञ्च रक्षसां वधं प्रतिज्ञातवान् ज्ञा अवबोधने सम्मतेरस्मृताविति मम् ॥ ६४ ॥ भ०

विभीषणादिति श्रुत्वा तं निदध्यौ रघूत्तमः ॥ ६५ ॥
ततो विजघटे शैलैरुद्वेलं पुप्लुवेऽम्बुधिः ।
दृप्तेभ्य स्रुस्रुवते पुष्पैर्विरेजुर्भासुरा दिशः ॥ ६६ ॥
जगाहिरेऽम्बुधिं नागा ववौ वायुर्मनोरमः ।
तेजांसि शंयमाञ्चक्रुः शरवन्त्या विशिश्लिषुः ॥ ६७ ॥
भ्रेजिरेऽस्तवद्योधा लेभे संज्ञाञ्च लक्ष्मणः ।

नागास्त्रमित्यादि । नागास्त्रमिदं न शराः एतस्य च विपक्षः शत्रुस्तार्क्ष्य-संस्मृतिः गरुडसंस्मरणं यत् संस्मरणादेवास्य शान्तिरिति एवं विभीषणाच्छ्रुत्वा राघवस्तार्क्ष्यं दध्यौ ध्यातवान् ॥ ६५ ॥ ज० म०

नागास्त्रमित्यादि । इदं नागास्त्रं एतस्य नागास्त्रस्य शत्रुर्गरुडस्मरणं इति विभीषणात् श्रुत्वा राघवस्तं गरुडं ददध्यौ चिन्तितवान् ॥ ६५ ॥ भ०

तत इत्यादि । ततो ध्यानानन्तरं तदागमनवायुवेगाच्छैलैर्विजघटे विघटितं भावे लिट् अम्बुधिरुद्वेलं वेलामतिक्रम्य पुप्लुवे गतः दृप्तेभ्यः सकाशात् पुष्पैः च्युते च्युतं दिशश्च भासुराः सुपर्णपक्षप्रभाभिर्भासनशीलाः सत्यो रराजुः शोभन्ते स्म फणाश्च सन्नानामित्येत्वपक्षे रूपं तत्र वेलमनुवर्त्तते ॥ ६६ ॥ ज० म०

तत इत्यादि । ततो ध्यानानन्तरं तत्पक्षवायुवेगात् शैलैर्विघटितं घटिषड्-मचेष्ट विपूर्व्वो विश्लेषमाह भावे रूपं अम्बुधिः समुद्रो वेलामतिक्रम्य पुप्लुवे गतः प्लुङ् च सर्पणे दृप्तेभ्यः पुष्पैस्रुच्युते स्खलितं च्युतच्युतिरत्तरे भावे रूपं सुवर्णपक्षप्रभाभिर्भासनशीला दिशो राजन्ते स्म राजृञणदीप्तौ तभ्वलेति पक्षे एत्वाभावः ॥ ६६ ॥ भ०

जगाहिरे इत्यादि । नागा भयादम्बुधिं जगाहिरे प्रविष्टाः वायुस्तत्प्रभवो ववौ वाति स्म तेजांसि रत्नादीनां शंयमाञ्चक्रुः अत्यर्थं प्रशान्तानि शमेर्यङ्-लुगन्तस्य रूपं एवञ्च कृत्वा अनुप्रयोगे परस्मैपदं शरवन्त्या विशिश्लिषुः विश्लिष्टाः दूरत एव तत्प्रभावात् ॥ ६७ ॥ ज० म०

जगाहिरे इत्यादि । नागा भयादम्बुधिं प्रविष्टाः गाङ् विलोडे मनोरमो वायुस्तत्प्रभवः शुभसूचकः स्वाभाविको वा वाति स्म वालगमनसिंहयोः रत्ना-दीनां तेजांसि तत्तेजसा भृशं शान्तानि अतिशयार्थे मूलविभुजादिति यङ् यङोलुक् दिर्घं अमजपेति खेर्नुण् त्यान्तत्वादाम् शमयाञ्चक्रुरिति पाठे गरुडस्य तेजांसि नागाश्चिरात्यन्ति स्मेत्यर्थः शराणां वन्त्या विश्लिष्टाः तत्प्रभावात् ॥ ६७ ॥ भ०

विभीषणोऽपि वभ्राजे गरुत्मान् प्राप चान्तिकम् ॥ ६८ ॥
संपस्पर्शाथ काकुत्स्थौ जज्ञाते तौ गतव्यथौ ।
तयोरात्मानमाचख्यौ ययौ चाथ यथागतम् ॥ ७९ ॥
क्ष्वेलुस्तित्विषुरुद्योमुरुज्जह्रुः पर्वतांस्तरून् ।
वानरा दद्रुमुश्चाथ संग्रामं चाशशंसिरे ॥ ७० ॥

भेजिर इत्यादि । अक्षतवत् अक्षता इव योधा भेजिरे दीप्यन्ते स्म फणाश्च सप्तानामित्येतपक्षे रूपं संज्ञाश्चेतनां लक्ष्मणो लेभे प्राप्तवान् विभीषणोऽपि वभ्राजे सम्पन्ना मे मनोरथा इति अनेतपक्षे रूपं अन्तिकञ्च रामलक्ष्मणयोर्गरुत्मान् प्राप गरुतः पक्षिणस्तेऽनुजीवितयास्त सन्तीति मतुप् यवादेराकृतिगणत्वात् मय इति वत्वं न भवति ॥ ६८ ॥ ज० म०

भेजिरे इत्यादि । योधा अक्षता इव भेजिरे शोभन्ते स्म भ्राजृजयटुच धकाराङ्गासि तफलेत्यादिना पात्तिकमेत्वं खिलोपश्च लक्ष्मणश्च संज्ञां चेतनां लब्धवान् लभङ्क्तोऽप्राप्तौ विभीषणोऽपि वभ्राजे समीहितं मे सम्पन्नमिति एत्वाभावपक्षे रूपं गरुत्मान् गरुडो राघवस्यान्तिकं समीपं प्राप गरुतः पक्षिणोऽनुजीविनः प्रशस्ता वा पक्षाः सन्त्यस्येति गरुत्मान् क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति न्यायात् मोङ्मभूपाद्वतुरित्यस्य विषयेऽपि मतुरर्थ इत्यस्याभिनिवेशः वसोर्वः सेमप्युर्मतुष्योरिति ज्ञापकात् मोङ्मभूपाद्वतुरित्यस्य क्वचिद्यभिचार इति देवीदासचक्रवर्त्तिनोक्तं यवादिभ्यो मतुरिति परः नदंतसाविति पदत्वनिषेधात् न नत्वम् ॥ ६८ ॥ भ०

संपस्पर्शेत्यादि । अनन्तरं गरुत्मान् काकुत्स्थौ राघवौ पस्पर्श स्पृष्टवान् तौ च स्पृष्टौ गतव्यथौ जज्ञाते जातौ तयोः काकुत्स्थयोरात्मानमाचख्यौ गरुत्मानहमिति कथितवान् वा लिटीति चक्षिङः ख्याञ् ययौ चापि यथागतं तथागतवान् ॥ ६९ ॥ ज० म०

संपस्पर्शेत्यादि । अथानन्तरं स गरुत्मान् काकुत्स्थौ संपस्पर्श स्पृशश्च स्पृशि तौ च स्पृष्टौ गतव्यथौ जज्ञाते जातौ जनीभ्यङ्जनने फलमित्युङ्लोपः स्तुभिःसवादिति नस्य ञः तयोः काकुत्स्थयोः स्थाने आत्मानं आचख्यौ कथितवान् अहं गरुड इति ख्याञ गतौ चक्षिङःख्याञादेशो वा यथागतं तथा ययौ गतः ॥ ६९ ॥ भ०

क्ष्वेलुरित्यादि । अथानन्तरं वानरा हृष्टाः क्ष्वेलुः शब्दितवन्तः तित्विषुः

डुढौकिरे पुनर्लङ्कां बुबुधे तान्दशाननः ।
जीवतश्च विवेदारीन् वभ्रंशेऽसौ धृतेस्ततः ॥ ७१ ॥
सस्वंसे शरबन्धेन दिव्येनेति वुवुन्द सः ।
वभाजाथ परं मोहमूहाञ्चक्रे जयं न च ॥ ७२ ॥

शोभिताः त्विषदीषदीप्तौ उद्येषुः उद्योगं चक्रुः पर्व्वतानुज्जखुः उत्खिप्तवन्तः दद्रसुः दृतस्ततो भ्रान्ताः द्रुमहृमयीहगतौ संग्रामञ्च शशंसिरे अभीष्टवन्तः आङः शसि इच्छायां आदादिकोऽनुदात्तेत् ॥ ७० ॥ ज० म०

खेनुरित्यादि । अथानन्तरं वानराः खेनुर्जयशब्दं चक्रुः खनणचेति चकारात् शब्दे तफलेति पक्षे एत्वं तित्विषुः दीप्यन्ते स्म त्विषौज्भासे उद्येषुः उद्यमं चक्रुः यमौङ्विरतौ पर्व्वतान् तरूंश्च उज्जखुः खनुञ्विदारणे हनगमित्युङ्लोपः ददृसुः शत्रून् प्रतिजग्मुः दृसुगतौ संग्रामञ्च आशशंसिरे इच्छन्ति स्म अनुस हिंसास्तुत्योः आङ्पूर्व्व इच्छामाह यदुक्तं आशंसतिः स्वादिच्छायां शंसतीति स्तुतौ पदमिति ॥ ७० ॥ भ०

डुढौकिर इत्यादि । पुनर्भूयो लङ्कां डुढौकिरे जग्मुः तान् वानरान् ढौकितान् दशाननो बुबुधे बुद्धवान् जीवतश्चारीन् रामादीन् विवेद ज्ञातवान् अन्यथा कथं वानरा ढौकिता इति ततश्च धृतेः सकाशाद्भ्रंशे भ्रष्टः ॥ ७१ ॥ ज० म०

डुढौकिरे इत्यादि । वानराः पुनर्लङ्कां डुढौकिरे जग्मुः ढौकत्वौकटिङ् गत्यां खेरौकारस्य हुस्वउकारः दशाननस्तान् बुबुधे ज्ञातवान् बुधौङ्बेदने अरींश्च रामादीन् जीवतो विवेद जानाति स्म विदलभतो ङाम्वाच्यामित्यस्याभावपक्षे रूपं तत धृतेः सकाशात् असौ भ्रष्टः स्रंभ्रस्यचेति चकारादधःपातेः ॥ ७१ ॥ भ०

सस्वंस इत्यादि । दिव्येन शरबन्धेन सस्वंसे स्वस्तं भावे लिट् इत्येवं दशाननो वुवुन्द स्तवान् बुदि निशामने अथानन्तरं महामोहं मूर्च्छाकरं वभाज सेवते स्म न च जयमूहाञ्चक्रे वितर्कितवान् ॥ ७२ ॥ ज० म०

सस्वंसे इत्यादि । दिव्येन शरबन्धेन सस्वंसे स्वस्तमिति स दशाननो वुवुन्द स्तवान् लक्षणसुङ्भ्रंशे वुन्दिर्ज्ञानिशामने अथानन्तरं परं मोहं मूर्च्छां वभाज भज औभागसेवयोः स्वकीयञ्च जयं न ऊहाञ्चक्रे ऊहङ् वितर्के-र्विजादीत्यात् ॥ ७२ ॥ भ०

धूम्राक्षोऽथ प्रतिष्ठासाञ्चक्रे रावणसम्मतः ।
सिंहास्यैर्युयुजे तस्य दृकास्यैश्च रथः खगैः ॥ ७३ ॥
त्वक्षौः संविव्ययुर्देहान् वाहनान्यधिशिश्यिरे ।
आनर्जुर्नृभुजोऽस्त्राणि ववञ्जुश्चाहवक्षितिम् ॥ ७४ ॥
अध्युवास रथं तेये पुराजुह्राव चाशुभम् ।

धूम्राक्ष इत्यादि । अथ धूम्राक्षो रावणसम्मतो रावणेनानुज्ञातः सन् भूते निश्चित्य दृष्ट्वा प्रतिष्ठासाञ्चक्रे गन्तुमिच्छां कृतवान् प्रपूर्व्वात्तिष्ठतेः सम्भवप्रतिज्ञ स्थ इति तङ् सनन्तादपि पूर्व्ववत् स न इति तङ् उपसर्गादित्यादिना षत्वं तस्य च गन्तुमिच्छतो रथः खगैः आकाशगामिभिर्यानैः सिंहमुखैर्दृकमुखैश्च युयुजे युक्तः कर्म्मणि लिट् ॥ ७३ ॥ ज० म०

धूम्राक्ष इत्यादि । अथानन्तरं धूम्राक्षो राक्षसो रावणेन सम्मतोऽनुज्ञातः सन् प्रस्थातुमिच्छां चक्रे प्रतिज्ञानिर्णयेत्यादिना प्रपूर्व्वस्याधातोर्ष्ठं क्लिशादिति षत्वं सनः षत्वाभावात् ञिस्नोः स्नेः सः ष इति न नियमः त्यान्तत्वादाम् तस्य रथः सिंहमुखैः दृकमुखैश्च खगैराकाशगामिभिर्युयुजे युक्तः युजिर्धौञ्च च युतौ कर्म्मणि रूपं कोक दृक्षाष्टगो दृक इत्यमरः ॥ ७३ ॥ भ०

त्वक्षौरित्यादि । धूम्राक्षसम्बन्धिनो नृभुजो राक्षसाः त्वक्षौः सन्नाहैः त्वचं तायन्त इति देहान् संविव्ययुः छादितवन्तः व्येञ् संवरण इत्यस्य न व्योलिटीत्यात्वप्रतिषेधः लिव्यभ्यासस्योभयेषामिति सम्प्रसारणं वाहनान्यधिशिश्यिरे आरूढवन्तः एरनेकाचोयण् अधिशीङिति कर्म्मसंज्ञा अस्त्राण्यानर्जुः गृहीतवन्तः अर्जप्रतियत्ने अत आदेरिति दीर्घः तस्मान्नुट्दृहलः आनर्चुरिति पाठान्तरं पूजितवन्तः आहवक्षितिञ्च रणभूमिं ववञ्जुर्गताः वञ्जु गतौ ॥ ७४ ॥ ज०म०

त्वक्षौरित्यादि । नृभुजो राक्षसा धूम्राक्षसम्बन्धिनः त्वक्षौः सन्नाहैर्देहान् संविव्ययुराच्छादितवन्तः व्येञ्वृतौ व्यथयश्चेति खेर्ज्जिः जिवान्त्यःकितीति मत्वे जेरभावः नाव्येष्वामिति आनिषेधः तेन एचोऽशित्या इत्यस्य न प्रवृत्तिः यलायवावाव इत्ययादेशः त्वचं तायत इति ल्युजनादिति ङः एचोऽशित्या इत्यत्र अशितीति विषयसप्तमी तेनादन्तत्वात् वाहनानि अश्वादीनि अधिशिश्यिरे आरूढवन्तः शीङ्स्वप्ने अधिपूर्व्व आरोहणेऽपि शुधोरित्यादिना यत्वं कर्म्मक्रियेत्यादिना क्रियाव्याप्यत्वेन ढत्वे द्वितीया आरोहणार्थस्य सकर्म्मकत्वात् शीधोऽभिग्नेतेऽहिमित्यादौ आरोहणार्थे तात्पर्य्याभावादाधारस्य कर्म्मत्वं अस्त्राणि

संश्रावयाञ्चकाराख्यां धूम्राक्षस्त्वरे तथा ॥ ७५ ॥
निलिल्ये मूर्ध्नि स्टप्रोऽस्य क्रूरा ध्वाङ्क्षा ववाशिरे ।
शिशीके शोणितं व्योम चचाल क्ष्मातलं तथा ॥ ७६ ॥
ततः प्रजघटे युद्धं शस्त्राण्यासुः परस्परम् ।
वव्रश्चुराजुघूर्णुश्च स्वेसुश्चुकूर्दिरे तथा ॥ ७७ ॥

आनर्जुः जग्टजुः अर्ज्ज अर्ज्जने स्वान्तादादीति खेरान् आनर्ज्जुरिति पाठे अर्ज्ज-धातो रूपं आहवस्थितिं रणभूमिं ववञ्जुर्गतवन्तः वञ्जु, गत्याम् ॥ ७४ ॥ भ०

अध्युवासेत्यादि । धूम्राक्षो रथमध्युवास आरूढं उपान्वध्याङ् वस इति कर्म्मसंज्ञा पुरात् लङ्कातः तेये निष्क्रान्तः अयपयतयेत्यादिषु तयिरनुदात्तेत् चुक्षाव च शब्दं कृतवान् अशुभं भयानकं चुशब्दे आख्यां आत्मीयं नाम संश्रावयाञ्चकार श्रावितवान् तथा तत्वरे त्वरते स्म युद्धाय ॥ ७५ ॥ ज०म०

अध्युवासेत्यादि । धूम्राक्षो रथमध्युवास आरूढः वसे ऐनिवासे व्यधत्तेति खेर्जिः कर्म्मक्रियेत्यादिना आधारस्य कर्म्मत्वं पुरात्लङ्कायास्तेये गतः तयङ्गति-रत्नयोः तृफलेत्यादिना एत्वं खिलोपश्च अशुभमशोभनं चुक्षाव चुतं क्षु लटुक्षुते आख्यां स्वनाम श्रावितवान् वानरानित्यर्थात् श्रुलगतौ श्रुतौ जिः त्यान्तत्वा-दाम् तथा युद्धाय त्वरां चक्रे जित्वर्यमङ्स्वरे ॥ ७४ ॥ भ०

निलिल्ये इत्यादि । अस्य धूम्राक्षस्य गच्छतो मूर्ध्नि स्टप्रो निलिल्ये निलीनः एरनेकाचो यण् ध्वाङ्क्षाः क्रूराः अशुभसंज्ञिनः ववाशिरे वाशन्ते स्म व्योम कर्त्तृ शोणितं शिशीके क्षरितवत् शीङ् सेचने इत्यनुदात्तेत् तथा क्ष्मातलं पृथ्वीतलं चचाल चलितम् ॥ ७६ ॥ ज० म०

निलिल्ये इत्यादि । अस्य धूम्राक्षस्य गच्छतो मूर्ध्नि स्टप्रो निलीनः क्षी जय ओस्निधि श्रध्वोरिति यत्वं क्रूरा अशुभसंज्ञिनो ध्वांक्षाः काका ववाशिरे वाशृङ् अङपि अपिशब्दात् शब्दे व्योम आकाशं कर्त्तृ शोणितं शिशीके ववर्ष शीङङ् सेके क्ष्मातलं तथा चचाल चलति स्म चलगतौ ॥ ७६ ॥ भ०

तत इत्यादि । ततोनिमित्तादनन्तरं युद्धं प्रजघटे घटितं ते क्षरिराक्षसाः वक्ष्यमाणाः शस्त्राण्यासुः क्षिप्तवन्तः परस्परं वव्रश्चुः छिन्नवन्तः आजुघूर्णुः चक्रवद्भ्रान्ताः घूर्णतिरनुदात्तेत् स्वेसुः शब्दं कृतवन्तः स्वमेः फणादित्वादेत्वं चुकूर्दिरे क्रीडितवन्तः ॥ ७७ ॥ ज० म०

तत इत्यादि । अनन्तरं युद्धं प्रजघटे प्रवृत्तं घटषड्भ्यश्चेष्टे परस्परं

रुरुजुर्भेजिरे फेणुर्वङ्ऊधा हरिराक्षसाः ।
वीरा न विभयाञ्चक्रुर्भीषयाञ्चक्रिरे परान् ॥ ७८ ॥
रक्तं प्रचुस्रुतुः क्षुण्णाः शिश्रियुर्व्राणविक्षताः ।
अस्यतां ग्लुग्लुवुर्व्राणान् भुजाः साङ्कुष्मुष्टयः ॥ ७९ ॥
रणे चिक्रीड धूम्राक्षं ततर्ज्जानिलात्मजः ।

यस्त्राणि आसुस्रुचिषुः हरिराक्षसा इत्यत्रिमश्लोकेनान्वयः अस्यु दूर्छेपे परस्परं वव्रस्रुः ओव्रस्चूयृ छेदे आंनवेप्रच्छामिति जिनिषेधः आजुघूर्षुश्चक्रुः वद्भ्रमन्ति स्म घूर्णञ्चभ्रमणे जुघूर्षिरे च वव्रस्रुरिति क्वचित्पाठः स्रेसुः यब्दं चक्रुः स्रसुणशब्दने णित्वात् फणादिः तफलेत्यादिना पात्विकमेत्वं खिलोपश्च चुकूर्दिरे क्रीड़ितवन्तः कूर्दचक्रीडायाम् ॥ ७७ ॥ भ०

रुरुजुरित्यादि । रुरुजुर्भग्नवन्तः भ्रेजिरे शोभिताः बहुधा बहुप्रकारं फेणुर्गताः फणगतौ वीराः सात्विका न विभयाञ्चक्रुः न बिभ्यति स्म भीह्रीभृह्रुवांस्रुवच्चेत्याम् विभेतेः परस्मैपदित्वात् अनुप्रयोगे परस्मैपदं परान् शत्रून् शौर्यगुणयुक्ताः प्रयोजकाः भीषयाञ्चक्रिरे भीषयन्ते स्म अत्र भीस्म्योर्हेतु भयहेति तङ् अनुप्रयोगेऽपि ॥ ७८ ॥ ज० म०

रुरुजुरित्यादि । हरयो वानरा राक्षसाश्च परस्परं रुरुजुः भग्नवन्तः रुजो-शौभङ्गेभ्रेजिरे शुशुभिरे भ्राजृङ्ऋटुचेति चकाराद्भासि तफलेति पात्विकमेत्वं खिलोपश्च बहुभिः प्रकारैः फेणुः फणमिश्रगतौ वीराः शत्रून् विभयाञ्चक्रुः बिभ्यति स्म जिभीलिभीत्यां पशाम्बाभीह्रीति पात्विकः पशाम् लीत्वात् ह्रादीरेद्भिः णुर्वृङ् इति गुणः परान् शत्रून् भीषयन्ते स्म भीर्भीष्वेति भीषा-देशो मच्च त्यान्तत्वादाम् ॥ ७८ ॥ भ०

रक्तमित्यादि । केचित् क्षुण्णाः खण्डिताः सन्तो रक्तं प्रचुस्रुतुः प्रचरिताः केचित् शिश्रियुः बिभाषाश्वेत्यसम्प्रसारणपक्षे रूपं व्राणानस्यतां क्षिप्यतां योधानां भुजाः साङ्कुष्मुष्टयः अङ्कुष्मुष्टिसहिताः शरविक्षताः शरभिन्नाः ग्लुग्लुवुः गताः गत्यर्थं दृष्टव्यं सम्प्रसारणपक्षे रूपम् ॥ ७९ ॥ ज०म०

रक्तमित्यादि । केचित् क्षुण्णाः खण्डिताः सन्तो रक्तं स्रवन्ति स्म सुतिरत्वरे केचित् विश्लिष्टाः सन्तः शिश्रियुः शोथयुक्ता बभूवुः द्वायोश्चिर्गतिदृद्धोः बाणान् अस्यतां क्षिप्यतां योधानां अङ्कुष्मुष्टिना सहिता भुजाः शरविक्षता सन्तः ग्लुग्लुवुः गताः पतिता इत्यर्थः श्वेर्जिर्व्यायङ्योरिति पात्विको जिः ॥ ७९ ॥ भ०

आदद्दे च शिलां साश्वं पिपेषास्य रथं तया ॥ ८० ॥
पपात राक्षसो भूमौ ररास च भयङ्करम् ।
ततोद गदया चारिं तं दुद्राव द्रिणा कपिः ॥ ८१ ॥
अकम्पनस्ततो योद्धुं चकमे रावणाज्ञया ।
स रथेनाभिदुद्राव जुघुरे चातिभैरवम् ॥ ८२ ॥

रण इत्यादि । धूम्राक्षो रणे चिक्रीड क्रीडति स्म तमनिलात्मजो हनूमान् ततर्ज्ज भर्त्सितवान् शिलामाददे च गृहीतवान् तया शिलया अस्य धूम्राक्षस्य साश्वं रथं पिपेष चूर्णितवान् ॥ ८० ॥ ज० म०

रण इत्यादि । धूम्राक्षो रणे क्रीडितवान् क्रीड् खेले अनिलात्मजो हनूमान् तं धूम्राक्षं ततर्ज तर्जभर्त्से शिलामाददे जग्राह च आङ्पूर्व्वो दाञग्रहणे तया शिलया अस्य धूम्राक्षस्य अश्वेन सहितं रथं पिपेष धौपिषल्चूर्णने ॥ ८० ॥ भ०

पपातेत्यादि । राक्षसो धूम्राक्षो भूमौ पपात पतितः सन् भयङ्करं ररास रटितवान् ततोऽरिं हनूमन्तं गदया ततोद आहतवान् तं राक्षसं स कपिः अद्रिणा दुद्राव व्यापादितवान् ॥ ८१ ॥ ज०म०

पपातेत्यादि। धूम्राक्षो राक्षसो भूमौ पपात पतल्लजगत्याञ्च ररास शब्दं चक्रे रट वाचि ततः उत्थितः सन् गदया च अरिं हनूमन्तं ततोद पीडितवान् तदनन्तरौव्यर्थे कपिर्हनूमान् पर्व्वतेन तं राक्षसं दुद्राव मारितवान् भ्रुगिकर्म्मे अनेकार्थत्वाद्धिंसायामपि जघानेति क्वचित्पाठः दुद्रावेति क्वचित् ॥ ८१ ॥ भ०

अकम्पन इत्यादि । ततो धूम्राक्षविनाशानन्तरं अकम्पनो राक्षसः रावणाज्ञया युध्यस्वेति युद्धं चकमे इष्टवान् आयादय आर्द्धधातुकेवेति णिङ्भावपक्षे रूपं सोऽकम्पनः रथेनाभिदुद्राव अभिमुखं गतः जुघुरे च शब्दं कृतवान् अतिभैरवं अतिभयानकं घुरभीमार्थशब्दयोरित्यनुदात्तेत् ॥८२॥ ज०म०

अकम्पन इत्यादि । ततोऽनन्तरं अकम्पनो राक्षसो रावणाज्ञया योद्धुं चकमे इष्टवान् कमु कङ्क्ष्यृहि वारे इत्यनेन। णिङोऽभावपक्षे रूपं सोऽकम्पनो रथेनाभिदुद्राव अभिमुखं गतः द्रु क्षुतौ गतौ अतिभैरवं अतिभयङ्करं जुघुरे शब्दञ्चकार घुर्षडीर्हिंसाज्यान्योः अनेकार्थत्वात् शब्देऽपि घुर शब्दनौ भीमार्थ इत्यस्य भावे रूपं वा तेनेति विभक्तिव्यत्ययेन सम्बन्धः क्वचि-

प्रसन्दे तस्य वामाक्षि सस्रसुश्चाशिवाः खगाः ।
तान् वव्राजावमत्यासौ वभासे च रणे शरैः ॥ ८३ ॥
खमूयुर्व्वसुधामूवुः सायका रज्जुवत्तताः ।
तस्माद्वलैरपत्रेपे प्रुप्रोथास्मै न कश्चन ॥ ८४ ॥

त्यरस्मैपदिनोऽयात्मनेपदित्वात् कर्त्तरि रूपं वा शब्दार्थधुरधात्वर्थात्मनेपदीति जयमङ्गला जुघोरेति केचित्पठन्ति ॥ ८२ ॥ भ०

प्रसन्द इत्यादि । तस्याकम्मनस्यानिमित्तत्वसूचकं वामाक्षि प्रसन्दे स्यन्दितं अशुभाश्च अशिवसूचकाः खगाः सस्रसुः शब्दं कृतवन्तः अनेत्वपक्षे रूपं तान् खगान् अवमत्यावज्ञायासौ वव्राज गतः रणे शरैश्च वभासे शोभितम् ॥ ८३ ॥ ज० म०

प्रसन्द इत्यादि । अकुशलसूच्यते तस्याकम्मनस्य वामं चक्षुः स्यन्दते स्म स्यदिङ् ईषत्कम्पे अशुभसूचकाः खगाः पक्षिणः सस्रसुः शब्दं चक्रुः स्रसुणशब्दने तृफलेत्यादेरप्रवृत्तिपक्षे रूपं असावकम्मनस्तान् खगान् अवमत्य अवज्ञाय वव्राज व्रजगतौ रणे शरैश्च वभासे भास्दीप्तौ ॥ ८३ ॥ भ०

खमित्यादि । तेन सायका रज्जुवत्तता विस्तृताः सन्तः खमाकाशमूयुराप्तवन्तः वसुधाञ्च जवुरश्नुवन्तः वेञ् तन्तुसन्ताने तस्य लिटि वयिरादेशः वश्चास्यान्यतरस्यामिति यकारस्य वकारादेशः तस्मादिति तमकम्मनं वीक्ष्य ल्यपलोपे पञ्चमी त्रेपे लज्जितं भावे लिट् तृफलेत्यादिना एत्वाभ्यासलोपौ अस्मै अकम्मनाय न कश्चित्प्रुप्रोथ न प्रभवति स्म प्रोथपर्य्याप्तावितिस्वरितेत् अत्र कर्त्तुः क्रियाफलायोगान्नात्मनेपदं नमस्वस्तीत्यत्र अलं शब्दस्य पर्य्याप्तार्थपठणात् तदर्थयोगे चतुर्थी ॥ ८४ ॥ ज० म०

खमूयुरित्यादि । तेन रज्जुवत्तता विस्तृताः सायकाः खमाकाशमूयुः वसुधाञ्च जवुः आप्तवन्तः ऐङ्वेञ्सुतौ वेजोवयवेति पाक्षिको वयादेशः व्यवयठेत्यादौ वयग्रहणात् त्यांनवेप्रक्षामित्यस्याप्रवृत्तिः तेन व्यवयठेत्यादिना खेर्ज्जिः यहस्पाद्योरिति प्रकृतेर्जि यवः कितीत्यस्य पक्षद्वये रूपं तस्मात्तमकम्मनं वीक्ष्य वानरसैन्यैरपत्रेपे लज्जितं त्रपूषमिङ्क्षियि तृफलेत्यादिना एत्वं खिलोपश्च भावे रूपं तस्मादिति अन्यारभ्येत्यादिना यवर्थे पञ्चमी अस्मै अकम्मनाय कश्चन वीरो न प्रुप्रोथ न समर्थः प्रोथृङ् पर्य्याप्तौ खेरोकारस्य तस्य उकारः प्रक्रान्तार्थेत्यादिना चतुर्थी ॥ ८४ ॥ भ०

स भस्मसाच्चकारारीन् दुद्राव च कृतान्तवत् ।
चुक्रोध मारुतिस्तालमुच्चखे च महाशिखम् ॥ ८५ ॥
यमायाकम्पनं तेन निरुवाप महापशुम् ।
वभ्रज्ज निहते तस्मिन् शोको रावणमग्निवत् ॥ ८६ ॥
स विभ्रेष प्रचुक्षोद दन्तैरोष्ठं चखाद च ।
प्रगोपयाञ्चकाराशु यत्नेन परितः पुरम् ॥ ८७ ॥

स भस्मसादित्यादि । सोऽकम्पनः अरीन् भस्मसाच्चकार कार्त्स्न्येन भस्मभूतान् कृतवान् कृतान्तवत् यम इव दुद्राव खष्ठु पीड़ितवान् दुदुउपतापे तं दृष्ट्वा मारुतिश्चुक्रोध क्रुद्धः तालञ्च दृढं महाशिखमत्युच्छ्रायं उच्चखे उत्खातवान् अत्र क्रियाफलयोगात् तङ् ॥ ८५ ॥ ज० म०

स भस्मसादित्यादि । सोऽकम्पनोऽरीन् कार्त्स्न्येन भस्मीभूतांश्चकार कात्स्न्र्यात्यारित्यादिना चसात् कृतान्तवत् यम इव दुद्राव पीडितवान् द्वौनदु उपतापे तं दृष्ट्वा मारुतिर्हनूमान् चुक्रोध क्रुद्धः क्रुधल्लयोकोपे महाशिखमतिदीर्घं तालदृक्षञ्च उत्खातवान् खनुञ्विदारणे हनगमित्यड्लोपः ॥ ८५ ॥ भ०

यमायेत्यादि । तेन तालेन स चाकम्पनं महापशुमिव यमाय निरुवाप दत्तवान् निष्पूर्व्वोवपिर्दाने वर्त्तते तत्र धातोर्यजादित्वात् सम्प्रसारणं न भवति अकित्वात् अभ्यासस्य लिटि भवत्येव तस्मिन्निहते शोकोऽग्निरिव रावणं वभ्रज्ज दग्धवान् ॥ ८६ ॥ ज० म०

यमायेत्यादि । तेन तालदृक्षेण हनूमान् अकम्पनं महापशुमिव यमाय निरुवाप दत्तवान् वपौञ्ड्वैसुखुडतन्तुवीजोप्योः निःपूर्व्वोदाने वर्त्तते व्यथप्रहेति खेर्जिः तस्मिन्नकम्पने निहते सति शोकोऽग्निरिव रावणं वभ्रज्ज ददाह भ्रस्जजौशपाके झप्झसोरिति सस्य दत्वे स्तुभिश्चषादिति जः भ्रस्जोऽरेणौ भर्ज्जवेत्यस्याप्रवृत्तिपक्षे रूपम् ॥ ८६ ॥ भ०

स विभ्रेत्यादि । स राजा विभ्रेष चलितः श्रेष चलने खरितेत् । प्रचुक्षोद क्रोधाल्लोष्टादीन् चूर्णितवान् ओष्ठञ्च दन्तैश्चखाद दष्टवान् पुरं लङ्कां समन्तात् यत्नेन प्रगोपयाञ्चकार रक्षितवान् गुपू रक्षण इत्युदात्तेत् आयप्रत्ययान्तत्वादाम् ॥ ८७ ॥ ज० म०

स विभ्रेत्यादि । स रावणो विभ्रेष चलितः धैर्य्यादित्यर्थात् श्रेभृञ्चलने क्रोधात् प्रचुक्षोद लोष्टादीन् चूर्णितवान् अधौक्षुदिरक्षुदि दन्तैरोष्ठं चखाद

प्रहस्तमर्थयाञ्चक्रे योद्धुमद्भुतविक्रमम्।
किं विचारेण राजेन्द्र युद्धार्थी वयमित्यसौ ॥ ८८ ॥
चक्राणाशङ्कितो योद्धुमुत्सेहे च महारथः।
नियेमिरेऽस्य योद्धारश्चक्रुपे चाश्वकुञ्जरम् ॥ ८९ ॥
युयुजुः स्यन्दनान्शैरीजुर्देवान् पुरोहिताः।

दृष्टवान् खादूभवणे खट् स्थैर्ये बधे वा पुरं लङ्कां परितः समन्तात् आशु शीघ्रं यत्नेन प्रगोपयाञ्चकार रक्षितवान् गुपूरक्षे वाऽरे इति पाक्षिक आयः त्यान्तत्वादाम् ॥ ८७ ॥ भ०

प्रहस्तमित्यादि। अद्भुतविक्रमं प्रहस्तं रावणो योद्धुं युध्यस्वेत्यर्थयाञ्चक्रे प्रार्थितवान् अर्थ उपपदात्ऽऽयामिति चौरादिक आत्मनेपदी वचनात् असौ प्रहस्तः प्रार्थितश्चक्राण वभाषेति वक्ष्यमाणेन सम्बन्धः हे राजेन्द्र युद्धार्था वयं युद्धप्रयोजनाः-ततश्च किं विचारेणेति ॥ ८८ ॥ ज० म०

प्रहस्तमित्यादि। रावणः अद्भुतविक्रमं प्रहस्तं योद्धुं प्रार्थितवान् अर्थ-त्कङ्याचने असौ प्रहस्त इति चक्राणेति वक्ष्यमाणेन सम्बन्धः किं चक्राणेत्याह हे राजेन्द्र किं विचारेण यतो वयं युद्धप्रयोजना एव ॥ ८८ ॥ भ०

चक्राणेत्यादि। उक्तावसौ महारथो योद्धा अशङ्कितो निर्भयः सन् योद्धुमुत्सेहे उत्साहं कृतवान् अस्य योद्धारो रावणेन नियेमिरे नियमिता अन्येन सह एतावद्भिर्योद्धव्यमिति कर्मणि लिट् अश्वकुञ्जरं चक्रुपे सञ्जीकृतं कपुङ्-चकल्पने कपः क्रुपोऽकपादौ अश्वाश्च कुञ्जराश्चेति समाहारद्वन्द्वः सेनाङ्गत्वात् समाहार इति परः महान् रथो यस्य स तथा महारथशब्दः पारिभाषिकोऽप्यस्ति तथाच रथेनैकेन योवीरः शास्ति शतुकुलं महत्। महारथः स विज्ञेयः संग्रामेषु परायण इति ॥ ८९ ॥ भ०

युयुजुरित्यादि। स्यन्दनान् रथान् अश्वैर्युयुजुः युञ्जन्ति स्म पुरोहिताः दैवानीजुः पूजितवन्तः यजादित्वात्समसारथं ब्राह्मणानर्चुः पूजितवन्तः ते च

आमन्त्र्य ब्राह्मणान् सम्यगाशिषश्चाशशंसिरे ॥ ६० ॥
जह्रिरे मूर्ध्नि सिद्धार्था गावश्चालेभिरे भटैः ।
प्रचुच्युवुर्मुहास्त्राणि जिज्ञासाञ्चक्रिरे हयान् ॥ ६१ ॥
ललुः खड्गान् ममार्ज्जुश्च मल्लजुश्च परश्वधान् ।
अलञ्चक्रे समालेभे ववसे बुभुजे पपे ॥ ६२ ॥

पूजिताः आशिषः आशशंसिरे उदितवन्तः आङ्पूर्वस्य शासु इच्छायामनुदात्तेत् शास इत्वे आङ्शासोः कावुपसङ्ख्यानमित्याशीः ॥ ६० ॥ ज० म०

युयुजुरित्यादि । अश्वैः स्यन्दनान् रथान् युयुजुः सङ्कृत्यन्ति स्म सारथय इत्यर्थात् युजिर्धाञ्चयुतौ युजकिसंयमे इत्यस्य भ्वादिपक्षे वा रूपं पुरोहिता देवान् यजन्ति स्म यजैजौ देवार्चादानसङ्गतिकरणेषु कर्तुः फलवत्त्वाभावात् पं व्यथ्यश्चेति खेर्जिः यङ्लुपाद्योरिति मूलस्य जिः ब्राह्मणांश्च पूजयन्ति स्म स्यान्नादादीति अर्च्चेः खेरान् ते ब्राह्मणा अर्च्चिताः सन्तः आशिषश्च आशशंसिरे इच्छन्ति स्म आङःशासु इच्छायां आशशासिरे इति पाठे आङःशास इच्छायामपि ॥ ६० ॥ भ०

जह्रिरे इत्यादि । भटैर्योधैः सिद्धार्थाः सर्षपाः मूर्ध्नि जह्रिरे जढाः गावश्चालेभिले स्पृष्टाः कर्मणि लिट् महास्त्राणि प्रचुच्युवुः तेजितवन्तः तथा तैर्योद्धुं पार्य्यत इति च्युङ् तेजने भटाः हयान् जिज्ञासाञ्चक्रिरे ज्ञातुमिच्छां कृतवन्तः किमेते योद्धुं क्षमा नेति ज्ञाश्रुस्रुदृशां सन इत्यात्मनेपदित्वादनुप्रयोगेऽपि तङ् ॥ ६१ ॥ ज० म०

जह्रिरे इत्यादि । भटैर्योधैर्मूर्ध्नि सिद्धार्थाः श्वेतसर्षपा जह्रिरे धृता मङ्गलार्थं वह्नैऔप्रापणे व्यथ्यश्चेति खेर्जिः यङ्लुपाद्योरिति प्रकृतेर्जिः गावश्च आलेभिरे स्पृष्टाः लभश्चौङःषमाप्तौ आङ्पूर्व्वः सर्षनेऽपि कर्मणि रूपं महास्त्राणि प्रचुच्युवुः तेजितवन्तः भटा इति विभक्तिव्यत्ययेनानुषज्यते च्युङ तेजने हयान् ज्ञातुमिच्छां चक्रुः किमेते युद्धकुशला न वेति ज्ञा अवबोधने स्रुदृशननुदात्तेति भम् ॥ ६१ ॥ भ०

ललुरित्यादि । खड्गान् ललुर्गृहीतवन्तः ला आदाने ममार्ज्जुश्च विशुद्धान् कृतवन्तः तथा परश्वधान् परश्वून् शोधितवन्तः मृजेरजादौ संक्रमे विभाषा दृद्भिः योद्धृभिर्वक्ष्यमाणैः अलञ्चक्रे अलङ्कृतं समालेभे समालब्धं ववसे छादितं अस आच्छादने बुभुजे भुक्तं पपे पीतं भावे लिट् ॥ ६२ ॥ ज० म०

जहसे च क्षणं यानैर्निर्जग्मे योद्धृभिस्ततः ।
विप्रान् प्रहस्त आनर्च्छ जुहाव च विभावसुम् ॥ ९३ ॥
संवर्गयाञ्चकाराप्तान् चन्द्रेनेन लिलेप च ।
चचाम मधुमाध्वीकं त्वक्षाञ्चाचकचे वरम् ॥ ९४ ॥
उष्णीषं सुसुचे चारु रथञ्च जुजुषे शुभम् ।
आललम्बे महास्त्राणि गन्तुं प्रवृत्ते ततः ॥ ९५ ॥

ललुरित्यादि । भटाः खड्गान् गृहीतवन्तः लल इच्छे समार्जुः खड्गान् शुद्धान् चक्रुः तथा परश्वधान् परश्वून् मृजुः शोधितवन्तः मृजलशुद्धौ मृजोऽकङिति त्रिर्वति रूपद्वयं अलञ्चक्रे योद्धृभिरिति वक्ष्यमाणेन सम्बन्धः समालेभे अनुलेपनं कृतं ववसे आच्छादनं कृतं वसलसृतौ वुभुजे भुक्तं भुजधोत्वाणे भजे पपे पीतं पापाने सर्वत्र भावे ठी ॥ ९२ ॥ भ०

जहास इत्यादि । क्षणं जहसे हसितं यानैः करणभूतैः निर्जग्मे निर्गतं ततः प्रहस्तः विप्रान् गोसुवर्णादिदानेन आनर्च्छ पूजितवान् विभावसुं चाग्निं आज्यादिना जुहाव प्रीणितवान् ॥ ९३ ॥ ज० भ०

जहसे इत्यादि । योद्धृभिः क्षणं जहसे हसितं यानै रथादिभिर्निर्जग्मे योद्धुं निर्गतं ततोऽनन्तरं प्रहस्तो विप्रान् आनर्च्छ पूजितवान् विभावसुं अग्निं जुहाव प्रीणितवान् हुजिहोमेऽदने च दृहानेकार्थत्वात् प्रीणनेऽपि ॥९३॥ भ०

संवर्गयामित्यादि । आप्तान् विश्वासिनः संवर्गयाञ्चकार कटकादिप्रदानेन संवर्गितवान् संवर्गं करोतीति ण्यन्तस्य रूपं चन्दनेन लिलेप समालब्धवान् मृद्वीका द्राक्षा तस्या विकारः माद्वीकं मधु चचाम त्वक्षाञ्च सन्नहनं परं श्रेष्ठं आचकचे बद्धवान् कच बन्धन इत्यनुदात्तेत् ॥ ९४ ॥ ज० भ०

संवर्गयामित्यादि । प्रहस्तः आप्तान् जनान् संवर्गयाञ्चकार सम्भावितवान् सजातीयसमुदायो वर्गः दक्षिणहस्तादिदानेन यथायथपूर्वकं संवर्गितवान् समृद्धीकृतवानित्यर्थो वा संवर्गं करोतीति ञिः चन्दनेन लिलेप लेपनं कृतवान् लिलिपोऽपञ्लेपे मधु माध्वीकं मद्यं चचाम वरं श्रेष्ठं त्वक्षां कवचं आचकचे बद्धवान् कचङ्बन्धत्विषोः ॥ ९४ ॥ भ०

उष्णीषमित्यादि । उष्णीषं शिरस्त्राणं सुसुचे रथञ्च जुजुषे जुषिरनुदात्तेत् महास्त्राणि आललम्बे गृहीतवान् लबि अवस्रं सन इत्यनुदात्तेत् तत उत्तरकालं गन्तुं प्रवृत्ते प्रवृत्तः ॥ ९५ ॥ ज० भ०

आजघ्नुस्तूर्यजातानि तुष्टुवुश्चानुजीविनः ।
रजः प्रवव्रधे घोरं घोषश्च व्यानशे दिशः ॥ ९६ ॥
तं यान्तं दद्रुमुर्गध्राः क्रव्यादश्च सिषेविरे ।
आववुर्वायवो घोराः खादुल्काश्च प्रचस्करुः ॥ ९७ ॥
सस्यन्दे शोणितं व्योम रणाङ्गानि प्रजज्वलुः ।

उष्णीषमित्यादि । चारु उष्णीषं शिरस्त्राणं मुकुटं वा सुतुचे परिदधे सुचल्लशयजौ मोले परिधानेऽपि दृश्यते उष्णीषश्च शिरोवेष्टे किरीटे लक्षणान्तर इति विश्वः शुभं शोभमानं रथं जुजुषे सेवितवान् आरूढ इत्यर्थः जुषीजि जुषन्तुदिसेवे महास्त्राणि आललम्बे जग्राह ललिङ्संजने च ततोऽनन्तरं गन्तुं प्रवृत्तः वृतुङ्वृल्ल वर्त्तने ॥ ९५ ॥ भ०

आजघ्नुरित्यादि । तूर्यजातानि वाद्यसमूहान् आजघ्नुः ताडितवन्तः तन्निघ्नन्ता इत्यर्थात् आङोयमहन इति तङ् न भवति सकर्मकत्वात् अनुजीविनश्च तुष्टुवुः जय जीवेति स्तुवन्ति स्म पदत्वोभाङ्गीरं रजः प्रवव्रधे वर्द्धते स्म घोषश्च कलकलशब्दः दिशो व्यानशे व्याप्नवान् ॥ ९६ ॥ ज० भ०

आजघ्नुरित्यादि । तूर्यसमूहान् आजघ्नुः वाद्यकारास्ताडितवन्तः आत्मङ्ढादित्यस्याविषयः आत्मोङ्कर्मकत्वाभावात् हनगमित्युड्लोपः अनुजीविनो जय जयेति स्तुवन्ति स्म स्तुसुधूञ् क्विलादिति षत्वे ष्टुभिरिति टः घोरं भीषणं रजो वर्त्तते स्म प्रवव्रध इति क्वचित्पाठः घोषः कोलाहलश्च दिशो व्याप्नवात् अम्भूङ्नव्याप्तिसंहत्योः स्वान्नादादीति खेरान् ॥ ९६ ॥ भ०

तं यान्तमित्यादि । तं प्रहस्तं यान्तं दृष्ट्वा अशुभसूचकाः दुर्दृवर्गतवन्तः क्रव्यादश्च दृगालाः सिषेविरे सेवितवन्तः वायवो घोराः पांशुपाकिणः आववुः समन्ताद्वान्ति स्म उल्काश्च तदा तस्मिन् काले प्रचस्करुः पतिताः स्म सस्खलन इत्यकर्मकः ॥ ९७ ॥ ज० भ०

तं यान्तमित्यादि । दृष्ट्वा अशुभसूचकाः पक्षिणस्तं यान्तं गच्छन्तं प्रहस्तं दद्रुमुर्गतवन्तः दुर्दुवरिति पाठे दुस्तुगतौ क्रव्यादः दृगालाः सेवितवन्तः सेदृङ् सेवने खेरेकारस्य छुलङ्कारः घोराः प्रतिकूला वायवः सर्वतो वान्ति स्म आकाशगमनस्थितयोः तदा तस्मिन् काले उल्काः प्रचस्करुः आकाशात् पतन्ति स्म स्मर सस्खलने ॥ ९७ ॥ भ०

सस्यन्द इत्यादि । व्योम कर्तृ शोणितं सस्यन्दे स्विद्यति स्म स्यन्दिः सक-

रथाः प्रचस्खलुः साश्वा न ररंहाश्वकुञ्जरम् ॥ ९८ ॥
प्रतोदा जगलुर्वामममानञ्जुर्यज्ञिया मृगाः ।
ददाल भूः पुपूरे द्यौः कपीनामपि निःस्वनैः ॥ ९९ ॥
मिमेह रक्तं हस्त्यश्वं राक्षसाश्च निषिष्विषुः ।
ततः शुशुभतुः सेने निर्दयञ्च प्रजघ्नतुः ॥ १०० ॥

भट्टिः रथाङ्गानि खड्गादीनि जज्वलुः ज्वलन्ति स्म साश्वाः सहाश्वैः रथाः प्रचस्खलु स्खलन्ति स्म अश्वकुञ्जरं न ररंह न गतम् ॥ ९८ ॥ ज० म०

प्रचस्खद् इत्यादि । व्योम आकाशं कर्तृ शोणितं स्रवति स्म स्रन्दूङ्प्रस्रुतौ रथाङ्गानि खड्गादीनि ज्वलन्ति स्म ज्वलज्जमचलत्यर्थः अश्वैः सह रथाः स्खलन्ति स्म स्खलमिचये चले अश्वकुञ्जरं कर्तृ न ररंह न जगाम रहिगत्यां नेहाञ्चक्रे इति पाठे न चेष्टते स्मेत्यर्थः ॥ ९८ ॥ भ०

प्रतोदा इत्यादि । प्रतोदाः जगलुः हस्तेभ्यो गलिताः गल अदने अनेकार्थत्वात्प्रतनेऽपि यज्ञार्हाः मृगाः यज्ञियाः यज्ञार्हाः कृष्णसाराः यज्ञर्त्विग्भ्यां षखञौ वाममङ्गमानञ्जुः गतवन्तः अत आदेरिति दीर्घः तस्मान्नुट्हिफलः भूर्ददाल विदीर्णा जज्वालेति पाठान्तरं ज्वालेत्यर्थः कपिनिःस्वनैर्द्यौराकाशं पुपूरे पूर्णं दिवः पूरणनिमित्तं यतः कपयो हर्षात्तद्विनाशसूचका एवमाचरन्ति ॥९९॥ ज०म०

प्रतोदा इत्यादि । सारथिहस्तात् प्रतोदास्ताडनदण्डाः गलिताः गलभवे अनेकार्थत्वात् यतनेऽपि यज्ञार्हा मृगाः कृष्णसारादयो वामं भागं गताः अञ्जुक्षिष्टोक्तौ गतौ आनञ्जुरिति पाठे अनञ्जधञ्जिव्यक्तिगतिव्रक्षणे भूर्विदार्ण दलमिभेदे जज्वालेति पाठे ज्वलमचाले कपीनां निःस्वनैः द्यौराकाशं पुपूरे पूर्णा तथाशुभं दृष्ट्वा कपीनां हर्षनिःस्वनो जात इति भावः पूरीङ्पूर्त्तौ॥९९॥भ०

मिमेहेत्यादि । हस्त्यश्वं कर्तृ रक्तं मिमेह मूत्रितवदित्यर्थः मिह सेचने राक्षसाश्च स्वरक्तं निषिष्विषुः निरस्तवन्तः ततो दुर्निमित्तादनन्तरं ते सेने सङ्घे शुशुभतुः शोभितवत्यौ निर्दयं प्रजघ्नतुः प्रहृतवत्यौ ॥ १०० ॥ ज० म०

मिमेहेत्यादि । हस्त्यश्वं कर्तृ रक्तं मिमेह मूत्रितवत् मिहौ सिचि राक्षसाश्च रक्तं निष्ठीवन्ति स्म ष्विङ् निरसने ष्विवजाद्योरिति षात्विकः षेत्यकारः तत ईदयामङ्गलनिमित्तानन्तरं ते सेने शुशुभतुः शुभशुन्भदीपनहिंसयोरित्यस्य रूपं शुभ्लङ् दीप्तौ कचिदात्मनेपदिनोऽपि परस्मैपदित्वमिति कोचित् निर्दयञ्च प्रहारं चक्रतुः कृञ् हृत्यां ॥ १०० ॥ भ०

दिद्विषुर्दुद्युवुश्चक्षुश्चक्लमुः सुषुपुर्हताः ।
चिखिदिरे चखादुश्च विलेपुश्च रणे भटाः ॥ १०१ ॥
प्रहस्तस्य पुरोऽमात्यान् जिहिंसुर्दधृषुस्तथा ।
वानराः कर्म्म सेनानी रक्षसां चक्षमे न तत् ॥ १०२ ॥
अर्णुनाव सशस्त्रौघैर्वानराणामनीकिनीम् ।
अशास च बहून् योधान् जीवितेन विवेच च ॥ १०३ ॥

दिद्विषुरित्यादि । रणे भटाः दिद्विषुः परस्परं द्विष्टवन्तः द्विष अप्रीतौ दुद्युवुः अभिमुखं गतवन्तः द्यु अभिगमने चक्षुः खिन्नवन्तः क्षा क्षेदने क्लमु: मूर्च्छां गतवन्तः सुषुपुः भूमौ पतिताः वध्यादिना सम्प्रसारणं चखादिरे खादिताः कर्म्मणि लिट् चखादुः खादितवन्तः विलेपुश्च विलेपं कृतवन्तः अत एकश्रुतीत्वं ॥ १०१ ॥ ज० म०

दिद्विषुरित्यादि । भटा रणे द्वेषं चक्रुः द्विषौजसैरे दुद्युवुः अभिमुखं जग्मुः द्युलभिसर्पणे चक्षुश्चिक्षुन्नवन्तः क्षो लूनौ कृताः सन्तश्चक्लमुर्मोहं गताः ऊक्लम्यक्लमुभिर्ग्लानौ सुषुपुर्भूमौ पतिताः स्वपौजिग्ये अनेन पतनं लक्ष्यते,व्यथयश्चेति खेर्जिः स्टक्षपाद्योरिति प्रकृतेर्जिः चखादिरे अन्यैः खादिताः चिखिदिरे इति पाठे दैन्यं गताः खिदड्धौदैन्ये चखादुश्च अन्यान् खादितवन्तः खादड्भक्षणे विलेपुर्विलापं चक्रुः कलपभाषे विपूर्व्वः परिदेवने ॥ १०१ ॥ भ०

प्रहस्तस्येत्यादि । अमात्यान् सचिवान् प्रहस्तस्य पुरोऽग्रतः वानरा जिहिंसुर्हतवन्तः तथा दधृषुः परिभूतवन्तः जिधृषाप्रागल्भ्ये तच्च कर्म्म वानरैर्यत्कृतं रक्षसां सेनानीः प्रहस्तः न चक्षमे न क्षमते स्म ॥ १०२ ॥ ज० म०

प्रहस्तस्येत्यादि । वानराः प्रहस्तस्य पुरोऽग्रतोऽमात्यान् हिंसन्ति स्म हिंसधिक्किहिंसे अमा सहार्थे त्यत्राद्यचिरेत्यादिना त्यः तथा दधृषुः जिधृषान प्रागल्भ्ये तद्वानरैः कृतं कर्म्म रक्षसां सेनानीः प्रहस्तो न क्षमते स्म क्षमूङ्जिमर्षे ॥ १०२ ॥ भ०

अर्णुनावेत्यादि । स सेनानीर्वानराणामनीकिनीः सेनाः शस्त्रौघैरर्णुनाव क्षादितवान् अर्णोतेर्णुवद्भावादितीजादेरित्याम् न भवति अशास च योधान् अत्र हिंसायां जीवितेन च विवेच च पृथक्कृतवान् विचिरपृथग्भावे इति रुधादौ स्मरितेत् ॥ १०३ ॥ ज० म०

अर्णुनावेत्यादि । स प्रहस्तो वानराणां अनीकिनीं सेनां शस्त्रसमूहैः प्रोर्णु-

आससञ्ज भयं तेषां द्युतते च यथा रविः ।
नाययास द्विषां देहैर्जगाहे च दिशो दश ॥ १०४ ॥
केचित् संचुकुटुर्भीता लेजिरेऽन्ये पराजिताः ।
संग्रामाद्दभ्रगुः केचित् ययाचुश्चापरेऽभयम् ॥ १०५ ॥
एवं विजिग्ये तां सेनां प्रहस्तोऽतिदर्पं च ।
अशाम न च संक्रुद्धो निर्जुगोप निशाचरान् ॥ १०६ ॥

भाव आच्छादितवान् जर्णुलञ् आच्छादने विजादीत्यादौ जर्णुवर्ज्जनात्साम् नाजन्तादेरादिर्द्विः स्वादौ नवद्रोय इति वचनात् नोरेव द्वित्वं बह्वन् योधान् अशास जघान उशसबधे जीवितेन च विवेच पृथक् कृतवान् विचिर्लिधौज-पृथक्त्वे ॥ १०३ ॥ भ०

आससञ्जेत्यादि । तेषां योधानां युयुत्सूनां भयमाससञ्ज आलग्नं सञ्जसङ्ग इत्यकर्म्मकः प्रहस्तश्च रविरिव द्युते द्योतते स्म द्युतिस्वाप्योः सम्प्रसारणमित्य-भ्यासस्य सम्प्रसारणं नायायास युध्यमानो नायस्यति स्म यत्नप्रयत्ने द्विषद्दैहैश्च यत्नु-कायैः करणभूतैः दश दिशो जगाहे अवटब्धवान् ॥ १०४ ॥ ज० भ०

आससञ्जेत्यादि । प्रहस्तस्तेषां वानराणां भयं आससञ्ज आरोपितवान् सन्जौजिसङ्गे अन्तर्भूतञ्यर्थोऽत्र बोध्यः सनुजेरकर्म्मकत्वात् किंवा भयं कर्त्तृ आससञ्ज आसक्तवत् प्रहस्तो रविरिव द्योतते स्म द्युत्लडपि अपिशब्दात् द्युत्यां द्युत्स्वाप्योःखेर्जिरिति जिः बध्यमानोऽपि नायायास नायासं प्राप दूर्यसु-यतने आङ्पूर्व्वः अमे द्विषां देहैः कपिशरीरैः करणभूतैः दश दिशो जगाहे विष्टब्धवान् ङगाङ्विलोडने ॥ १०५ ॥ भ०

केचिदित्यादि । केचिद्भीताः सन्तः सञ्चुकुटुः सङ्कुटिताः निष्प्रयत्नाः स्थिता इत्यर्थः कुटकौटिल्ये अन्ये पराजिताः सन्तः लेजिरे भर्त्सिताः प्रहस्तेन स्टगा इव कातरा यूयमिति लज्जालाजिभर्त्सने कर्म्मणि लिट् केचित् संग्रामाद्दभ्रगुः पलायिताः भ्रसुभ्रंशु अधः पतने अपरे चाभयं ययाचुः याचितवन्तः ॥१०५॥ ज० भ०

केचिदित्यादि । केचन भीताः सन्तः सञ्चुकुटुः कौटिल्यं प्रापुः कुटिल-युद्धाश्रयणात् कुटधिकौटिल्ये अन्ये पराजिताः लेजिरे प्रहस्तेन भर्त्सिताः लज्जभर्त्सने कर्म्मणि रूपं केचित् संग्रमाद्दभ्रगुः पलायिताः स्रभ्रन्गुङ्भ्रंशु च चकारादधःपाते अपरे चाभयं देहीति याचितवन्तः टुडुयाचृञ् याचने॥१०५॥भ०

एवमित्यादि । एवमुक्तेन प्रकारेण प्रहस्तस्तां सेनां विजिग्ये जितवान्

चुक्रुधे तत्र नीलेन तरुश्चोन्निक्षिपे महान्।
प्रहस्तोऽभिहतस्तेन वाणान् विसस्रुजे बहून्॥ १०७॥
सेहे कपीरथाश्वांश्च रिपोस्तर्द शाखिना।
धरित्रीं सुषली तेये प्रहस्तश्चिखिदे न च॥ १०८॥
संदुधुक्षे तयोः कोपः पक्षाये शस्त्रलाघवम्।

विपराभ्यांजेरिति तङ् संलिटोजेरिति कृत्वं अतिदर्पं च सुष्ठु हृष्टवान् दर्पहर्षविमोचनयोः न च शशाम न च शमनं गतः निशाचरान् स्वीयानमात्यान् निजुगोप रक्षितवान् आयाभावपक्षे रूपम्॥ १०६॥ ज० म०

एवमित्यादि। उक्तप्रकारेण प्रहस्तस्तां कपिसेनां विजितवान् जिजये विपराजोति मं जेर्गिसन्ध्योः अत्यर्थं दृप्तोऽपि जातः दृप्यङ्हर्षगर्व्वयोः दर्पक्लिसन्दीपन इत्यस्य वा जेरभावपक्षे रूपं संक्रुद्धः सन् न शान्तो बभूव शशु दूर्यमे निशाचरान् निजुगोप शुपूरक्षे वाऽरे इति पक्षे आयस्याभावः॥१०६॥भ०

चुक्रुध इत्यादि। तत्र तस्मिन् संग्रामे नीलेन चुक्रुधे क्रुधं भावे लिट् तरुश्चिक्षिपे उत्क्षिप्तः कर्मणि लिट् तेन तरुणा उन्मूलितेनाभिहतः सन् प्रहस्तो बाणान् विसस्रुजे क्षिप्तवान् स्रुज विसर्गे इति देवादिकोऽनुदात्तेत्॥ १०७॥ ज० म०

चुक्रुधे इत्यादि। तत्र प्रहस्तविषये नीलेन चुक्रुधे क्रोधः कृतः क्रुधक्लिशौ क्रोधे भावे रूपं महान् तरुश्च तस्योपरि उच्चिक्षिपे उत्क्षिप्तः क्षिपश्चौ क्षिपि कर्मणि रूपं तेन नीलेन तरुणा वा अभिहतः प्रहस्तो बहून् बाणान् विसस्रुजे त्यक्तवान् स्रुज्यौऽविसर्गे॥ १०७॥ भ०

सेहे कपिरित्यादि। कपिर्नीलो बाणान् सेहे सोढवान् रथानश्वांश्च रिपोः प्रहस्तस्य शाखिना तरुणा ततर्द हतवान् तर्दृहिंसि हिंसायां हतरथाश्वश्च प्रहस्तो सुषली गृहीतसुषलः धरित्रीं तेये गतवान् अयपक्षेत्यत्र तयिरनुदात्तेत् न च चिखिदे खिन्नः खिददैन्य इत्यनुदात्तेत्॥ १०८॥ ज० म०

सेहे इत्यादि। कपिर्नीलः सेहे सोढवान् तद्बाणवृष्टिमित्यर्थात् रिपोः प्रहस्तस्य रथमश्वांश्च शाखिना ततर्द तर्दृहिंसे ततः प्रहस्तो सुषलान्वितः सन् धरित्रीं तेये गतः तयङ्गतिरत्नयोः न च चिखिदे खेदं प्राप्तः खिदङ्ध्यौदैन्यके॥ १०८॥ भ०

संदुधुक्ष इत्यादि। तयोर्नीलप्रहस्तयोः कोपः संदुधुक्षे दृद्धिं गतः

नुनोद शाखिनं नील आवव्रे सुषली तरुम् ॥ १०९ ॥
वियत्यानभ्रतुर्भूमौ मण्डलानि विचेरतुः ।
प्रदुद्रुवतुरन्योन्यं वीरौ श्रमभतुर्न च ॥ ११० ॥
समीरयाञ्चकाराथ राक्षसस्य कपिः शिलाम् ।
क्षतस्तया ममारासावाशिश्राय च भूतलम् ॥ १११ ॥
ततुषुर्वानराः सर्वे नेशुश्चित्ता निशाचराः ।
जेरू राज्ञा दशास्यस्य सैन्यं नीलं नुनाव च ॥ ११२ ॥

अस्त्रलाघवमस्त्रकौशलं प्रस्फाये वृद्धिं गतः नुनोद शाखिनं प्रेरितवान् सुषली प्रहस्तः तरुमावव्रे सुषलेनाहृतवान् ॥ १०९ ॥ ज० भ०

संदुधुक्षे इत्यादि । तयोर्नीलप्रहस्तयोः कोपः संदुधुक्षे संप्रदीप्तः धिक्षधुक्षङ्सन्दीपने क्लेशे जीवे अस्त्रविषये लाघवं शीघ्रता वर्द्धते स्म स्फायीङ्संवृद्धौ नीलः शाखिनं नुनोद नुदञ्प्रेरणे सुषली प्रहस्तस्तरुं निवारितवान् वृलगृहजवृतौ ॥ १०९ ॥ भ०

वियतीत्यादि । वीरौ तौ वियति आकाशे आनभ्रतुः गतौ अभ्रवश्चेति गत्यर्थः वियतोऽधिकरणत्वेन विवक्षितत्वात् द्वितीया न क्षता भूमौ च मण्डलानि तिर्यग्भ्रमणानि विचेरतुः आचरितवन्तौ अन्योन्यं प्रदुद्रुवतुः उपतापितवन्तौ न च श्रमभतुः श्रान्तौ ॥ ११० ॥ ज० भ०

वियतीत्यादि । तौ नीलप्रहस्तौ वीरौ वियति आकाशे गतौ अभ्रगत्यां स्थान्तादादीति खेरान् भूमौ मण्डलानि तिर्यग्भ्रमणानि विचेरतुर्विहितवन्तौ अन्योन्यं प्रदुद्रुवतुः उपतापितौ दुर्णोप्रतापे दुःखगतौ नतु श्रमभतुः श्रान्तौ श्रमुभ्यजिदृर् तपःखेदयोः ॥ ११० ॥ भ०

समीरयामित्यादि । अथानन्तरं कपिः राक्षसस्य शिलां समीरयाञ्चकार क्षिप्तवान् ईरक्षेप इति चौरादिक उदात्तेत् असौ राक्षसस्तया शिलया क्षतः सन् ममार मृतवान् भूतलञ्च शिश्राय आश्रितवान् पतित इत्यर्थः ॥१११॥ज०भ०

समीत्यादि । अथानन्तरं कपिर्नीलो राक्षसस्य प्रहस्तस्य शिलां समीरयाञ्चकार विक्षिप्तवान् ईक्षिंगतौ नुदि तया शिलया क्षतस्ताडितोऽसौ प्रहस्तो मृतः मृङ्प्राणत्यागे इमनिति नियमात् पं भूतलञ्च आश्रितवान् श्रिञ सेवने ॥ १११ ॥ भ०

ततुषुरित्यादि । वानराः सर्वे ततुषुः तुष्टाः निशाचरा नेशुः पलायिताः

यदा न फेलुः क्षणदाचराणां मनोरथा रामबलाभियोगे ।
लङ्कां तदा भेजुरुदीर्णदैन्या व्याचख्युरुच्चैश्च हतं प्रहस्तम् ॥११७॥

इति भट्टिकाव्ये तिङन्तकाण्डे लिङ्विलसितो नाम
प्रथमः काव्यस्य चतुर्दशः सर्गः ॥

विचित्राः नानाप्रकाराः दशास्यस्य आशाः मनोरथा जेरुः जीर्णाः बाजभ्रुस्त्यर्थेवं सैन्यञ्च कर्तृ नीलं लुनाव स्तौति स्म ॥ ११२ ॥ ज० म०

तलुपुरित्यादि । ततः सर्वे वानरास्तुष्टाः तुष्लृयोर्जिच चकारात्तुष्टौ तुष्टुवुरिति पाठे नीलमिति योज्यं चित्रा नानाप्रकारा निशाचरा नेशुः पलायिताः णश्लृयूनाग्रे दशास्यस्य आशा मनोरथा जीर्णाः जॄगिक्ष्यानौ क्तोणुः कित्स्यां तृफलेत्यादिना प्राप्तिकमेत्वं खिलोपश्च गेलुरिति पाठे गलभ्रंशे अनेकार्थत्वात् गतावपि सर्वमेव सैन्यं कर्तृ नीलं लुनाव लुलस्तुतौ नूग्रिस्रवने वा ॥ ११२ ॥ भ०

यदेत्यादि । क्षणदाचराणां रामबलाभियोगे मनोरथा वाञ्छितानि यदा न फेलुः न फलिताः प्रहस्तस्य व्यापादितत्वात् तदा लङ्कां भेजुः सेवितवन्तः उदीर्णदैन्याः उदीर्णं महद्दैन्यं दीनभावो येषामिति प्रहस्तञ्च हतं कृतसङ्गरं, राचख्युः आख्यातवन्तः रावणायेत्यर्थात् ॥ ११३ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लिङ्विलसितो नाम
प्रथमः परिच्छेदः काव्यस्य चतुर्दशः सर्गः ।

यदा नेत्यादि । रामबलस्य हनने क्षणदाचराणां राक्षसानां मनोरथा यदा न फेलुः फलनिष्पत्तौ तृफलेति एत्वं खिलोपश्च तदा निशाचरा लङ्कां भेजुः सेवितवन्तः भजसौभागसेवयोः हतं प्रहस्तञ्चाख्यातवन्तश्च रावणमित्यर्थात् ख्यालख्यातौ चङ्यिङः ख्याङ् वा उदीर्णं महद्दैन्यं येषां कृगिगत्यां क्तः ॥ ११३ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मज श्रीभरतसेन-
विरचितायां सुग्धबोधिन्यां भट्टिटीकायां प्रबन्धो नाम
चतुर्दशः सर्गः ।

पञ्चदशः सर्गः ।

राक्षसेन्द्रस्ततोऽभैषीद्दृष्ट्वा परितः पुरम् ।
प्रातिष्ठिपच्च बोधार्थं कुम्भकर्णस्य राक्षसान् ॥ १
तेऽभ्यगुर्भवनं तस्य सुप्तं चैक्षिषताथ तम् ।
व्याहार्षुस्तुमुलान् शब्दान् दण्डैश्चाबधिषुर्द्रुतम् ॥ २ ॥

इतःप्रभृति लुङ्मधिकृत्य तद्विलसितमाह तत्र भूतसामान्ये लुङ् ततोऽन्यत्रापि दर्शयिष्यति

राक्षसेत्यादि । ततः प्रहस्तवधश्रवणानन्तरं दैत्यशोऽपि व्यापादित इति अभैषीत् सिचि वृद्धिः परितः समन्तात् पुरं लङ्कामैक्षिष्ट दृष्टवान् किमत्र शक्यते स्थातुं न वेति कुम्भकर्णस्य सुप्तस्य बोधनार्थं राक्षसान् प्रातिष्ठिपत् प्रस्थापितवान् तिष्ठतेश्चङ् परेरावुपधाह्रस्वापवादः तिष्ठतेरित्तीत्वं द्वित्वचनमभ्यासकार्यं धातोरादेशः षत्वं ष्टुत्वञ्च ॥ १ ॥ ज० म०

अथ टीमधिकृत्य तद्विलसितमुच्यते पाणिनिमते लुङिति संज्ञा

राक्षसेन्द्र इत्यादि । राक्षसेन्द्रो रावणः ततः प्रहस्तवधाद्भैषीत् भीतः जिभीलिभीत्यां भवद्भूतभव्ये त्रिणः इति भूतसामान्ये टी घीटीधीष्वमिति धातोरादौ मित्त्वादम् ह्रांसिः नेमेकाजादिति इमोभावः व्रजवदेत्यादिना त्रिः रुदाद्यस्तिसेरिति दैम् क्विलादिति षः परितः समन्तात् पुरं लङ्कां वीक्षितवान् किमत्र स्थातुं शक्यते न वेति ईक्षङ् दर्शने भूयोऽमजादेरिति अमि कृते पुनरम् आदिगेचोरिति सन्धिः वसोऽरखेतीम् षत्वं ष्टुभिरिति तस्य टः राक्षसान् कुम्भकर्णस्य बोधार्थं प्रस्थापितवांश्च ष्ठा स्थाने जिःप्रेरणे क्ष्वीब्वीत्यादिना आदन्तत्वात्मनं जिश्चिद्रुचुक्रम इति चङ् स्योजोऽजङीरितीत्वं धुर्विच्छर्डिर्जेर्वीपः ॥ १ ॥ भ०

तेऽभ्यगुरित्यादि । ते राक्षसास्तस्य कुम्भकर्णस्य भवनं गृहं अभ्यगुः गताः इणोगेति लुङि विषयभूते गादेशः गातिस्थेति सिचोलुक् तस्य पदान्तादिति

केशानलुञ्चिषुस्तस्य गजान् गात्रेष्वविभ्रमन् ।
शीतैरभ्यषिचंस्तोयैरलातैश्चाप्यदम्भिषुः ॥ ३ ॥
नखैरकर्त्तिषुस्तीक्ष्णैरदाङ्क्षुर्दशनैस्तथा ।
शितैरतौत्सुः शूलैश्च भेरीश्चावीवदन् भृशम् ॥ ४ ॥

परस्परत्वं ते च सुप्तमैक्षिषत दृष्टवन्तः अथानन्तरं प्रबोधार्थं तुमुलान्महतो ध्वनीन् व्याहार्षुः व्याहृतवन्तः नेटीति दृङ्प्रतिषेधः हलसमुदायपरियुक्ता-द्वेः प्राप्तत्वात् ॥ २ ॥ ज० म०

तेऽभ्ययुरित्यादि । ते राक्षसास्तस्य कुम्भकर्णस्य भवनं गृहं अभ्ययुर्गतवन्तः इणोगतौ गाङ्यामिति इणोगादेशः अनुक्ष्विद्वेः भूस्थापिवदेण इति सेर्लुक् उस्येचीत्यालोपः सुप्तं तं कुम्भकर्णं ऐक्षिषत दृष्टवन्तः मान्तोऽनतः अथानन्तरं प्रबोधार्थं तुमुलान् महतः शब्दान् व्याहार्षुः व्याहृतवन्तः चक्रुरित्यर्थः हृञ्हृत्यां नेमेकाजादिति इमुनिषेधः व्रजवदेत्यादिना त्रिः अनुक्ष्विद्वेः दण्डैश्च द्रुतमाबधिषुः हनबधष्टीति बधादेशः हसादेःसेम इत्यादौ बधवर्ज्जनान्न. त्रिः ॥ २ ॥ भ०

केशानित्यादि । तस्य केशानलुञ्चिषुः उत्पाटितवन्तः गात्रेषु गजानविक्रमन् क्रमयन्ति स्म क्रमेर्मान्तत्वान्मित्संज्ञायां हुस्वत्वं चङिसन्वद्भावादभ्यासस्य सन्यत इति इत्वं शीतैस्तोयैरभ्यषिचन् सिञ्चन्ति स्म अत्र सिचिरभ्युक्षणे वर्त्तते तेनोदकस्य करणत्वं लिपि सिचिक्रियेत्यङ् प्राक् सितादह्यवायेऽपीति षत्वं अलातैरङ्गारैश्चाप्यदम्भिषुः दग्धवन्तः अनेकार्थत्वाद्धातूनाम् ॥ २ ॥ ज० म०

केशानित्यादि । ते राक्षसास्तस्य कुम्भकर्णस्य केशान् अलुञ्चिषुः उत्पाटितवन्तः लुञ्चापनयने गात्रेषु हस्तिनो भ्रमयन्ति स्म भ्रमुजणचाले ञिः अङ्द्वित्वं अग्रङ्गुङ् इति स्वः घटादीत्यादिना वा खेःसन्वत् ख्यसेत्यनि अविक्रमन्निति पाठे क्रमुगतौ शीतैस्तोयैरभिषिञ्चन्ति स्म षिचप्रशौजत्वरणे अभिपूर्वः प्रोक्षणमाह तेन तोयानां करणत्वं वक्ष्यसेत्यादिना ङः लोपोतोदेचोः गीक इत्यादिना षत्वं अलातैरङ्गारैरपि अदम्भिषुर्दग्धवन्तः दनुभु न दम्भे अनेकार्थत्वाद्धार्थः ॥ २ ॥ भ०

नखैरित्यादि । तीक्ष्णैर्नखैरकर्त्तिषुश्छिन्नवन्तः तथा दशनैस्तीक्ष्णैरदाङ्क्षुः दशन्ति स्म दंशेरनिटोहलन्तलक्षणा दृद्धिः व्रश्चेत्यादिना षत्वं षढोः कस्सि शीतैस्तीक्ष्णैः शूलैरतौत्सुः व्यथयन्ति स्म तुदोरनिटोहलन्तलक्षणा दृद्धिः भेरीश्च

स तान्राजीगणत्सर्वानिच्छयाबुद्ध च स्वयम् ।
अबुबूधत कस्मान्मामप्राक्षीच्च निशाचरान् ॥ ५ ॥
तेऽभाषिषत राजा त्वां द्रष्टुः क्षणदाचर ।
सोऽस्रासीद्बलिपन्नांसमश्रासीद्दारुणीमपात् ॥ ६ ॥

शुभाः उच्चैः शब्दा अवोवदन् वादितवन्तः सन्वल्लघुनीति सन्वद्भावादभ्यासस्येत्वं दीर्घोलघोरिति दीर्घत्वं ॥ ४ ॥ ज० म०

नखैरित्यादि । तीक्ष्णैर्नखैश्चिच्छिदुः छतीशपच्छिदि तथा तीक्ष्णैर्दन्तैर्दशन्ति स्म दन्शोदंशने शांसिः औदित्त्वान्नेम् अनिमित्त्वात् व्रजवदेत्यादिना व्रिः शब्दाजिति षड् षढोःकः क्ष्नोर्नुः अम्नोः किलादिति षः अनुस्विद्दैः श्वित्तैस्तीक्ष्णैः शूलैरपि व्यथयन्ति स्म तुदशजौव्यथे अनिमित्त्वाद्व्रिः ह्रस्वस्येति दस्य तः शुभाःशोभनाः उच्चैः शब्दा भेरीर्वादितवन्तः वदेर्ञिः कर्तुः फलवत्त्वाविवक्षयां पं वदक्वाक्सन्देशयोरित्यस्मात् चुरादेर्ञ्यन्ताद्दाजिरङ्द्वित्वं अग्रङुग्रङ्-स्वःसन्वत् ञेर्लोपः ॥ ४ ॥ भ०

स तानित्यादि । स कुम्भकर्णः तान् सर्वान् उपद्रुतान् नाजीगणत् न गणयति स्म न वेदितवानित्यर्थः गणेः स्वार्थिकण्यन्तस्यादन्तस्याभ्यासस्य ईचगण इतीत्वं स्वयं चात्मन इच्छयाबुद्ध बुध्यते स्म झलोझलोति सिचोलोपः निशाचरानाप्राक्षीत् पृष्टवान् झलन्तलक्षणा दृद्भिः व्रस्वेत्यादिना षत्वं षढोःकस्मि कस्मान्नामबूबुधत यूयं प्रबोधितवन्तः बुधेर्ण्यन्तस्य मध्यमपुरुषबहुवचने णौचङुपधायाह्रस्वं अभ्यासस्य दीर्घोलघोरिति दीर्घत्वं ॥ ५ ॥ ज० म०

स तानित्यादि । स कुम्भकर्णस्तान् तुमुलशब्दादीन् न गणयति स्म गणत्यसंख्याने चुर्योञिः अदन्तत्वात् ञ्णत्यन्तेजुङ्तोरित्यस्य न विषयः इसाह्लोपोऽशित्यर्योरित्यकारलोपः वेड्गणकथेति मात्त्विकः खेरीङ् स्वयमिच्छया च प्रबुद्धः बुध्यौड्वेदने पदस्तनीणध्येष्वाग्रहत्तिपत्ते सिः तस्य ह्रयुङुर्मढीस्वनिमिति कित्त्वात् गुणाभावः झमस्त्रादिति झेर्लोपः ढभात्तथोरिति धः झषझषोरिति धस्य दः खेःसन्विदिति दीर्घः प्रक्षौशब्दीर्घे अनिमित्त्वाद्व्रिः षढोः कः ॥ ५ ॥ भ०

त इत्यादि । ते राक्षसा यथोक्ताः सन्तः अभाषिषत भाषितवन्तः हे क्षणदाचर राजा रावणस्त्वां दिदृक्षुः द्रष्टुमेषणशील इति न लोकेति षष्ठीप्रतिषेधः स कुम्भकर्णः श्रुत्वा अस्रासीत् स्रातवान् यमरमेत्यादिना सगिटौ व्यलिपत्

न्यवसिष्ट ततो द्रष्टुं रावणं प्रायतत् गृहात् ।
राजा यान्तं तमद्राक्षीदुदस्थाच्चेषदासनात् ॥ ७ ॥
अतुषत् पीठमासन्ने निरदिक्षच्च काञ्चनम् ।
अस्वेष्ट कुम्भकर्णोऽल्पमुपाविक्षदथान्तिके ॥ ८ ॥

समालिप्तवान् लिपिसिचित्यङ् मांसमघासीत् घाभक्षणे वारुणीमपात् पीतवान् गातिस्थेति सिचोलुक् ॥ ६ ज० म०

तेऽभाषिषतेत्यादि । ते दृष्टा निशाचरा भाषितवन्तः भाषङ्वाचि मान्तोऽदन्तः किमित्याह हे क्षणदाचर राजा रावणस्त्वां द्रष्टुमिच्छुः दृघेक्षतीत्यादौ उदन्तक्षद्वर्जनात् न कर्म्मणः षष्ठी स कुम्भकर्णः स्नातवान् स्नालशोधने स्नाद्यादीति षस्य सत्वे तन्निमित्तस्य णस्य नत्वं ह्यांसिः स्नादाद्यस्तीति द्रम् यमरमेति द्रम्सनौ झसस्खाञ्झसीति सेर्लोपः ष्टैवेष्टे अनेकार्थत्वात् स्नानमभ्याष्टेत्यन्ये स्नातः सन् व्यलिपत् चन्दनानुलेपनं कृतवान् लिपिसिचिमुचेति चङ्यस्येत्यादिना ङः मांसं अघासीत् भक्षितवान् घाभक्षणे वारुणीं मदिरामपात् पापाने भूस्थापिवेति सेर्लुक् ॥ ६ ॥ भ०

न्यवसिष्टेत्यादि । ततो रावणं द्रष्टुं न्यवसिष्ट पूर्व्वनिवसितं वसनं त्यक्त्वा अन्यद्वस्त्रं परिदधाति स्म गृहात्स्वस्मात्प्रायतत् प्रवृत्तः घुभ्योलुङीति परस्मैपदं पुषादित्वादङ् तमायान्तं राजाद्राक्षीत् दृष्टवान् सृजिदृशोरित्यम् झलन्तलक्षणा दृङ्निः आसनाच्च ईषदुदस्थात् उत्थितः जर्ल्ह कर्म्मकत्वादात्मनेपदं न भवति ॥ ७ ॥ ज० म०

न्यवेत्यादि । कुम्भकर्णो न्यवसिष्ट राजदर्शनोचितवस्त्रं परिहितवान् वसतङ् स्तृतौ ततोऽनन्तरं स्वकोयाद्गृहात् रावणं द्रष्टुं प्रवृत्तः वृतङ्वल्लवर्त्तने घासलिहुग्रदिति दृतादित्वात् ङः तेनैव पं राजा रावणस्तमागच्छन्तमद्राक्षीत् दृष्टवान् दृदृशोग्रे क्षे इरित्वात् पाक्षिकोऽः तदभावे ह्यांसिः हृशसोऽनिमिजुङ् इत्यादौ हृशवर्जनान्न सक् वर्द्रोऽकिति क्षद्रः अनिमात्वाद्व्रजवदेति त्रिः शक्ष्वाजिति षङ् षढोःकः किलादिति षः दृष्ट्वा आसनादीषदुत्थितः उत्पूर्व्वतिष्ठतेरूर्द्ध्वचेष्टायां पं उदोऽनूर्द्ध्वे इत्यक्तेः भूस्थापिवेति सेर्लुक् ॥ ७ ॥ भ०

अतुषदित्यादि । दृष्ट्वा चातुषत् तुष्टः पुषादित्वात् ङः आसन्ने चात्मनः काञ्चनं पीठं निरदिक्षत् आदिष्टवान् दिशेः शल इगुपधादनिटःक्स इति क्सः अथानन्तरं कुम्भकर्णः अस्वेष्ट ईषद्वसितवान् स चार्थो येनायमादर

अवादीन्मां किमित्याह्वो राज्ञा च प्रत्यवादि सः ।
मा ज्ञासीस्त्वं सुखी रामो यदकार्षीत् स रक्षसाम् ॥ ६ ॥
उदतारीदुदन्वन्तं पुरं नः परितोऽरुधत् ।

इति अन्तिके चास्य काञ्चनं पीठमध्यास्य पीठे उपाविक्षत् उपविष्टः पूर्ववत् कृसः ॥ ८ ॥ ज० म०

अतुषदित्यादि । हृष्टा अतुषत् तुष्टोऽभूत् तुष्ट्योञ्जि च चकारात् तुष्टौ पुषादित्वात् ङः लितोऽष्टोमेदरितस्तु वेत्यनेनैवेष्टसिद्धौ पूर्वाचार्यक्रमदर्शनात् षासलिट्युतुषादेरित्यादिसूत्रस्य तथाकरणे सुग्धबोधस्य कविकल्पद्रुमात्राक् कृतत्वात् गौरवं न वाच्यं एतमन्यत्राप्यवधेयं आसन्ने आत्मन आसन्ने समीपदेशे काञ्चनं पीठमादिष्टवान् दिशेः दृशसोऽनिमिजुङ् इति सक् षढोःकःसे काञ्चनस्य विकार इति विकारसंधेति ष्णः अनन्तरं कुम्भकर्णोऽल्पमस्मेष्ट स्मितं चकार स्मिङ् स्मिते यद्यपि स्मितमीषद्धसनं तथापि राजसान्निध्ये स्मितस्याप्यनौचित्यादनुपलभ्यमानहसनायाल्पमित्युक्तं हासमात्रेऽपि स्मितमिति केचित् स्मितोत्पत्तिः कार्यवशात्ताहशादरदर्शनात् नेमेकाजादिति इमनिषेधः अन्तिके रावणसमीपे उपविष्टवान् अर्थात्काञ्चनपीठे विद्यासागरस्तु अल्पं रावणपीठापेक्षया स्वल्पं काञ्चनपीठमुपाविक्षदित्याह तन्न साधु आधारप्रसङ्गात् शौविश्यप्रवेशे उपपूर्व आसने ॥ ८ ॥ भ०

अवादीदित्यादि । तत उपविश्य तमवादीदुक्तवान् ब्रजेत्यादिना हृद्विः किमिति कस्मात् कारणात् मामाह्वः आहूतवान् लिपिसिचिह्वश्चेत्यङ् आतोलोपः राज्ञा च स कुम्भकर्णः प्रत्यवादि प्रत्युक्तः कर्मणि लुङ् चिण्भावकर्मणोरिति चिण् चिणोलुगिति तलोपः सुखी त्वं येन रामो रक्षसां यदकार्षीत् तत्त्वं नाज्ञासीः न ज्ञातवानसि यमरमेति सगिटौ ॥ ६ ॥ ज० म०

अवादीदित्यादि । उपविश्य कुम्भकर्णो रावणमवादीत् उक्तवान् वदैवाचि ब्रजवदेति त्रिः किमवादीदित्याह किमिति कस्मात् कारणात् त्वं मां आह्वः आहूतवान् ह्वेञ्श्वर्ङ् वक्ष्यस्येति ङः एचोऽशित्या उस्येचीत्यालोपः राज्ञा रावणेन च स कुम्भकर्णः प्रत्यवादि प्रत्युक्तः रत्नोर्यगिणावितीण् अणित्त्वेलुङत इति त्रिः दृशस्तनलोपः स नरात्मा रामो रक्षसां यत् कृतवान् भयमित्यर्थात् तत्त्वं सुखी त्वं न ज्ञातवान् ज्ञागबोधने यमरमेति इमसनौ ब्रज्कृतौ ब्रज्दृकृतौ वा नेमेकाजिति इमनिषेधः ब्रजवदेत्यादिना त्रिः ॥ ६ ॥ भ०

व्यद्योतिष्ट रणे शस्त्रैरनैषीद्राक्षसान् क्षयम् ॥ १० ॥
न प्रावोचमहं किञ्चित्प्रियं यावज्जीविषम् ।
बन्धुस्त्वमर्च्चितः स्नेहान्मा द्विषो न वधीर्मम ॥ ११ ॥
वीर्य्यं मा न ददर्शस्त्वं मा न त्रास्थाः क्षतां पुरम् ।
तवाद्राक्ष्म वयं वीर्य्यं त्वमजैषीः पुरा सुरान् ॥ १२ ॥

उदतारीदित्यादि । स ह्युदन्वन्तं समुद्रमुदतारीत् उत्तीर्णः सिचि वृद्धिः नोऽस्माकं पुरं परितः समन्तादरुधत् आवृतवान् इरितोवेत्यङ् रणे शस्त्रैरद्योतिष्ट द्योतितवान् द्युतादेर्लुङ्लोपि विकल्पेन परस्मैपदविधानादात्मनेपदं राक्षसान् क्षयं विनाशमनैषीत् नीतवान् ॥ १० ॥ ज० म०

उदतारीदित्यादि । राम उदन्वन्तं समुद्रं उत्तीर्णवान् ततरेऽभिभवेत्यर्थां स्यां सिः रुदाद्यस्तीति ईम् वसोरस्येतीम् व्रजवदेति त्रिः झसस्यादिति सेर्लोपः उदकं विद्यतेऽस्येत्युदन्वान् मनीषादित्वात् कस्य नत्वं अस्माकं पुरं परितः समन्तात् रुद्धवान् रुधिरोऽ आवृतो इरित्त्वात् यासलिद्युदित्यादिना पाञ्चिकोऽः रणे शस्त्रैर्विद्योतितवान् द्युतलङ्ङपि अपिशब्दात् द्युत्यां द्युतादेष्ठीमे ङविधानात्मं गम्यते ङित्त्वान्मभवत्येव तेन द्यां द्युतादेरुभयपदित्वं मे सिरेव राक्षसान् क्षयं नीतवान् षीञ्प्रापणे तक्षं नाशासीरिति सम्बन्धः ॥ १० ॥ भ०

न प्रावोचमित्यादि । यावज्जीविषं यावन्तं काल जीवितः तावन्तं कालं कस्यचित्प्रियं किञ्चिन्न प्रावोचं नोक्तवानहमिति तव विदितमेव किन्तु बन्धुस्त्वं स्नेहादर्थितः सन् मम सम्बन्धिनो द्विषः शत्रून् मा न वधीः मा न मारयेति किन्तु मारयेति माङिलुङ् सर्व्वलकारापवादः प्रावोचमिति वचउस् ॥११॥ज०म०

न प्रावोचमित्यादि । यावन्तं कालमहं जीवितवान् तावन्तं कालं किञ्चित् प्रियं न प्रावोचं नोक्तवानस्मि प्रार्थयामि स्नेहेति भावः सम्मति बन्धुस्त्वमिति कृत्वा स्नेहात्प्रार्थितोऽसि मम द्विषः शत्रून् त्वं मा न वधीः किन्तु मारय वचौवाचि वक्ष्यस्येत्यादिना ङः वक्ष्यस्यपतामिति वोचादेशः जीवप्राणे हनलौ भतौ वधे माटो वेति टो धीटोधीष्विति भावोगेऽभावः हनवधष्टीति वधादेशः ॥ ११ ॥ भ०

वीर्य्यमित्यादि । त्वं वीर्य्यं मा न ददर्शः किन्तु दर्शय यत्नस्य चङि रूपं क्षतां परैरक्षतादितां पुरं मा न त्रास्थाः किन्तु त्रायस्व त्रैङ् पालने न च त्वमशक्तः यतश्चैव वीर्य्यमद्राक्ष्म दृष्टवन्तो वयं न हश दृति कृषादेशो न भवति

अवोचत् कुम्भकर्णस्तं वयं मन्त्रेऽभ्यधाम यत्।
न त्वं सर्व्वं तदश्रौषीः फलं तस्येदमागमत् ॥ १२
प्राज्ञवाक्यान्यवामंस्था मूर्खवाक्येष्ववास्थिथाः।
अध्यगीष्ठाश्च शास्त्राणि प्रत्यपत्था हितन्न च ॥ १४ ॥

इरितो ङेति विकल्पेनाङ्विधानात्तद्भावपक्षे रूपं पुरा पूर्व्वं त्वं सुरान् देवानजैषीः जितवानसि ॥ १२ ॥ ज० म०

वीर्य्यमित्यादि। त्वं वीर्य्यं स्वसामर्थ्यं मा न ददर्शः किन्तु दर्शय दृशेर्ज्ञप्त्यादङ् क्षतां शरैः पीडितां पुरं लङ्कां मा न त्रास्थाः किन्तु त्रायस्व त्रैङ् पालने न त्वमसमर्थः यतस्तव वीर्य्यं वयं दृष्टवन्तः दृशेश्चेक्षे इरित्त्वात् ङस्याप्रवृत्तिपक्षे सिः वर्द्रोऽकिदिति क्ङतोरः अनिमृत्वात् व्रजवदेति त्रिः षङ् षढोःकः सि त्वं पुरा पूर्व्वस्मिन् काले सुरान् जितवान् जिजये च ॥१२॥ भ०

अवोचदित्यादि। इत्युक्तवन्तं तं रावणं कुम्भकर्णोऽवोचत् उक्तवान् मन्त्रे मन्त्रणासमये क्रियासमारम्भगतोऽभ्युपाय इत्यादिना यद्वयमभ्यधाम अभिहितवन्तः धाधातोर्गातिस्थेति सिचोलुक् तत्सर्व्वं त्वं नाश्रौषीः न श्रुतवानसि तस्माश्रवणस्येदं फलं विनायरूपमागमत् आगतं गमेर्लृदित्वादङ् ॥ १२ ॥ ज० म०

अवोचदित्यादि। इत्युक्तवन्तं तं रावणं कुम्भकर्ण उक्तवान् वचेः पूर्व्ववद्ङः वोचादेश्च मन्त्रे मन्त्रणायां वयं यदुक्तवन्तः तत्सर्व्वं त्वं न श्रुतवान् तस्माश्रवणस्य इदं फलं विनायरूपमागतं डुधाञ्झिल्धारणेपुष्टौदानेऽभिपूर्व्वोभावणे वर्त्तते भूस्थापिवदेन इति सेर्लुक् देत्यनेन दाधादेति दासंज्ञकस्य ग्रहणात् श्रुनुगतौ श्रुतौ नेमेकाजिति इमनिषेधः गमृल्लृगयां लृदित्वात् ङः ॥ १३ ॥ भ०

प्राज्ञवाक्यानीत्यादि। प्राज्ञानां विभीषणादीनां वाक्यान्यवामंस्थाः अवज्ञातवानसि मनज्ञाने मूर्खवाक्येषु प्रहस्तादिवाक्येषु अवास्थिथाः अवस्थितोऽसि समवप्रविभ्यस्थ इति तङ् स्थाध्वोरित्त्वात्त्वञ्च शास्त्राण्यध्यगीष्ठा अधीतवानसि विभाषालुङ्लङोरिति इङोग्यादेशः न च हितं प्रत्यपत्थाः प्रतिपन्नवानसि पदगतौ झलोझलीति सिचोलोपः ॥ १४ ॥ ज० म०

प्राज्ञवाक्यानीत्यादि। त्वं प्राज्ञानां विभीषणादीनां वाक्यानि अवामंस्थाः अवज्ञातवान् मनदुङ्बोधे मूर्खाणां प्रहस्तादीनां वाक्येषु अवस्थितोऽसि प्रतिज्ञानिर्णयेत्यादिना अवपूर्व्वतिष्ठतेर्भ्यादोर्ङिरिति ङिः गुणाभावश्च झमुस्त्वाज्झलीति सेर्लोपः शास्त्राणि अधीतवानसि किन्तु हितं न प्रतिपन्नवानसि अधीङ्-

मूर्खास्त्वामववञ्चन्त ये विग्रहमचीकरन् ।
अभाणीन्माल्यवान् युक्तमत्तंस्थाखन्न तन्मदात् ॥ १५ ॥
राघवस्यासुषः कान्तामाग्नैरुक्तो न चार्पिषः ।
मा नानुभूः स्वकान्दोषान् मा मुहो मा रुषोऽधुना ॥१६॥

ल्यध्ययने अध्युपसर्गोपादानं सहप्रयोगनियमार्थं गीङ्टीथ्योर्वेति ग्याद्देशः दीर्घादेशोगुणाभावस्तटार्थः धत्वान्नणुरित्युक्तञ्च यौपदङ्गतौ झस्झाज्झसीति सेर्लोपः ॥ १४ ॥ भ०

मूर्खा इत्यादि । मूर्खाः सर्व्व एवैते त्वामववञ्चन्त विप्रलब्धवन्तः वनुचप्रलम्भने ण्यन्तस्य गटधिवञ्चीत्यादिना तङि चङि रूपं ये विग्रहमचीकरन् कारितवन्तो भवन्तं एष मातामहो माल्यवान् युक्तमभाणीत् भणितवान् भणशब्दे इटईटीति सिचोलोपः तत्त्वं मदान्नात्तंस्था न सोढवानसि त्वमू सहने ॥ १५ ॥ ज०म०

मूर्खास्त्वामित्यादि । ये ग्रहस्तादयो विग्रहं कारितवन्तस्ते मूर्खास्त्वां वञ्चितवन्तः माल्यवान् यदुक्तं न्याय्यमुक्तवान् त्वं मदान्न सोढवान् वनुचडुकवञ्चने प्रतारेवञ्चिगर्द्धेरिति मं ञिभ्रीत्यङ्क्रञोऽप्रत्तदाङ् आङ्गुडः स्व इति हुस्वत्वे खेःसन्वद्भावितीत्वं सन्वत् ख्यस्येत्यनीति इत्वं हसादेर्घस्येति दीर्घत्वं भण च चकारात् शब्दे हसादेःसेम इति पक्षे त्रिः त्वमूङ्ञिषच चकारान्नर्षे ऊदित्वाद्वे मूदित्वरेत्यस्याप्रवृत्तिपक्षे म्नोर्नुः ॥ १५ ॥ भ०

राघवस्येत्यादि । प्रमादित्वमपि तेऽस्ति यतो राघवस्य कान्तां असुषः खण्डितवानसि खण्डनञ्चास्या इदं यद्वर्त्ता वियोजनं सुषखण्डने पुषादित्वादङ् पुषादयश्च गणान्ता गटहीताः आग्नैर्विभीषणादिभिरुक्तो न चार्पितवानसि कान्तां अर्चेर्णौ अर्त्तिह्रीत्यादिना पुगन्तगुणः चङि द्विर्व्वचने चीति स्थानिवद्भावादजादेर्द्वितीयस्येति पिशब्दो द्विरुच्यते रेफस्य नन्द्रा इति प्रतिषेधः तद्धुना स्वकानात्मीयान्दोषान् दुश्चरितानि मा नानुभूः अपित्वनुभव माङि लुङ् गातिस्थेति सिचो लुक् मा मुहः मोहं मा गमः मा रुषः रोषं मा कार्षीः मुहिरुषिभ्यां पुषादित्वादङ् ॥ १६ ॥ ज० म०

राघवस्येत्यादि । प्रमादित्वमपि तवास्ति यतस्त्वं राघवस्य कान्तामसुषः अपहृतवान् सुष्य हृक्रिदि अनेकार्थत्वादपहारार्थः कान्ताविवोजनमेव वात्र छेदः आषलिङ्ग्रदित्यादिना पक्षे ङः आग्नैर्विभीषणादिभिरुक्तोऽपि त्वं तां न चार्पितवानसि ऋति गत्यां ऋप्रापणे च ह्वीव्लीरीत्यादिना पत्वं णुत्वं नाजन्ता-

तस्याप्यत्यक्रमीत् कालो यत्तदाहमवादिषम् ।
अघानिषत रक्षांसि परैः कोषांस्त्वमव्ययीः ॥ १७ ॥
सन्धानकारणं तेजो न्यगभूत्तेऽऊथास्तथा ।
यच्चं वैराणि कोषञ्च सहदण्डमजिग्लपः ॥ १८ ॥

देरादिर्हिः स्यादौनवद्रोऽये इति वचनात् पीत्यस्य हित्वं ञेर्लोपः अधुना स्वीयान् दोषान् आत्मीयचेष्टितानि मा न अन्वभूः किञ्च अनुभव अनुपूर्व्वभवतेर्भूस्थापिवेति सेर्लुक् त्वं मा सुहः मोहं मा गमः मा रुषः रोषं मा कार्षीः सुह्रज्जि वैचित्त्ये रुषिर्ज्जिक्रुधि आभ्यां शासलिट्द्युदिति ङः ॥१६॥ भ०

तस्येत्यादि । यत्तदा तस्मिन् कालेऽहमवादिषं अभिहितवानस्मि रामः सन्धीयतामिति तस्यापि सन्धेः कालोऽत्यक्रमीदतिक्रान्तः स्नुक्रमोरनात्मनेपदनिमित्त इतीट् मान्तत्वाद्दृद्भिप्रतिषेधः यतः परैः शत्रुभिः रक्षांस्यघानिषत हतानि चिण्वद्भावाद्दृद्भिप्रतिषेधः त्वञ्च कोशमव्ययीः त्यक्तवानसि लङ्कादाहे तस्यारक्षितत्वात् व्ययवित्तसमुत्सर्ग इति चुरादौ पठ्यते यदा आक्षेपाद्देति णिच् नास्ति तदा रूपं ह्यन्तत्वाद्दृद्भिप्रतिषेधः व्ययगतावित्यस्यापि रूपं अनेकार्थत्वाद्धातूनामुत्सर्ज्जनेऽपि द्रष्टव्यम् ॥ १७ ॥ ज० म०

तस्येत्यादि । तस्मिन् काले तव यदहं अवादिषं रामेण सह सन्धिः क्रियतामित्युक्तवानस्मि तस्यापि सन्धेः कालोऽतिक्रान्तः यतः परैः शत्रुभिः रक्षांसि हतानि त्वं कोषद्रव्यं व्ययितवानसि लङ्कादाहे तस्यारक्षणात् वीरेभ्यः प्रदानाच्च क्रय्यक्रसुगतौ हसासेः सेम इत्यादौ मान्तवर्ज्जनान्न त्रिः वदेर्व्रजवदेति त्रिः हन्तेः कर्म्मणि हनग्रहदृशच इति सिण् हनस्तङित्यादौ दृणवर्ज्जनान्न तङ् खेर्हौघोर्ज्झिति चेति घः मान्तोऽदनत इत्यत् व्ययञ्च गत्यां अनेकार्थत्वात् व्ययार्थेऽपि यान्तत्वान्न त्रिः ॥ १७ ॥ भ०

सन्धानेत्यादि । तथा त्वमकथाः कृतवानसि तनादिभ्यस्तथा सोरिति थिचेलुक् यथा सन्धानकारणं सन्धानहेतुकं यत्तव तेजः प्रचण्डत्वं तत् न्यगभूत् न्यग्भूतं गतिस्थेति चिचेलुक् कृत इत्याह यच्चं वैराणि शत्रुभावान् कोषाञ्च सहदण्डं समैन्यमजिग्लपः ग्लपितवानसि ग्लायतेर्णौपुकि ग्लास्नावनुपमाङ्गेति मित्त्वाद्दृद्भत्वं ग्लपयतेश्चङि रूपं यदि हि तेजो भवेत् सर्व्वं तथावस्थितमेव स्यात् ततश्च तेजसोऽभावात् कथं सन्धानं द्वयोः परस्परानुपतापात् यथोक्तं

ATIC SOCIET

अक्रुधच्चाभ्यधाद्वाक्यं कुम्भकर्णं दशाननः ।
किं त्वं मामजुगुप्सिष्ठा नैदिधः स्वपराक्रमम् ॥ १९ ॥
मोज्जिग्रहः सुनीतानि मास्म क्रंस्था न संयुगे ।
मोपलब्धाः कृतैर्दोषैर्मा न वाक्षीर्हितं परम् ॥ २० ॥

यावन्मात्रमुपकुर्यात् तावन्मात्रमेवास्य प्रत्युपकुर्यात् तेजो हि सन्धानकारणं तप्तं लोहं तप्तेन लोहेन सन्धत्त इति ॥ १८ ॥ ज० म०

सन्धेत्यादि । त्वं तथाकृथाः कृतवानसि यथा सन्धानकारणं तव तेजो व्यग्भूतं कोहि तेजस्विना सन्धिं करोति कृज इगुडुर्ग्मढीति सेः किित्वाद्गुणाभावः झषस्खादिति सिलोपः यद्यस्मात् त्वं वैराणि वीरभावान् वीरयोग्यानि दुर्गाणि वा शत्रुत्वानि वा सहदण्डं सैन्येन सह कोषञ्च ग्लपितवानसि ग्लैक्लमे जिः ह्रीव्लीति पन् ॥ १८ ॥ भ०

अक्रुधदित्यादि । अथैवमुक्तो दशाननः अक्रुधत् क्रुद्धवान् पुषादित्वादङ् क्रुद्धश्च कुम्भकर्णमभ्यधात् अभिहितवान् गतिस्थेति सिचोलुक् किमिति त्वं मां अजुगुप्सिष्ठाः निन्दितवानसि स्वविक्रमं नैदिधः न वर्द्धितवानसि एधधातोर्ण्यन्तस्य चङि स्थानिवद्भावादजादेर्द्वितीयस्येति धिशब्दो द्विरुच्यते ॥ १९ ॥ ज० म०

अक्रुधदित्यादि । एवमुक्तो दशाननोऽक्रुधत् क्रुधल्लयौ कोपे पुषादित्वात् ङः कुम्भकर्णञ्च उक्तवान् डुधाञ्लिधारणे पुष्टौ दाने टी भूस्थापिपेति सेर्लुक् किमभ्यधादित्याह किं त्वं मां निन्दितवानसि गुपुङ्गोपनकुत्सनयोः किित्त्रजगुप इति सन् निन्दायां निशानार्जवनिन्दास्वित्युक्ते स्वपराक्रमं किं न वर्द्धितवानसि एधङ् वृद्धौ जग्रन्नादङ् द्वित्वञ्च ॥ १९ ॥ भ०

मोज्जिग्रह इत्यादि । सुनीतानि सुनयान् मा उज्जिग्रहः मा उद्ग्राहय ग्रहेर्ण्यन्तस्य चङि रूपं संयुगे युद्धे विषयभूते मा क्रंस्था मोत्साहं न कार्षीः अपितृस्वहस्व स्रोत्तरे लुङ्चेति चकाराल्लुङ् वृत्तिसर्गेत्यादिना क्रमेः सर्गे उत्साहे तङ् दोषैः अस्मत्कृतैः मोपालब्धाः मोपालभस्व झलोझलीति सिचो लोपः झषस्तथोर्धोधः झलाञ्जशि हितं परं कार्यस्य मा न वाक्षीः मा न वह किन्तु वह वहेरनिटो हलन्तलक्षणा वृद्धिः उत्यकृत्वसत्वानि ॥ २० ॥ ज०म०

मोज्जिग्रह इत्यादि । शोभनानि नीतानि न उद्ग्राहय ग्रहेर्ज्यन्नादङ् प्रस्तुतमुपन्यसन्नाह संयुगे युद्धविषये मास्म न क्रंस्थाः किन्त्ववश्यमुत्साहं कुरु मास्मन धीर्यौ इति सर्वकाले टी हस्तुग्रत्साहतायने क्रम इति मं स्तुक्रमोऽमे इति

कुम्भकर्णस्ततोऽगर्जीद्भटांश्चान्यान् न्यवीवृतत् ।
उपायंस्त महास्त्राणि निरगाच्च द्रुतं पुरः ॥ २१ ॥
मूर्द्धा दिवमिवालेखीत् खं व्यापद्वपुषोरुणा ।
पद्भ्यां क्ष्मामिवाभेत्सीत् दृष्ट्याधाक्षीदिव द्विषः ॥ २२ ॥
दग्धशैल इवाभासीत् प्राक्रंस्त क्षयमेघवत् ।

भवर्ज्जनादिभोऽभावः कृतैर्दोषैर्मा उपालब्धाः नोपलभस्व न भर्त्सयेत्यर्थः लभ-ङ्क्षौङ्षप्राप्तौ झषस्खाञ्झसीति सिलोपः हितं युक्तं परं मा न वाचीः अपित्ववश्यं वक्षेति भावः वक्षैजौप्रापणे अनिमत्वादुत्रिः क्षोढः षढोः कः ॥ २० ॥ भ०

कुम्भकर्ण इत्यादि । ततस्तद्वचनानन्तरं कुम्भकर्णोऽगर्जीत् गर्ज्जितवान् अन्यांश्च भटान् पृष्ठतो गच्छतो न्यवीवृतत् निवर्त्तितवान् वृतेश्चङ् परेणाबुपधाया उदित्यपवाद ऋकारादेशः महास्त्राणि उपायंस्त स्वीकृतवान् औपचारिकमत्र स्वीकरणं तेन तङ् यदिवा उपाङ्पूर्व्वाद्यमेः सप्तदाङ्भ्योयमोयन्य इति तङ् पुरश्च जङ्घातः द्रुतं निरगात् निर्गतः द्रणोगादेशः गातीति सिचो लुक् ॥ २१ ॥ ज० म०

कुम्भकर्ण इत्यादि । ततो रावणवाक्यानन्तरं कुम्भकर्णो गर्ज्जितवान् गर्ज्जोर्जयन्दे अन्यान् भटान् योद्धुमुद्यतान् निवर्त्तयामास वृतेर्ज्ञान्तादङ् महा-स्त्राणि उपायंस्त स्वीचकार यमो विरतौ उपयमो विवाहे इति मं विवाहः स्वीकार इति व्याख्यातं यमः सूचनेवाद्वाहे इति पक्षे सेः किच्चाभावात् गलोपाभावः किंवा आङ्पूर्व्वस्य यमोञ्जिञ्जन्त्येत्यादिना मं पुरो लङ्घायाः सका-शात् शीघ्रं निर्गतः द्रणोगा भूस्थापिवेति सेर्लुक् ॥ २१ ॥ भ०

मूर्द्धेत्यादि । निर्गच्छन् मूर्द्धा दिवमलेखीदिव लिखितवानिव उरुणा महता वपुषा खं व्यापत् व्याप्तवान् लृदित्वादङ् क्ष्मां पृथ्वीं पादाभ्यामभैत्सी-दिव विदारितवानिव द्विषः शत्रून् दध्याधाक्षीदिव भस्मसात् कृतवानिव दह भस्मीकरणे ॥ २२ ॥ ज० म०

मूर्द्धेत्यादि । स गच्छन् मूर्द्धा दिवमाकाशं स्पृष्टवानिव लिखृलेखने उरुणा महता वपुषा शरीरेण खमाकाशं व्याप्तवानिव आप्लृव्याप्तौ व्यापने लृदित्वात् ङः चरणाभ्यां क्ष्मां भूमिं भिन्नवानिव अधौभिदिर्भिदि ङाभावपक्षे सिः क्वनिमित्वादुत्रिः दर्शनमात्रेणैव शत्रून् दग्धवानिव दहौ दाहे दादेर्घः झभान्तस्यादिजवामिति धः झषझषोरिति कः ॥ २२ ॥ भ०

दग्धेत्यादि । महत्त्वात्कृष्णत्वाच्च दग्धशैलवदभासीत् भाति स्म भादीप्तौ यम-

प्राचकम्यदुदन्वन्तं राक्षसानप्यतित्रसत् ॥ २३ ॥
सपक्षोऽद्रिरिवाचालीन्नश्वसीत् कल्पवायुवत् ।
अभार्षीद्ध्वनिना लोकानभ्राजिष्ट क्षयाग्निवत् ॥ २४ ॥
अनंसीत् भूभरेणास्य रंहसा शाखिनोऽलुठन् ।
सिंहाः प्रादुद्रुवन् भीताः प्राक्षभन् कुलपर्वताः ॥ २५ ॥

रमेति सगिटौ क्षयमेघवत्प्राक्रंस्त प्रस्थितः प्रोपाभ्यां समर्थाभ्यामिति तङ् प्रतिष्ठमानश्च उदन्वन्तमचकम्पत् कम्पितवान् कपिचलने इदितोऽथ्लस्य चङि रूपं राक्षसानपि अतित्रसत् त्रासितवान् त्रसेर्ण्यन्तस्य चङि रूपम् ॥२३॥ ज०म०

दग्धेत्यादि। अतिकृष्णत्वात् महत्त्वाच्च दग्धपर्वत इव स भाति स्म भालपदीप्तौ यमरमेति इमसनौ प्रलयसम्बन्धिमेघ इव प्रक्रमते स्म प्रोपादारम्भे इति मं गच्छन् समुद्रमपि कम्पितवान् कपिङ्पिचाले ऋन्नादङ् न केवलं कपीन् राक्षसानपि त्रासयामास त्रसेर्ऋन्नादङ् ॥ २३ ॥ भ०

सपक्ष इत्यादि । सपक्ष इवाद्रिः वाङ्गोः पक्षानुकारित्वात् अचालीत् चलितः लान्तत्वाच्चिचि इदितः क्रोधात्कल्पान्तवायुवच्छ्वसीत् निश्वसितवान् ह्यन्तेति इदितिप्रतिषेधः ध्वनिना लोकानभार्षीत् पूरितवान् भ्राजभरणे ईडन्तस्य सिचि इदितः अभ्राजिष्ट भ्राजते स्म क्षयाग्निवत् पिङ्गलकेशत्वात् लोकविनाशहेतुत्वाच्च ॥ २४ ॥ ज० म०

सपक्ष इत्यादि । स पक्षयुक्तः पर्वत इव चलितः वाङ्गोः पक्षतुल्यत्वात् चलेर्व्रजवदेत्यादिना व्रिः प्रलयवायुरिव निःश्वासं चकार हसादेःसेम इत्यादौ असवर्जनात् न व्रिः ध्वनिना लोकत्रयं पूरितवान् भ्रलिटुडुञ्भ्रतिपुङ्भ्यो नेमेकाजिति अनिम् प्रलयाग्निरिव भ्राजते स्म लोकविनाशकत्वात् पिङ्गलकेशाच्च भ्राजृङ्क्षटुञ्चराङ्गादि ॥ २४ ॥ भ०

अनंसीदित्यादि । अस्य भरेण भूरनंसीत् नता यमरमेति सगिटौ रंहसा वेगेन शाखिनो दृक्षा अलुठन् पतिताः रुठलुठप्रतिघाते द्युतादित्वादङ् द्युतादीनामनुदात्तेत्त्वात्तङ् द्युभ्योलुङीति परस्मैपदविकल्पः सिंहाः भीताः सन्तः प्रादुद्रुवन् पलायिताः णिश्रीत्यादिना चङ् कुलपर्वताः प्राक्षुभन् सञ्चलिताः द्युतादित्वादङ् पूर्ववन्नात्मनेपदं ॥ २५ ॥ ॥ ज० म०

अनंसीदित्यादि । अस्य भरेण भूर्नमति स्म यमरमेति इमसनौ अस्य रंहसा वेगेन शाखिनो वृक्षाः पतिताः लुलुठविलोटविलोडयोः लदित्वात्

उत्पाताः प्रावृतंस्तस्य द्यौरशीकिष्ट शोणितम् ।
वायवोऽवासिषुर्भीमाः क्रूराश्चाकूवत द्विजाः ॥ २६ ॥
अस्यन्दिष्टाक्षि वामञ्च घोराश्चाराटिषुः शिवाः ।
न्यपद्यत मुखले गट्भा दीप्तयापाति चोल्कया ॥ २७ ॥
आक्रिंष्ट तानसंमान्य दर्पात्स प्रधनक्षितिम् ।
ततोऽनर्दीदनन्दीच्च शत्रूनाह्वास्त चाहवे ॥ २८ ॥

ङः ठान्तपाठे द्युतादित्वात् ङः तेनैव पं सिंहाः भीताः रुन्तः पलायिताः दुस्मुगतौ जिस्थिंदुस्मुकम इति अङ् कुलपर्वताः क्षोभं प्रापुः क्षुभङ्स्वञ्चले द्युतादित्वात् ङः ॥ २५ ॥ भ०

उत्पाता इत्यादि । तस्य गच्छत उत्पाताः प्रावृतन् प्रवृत्ता वृतुवर्त्तने द्युतादिः द्यौः शोणितमशीकिष्ट सिञ्चति स्म शीकसेचने अनुदात्तेत् वायवो भीमाः प्रचण्डा अवासिषुर्वान्ति स्म यमरमेति सगिटौ क्रूराश्चाशुभसूचका द्विजाः पक्षिणोऽकूवत शब्दिताः कुङ्शब्द इत्यनिट् कुटादित्वात्सिचः किति न गुणः ॥ २६ ॥ ज० भ०

उत्पाता इत्यादि । गच्छतस्तस्य उत्पाता विनाशसूचकाः प्रवृत्ताः द्युतादित्वात् ङः द्यौराकाशं शोणितं क्षरति स्म शीकङ्सेके भीमाः प्रचण्डा वायवो वान्ति स्म वालगमनहिंसयोः यमरमेति इमसनौ अनुस्विद्देः क्रूरा भयदा द्विजाः पक्षिणश्च शब्दं चक्रुः कूविङ् आर्त्तस्वरे कुटांगुन्नीज्झिणतीति नियमाकुणाभावः नेमेकाजिति अनिम् ॥ २६ ॥ भ०

अस्यन्दिष्टेत्यादि । वामञ्चास्याक्षि अस्यन्दिष्ट स्यन्दते स्म घोराः अनिष्टार्थसिन्यः शिवाः अराटिषूरटन्ति स्म अतोऽलादेरिति दृद्विकल्पः गट्भो मुखले न्यपद्य उपविष्टवान् लकित्वादङ् पतः पुमिति पुमागमश्च दीप्तया उल्कया अपाति पतितं भावे चिणादेशः ॥ २७ ॥ ज० भ०

अस्यन्दिष्टेत्यादि । अस्य वाममक्षि स्यन्दते स्म स्यदिङ् ईषत्कम्पे क्रूराभीमाः शृगालाः शब्दं चक्रुः रटवाचि हसादेः सेम इति त्रिः मुखले गट्भाः पतिताः पतृलृजगत्यां लृदित्वात् ङः वच्यस्यश्विपतामिति पप्रादेशः दीप्तया उल्कया च पतितं रतनोर्थ्यगिणाविति भावे क्त्र् इनस्तनलोपः ॥ २७ ॥ भ०

आक्रिंष्टेत्यादि । तान् उत्पातान् कुम्भकर्णोऽसंमान्य दर्पादवज्ञाय प्रधनक्षितिं युद्धभूमिमाक्रिंष्ट गतवान् तत उत्तरकालं अनर्दीत् गर्जितवान् क्व यास-

प्राशीन्न चात्मपत् क्रूरः क्षुच्चास्यादधदश्नतः ।
अधाद्वसामधासीच्च रुधिरं वनवासिनाम् ॥ २९ ॥
मांसेनास्याश्नतां कुक्षौ जठरं चाप्यशिश्रियत् ।
बह्वनामग्लुचत् प्राणानग्लोचीच्चरणे यशः ॥ ३० ॥

तेदानीमिति अनन्दीच्च जयश्रियं श्लाघितवानित्यर्थः आहवे युध्यामे शत्रूनाह्वास्त आह्वतवान् आगच्छत युध्यध्वमिति सङ्ग्रामाह्वाडिति तङ् आत्मनेपदेष्वन्यतरस्यामित्यङभावपक्षे रूपम् ॥ २८ ॥ ज० म०

आक्षिष्टेत्यादि । स कुम्भकर्णस्तान् उत्थितान् दर्पादसमान्य प्रधनक्षितिं रणस्थलीं आक्षिष्ट गतः अक्षिङ्गतौ मानकिचार्च्च इत्यक्षात् त्काच् ततोऽनर्दीत् सिंहनादं चकार नर्दशब्दे अनन्दीत् आनन्दयुक्तो बभूव आहवे युद्धे शत्रूनाह्वतवान् सङ्ग्रामाह्वाङ् इति मं वक्ष्यमाणेति प्राच्चिकोऽस्तदभावे सिः ॥२८॥ भ०

प्राशीदित्यादि । प्राशीत् भक्षितवान् वनवासिन इत्यर्थात् न चासौ क्रूरः दुष्टचेता अत्मपत् तृप्तवान् पुषादित्वादङ् अश्नतोऽस्य खादतः क्षुत् बुभुक्षा अदधत् बर्द्धते स्म दधृङ्ङ्दृढौ द्युतादिः वनवासिनां वानराणां वसामधात् पीतवान् विभाषाघ्राधेड्शीति सिचोलुक्पक्षे रूपं रुधिरञ्चाधासीत् विभाषाधेट्श्वोरिति चङभावपक्षे रूपम् ॥ २९ ॥ ज० म०

प्राशीदित्यादि । प्राशीत् भक्षितवान् कपीनित्यर्थात् अशगभोजने असौ क्रूरो दुष्टाशयो न तृप्तः ञिक्षत्पुङ्कारात् प्रीणने पुषादित्वात् ङः अश्नतः खादतोऽस्य क्षुत् बुभुक्षा बर्द्धते स्म दधङ्क्षदृढौ द्युतादित्वात् ङः असौ वनवासिनां वानराणां वसां पपौ रुधिरञ्च अधासीत् पपौ धेट्पाने धेशाक्षासाम्र इति पक्षे सिलुक् तदभावपक्षे यमरमेति दमसनौ भसस्खादिति सिचोलोपः ॥ २९ ॥ भ०

मांसेनेत्यादि । वनवासिनां मांसेनास्य कुम्भकर्णस्य कुक्षौ उदरपार्श्वौ अश्नतां सूनौ जृस्तम्भित्यादिना अङ् श्वयते र इत्यत्वं जठरञ्चोदरमशिश्रियत् सूनं विभाषाधेट्श्वोरिति चङ् दृयाजादेशः बह्वनां वनवासिनां प्राणानग्लुचत् कृतवान् ग्लुचुग्लुचुक्लुचुग्लुचुस्तेयकरणे जृस्तम्भित्यादिना अङ्विकल्पनादङभावपक्षे रूपं यशश्च बह्वनां रणे अग्लोचीत् अपनीतवान् चङ्युवञ्चित्यादौ ग्लुचिर्गत्यर्थः अङभावपक्षे रूपम् ॥ ३० ॥ ज० म०

मांसेनेत्यादि । अस्य कुम्भकर्णस्य कुक्षौ उदरपार्श्वौ वानरादीनां मांसेन अश्नतां सूनौ द्यायौश्चीर्गतिदृङोः श्वसिद्युदित्यादिना पक्षे ङः बच्यस्त्रिपता-

सामर्थ्यञ्चापि सोऽस्तम्भीद्विक्रमञ्चास्य नास्तभन् ।
शाखिनः केचिदध्यष्ठुर्न्यमाङ्क्षुरपरेऽम्बुधौ ॥ ३१ ॥
अन्ये त्वलङ्क्ष्णुः शैलान् गुहास्वन्ये न्यलेषत ।
केचिदासिषत स्तब्धा भयात् केचिद्घूर्णिषुः ॥ ३२ ॥

मिति स्वादेशः अस्य जठरसदरञ्च अधिश्वियत् वहधे जिघ्रीत्यादिना पक्षेऽङ् असौ वह्वनां प्राणान् अग्लुचत् जहार रणे वह्वनां यशोऽग्लोचीत् ग्लुचुदर् चौर्ये शासलिह्विदित्यादिना प्राच्चिकोऽस्तदभावपक्षे सिः अग्लोचीदिति पाठे ग्लुचुदर्गत्यां यशः प्राप्तेत्यर्थः ॥ ३० ॥ भ०

सामर्थ्यमित्यादि । स कुम्भकर्णः केषाञ्चिद्बलवतामपि वनवासिनां सामर्थ्यमस्तम्भीत् नियमितवान् अङभावपक्षे रूपं विक्रमञ्च केचिदस्य नास्तभन् न नियमितवन्तः अङ्पक्षे रूपं किङित्यनुनासिकलोपः केचिद्वयाद्दक्षानध्यष्ठुः अधिष्ठितवन्तः तिष्ठतेर्गातिस्थेति सिचोलुक् आदेशसकारस्य षत्वं ष्टुत्वञ्च अपरेऽम्बुधौ न्यमाङ्क्षुर्निमग्नाः मस्जिनशोर्हलीति नुम् मस्जेरन्त्यात्पूर्वं नुममिच्छन्ति अनुषङ्गसंयोगादिलोपार्थम् ॥ ३१ ॥ ज० म०

सामर्थ्यमित्यादि । स कुम्भकर्णः शत्रूणां सामर्थ्यमस्तम्भीत् निवारितवान् अस्य विक्रमं केचिदपि नास्तभन् न निवारितवन्तः स्तन्भस्तुन्भस्कन्भ रोधने सौत्रः पूर्ववत्पक्षे ङरूपदभावे सिः ङेः हस्तङ्क्लोपोऽणाविति नस्य लोपः केचित् भयात् दृक्षान् अधितिष्ठन्ति स्म भूस्थेति सेर्लुक् गीकःस्तुस्तुभेति षत्वं अपरेऽम्बुधौ निमग्नाः मस्जौशट्वेस्नानेऽनिमृत्वाद्वृद्भिः नुनरधोऽनुचामित्यादिना नुन् स्वादेःसोलोपः श्चुश्छाजिति षड् षढोकः स्नोर्नुर्जपेऽजग्नोः किलादिति षः अनुम् ॥ ३१ ॥ भ०

अन्ये त्वित्यादि । अन्ये शैलानलङ्क्ष्णुः भयादारूढा इत्यर्थः अन्ये गुहासु न्यलेषत लीङ्श्लेषणे केचित् स्तब्धाः स्थाणुवदासिषत आसते स्म अपरे भीत्या भयात् अघूर्णिषुः घुर्णन्ते स्म ॥ ३२ ॥ ज० म०

अन्ये इत्यादि । अन्ये कपयः शैलान् अलङ्क्ष्णुः तद्भयाकुलत्वात् लधिशोचे अनेकार्थत्वाद्धातावपि लधिङ् अभुग्नत्वोरित्यस्य क्वचिदात्मनेपदिनोऽपि परस्मैपदित्वाद्वा रूपं अन्ये गुहासु लीनाः लीङ्यश्लेषणे नैकाजिति अनिम् केचित् स्तब्धाः सन्तः स्थाणुवद्भासन्ते स्म जिलासङ् उपवेशे केचित् भयात् घूर्णन्ते स्म घूर्णङ्भ्रमणे ॥ ३२ ॥ भ०

उदतारिषुरम्भोधिं वानराः सेतुनापरे ।
अलज्जिष्टाङ्गदस्तत्र प्रत्यवास्थित चोर्जितम् ॥ ३३ ॥
सत्वं समदुधुक्षच्च वानराणामयुद्ध च ।
ततः शैलानुदक्षैषुरुदगूरिषत द्रुमान् ॥ ३४ ॥
अनर्दिषुः कपिव्याघ्राः सम्यक् चायुत्सताहवे ।
तानमर्दीदखादीच्च निरास्थच्च तलाहतान् ॥ ३५ ॥

उदतारिषुरित्यादि । अपरे वानराः सेतुना अम्भोधिमुदतारिषुः उत्तीर्णाः तत्र तेषु तथाभूतेष्वङ्गदोऽलज्जिष्ट लज्जते स्म अर्जितञ्च पराक्रमं प्रत्यवास्थित प्रतिपन्नवान् समवप्रविभ्यस्थ इति तङ् हुस्वादङ्गादिति सिचोलोपः ॥ ३३ ॥ ज० म०

उदतारिषुरित्यादि । अपरे वानराः सेतुना समुद्रमुत्तीर्णाः ततरेऽभिभवेत्युक्तां अजन्तत्वाद्व्रजवदेति त्रिः वानरेष्वेवंभूतेषु सत्सु तत्राङ्गदो लज्जते स्म लसृलि ओङ्लजङ्व्रीडे अर्जितं पराक्रमञ्च प्रत्यवास्थित प्रतिपन्नवान् प्रतिज्ञानिर्णयेत्यादिना अं स्यादोर्ङिः झसस्वादिति सिलोपः ॥ ३३ ॥ भ०

सत्वमित्यादि । वानराणां सत्वं समदुधुक्षत् सन्दीपितवान् धुक्षे सन्दीपनार्थात् श्यन्लुक्ष्वङ् स्वयमयुद्ध च युध्यते स्म झलोझलीति सिचो लोपः ततः सत्वधुक्षणानन्तरं वानराः शैलानुदक्षैषुः उत्क्षिप्तवन्तः हलन्तलक्षणा दृद्भिः द्रुमांश्चोदगूरिषत उत्थापितवन्तः गूरी उद्यमे ॥ ३४ ॥ ज० म०

सत्वमित्यादि । अङ्गदो वानराणां सत्वं बलं संधुक्षयामास धुक्षङ्सन्दीपने अन्नादङ् स्वयञ्च युध्यते स्म युध्यौङ् युद्धे झसस्वादिति सिलोपः ततः संधुक्षणानन्तरं शैलान् उत्क्षिप्तवन्तः कपिव्याघ्रा इत्यग्रिमश्लोकेनान्वयः क्षिपञ्जौ क्षिप्यौ तुदि अनिमित्वात् व्रजवदेति त्रिः द्रुमांश्च उदूर्णवन्तः गूरण्क उद्यमे चूर्योर्ङिर्ञिति जेरभावपक्षे रूपं गूरीयङ्बधे गत्यामित्यस्य रूपं वा गुरीङश्चि उद्यमे इत्यस्य तु नायं प्रयोगो ह्रस्वोङ्त्वात् ॥ ३४ ॥ भ०

अनर्दिषुरित्यादि । उत्क्षिप्तशैलद्रुमाः कपिव्याघ्रा अनर्दिषुः नर्दितवन्तः दृष्टोऽस्माभिः क्व यास्यसीति सम्यक् निर्भयमाहवे अयुत्सत युध्यन्ते स्म हलन्ताच्चेति सिचः किच्चे गुणाभावः तान् समङ्गदान् युध्यमानान् कुम्भकर्णोऽमर्दीत् मृदितवान् मृदेर्लघूपधगुणः अखादीच्च भक्षितवान् हस्ततलेनाहतान् निरास्थत् इतस्ततः क्षिप्तवान् अस्यतीत्यादिना अङ् अस्यते स्थुक् ॥ ३५ ॥ ज० म०

अनर्दिषुरित्यादि । कपिव्याघ्रा नर्दितवन्तः मारय मारयेति शब्दं चक्रुः

प्राचुचूर्णच्च पादाभ्यामविभीषत च द्रुतम् ।
अतर्हीच्चैव शूलेन कुम्भकर्णः प्लवङ्गमान् ॥ २६ ॥
अतौत्सीत् गदया गाढमपिषच्चोपगूहनैः ।
जानुभ्यामदमीच्चान्यान् हस्तवर्त्तमवीवृतत् ॥ २७ ॥
अदालिषुः शिला देहे चूर्णभूवन्महाद्रुमाः ।

नर्दशब्दे सम्यक् निर्भयं संग्रामे युध्यन्ति स्म इगुदुर्मठेति किंत्त्वात् गुणाभावः तान् वानरान् मर्दितवान् कुम्भकर्ण इत्यभिश्लोकेनान्वयः कृदगत्वादि अखादीत् खाद भक्षणे तलेन हस्ताघातेन आहतान् निरास्थच्च इतस्ततश्चिक्षेप च अस्थु र्द्रुमे वच्यस्थिपतामिति अस्थादेशः ॥ २५ ॥ भ०

प्राचुचूर्णदित्यादि । पादाभ्यां प्राचुचूर्णत् पिष्टवान् चूर्णप्रेरण इति चुरादिः एवं चूर्णयन् द्रुतमविभीषत भीषयते स्म भियोहेतु भयेषुक् भीस्म्यो-र्हेतुभय इति तङ् शूलेन प्रहरणेन अतर्हीच्च विद्धवान् तर्हि हिंसायां ह्वान्त-त्वणत्वान्न वृद्धिः ॥ २६ ॥ ज० म०

प्राचुचूर्णदित्यादि । पादाभ्यां चूर्णयामास चूर्णक्रमेण चुरादिर्ञ्णान्तादङ् द्रुतं भीषयते स्म भीर्भीष्वेति औ पाच्चिको भीषादेशो मञ्च कर्तृकुम्भकर्णत एव भयस्योत्पत्तेः शूलेन च अतर्दीत् तर्द हिंसे अतर्हीदिति पाठे तृहधतृन्यूय हिंसे इत्यस्य रूपम् ॥ २६ ॥ भ०

अतौत्सीदित्यादि । कांश्चिन्नदया गाढमतौत्सीत् व्यथितवान् उपगूहनैरपिषत् चूर्णितवान् रुदित्त्वादङ् अन्यांश्च जानुभ्यां अदमीत् शासितवान् अवष्टभ्य नियमितवानित्यर्थः ह्वान्तत्वान्न वृद्धिः हस्तवर्त्तमवीवृतत् हस्ताभ्यां वर्त्तितवान् पिष्ट-वानित्यर्थः वृतेर्ण्यन्तात् हस्ते वर्त्तिग्रहोरिति णमुल् कषादिषु यथाविध्यनु-प्रयोगः ॥ २७ ॥ ज० म०

अतौत्सीदित्यादि । गदया कांश्चित् प्लवङ्गमान् गाढमत्यर्थमतौत्सीत् तुद-श्चौव्यथेऽनिमित्त्वाद्विः अन्यान् उपगूहनैरालिङ्गनैः पिष्टवान् धौपिषुल् चूर्णने रुदित्त्वात् ङः अन्यान् जानुभ्यां दमितवान् दम्युदूचूर्णने मान्तत्वान्न द्विः अन्यान् हस्तवर्त्तमवीवृतत् हस्ताभ्यां पीडयित्वा चूर्णितवानित्यर्थः वृतेर्ण्यन्ता-दङ् वर्तृङोर्धुरिति पक्षे गुणाभावः हस्तवर्त्तमिति हस्तार्थाद्ण्यन्ताद्वर्त्तिवृतां गता-र्थत्वे णम् तदनुप्रयोगश्चेति परः क्षमते चणम्बेत्यस्य योगविभागात् ॥ २७ ॥ भ०

व्यदालिषुरित्यादि । वानरैस्तस्य देहे क्षिप्ताः शिला अदालिषुर्विशीर्णाः

क्षिप्तास्तस्य न चाचेतीत्तानसौ नापि चाक्षुभत् ॥ ३८ ॥
अद्राष्टां तं रघुव्याघ्रौ आख्यच्चैनं विभीषणः ।
एष व्यजेष्ट देवेन्द्रं नाशङ्किष्ट विवस्वतः ॥ ३९ ॥
यत्तेन्द्रशक्तिमच्छासीन्नाप्रोथीदस्य कश्चन ।
कुम्भकर्णान्न भैष्टं मा युवामस्मान्नृपात्मजौ ॥ ४० ॥

दलविशरणे भौवादिकः लान्तत्वादट्टिः महाद्रुमाश्शूर्ण्यभूवन् चूर्णीभूताः न च तान् क्षिप्तानसौ कुम्भकर्णो नाचेतीत् न चेतितवान् चिती संज्ञाने नापि चाक्षुभत् क्षुभितः क्षुभ सञ्चलने दिवादिः ॥ ३८ ॥ ज० म०

अदालिषुरित्यादि । कपिभिः क्षिप्ताः शिलास्तस्य कुम्भकर्णस्य देहे अदालिषुर्विदीर्णाः दलमिभेदे व्रजवदेति त्रिः महाद्रुमाश्शूर्णीभूताः भुवोवनटीछचितान् दृष्टान् असौ कुम्भकर्णो न अचेतीत् चितीज्ञाने नापि क्षुभितः क्षुभस्वङ् सञ्चले दुतादिः ॥ ३८ ॥ भ०

अद्राष्टामित्यादि । तं तादृशौ रघुव्याघ्रौ रामलक्ष्मणावद्राष्टां दृष्टवन्तौ विभीषणस्तेनमाख्यत् कथितवान् कुम्भकर्णोऽयमिति अस्यतीत्यादिनाऽङ् प्रभावश्चास्य कथयन्नाह देवेन्द्रमेष व्यजेष्ट विजितवान् विपराभ्याञ्जेरिति तङ् विवस्वतः सूर्यात् नाशङ्किष्ट न शङ्कते स्म ॥ ३९ ॥ ज० म०

अद्राष्टामित्यादि । रघुव्याघ्रौ तं कुम्भकर्णं दृष्टवन्तौ इदंशौ प्रेक्षे वर्त्तेऽकिदिति कृदः झसस्वाज्झसीति सेर्लोपः शक्छाजिति षङ् क्षुभिरिति टः विभीषण एनमाख्यातवान् ख्यालख्यातौ कथने वक्तव्ये खेप्रति ङः उस्येत्यालोपः केन प्रकारेणाख्यदित्याह एष देवेन्द्रं जितवान् विपराजीति मं विवस्वतः सूर्यादपि नायं शङ्कितवान् शकिङ्त्वासशङ्कयोः ॥ ३९ ॥ भ०

यत्तेत्यादि । यत्तेन्द्रस्य कुबेरस्य शक्तिं प्रहरणमच्छासीत् खण्डितवान् छो छेदने अस्य तु कश्चन कश्चित् नाप्रोथीत् न प्रभवति स्म शक्यै प्रहरणायेत्यर्थात् प्रोथपर्याप्तौ पर्याप्तियोगे चतुर्थी न भविष्यति पर्याप्तेरविवक्षितत्वात् अतोऽस्मादेवंविधात् कुम्भकर्णात् युवां नृपात्मजौ मा न भैष्टं किन्तु बिभीतं स्म माङि लुङ् मध्यमपुरुषद्विवचने रूपं माशब्दः प्रतिषेधे ॥ ४० ॥ ज० म०

यत्तेन्द्रेत्यादि । यत्तेन्द्रस्य कुबेरस्य शक्तिमस्त्रविशेषं सामर्थ्यं वा अच्छासीत् चिच्छेद छोयलूनौ धेशाच्छासाम्र इत्यस्याग्रहणात्तिप्यत्ते यमरमेति दृम्सनौ झसस्वाज्झसीमर्हतीति सेर्लोपः अस्य कुम्भकर्णस्य कश्चित् नाप्रोथीत् न शक्तः

मन्तं मोपेक्षिषाथाञ्च मा न कार्ष्टमिहादरम् ।
अमुं मा न बधिष्टेति रामोऽवादीत्ततः कपीन् ॥ ४१ ॥
ते व्यरासिषुराह्वन्त राक्षसं चाप्यपिप्लवन् ।
अवभासन् स्वकाः शक्तीर्द्रुमशैलं व्यकारिषुः ॥ ४२ ॥

प्रोपृङ् पर्य्याप्तौ पर्य्याप्तिः सामर्थ्यं शक्तार्थेत्यादिना चतुर्थीप्राप्तौ सम्बन्धविवक्षया षष्ठी शक्तार्थैः षष्ठ्यपीष्यत इत्यन्ये अस्य शक्तिं कश्चन नाप्नोथीन्न हिंसितवान् अनेकार्थत्वात् हिंसार्थत्वमपीति भट्टभास्करः हे नृपात्मजौ अस्मात् कुम्भकर्णात् युवां मा भैष्टमिति न जिभीलिभीत्यां श्यांसिः नेमेकाजिति दम्निषेधः व्रजवदेति त्रिः ॥ ४० ॥ भ०

मन्तमित्यादि । तस्मात् मन्तमेनं युवां, मोपेक्षिषाथां मोपेक्षकौ भूतमित्यर्थः इह च कुम्भकर्णे आदरं मा न कार्ष्टां अपि तु कुरुतं ततो विभीषणवचनानन्तरं रामः कपीनवादीत् उक्तवान् अमुं कुम्भकर्णं मा न बधिष्टेति किन्तु हतेति हनोबधलङि ॥ ४१ ॥ ज० भ०

मन्तमित्यादि । मन्तं प्रहरन्तमेतं युवां मा उपेक्षिषाथां ईक्षङ्दर्शने उपपूर्व्वोऽयमनादरे वर्त्तते इह कुम्भकर्णे आदरं मा कार्ष्टं किन्त्वस्यं कुरुतं क्रञ्छ्यांसिः व्रजवदेति त्रिः इत्येवं विभीषण आख्यात इत्यर्थः ततोऽनन्तरं रामो वानरान् अवादीत् उक्तवान् किन्तदित्याह अमुं कुम्भकर्णं यूयं मा न बधिष्ट किन्त्वस्यं हतेति हनबधष्टीति बधादेशः ॥ ४१ ॥ भ०

त इत्यादि । ते वानराः हर्षाद्व्यरासिषुः किलिकिलाशब्दं कृतवन्तः अतो हलादेरिति दृद्भिः राक्षसञ्च कुम्भकर्णमाह्वन्त स्पर्द्धमाना आह्वतवन्तः आत्मनेपदेष्वन्यतरस्यामिति ह्वेङः पक्षे अङ् अपिप्लवन् प्लावितवन्तः अपि शब्दार्थे तथा कृतवन्तः यथासौ प्लुतिं कर्त्तुमारब्धः प्लवतेर्ण्यन्तस्य चङि सन्वत्कार्यमिति स्नवति श्नुस्तोतीत्यादिना अभ्यासस्येत्वं स्वका आत्मीया शक्तीरवभासन् प्रकाशयन्ति स्म भासेर्ण्यन्तस्य चङि भ्राजभासेत्यादिना उपधाह्रस्वविकल्पः द्रुमाश्च शैलाश्च द्रुमशैलं जातिरप्राणिनामित्येकवद्भावः व्यकारिषुः तदुपरि क्षिप्तवन्तः कृविक्षेपे ॥ ४२ ॥ ज० भ०

ते व्यरासिषुरित्यादि । ते वानरा व्यरासिषुः किलकिलाशब्दञ्चक्रुः रसशब्दे हलादेः सेम इति त्रिः राक्षसं कुम्भकर्णं स्पर्द्धमाना आह्वतवन्तः स्पर्द्धायामाङ् इति सं वक्ष्यत्यादिना ङः तमेवापिप्लवन् प्लुङ्च सर्पणे अनुदात्तादङि खेः

ते तं व्याश्लिषताञ्चौत्सुः पादैर्दन्तैस्तथाच्छिदन् ।
आर्ज्जिजत् शरभो वृक्षं नीलस्त्वादित पर्व्वतम् ॥ ४३ ॥
ऋषभोऽद्रीनुदचैषीत्तैररिमतर्दिषुः ।
अस्फूर्ज्जीद्गिरिश्रृङ्गञ्च व्यस्राक्षीद्गन्धमादनः ॥ ४४ ॥

सन्वत् स्नुस्नुदुस्नुस्नु च्युङांवेति पक्षे खेरुकारस्य इकारः स्वका आत्मीयाः शक्तीः सामर्थ्यानि प्रकाशितवन्तः भासृङ् दीप्तौ, अन्नादङ् भ्राजभासभ्रासेत्यादिना पक्षे उङोऽनुस्वः तदभावपक्षे खेःसन्वद्भावित्यस्याविषयः परे लघ्वक्षराभावात् द्रुमशैलं तदुपरि क्षिप्तवन्तः क्षश विक्षेपे व्रजवदेति व्रिः द्रुमाश्च शैला शेति समाहारः ॥ ४२ ॥ भ०

ते तमित्यादि । ते वानरास्तं राक्षसं व्याश्लिषत व्याप्तवन्तः अस्फूव्याप्तौ पादैश्चाच्चौत्सुः पिष्टवन्तः चुदिरसम्पेषणे दन्तैरच्छिदन् छिन्दन्ति स्म ऋरितो वेत्यङ् शरभो नाम कपिर्वृक्षमार्ज्जिजत् ग्रहीतुं यतते स्म अर्जप्रतियत्न इति स्वार्थिकण्यन्ताच्छङि द्विर्वचने चीति स्यानिवद्भावादजादेर्द्वितीयस्येति द्विर्वचनं रेफस्य नन्द्रा इति प्रतिषेधः नीलः पर्व्वतमादित ग्रहीतवान् स्याच्चोरिश्च ॥ ४३ ॥ ज० म०

ते तमित्यादि । ते वानरास्तं कुम्भकर्णं व्याप्तवन्तः अस्फूलङ् व्याप्तिसंहत्योः वेमूदिति पक्षे इम् पादैः चुखवन्तः अधौचुदिर्नुदि ऋरित्वात् पाक्षिकङाभावे सिः अनिमित्त्वाद्विः तथा दन्तैरच्छिदन् छिदिरधौजक्षेदे ऋरित्वात् पक्षे ङः शरभनामा कपिर्वृक्षमर्ज्जिजत् ग्रहीतुं यतते स्म अर्जक्संस्कारे युद्धे वृक्षसंस्कारो ग्रहणप्रेरणानुकूलव्यापारः चुरादिअन्नादङ् नीलः पर्व्वतमादित जग्राह आङ्पूर्व्वदाङ्ग्रहणे स्यादोर्ङिः ॥ ४३ ॥ भ०

ऋषभ इत्यादि । ऋषभो नाम कपिरद्रीनुदचैषीत् उत्क्षिप्तवान् ते शरभादयस्तैर्वृक्षादिभिररिमतर्दिषुः हतवन्तः तर्दृहिंसायां गन्धमादनो नाम कपिरस्फूर्ज्जीत् वज्रमिव गिरिश्रृङ्गञ्च व्यस्राक्षीत् विसृष्टवान् स्रुजश्चौदादिक उदात्तेत् ॥ ४४ ॥ ज० म०

ऋषभ इत्यादि । ऋषभो नाम कपिः पर्व्वतानुत्क्षिप्तवान् क्षिप्शजौक्षिप्यौ तुदि अनिमित्त्वाद्विः ते शरभादयस्तैर्वृक्षादिभिररिं कुम्भकर्णं अतर्दिषुः तर्दृहिंसे गन्धमादनः कपिरस्फूर्ज्जीत् वज्रवत् शब्दञ्चकार ष्टौस्फूर्ज्जावज्रनिर्घोषे गिरि-

अकूर्दिष्ट व्यकारीच्च गवाक्षो भूधरान् बहून् ।
स तान्नाजीगणद्वीरः कुम्भकर्णोऽव्यथिष्ट न ॥ ४५ ॥
अमन्थीच्च परानीकमश्लोष्ट च निरङ्कुशः ।
निहन्तुं चात्वरिष्टारीनजत्तीच्चाङ्कमागतान् ॥ ४६ ॥
व्यक्रुत्तद्वानरानीकं संपलायिष्ट चायति ।
हस्ताभ्यां नश्यदक्राक्षीद्भीमे चोपाधितानने ॥ ४७ ॥

श्रङ्क्ष्च क्षिप्तवान् सृजौशच चकारादिसर्गे वर्द्रोऽकिदिति क्ष्वदः अनिम्त्वाद्विः षड् षढोः कः ॥ ४४ ॥ भ०

अकूर्दिष्टेत्यादि । गवाक्षो नाम कपिः अकूर्दिष्ट क्रीडापूर्व्वकं चेष्टते स्म महीधरांश्च व्यकारीत् विक्षिप्तवान् वीरः कुम्भकर्णस्तान् शरभादीन् नाजीगणत् न गणयामास अजगणदिति पाठान्तरं तत्र चकारेणात्वमप्यनुवर्त्तते न चाव्यथिष्ट व्यथितोऽभूत् ॥ ४५ ॥ ज० म०

अकूर्दिष्टेत्यादि । गवाक्षो नाम कपिरकूर्दिष्ट क्रीडापूर्व्वकं चेष्टते स्म कुर्द क्रूर्दङ्क्रीडायां बहून् पर्व्वतांश्च विक्षिप्तवान् क्रुध विक्षेपे स कुम्भकर्णस्तान् शरभादीन् न गणयामास गणत्कसंख्याने चुरादिञ्प्रत्यादङ् वेङ्गणकथ इति पाचिकः खेरीङ् नच व्यथितो बभूव यतो वीरः व्यथषमङ्दुःखेचाले ॥४५॥ भ०

अमन्थीदित्यादि । परानीकं शत्रुसैन्यममन्थीत् क्षोभितवान् मन्थ विलोडने निरङ्कुशश्चाप्रतिहतशक्तिः अश्लोष्ट भ्रान्तवान् श्लुङ्गतौ अरींश्च वानरान्निहन्तुमत्वरिष्ट त्वरते स्म जित्वरासंभ्रमे अङ्कञ्च समीपमागतानजत्तीत् भक्षितवान् जत्तभक्षहसनयोरिति भक्षणे जत्तिः ॥ ४६ ॥ ज० म०

अमन्थीदित्यादि । कुम्भकर्णः परानीकं शत्रुसैन्यञ्च क्षोभितवान् मन्थगमाङ्के निरङ्कुशोऽप्रतिहतः सन् गतिं चकार श्लुङ्च सर्पणे नेमेकाजिति अनिम् अरीन् निहन्तुं त्वराञ्चक्रे अङ्कमागतान् क्रोडप्रविष्टान् भक्षितवान् जत्तज्लु भक्षहासयोः ॥ ४६ ॥ भ०

व्यक्रुत्तदित्यादि । तस्मिन्नायत्यागच्छति सति आङ्पूर्व्वस्थेशः शतरि रूपं वानरानीकं व्यक्रुत्त विक्रोशति स्म शलदृगुपधादनिटः क्सः सम्पलायिष्ट पलायते स्म तच्च नश्यत्पलायमानं हस्ताभ्यामक्राक्षीत् आकृष्टवान् कुम्भकर्णः क्रपविलेखने अनुदात्तस्य चेत्यकम् हलन्तलक्षणा वृद्धिः आकृष्टं चातिभीमेऽतिभयङ्करे विकृते आनने वक्त्रे उपाधित न्यस्तवान् धाङ् स्थाध्वोरिच्च ॥ ४७ ॥ ज० म०

रक्तेनार्द्रीचक्रिदद्भूमिं सैन्यैश्चांतस्तरद्भुतैः ।
नातार्षीद्भक्षयन् क्रूरो नाश्नमद्भ्नन् प्लवङ्गमान् ॥ ४८ ॥
न योद्धुमशकन् केचिन्नाढौकिषत केचन ।
प्राणश्यन्नासिकाभ्याञ्च वक्त्रेण च वनौकसः ॥ ४९ ॥

व्यक्रुचदित्यादि । अस्मिन्नायति समागच्छति सति वानरसैन्यं विक्रोशति स्म क्रुशौजरोदे ह्वतौ हृग्रसोऽनिमिजुङ् इति सक् सम्मलायते स्म अयङ्गतौ प्रपूर्वः मनीषादित्वाल्लकारः कुम्भकर्णो नश्यत् पलायमानं वानरसैन्यं हस्ताभ्यामाक्षिपत्वान् क्षपस्पशस्पृशेत्यादिना षाच्छिकसिः वर्द्रीकिदिति षाच्छिकस्कारस्य रः अनिमित्वाद्विः षढोः कः भीमे आनने उपाधित न्यस्तवान् डुधाञ्लिधारणेपुष्टौदाने स्यादोर्डिरिति डिः गुणाभावश्च दासंज्ञकस्य यङ्हणात् ॥ ४७ ॥ भ०

रक्तेनेत्यादि । वानरानीकस्य रक्तेन भूमिमार्द्रीचक्लिदत् क्लेदितवान् क्लिद आर्द्रीभावे तस्य यङन्तस्य चङि रूपं सैन्यैश्च हृतैर्भूमिमतस्तरत् छादितवान् स्तृणातेर्णौचङि रूपं अत्स्मद्दत्यरेत्यादिना अत्त्वं तांश्च भक्षयन्नपि क्रूरः नातर्पीत् न तृप्तः तृपप्रीणने पुषादिः स्पृशन्नक्षपत्पदपांसिजुवेति पक्षे सिच् प्लवङ्गमांश्च घ्नन् हिंसन् नाश्नमत् न श्रांतवान् अश्नुतपसि खेदे चेति खेदे पुषादित्वाद्ङ् ॥ ४८ ॥ ज० म०

रक्तेनेत्यादि । स कपिसैन्यस्य रक्तेन भूमिमार्द्रतां नीतवान् क्लिद्यूदरक्लेदे अयन्तादङ् हृतैः सैन्यैर्भूमिमाच्छादितवान् स्तृस्तृतौ स्तृञ्गिच्छादने वा अयन्तादङ् क्रूरोऽसौ तान् भक्षयन्नपि न तृप्तो बभूव जिलृतृथूचचकारात् प्रीणने क्षपस्पशस्पृशेत्यादिना पक्षे सिः वर्द्रीऽकिदित्यस्य पक्षेऽप्रवृत्तिः रधादित्वात् पक्षे इमोऽभावः तेन व्रजवदेत्यादिना त्रिः प्लवङ्गमान् घ्नन् श्रान्तो न जातः श्रमुभ्यङिदर्त्तिपःखेदयोः पुषादित्वात् ङः इरनुबन्धेन कस्यचिन्मते विभाषा दर्शिता ॥ ४८ ॥ भ०

न योद्धुमित्यादि । तेषां मध्ये केचिद्वनौकसो वानरा योद्धुं नाशकन् न शक्ता अभवन् लृदित्वाद्ङ् केचिन्नाढौकिषत न ढौकन्ते स्म ये तु तेन पदेन घ्रिप्राप्ते नासिकाभ्यां नासिकाविवराभ्यां वक्त्रेण च प्राणश्यन् प्रनष्टाः निःसृता इत्यर्थः नशेः पुषादित्वाद्ङ् उपसर्गादित्यादिना यत्वम् ॥ ४९ ॥ ज० म०

न योद्धुमित्यादि । केचिद्वनौकसो वानरा योद्धुं न शक्ताः शकयञ्शकिकृतशक्तौ पुषादिः केचन वानरा न ढौकिषत समीपं न जग्मुः टौकृङ् गत्यां

उदरे चाजरन्यस्य पातालसन्निभे ।
आक्रन्दिषुः सखीनाङ्क्षन् प्रपलायिषताखिदन् ॥ ५० ॥
रक्तमस्रोतिषुः क्षुण्णाः क्षताश्च कपयोऽटषन् ।
उपास्थायि नृपो भग्नैरसौ सुग्रीवमैजिहत् ॥ ५१ ॥
योद्धुं सोऽप्यरुषच्छत्रोरैरिरच्च महाद्रुमम् ।

ये च तेन मुखे क्षिप्तास्ते नासाविवराभ्यां वक्त्रेण च प्राणयन् पलायिताः नशूल्नाशे पुषादिः प्राग्वद्रोण इत्यादिना णत्वं नशनेशवाङ इत्यस्याप्रवृत्तिपक्षे रूपम् ॥ ४९ ॥ भ०

उदरे चेत्यादि । अन्ये च तस्योदरे पातालसदृशे अजरन् जीर्णाः जृस्तम्भीत्यादिनाऽङ् ऋदृशोऽङिगुणः आक्रन्दिषुः आक्रन्दितवन्तः सखीन् मित्राणि आङ्क्षन् आङ्क्षतवन्तः लिपिसिचित्यादिनाङ् प्रपलायिषुः प्रपलायन्ते स्म पलायमानाश्चाखिदन् प्रखिन्नाः पुषादित्वादङ् ॥ ५० ॥ ज० भ०

उदर इत्यादि । पातालतुल्ये तस्य उदरे केचित् कपयो जीर्णाः जृगिकिज्यानौ शासलिद्युदित्यादिना पक्षे ङः ऋश्रोर्णुरिति गुणः अपरे आक्रन्दितवन्तः अन्ये सखीन् मित्राणि आङ्क्षतवन्तः वक्ष्यतीत्यादिना ङः अन्ये प्रपलायन्ते स्म अन्ये प्रखिन्नाः लृमिदाजिङच चकारात् क्ष्विहि खेदयुक्ता बभूवुरित्यर्थः जिमिदागात्रप्रलरणे इति पठन्त्यन्ये पुषादिः अखिदन्निति पाठे स एवार्थः ॥ ५० ॥ भ०

रक्तमित्यादि । अन्ये क्षुण्णाः सन्तः रक्तमस्रोतिषुः स्रोतन्ति स्म स्रवितो वेत्यङभावपक्षे रूपं क्षताश्च खण्डिता अटषन् टषन्ति स्म जिटषपिपासायां पुषादित्वादङ् नृपो रामस्तैर्भग्नैरुपास्थायि उपस्थापितः अन्तर्भावितोण्यर्थः कर्मणि चिण् असौ रामः सुग्रीवमैजिहत् योद्धुमीहाङ्कारितवान् ईहतेर्ण्यन्तान्ङिर्द्विवचनेचीति स्थानिवद्भावात् द्वितीयस्य द्विर्वचनं आहुर्द्विः योद्धुमिति वक्ष्यमाणेन यौज्यम् ॥ ५१ ॥ ज० भ०

रक्तमित्यादि । अन्ये कपयः क्षुण्णाः खण्डिताः सन्तो रक्तं स्रवन्ति स्म क्षुतिरक्षरे पक्षे स्विः क्षताः सन्तोऽटषन् दूर्यजिटषटषि टट् पिपासा पुषादिः भग्नैः रुग्नैः पलायमानैर्वा नृपो राम उपास्थायि आराधितः रतनोर्यगिणाविति कर्मणि इण् यनञ्णिदिति यन् असौ रामः सुग्रीवमीहां कारितवान् योद्धुमिति वक्ष्यमाणेन सम्बन्धः ईहङ्चेष्टे आत्मादङ् ॥ ५१ ॥ भ०

तं प्राप्तं प्रासहिष्टारिः शक्तिं चोग्रामुदग्रहीत् ॥ ५२ ॥
स तामविभ्रमद्भीमां वानरेन्द्रस्य चासुचत् ।
प्रापप्तन्मारुतिस्तत्र ताञ्चालासीद्वियद्गताम् ॥ ५३ ॥
अशोभिष्टाचखण्डच्च शक्तिं वीरो न चायसत् ।
लौहभारसहस्रेण निर्मिता निरकारि मे ॥ ५४ ॥

योद्धुमित्यादि । सोऽपि सुग्रीवः अरुषत् क्रुध्यति स्म रुषरोषे पुषादिः शत्रोश्च द्रुममैरिरत् क्षिप्रवान् ईरक्षेप इति स्वार्थिकण्यन्तस्य रूपं तन्द्रुमं प्राप्तमरिः कुम्भकर्णः प्रासहिष्ट प्रसहते स्म शक्तिञ्चोग्रां प्राणहरामुदग्रहीत् उद्गृहीतवान् ॥ ५२ ॥ ज० म०

योद्धुमित्यादि । तत्प्रेरणया सुग्रीवो रुष्टः रुषिर्ज्जिक्रुधि पुषादिः शत्रोः क्षते समीपे वा महाद्रुमं प्रेरयामास ईर्क्रिगतौ तुदि चुरादिः अन्नादङ् अरिः कुम्भकर्णः प्राप्तं तं द्रुमं सोढवान् उग्रां शक्तिमस्त्रं जग्राह हान्तत्वान्न ह्रिः ॥ ५२ ॥ भ०

स तामित्यादि । तां गृहीतां शक्तिं स कुम्भकर्णः अविभ्रमत् भ्रमयति स्म भ्रमेर्ज्जन्नाङ्ङ् रूपं वानरेन्द्रस्य सुग्रीवस्योपरि असुचत् क्षिप्तवान् क्षदित्वाद्ङ् तत्र तस्यां सुक्षायां मारुतिर्हनूमान् प्रापप्तत् प्रत्युपस्थितः क्षदित्वाद्ङीति पतःपुमिति पुमागमः ताञ्च वियद्गतामलासीत् आप्तवान् ला आदाने यमरमेति सगिटौ ॥ ५३ ॥ ज० म०

स तामित्यादि । स कुम्भकर्णस्तां भीमां शक्तिं भ्रमयामास भ्रमेर्ज्जन्नाद्ङ् सुग्रीवस्य क्षते त्यक्तवान् सुच्लृशपजौ मोक्षे क्षदित्वात् ङः तत्र तस्यां सुक्षायां सत्यां तद्धेये मारुतिर्हनूमानुपस्थितः पतल्लजगत्यां क्षदित्वात् ङः वच्यश्चिपतामिति पप्रादेशः तां शक्तिञ्च वियद्गतां जग्राह यमरमेति ह्रस्वनौ ॥ ५३ ॥ भ०

अशोभिष्टेत्यादि । असौ गृहीतशक्तिर्वीरः अशोभिष्ट शोभते स्म शक्तिमचखण्डच्च भग्नवान् खण्डखण्डिभेदने चौरादिकः ताञ्च खण्डयन्नायसत् नायस्यति स्म यसुयत्ने पुषादिः लौहभारसहस्रेण निर्मिता घटिता मम शक्तिर्निरकारि भग्ना अनेनेति रक्षः कुम्भकर्णोऽकृषदिति वक्ष्यमाणेन सम्बन्धः ॥ ५४ ॥ ज० म०

अशोभिष्टेत्यादि । गृहीतशक्तिर्मारुतिर्वीरोऽशोभिष्ट शुभ्लृङ् दीप्तौ मे

शक्तिरत्यकुपद्रक्षो गिरिञ्चोद्खनीद्गुरुम् ।
व्यसृष्ट तं कपीन्द्रस्य तेनामूर्छीद्सौ क्षतः ॥ ५५ ॥
अलोठिष्ट च भूपृष्ठे शोणितञ्चाप्यसुस्रुवत् ।
तमादायापलायिष्ट व्यरोचिष्ट च राक्षसः ॥ ५६ ॥
अभैषुः कपयोऽम्बारत् कुम्भकर्णं मरुत्सुतः ।
अनैरबोधि सुग्रीवः सोऽलुञ्चीत् कर्णनासिकम् ॥ ५७ ॥

ङाभावात् सिः शक्तिञ्च खण्ड्यामास खडिखडक् भेदे चुरादिःअन्तादङ् तां खण्ड्यन् नचायासं प्राप दूर्यस्तु यत्ने पुषादिः लौहभारसहस्रेण निर्म्मिता मे मस शक्तिरनेन निरकारि भग्ना इति रक्षः कुम्भकर्णोऽकुपदिति वक्ष्यमाणश्लोके-नान्वयः क्रजननधे कर्म्मणि इण तुलास्त्रियां पलशतं भारः स्यादिंशतिस्तुला इत्यमरः ॥ ५४ ॥ भ०

शक्तिरित्यादि । अकुपत् कुपितः कुपक्रोधे पुषादिः गिरिञ्च गुरुमुदखनीत् उत्खातवान् अतो हलादेर्लघोरिति दृङ्भावपक्षे रूपं कपीन्द्रस्य सुग्रीवस्यो-परि तञ्च गिरिं व्यसृष्ट विसृष्टवान् सृजविसर्गेऽनुदात्तेषु तस्माद्धलन्तादात्मनेपदे सिचःकित्त्वे गुणाभावः असौ कपीन्द्रस्तेन हतः सन् अमूर्च्छीत् मोहमुपगतः ॥ ५५ ॥ ज० म०

शक्तिरित्यादि । अकुपत् कुपितः कुप्य इर कोपे पुषादिः गुरुं महान्तं गिरिं उत्खातवान् खनुञ् विदारे हलादेः सेम इति त्रेः पाच्चिकत्वादभावः तं पर्व्वतं कपीन्द्रस्य कृते विसृष्टवान् सृज्यौङ्विसर्गे ऋस्खाऋसीति सेर्लोपः शक्त्राजिति षङ् तेन गिरिणा क्षतोऽसौ कपीन्द्रो मूर्च्छां प्राप मूर्च्छा सम्मोहे उच्छ्राये ॥ ५५ ॥ भ०

अलोठिष्टेत्यादि । मूर्च्छितस्य भूपृष्ठे अलोठिष्ट लुठते स्म कठलुठप्रतिघात इति द्युतादिः द्युद्भ्योलुङीति परस्मैपदविकल्पेनात्मनेपदं असृग्धोणितञ्च व्यसु-स्रुवत् स्रुतं स्रिग्भ्रीत्यादिना चङ् तं सुग्रीवमादाय राक्षसः कुम्भकर्णः अपला-यिष्ट पलायते स्म व्यरोचिष्ट रोचते स्म रुचदीप्तौ ॥ ५६ ॥ ज० म०

अलोठिष्टेत्यादि । स कपीन्द्रो मूर्च्छितः सन् भूपृष्ठे लुठते स्म ल लुठङ् प्रतीघाते अस्य शोणितमपि स्रवति स्म स्रिग्भ्रीत्यङ् श्रुध्वोरित्युव् राक्षसः कुम्भ कर्णस्तं सुग्रीवमादाय गृहीत्वा पलायितः शुशुभे च हर्षात् ॥५६॥ भ०

अभैषुरित्यादि । तस्मिन्नीते कपयोऽभैषुः भीताः मरुत्सुतः कुम्भकर्ण-

राक्षसस्य न चात्रासीत् प्रनष्टुमयतिष्ट च ।
अक्रोधि कुम्भकर्णेन पेष्टुमारभि च क्षितौ ॥ ५८ ॥
सुग्रीवोऽस्याभ्रश्यद्धस्तात् समगाहिष्ट चाम्बरम् ।
तूर्णमन्वरुपदाममाननन्दच्च वानरान् ॥ ५९ ॥

मन्वारत् अनुगतः ऋतेः शर्त्तिशास्त्यर्तिभ्यश्चेत्यङ् रुटश्चोऽङि गुणः सुग्रीवः अनैर्मनागबोधि लब्धसंज्ञो बभूव दीपजनेत्यादिना बुधेः कर्त्तरि चिण् स बुद्धः कर्णनासिकं प्राग्यङ्क्त्वादेकवद्भावः अस्यालुञ्चीत् क्तवान् राक्षसस्येति वक्ष्यमाणेन सम्बन्धः ॥ ५७ ॥ ज० म०

अभैषुरित्यादि । अस्मिन् गृहीते कपयो भीताः व्रजवदेति त्रिः मरुत्सुतो हनूमान् कुम्भकर्णमनुजगाम रुटप्रापणे च चकारङ्त्यां वक्ष्यतेत्यादिना पत्ते ङः दश्चोर्णुः सुग्रीवः अनैर्मनाक् प्रबुद्धः बुध्यौङ् वेदने पदस्तनोतीत्यादिना पाक्षिक ण् स प्रबुद्धः सन् तस्य कर्णौ नासिकाञ्च चिच्छेद राक्षसस्येति वक्ष्यमाणेनान्वयः लुञ्चापनयने ॥ ५७ ॥ भ०

राक्षसस्येत्यादि । राक्षसस्य कुम्भकर्णस्य सम्बन्धे स सुग्रीवो न चात्रासीत् न त्रस्तः राक्षसात् प्रनष्टुं पलायितुं मज्जिनशोर्भलीति तुम् अयतिष्ट च यतते स्म कुम्भकर्णेनात्मनोऽवस्थां दृष्ट्वा अक्रोधि क्रुधं भावे लुङ् क्षितौ च पेष्टुं चूर्णयितुं सुग्रीव आरभि आरब्धः कर्मणि लुङ् रभेरशब्लिटोरिति तुम् ॥ ५८ ॥ ज० म०

राक्षसस्येत्यादि । सुग्रीवो न च तस्मात् त्रस्तः त्रसयीभवे हसादेः सेम् इति त्रिः पलायितुं यतते स्म यतीङ्यत्ने भशेर्नुण्रधोसुचामिति नुण् अघान्तत्वान्न षः आत्मावस्थां दृष्ट्वा कुम्भकर्णेन अक्रोधि भावे दृण क्षितौ पेष्टुं सुग्रीवं चूर्णयितुं आरब्धं रभौङ्राभस्ये पूर्ब्बवन्नुण् ॥ ५८ ॥ भ०

सुग्रीव इत्यादि । अस्य कुम्भकर्णस्य हस्तात् सुग्रीवः अभ्रश्यत् भ्रष्टः भ्रशभ्रंश अधःपतने पुषादिः स चाम्बरमाकाशमगाहिष्ट आक्रान्तवान् गाह विलोडने अनुदात्तेत् तूर्णञ्च राममन्वरुपत् अनुगतः लटित्वाद्ङ् वानरांश्च कर्णनासिककर्त्तनेनाननन्दत् तोषितवान् नन्दतेर्ण्यन्तस्य रूपम् ॥ ५९ ॥ ज० म०

सुग्रीव इत्यादि । अस्य कुम्भकर्णस्य हस्तात् सुग्रीवो भ्रष्टः अभ्रश्यत् ङ्यश्च चकारादधःपाते पुषादिः हसङ्गलोपोऽणौ अम्बरमाकाशं आक्रान्तवान् ङगाङ्प्रतिषेधान्ययोः अगाहिष्टेति प्राठे ङगाङ्ग विलोडे ऊदित्वाद्दिम् ततः

अतत्वरच्च तान् योद्धुमचिचेष्टच्च राघवौ ।
कुम्भकर्णो न्यवर्त्तिष्ट रणेऽयुत्सत वानराः ॥ ६० ॥
अविवेष्टन्नृपादेशादारुक्षंश्चाशु राक्षसम् ।
तानधावीत् समारूढांस्तेऽप्यस्रंसिषताकुलाः ॥ ६१

शीघ्रं राममनुजगाम लघुपौ गत्यां लटित्वात् ङः वानरांश्च नन्द्यामास टुनदिसंदृधिज्ञ्यन्नादङ् ॥ ५९ ॥ भ०

अतत्वरदित्यादि । तांश्च वानरान् योद्धुमतत्वरत् त्वरयन्ति स्म मा विलम्बध्वमिति त्वरेर्ण्यन्नाच्चङ् अत्सृदृत्वरेति अभ्यासस्य अत्वं राघवौ च योद्धुमचचेष्टत् व्यापारयति स्म विभाषा चेष्टिवेष्योरित्यभ्यासस्यात्वपक्षे रूपं स. कुम्भकर्णो योद्धुं न्यवर्त्तिष्ट निवृत्तः वृतिवृषादिः वृङ्ग्र इत्यादिनात्मनेपदे नाङ् वानराश्चायुत्सत युध्यन्ते स्म ॥ ६० ॥ ज० भ०

अतत्वरदित्यादि । सुग्रीवस्तान् वानरान् योद्धुं त्वरयति स्म जित्वर्षमङ्खदे ज्ञ्यन्नादङ् सृदृत्वरप्रथेत्यादिना खेरङ् स राघवौ च योद्धुं चेष्टयामास चेष्टङीङ्के ज्ञ्यन्नादङ् पूर्ववत् पक्षे खेरङ् कुम्भकर्णो युद्धे निवृत्तः वृतङ्वल्लवर्त्तने मे ङाभावात् सिः वानरा युध्यन्ते स्म युध्यौङ् युद्धे इगुङुर्मढीति सेः किच्चान्न गुः ॥ ६० ॥ भ०

अविवेष्टन्नित्यादि । वानरा राक्षसमविवेष्टन् वेष्टयन्ति स्म अत्र राम इत्यर्थाद्दृष्टव्यं यतस्तदादेशादाशु ते राक्षसमारुक्षन् आरूढाः रुहः श्लेत्यादिना कृसः वानरा एव नृपादेशादविवेष्टन्निति व्याख्याने स्वातन्त्र्येण तेषां कर्तृत्वात्तयोजकत्वं न घटते तांश्च वानरानारूढान् कुम्भकर्णोऽधावीत् धूतवान् स्वरतीत्यादिना वृट् वृलवर्द्धनेटीति प्रतिषेधः ते व्याकुलाः सन्तोऽस्रंसिषत स्रस्ताः पतिता इत्यर्थः स्रंसुभ्रंसु च स्रंसने द्युतादिः परस्मैपदाभावान्नाङ् ॥ ६१ ॥ ज० भ०

अविवेष्टन्नित्यादि । वानरा राक्षसं वेष्टयामासुः राम इत्यध्याहृत्य वानरांस्तेष्टयामास इत्यर्थो वा चुभ्यौर्जिर्वेत्यस्य योगविभागात् क्वचिच्चुरादेरन्यस्मादपि जिरितन्ये सृदृत्वर इत्यस्यापवृत्तिपक्षे रूपं अवेष्टन्निमि पाठे वेष्टङ्वटवेष्टे राक्षसं वेष्टितवन्तः पूर्ववत् खेरङ् वा नृपादेशात् रामाज्ञया वानराः शीघ्रं राक्षसमारूढाः जिजरुहौ जन्यां हय. ोऽनिमिजुर्ङं इति सक् कुम्भकर्णः समारूढान् धूतवान् धूजण कम्पे स्रस्तुधोः सेरिम् मे इति इम् अजन्ताद्वजवदेति त्रिः ते कपयो व्याकुलाः स्रस्ताः स्रस्तनुसुङ्भ्रंशे मे सिः ॥ ६१ ॥ भ०

अग्रसिष्ट व्यधाविष्ट समाश्लिक्षच्च निर्दयम् ।
ते चाप्यघोरिषुर्घोरं रक्षश्चावमिषुर्मुखैः ॥ ६२ ॥
स चापि रुधिरैर्मत्तः स्वेषामप्यदयिष्ट न ।
अग्रहीच्चायुरन्येषामरुङ्क्त च पराक्रमम् ॥ ६३ ॥
संत्रस्तानामपाहारि सत्वञ्च वनवासिनाम् ।

अग्रसिष्टेत्यादि । कुम्भकर्णः कांश्चिदग्रसिष्ट ग्रसते स्म कांश्चिन्निर्दयं समाश्लिक्षत् श्लिष आलिङ्गने शत इति क्सः ते चाश्लिष्टाः महाघोरं श्रुतिकटुकं अघोरिषुः शब्दमकुर्वन्तः घुरभीमार्थशब्दयोरिति तुदादिरनुदात्तेत् रक्षां चाव-मिषुः उद्गीर्णवन्तः ॥ ६२ ॥ ज० म० ,

अग्रसिष्टेत्यादि । कुम्भकर्णः कांश्चित् ग्रसते स्म ग्रसुङ्भक्षे कांश्चित् धावति स्म धावुञ्जवे स्वजि व्यबाधिष्टेति पाठे कांश्चित् प्रबाधते स्म बाधृङ् विलोडने कांश्चिन्निर्दयं समाश्लिक्षत् आलिङ्ग्य हतवानित्यर्थः श्लिषौ यल्लिङ्लेषे हृग्रहोऽनिमिजुङ इति आलिङ्गने ङापवादः सक् ते वानरास्तेन हताः सन्तः घोरं शब्दं चक्रुः घुरशब्दनौ भीमार्थे रक्षश्च मुखैरवमिषुः टुवम उद्गिरि मान्त-त्वान्न त्रिः ॥ ६२ ॥ भ०

स चेत्यादि । स चापि कुम्भकर्णः रुधिरैर्मत्तः स्वेषामपि नादयिष्ट न दयां कृतवान् किमपरेषां अधीगर्थेति षष्ठी अन्येषां वानराणां आयुर्जीवितमग्रहीत् ग्रहीतवान् ह्रस्वत्वान्न द्वित्वं अदोहीवायुरिति पाठान्तरं तत्र तथाभूतं कुम्भ-कर्णं दृष्टवतामन्येषामायुरदोहीव स्वयङ्कृतमिव दुहस्रेति कर्मकर्तरि क्विण् पराक्रमञ्चान्येषामरुङ्क्त च आहतवान् रुधेः कर्माभिप्राये तङ् झलोझलीति सिचो लोपः झषस्तथोर्धोधः झलाञ्झरसीति ॥ ६३ ॥ ज० म०

स चेत्यादि । सोऽपि कुम्भकर्णः शोणितैर्मत्तः सन् स्वेषां राक्षसानामपि न दयां चक्रे किं पुनः परेषां कर्मणि सम्बन्धविवक्षया वा षष्ठी अदयङ्ग्रहणे गतौ बधे दानेऽशने अन्येषां वानराणां आयुर्गृहीतवान् ह्रस्वत्वान्न त्रिः अदोहीवायुरिति पाठे तादृशं कुम्भकर्णं दृष्ट्वा अन्येषामायुः स्वयमेवादोहीव दुहस्रलौ दुहि ढवड्ढघोऽढे इति ढवदित्युक्तेः ढभावे मसिति मं वेणजदुह इति ण्वु अन्येषां पराक्रमञ्च अरुङ्क्तवान् रुधिरौजिञ आहतौ झषस्तथोर्धोधः झलाञ्झरसीति सिचोलोपः ॥ ६३ ॥ भ०

सन्त्रस्तानामित्यादि । तेन सत्वमपाहारि अपहृतं सर्वेषां त्रस्तत्वात्

अच्छेदि लक्ष्मणेनास्य किरीटं कवचं तथा ॥ ६४ ॥
अभेदि च शरैर्देहः प्राशंसीत्तं निशाचरः ।
अस्पर्द्धिष्ट च रामेण तेनास्याक्षिप्नुतेषवः ॥ ६५ ॥
यैरयानि खरो बाली मारीचो दूषणस्तथा ।
अवामंस्त स तान् दर्पात् प्रोदयंसीच्च मुद्गरम् ॥ ६६ ॥
वायव्यास्त्रेण तं पाणिं रामोऽच्छैत्सीत् सहायुधम् ।
अदीपि तरुहस्तोऽसावधावीच्चारिसंमुखम् ॥ ६७ ॥

कर्मणि लुङ् लक्ष्मणेन तस्य किरीटं मुकुटं तथा कवचमच्छेदि छिन्नं कर्मणि लुङ् ॥ ६४ ॥ ज० म०

सन्वस्तानामित्यादि । सन्वस्तानां वानराणां सत्वं बलं तेनापहृतं हृडः कर्मणीण् लक्ष्मणेन अस्य किरीटं मुकुटं कवचञ्च छिन्नम् ॥ ६४ ॥ भ०

अभेदीत्यादि । देहश्चास्य शरैः करणभूतैरभेदि छिन्नः निशाचरश्च तं लक्ष्मणं प्राशंसीत् स्तुतवान् साधु भवता युद्धमिति रामेण सहास्पर्द्धिष्ट योद्धुं स्पर्द्धते स्म तेन रामेणास्य इषवः अक्षिप्नुत क्षिप्ताः कर्मणि लुङ् हलन्तादात्मनेपदे सिचः कित्त्वाङ्गुणाभावः ॥ ६५ ॥ ज० म०

अभेदीत्यादि । लक्ष्मणेनास्य देहः शरैर्भिन्नः ततो निशाचरः कुम्भकर्णस्तं लक्ष्मणं प्रशशंस श्लाघते स्म हिंसास्तुत्योः रामेण सह योद्धुं स्पर्द्धते स्म स्पर्द्धङ् संघर्षे तेन रामेणास्य राक्षसस्य क्षते इषवः क्षिप्ताः क्षिप्यौ लुदि कर्मणि टौ ॥ ६५ ॥ भ०

यैरित्यादि । यैः शरैश्च खरोऽयानि व्यापादितः कर्मणि लुङ् ते अक्षिप्नुतेति योज्यं स कुम्भकर्णस्तानि घ्नन् दर्पादवामंस्त अवमन्यते स्म मुद्गरं प्रोदयंसीत् उद्गूर्णवान् यमरमेति सगिटौ ॥ ६६ ॥ ज० म०

यैरित्यादि । यैः शरैः खरादिर्हतः स कुम्भकर्णस्तान् क्षिप्तान् अवमन्यते स्म दर्पादहङ्कारात् मन्यौङ् च बोधे मुद्गरं उत्थापितवान् यमौ उपरितौ यमरमेतीमुसनौ ॥ ६६ ॥ भ०

वायव्यास्त्रेणेत्यादि । येन पाणिना मुद्गरमुदयंसीत् तं पाणिं सहायुधं रामो वायव्यास्त्रेण मरुद्देवतादत्तेन अच्छैत्सीत् छिन्नपाणिश्चासौ तरुहस्तः तरुर्हस्ते यस्येति तरोः प्रहरणत्वात् सम्पद्यनस्य परनिपातः अदीपि दीप्यते स्म

सहस्रमच्छिदत्तस्य शक्रास्त्रेण करं नृपः ।
जङ्घे चाशीशतद्बाणैरप्रासोदिषुभिर्मुखम् ॥ ६८ ॥
ऐन्द्रेण हृदयेऽव्याक्षीत् सोऽध्यवात्सीच्च गां हतः ।
अपिंषातां सहस्रे द्वे तद्देहेन वनौकसाम् ॥ ६९ ॥

दीपजनेत्यादिना कर्त्तरि चिण् अरिसम्मुखञ्च रामाभिमुखमधावीत् वेगेन गतवान् ॥ ६७ ॥ ज० भ०

वायव्यास्त्रेणेत्यादि । येन पाणिना हस्तरुदयंसीत् तं पाणिं आयुधेन सहस्रेण सहितं वायव्यास्त्रेण रामश्छिन्नवान् छिदि रधौजश्छेदे अनिमृत्याद्विः वायुर्देवता यस्येति विकारसङ्केत्यादिना ष्णः न्वोर्लोपो तौतेऽच्ये इति ओकारः ओदौतौऽच्वदिति अच्वद्भावः यलायवावाव इति अव् असौ छिन्नहस्तो राक्षसस्तरुहस्तः सन् दीयते स्म पदरुजनीरुघ इत्यादिना कर्त्तरि दृण् तरुर्हस्ते यस्य तरुयुक्तो हस्तो यस्येति वा समासः अरिसम्मुखं रामाभिमुखं अधावीच्च वेगेन गतः धावुञ्जवे ह्वजि ॥ ६७ ॥ भ०

सहस्रमित्यादि । तस्य सहस्रमपि करं नृपः शक्रास्त्रेणाच्छिदत् दरितो वेत्यङ् जङ्घे चान्यैर्बाणैरशीशतत् गमनाममर्थं कृतवान् शदेर्णैशदेरगताविति तत्वं मुखञ्चेषुभिरप्रासीत् पूरितवान् प्रापूरणे ॥ ६८ ॥ ज० भ०

सहस्रमित्यादि । नृपो रामस्तस्य कुम्भकर्णस्य हस्तसहितं हस्तान्तरं शक्रास्त्रेण छिन्नवान् दरित्वात्मनेङः वाणैः प्रयोजककर्त्रभिस्तस्य जङ्घे च अशीलवत् छेदितवान् लूञ्जिच्छिदि ञिः प्रेरणे अंङ् द्वित्वं त्रिः अभ्रङ्भ्रङः स्वः खेः सन्वत् जयलोपः ख्योर्थे इति खेरुकारस्य इकारः तस्य घोर्हसादेर्घस्येति दीर्घत्वं अशीशतदिति पाठे शदोऽगतौ तङ् गत्यसमर्थं च जङ्घे कृतवानित्यर्थः अस्य मुखं शरैः पूरितवान् प्रापूर्त्तौ यमरमेतीमृसनौ ॥ ६८ ॥ भ०

ऐन्द्रेणेत्यादि । ऐन्द्रेण शरेण हृदयेऽव्याक्षीत् विद्धवान् स तथा हतो गामध्यवात्सीत् भूमिमध्युषितवान् तस्य पततो देहेन वनौकसां वानराणां द्वे सहस्रे अपिंषातां चूर्णिते पिष्लृ संचूर्णने कर्मणि लुङ् ॥ ६९ ॥ ज० भ०

ऐन्द्रेणेत्यादि । इन्द्रदैवतेनास्त्रेण हृदये तं विद्धवान् व्यधौ ताडे अनिमृत्याद्विः अव्याक्षीदिति पाठे व्येञ् हतौ निरुद्धवानित्यर्थः स कुम्भकर्णो हतः सन् गां भूमिं अध्युषितवान् वसै औ निवासे अनिमृत्याद्विः सत्यरे इति तस्य ततः पततस्तस्य देहेन वानराणां द्वे सहस्रे अपिंषातां चूर्णिते धौपिष्लृ चूर्णने

अस्तावि॒षुः सुरा रामं दि॒शः प्रापन्नि॒शाचराः ।
भूरकम्पिष्ट साद्रीन्द्रा व्यचालीदम्भसां पतिः ॥ ७० ॥
हतं रक्षांसि राजानं कुम्भकर्णमशिश्रवन् ।
अरोदी॒द्रावणोऽशोचीन्मोहञ्चाशिश्रियत् परम् ॥ ७१ ॥
अपप्रथद्गुणान् भ्रातुरचिकी॑र्त्तञ्च विक्रमम् ।
क्रुद्धेन कुम्भकर्णेन येऽदर्शिषत शत्रवः ॥ ७२ ॥

कर्म्मणि द्विवचनं हृशसोऽनिमिजुङ इति सक् षढोः कः सकोल्लोपः तेन याधातोऽत इत्यस्तावि॒षयः ॥ ६६ ॥ भ०

अस्तावि॒षुरित्यादि । तस्मिन् हते सुरा देवा राममस्तावि॒षुः स्तुवन्ति स्म स्तुसुधूभ्यः परस्मैपदेष्वितीट् निशाचरास्त्रयाद्दि॒शः प्रापन् प्राप्नुवन्तः आप्लृ व्याप्तौ साद्रीन्द्रा सकलपर्व्वता भूमिरकम्पिष्ट चलति स्म अम्भसां पतिः समुद्रो व्यचालीत् प्रक्षुभितवान् ॥ ७० ॥ ज० म०

अस्तावि॒षुरित्यादि । तस्मिन् हते सुरा रामं स्तुवन्ति स्म स्तुसुधोः सेरिम्पे अजन्ताद्दि॒शः रावसा भयाद्दि॒शः प्रापुः आप्लृणौकि व्यापने लृदित्वात् ङः अद्रीन्द्रैः कुलपर्व्वतैः सहिता भूमिः कम्पिता कपिचाले अम्भसां पतिः समुद्रो विचलति स्म तद्देहपातात् चलन्त्यादृजवदेति त्रिः ॥ ७० ॥ भ०

हतमित्यादि । हतं व्यापादितं कुम्भवर्ष्मं रक्षांसि राजानं रावणमशिश्रवन् श्रावितवन्तः श्रृणोतेर्ण्यन्तात् सनीव कार्य्यमिति अवति शृणोतीत्यादिना अभ्यासस्य विकल्पेनेट् एवञ्च कृत्वा अस्तूस्तुवन्निति पाठान्तरं द्विकर्म्मकतातु बुद्ध्यर्थत्वात् श्रुत्वा च रावणोऽरोदीत् अश्रूणि सुषोच अशोचीत् शोचति स्म तेनापि त्यक्तोऽस्मीति परञ्च मोहं मूर्च्छामशिश्रियत् श्रिञ सेवायां श्रीत्यादिना चङ् ॥ ७१ ॥ ज० म०

हतमित्यादि । हतं कुम्भवर्ष्मं राक्षसा राजानं श्रावितवन्तः श्रुतगतौ श्रुतौ अत्यन्तत्वादङ् द्वित्वं त्रिः अजादुजः स्वः खेः सन्वत् सुस्रुवुरिति खेरुकारस्य पाक्षिक उकारः घोऽञोऽरिति प्रयोज्यस्य राज्ञः कर्म्मत्वं श्रुत्वा च रावणोऽरोदीत् लघिरुदरोदे आशोचीत् शोचति स्म शुच शोके परस्मैपदञ्च मोहमाश्रितः श्रिञ सेवने श्रिश्रीत्यङ् शुश्रोरितीय ॥ ७१ ॥ भ०

अपप्रथदित्यादि । भ्रातुर्गुणान् बुद्धिमत्त्वादीनपप्रथत् प्रख्यापितवान् प्रथ प्रख्याने घटादिः तस्मात् यङन्ताच्छङि अतस्तदित्यादिनाऽत्वं विक्रमञ्च

कथं न्वजीविषुस्ते च स चाहत महाबलः ।
अयुयुत्सिषताश्वास्य कुमारा रावणं ततः ॥ ७३ ॥
देवान्तकोऽतिकायश्च त्रिशिराः नरान्तकः ।
ते चाक्षिषत संग्रामं बलिनो रावणात्मजाः ॥ ७४ ॥
युद्धोन्मत्तश्च मत्तश्च राजा रक्षार्थमाक्षिहत् ।
सुतानां निरगातां तौ राक्षसौ रणपण्डितौ ॥ ७५ ॥

गौर्यमचकीर्त्तत् उदीरितवान् क्षतसंशब्दन इति चौरादिकः जिघ्रतेर्वेत्यादृत इदिति इकाराभावपक्षे रूपं उपधायाश्चेतीत्वं विक्रमकीर्त्तनञ्चाह क्रोधकर्त्ता कुम्भकर्णेन ये यत्नवोऽदर्शिषत दृष्टाः कर्म्मणि लुङ् सिजित्यादिना दृशेश्चिण्वदिट् ॥ ७२ ॥ ज० म०

अपप्रथदित्यादि । रावणो भ्रातुः कुम्भकर्णस्य गुणान् प्रथयति स्म प्रथकचख्याते आत्मादङ् स्तुत्वरप्रथेति खेरङ् दृढाधकः तस्य विक्रमं कीर्त्तयति स्म क्षतकसंशब्दे आत्मादङ् विक्रमकीर्त्तनमेवाह कुम्भकर्णेन क्रुद्धेन सता ये यत्नवो दृष्टाः ते च कथं नु अजीविषुः जीवन्ति स्मेत्युत्तरश्लोकेनान्वयः दृशेः कर्म्मणि वक्ष्यवचनं हनग्रहदृशश्च इति पक्षे मिण् ॥ ७२ ॥ भ०

कथमित्यादि । तेऽल्पाः कथन्नाम अजीविषुः जीविताः स च कुम्भकर्णो महाबलः अहत हतः म्रियतेर्लुङ्लिङोश्चेति तङ् हुस्वादङ्गादिति सिचो लोपः अनन्तरं कुमाराः राजपुत्रा देवान्तकादयो रावणं शोचन्तमाश्वास्य अपनीतशोकं कृत्वा प्रायुयुत्सिषत योद्धुमिष्टवन्तः हलन्ताच्चेति सनः किच्चं पूर्ववत्सन इति तङ् ॥ ७३ ॥ ज० म०

कथमित्यादि । तुशब्दः प्रश्ने स च महाबलो हतः हशवङ् हतौ हवङ्दीर्घेऽमं दृशुर्वदीति सेः किच्चाङ्गुणाभावः झषस्तादिति तेर्लोपः ततोऽनन्तरं कुमारा रावणपुत्रा देवान्तकादयो रावणमाश्वास्यापनीतशोकं कृत्वा योद्धुमिष्टवन्तः युध्यौङ् युद्धे सन्निच्छायां गुणोनिमि सनि ॥ ७३ ॥ भ०

देवान्तक इत्यादि । ते च रावणात्मजाः संग्राममाक्षिषत गतवन्तः अक्षि गतौ किंनामानः देवान्तकः अतिकायः त्रिशिराः नरान्तक इति ॥ ७४ ॥ ज० म०

देवान्तक इत्यादि । के ते कुमारा इत्यतोऽमं देवान्तक इत्यादि ते च बलिनो रावणपुत्राः संग्राममाक्षिषत गताः अक्षिङ् गतौ ॥ ७४ ॥ भ०

युद्ध इत्यादि । सुतानां रक्षार्थं राजा युद्धोन्मत्तं मत्तञ्च राक्षसं आक्षिहत्

तैरजेषत सैन्यानि द्विषोऽकारिषताकुलाः ।
पर्व्वतानिव ते भूमावचैषुर्व्वानरोत्तमान् ॥ ७६ ॥
अङ्गदेन समं योद्धुमघटिष्ट नरान्तकः ।
प्रैषिषद्राक्षसः प्रासं सोऽस्फोटोदङ्गदोरसि ॥ ७७ ॥
अश्वान् वालिसुतोऽहिंसीदततार्डञ्च मुष्टिना ।
रावणिश्चाव्यथो योद्धुमारब्ध च महीं गतः ॥ ७८ ॥

प्रस्थापितवान् अंहतेर्णौ चङ्परे द्वितीयहिर्वचनं तौ राक्षसौ रणपण्डितौ निरगातां निर्गतौ दृणोगा लुङि ॥ ७५ ॥ ज० म०

युद्धेत्यादि । राजा रावणः सुतानां तेषां रक्षार्थं युद्धोन्मत्तं मत्तञ्च राक्षसहयं आत्रिहत् प्रस्थापितवान् अहिङ्गतौ अग्नादङ्तौ रणपण्डितौ राक्षसौ पुरादिर्गतौ दृणगतौ स्यां भूस्थापिवदेवेति सेलुक् ॥ ७५ ॥ भ०

तैरित्यादि । तैः राक्षसैः सैन्यानि अजेषत जितानि कर्म्मणि लुङ् अचिण्भावपक्षे रूपं द्विष आकुला अकारिषत ते राक्षसा वानरोत्तमान् वानराणां प्रधानभूतान् पर्व्वतानिव भूमौ अचैषुः पुञ्जीकृतवन्तः चिञ चयने ॥ ७६ ॥ ज० म०

तैरित्यादि । तैर्देवान्तकादिभिः सैन्यानि जितानि जिजये च कर्म्मणि बहुवचनं यत्नवत्याकुलाः कृताः कर्म्मणि हनस्यहदश च इति मिण् ते राक्षसा वानरोत्तमान् पर्व्वततुल्यान् भूमौ चितवन्तः पुञ्जीचक्रुः चिञ चित्यां व्रजवदेति त्रिः ॥ ७६ ॥ भ०

अङ्गदेनेत्यादि । नरान्तकः कुमारः अङ्गदेन सह योद्धुमघटिष्ट घटते स्म राक्षसः प्रासं कुन्तं प्रैषिषत् प्रहितवान् दृष्णगतावित्यस्य ण्यन्तस्य चङि रूपं स प्रासोऽङ्गदोरसि अस्फोटीत् विशीर्णः ॥ ७७ ॥ ज० म०

अङ्गदेनेत्यादि । नरान्तकः कुमारः अङ्गदेन सह योद्धुं चेष्टितवान् घटष्टङ्मचेष्टे स राक्षसः प्रासं कुन्तं प्रेषितवान् दृष्ण सर्पणे अग्नादङ् ईदङ्दानेतर्हिंसे चेत्यस्य रूपं वा अयञ्च चकारात् सर्पणेऽपि स प्रासः अङ्गदस्य वक्षसि अस्फोटीद्विदीर्णः स्फुटिर्विसरणे ॥ ७७ ॥ भ०

अश्वानित्यादि । वालिसुतोऽश्वान् रथयुक्तानहिंसीत् व्यापादितवान् टहिहिंसि हिंसायां मुष्टिना पाणिना अततार्डत् आहतवान् ताड आघाते ताडनं ताडः भावे घञ् ताडङ्करोतीति णिचणाविष्ठवदिति टिलोपः यौचङुपधायाम्लोपिशास्ह्रदितामिति मुक्प्रतिषेधः स च रावणिरव्यथो व्यथारहितः

तस्याहरिषत प्राणा मुष्टिना बालिसूनुना ।
प्रादुद्रुवंस्ततः क्रुद्धाः सर्वे रावणयोऽङ्गदम् ॥ ७९ ॥
ततो नीलहनूमन्तौ रावणीनववेष्टताम् ।
अकारिष्टां गिरींस्तुङ्गानरौत्सीच्छिरांसि शरैः ॥ ८० ॥
परिघेणावधिष्टाथ रणे देवान्तको बली ।

हृताश्वाद्रथादवतीर्य्य महीं गतः सन् योद्धुमारब्ध आरभते स्म झलोझलीति सिचोलोपः धत्वञ्च ॥ ७८ ॥ ज० म०

अश्वानित्यादि । बालिसुतोऽङ्गदो नरान्तकस्याश्वान् हिंसितवान् हिंसिधकिहिंसे मुष्टिना राक्षसं ताडितवांश्च तडक्द्विधीत्यक्षात् भावे यङ् तं करोतीति आत्मादङ् अग्लोपित्वात् उडो हुस्वाभावः स च रावणपुत्रो व्यथारहितः हृताश्वत्वाद्रथादवतीर्य्य महीं गतः सन् योद्धुं आरब्धवान् रभेऽस्यात्तु राभस्ये भास्यात्मनेति सेर्लोपः रावणस्यापत्यमिति वाह्वाद्यत इति ण्यिः ॥७८॥ भ०

तस्येत्यादि । तस्य प्राणाः बालिसुतेन अहारिषत हृताः कर्म्मणि लुङ् चिण्वद्भावः ततोऽनन्तरं सर्वे रावणयः रावणस्यापत्यानि देवान्तकादयः क्रुद्धाः सन्तोऽङ्गदं प्रादुद्रुवन् गतवन्तः णिश्रीत्यादिना चङ् ॥ ७९ ॥ ज० म०

तस्येत्यादि । बालिसूनुना अङ्गदेन तस्य प्राणा मुष्टिना करणेन हृताः हृञः कर्म्मणि हनग्रहदृग्रच इति भिण् ततोऽनन्तरं सर्वे रावणपुत्राः क्रुद्धाः सन्तः अङ्गदं प्रद्रुतवन्तः जग्मुरित्यर्थः णिश्रीत्यङ् ॥ ७९ ॥ भ०

तत इत्यादि । ततो रावणीनङ्गदाभिमुखमागच्छतो नीलो हनूमांश्चावावेष्टतां वेष्टितवन्तौ विभाषावेष्टिचेष्टोरित्यभ्यासस्यात्वं गिरींश्चाकारिष्टां विच्छिन्नवन्तौ कृ विक्षेपे सिचि वृद्धिः तांश्च गिरीन्छिन्नान् शिरांसि शरैस्तुङ्गानरौत्सीत् आवृतवान् रुधिरावरणे ॥ ८० ॥ ज० म०

तत इत्यादि । अनन्तरं अङ्गदं प्रति गच्छतो रावणपुत्रान् नीलहनूमन्तौ वेष्टितवन्तौ गिरींश्च विच्छिन्नवन्तौ कृ विक्षेपे अजन्तत्वाद्विः तान् छिन्नान् गिरीन् शिरांसि शरैर्निरुद्धवान् रुधिरौघेऽज आवृतौ डाभावपक्षे शिः ॥८०॥ भ०

परिघेणेत्यादि । अथ देवान्तको बली परिघेणावधिष्ट हतवान् आङो यमहन इति तङ् अविवक्षितकर्म्मकत्वादात्मनेपदेष्वन्यतरस्यामिति हनो वधादेशः तस्य क्रतो मूर्द्धानं मारुतात्मजः मुष्टिना अददरत् दारितवान् दृ विदरणे यङ्लुगन्तस्य चङ्परे णौ अतृस्वदृत्वरेत्यादिनाभ्यासस्यात्वम् ॥ ८१ ॥ ज० म०

मुष्टिनाददरक्तस्य मूर्द्धानं मारुतात्मजः ॥ ८१ ॥
अदीदिपत्ततो वीर्य्यं नीलञ्चापीपिडच्छरैः ।
युद्धोन्मत्तस्तु नीलेन गिरिणानायि संक्षयम् ॥ ८२ ॥
अवभ्राजत्ततः शक्तिं त्रिशिराः पवनात्मजे ।
हनूमता हतास्तस्य रणेऽस्रवत वाजिनः ॥ ८३ ॥
अक्षसङ्गाहतो मूर्द्धि खड्गं चाजीहरद्द्विषा ।
प्राणानौज्झीच्च खड्गेन छिन्नैस्तेनैव मूर्द्धभिः ॥ ८४ ॥

परिघेणेत्यादि । अथ बली देवान्तको रणे परिघेणाहवान् आत्माङ्कढादढाङ्केति मं अविवक्षितकर्म्मत्वादकर्म्मकत्वं हनबधष्टीति पक्षे बधादेशः तस्य मूर्द्धानं पवनात्मजो हनूमान् मुष्टिना दारयामास दृयगिविदारे स्फुट् त्वरप्रथेति खेरङ् ॥ ८१ ॥ भ०

अदीदिपदित्यादि । ततो देवान्तकविनाशादनन्तरं युद्धोन्मत्तः सुतानां रक्षार्थं यः प्रेषितः स वीर्य्यमदीदिपत् भ्राजभासेत्यादिना हस्वाभावपक्षे रूपं नीलञ्च शरैरपीपिडत् पीडितवान् हस्वाभावपक्षे रूपं अपीपरदिति पाठान्तरं पूरितवानित्यर्थः पॄ पूरण इति चुरादिः स तु नीलेन क्षयं गिरिणा अनायि नीतः कर्म्मणि लुङ् ॥ ८२ ॥ ज० म०

अदीदिपदित्यादि । ततो देवान्तकवधानन्तरं युद्धोन्मत्तो नाम राक्षसः स्ववीर्य्यं दीपयामास भ्राजभ्राशभ्रासभासेत्यादिना पाक्षिक ङिच्चे हस्वः खेः सन्वद्भावेति दीर्घः शरैश्च नीलं पीडयामास पूर्ब्ववदुङो हस्वः अपीपरदिति पाठे पॄ पूर्त्तौ स तु नीलेन गिरिणा संक्षयं नीतः कर्म्मणि रतनोरितीण ॥ ८२ ॥ भ०

अवभ्राजदित्यादि । ततोऽनन्तरं त्रिशिराः कुमारः पवनात्मजविषये शक्तिं वीर्य्यमवभ्राजत् दीपयति स्म भ्राजेत्यादिना हस्वाभावपक्षे रूपं तस्य वाजिनो रथयुक्ता रणे हनूमता हताः सन्तः अस्रवत स्रुताः क्षियतेर्लुङीति तङ् ॥ ८३ ॥ ज० म०

अवभ्राजदित्यादि । तदनन्तरं त्रिशिराः कुमारो हनूमद्विषये शक्तिं दीपयति स्म भ्राजङ्घणटुच चकाराङ्गामि ङिच्चे हस्वाभावपक्षे रूपमिदं तस्य वाजिनो रथाश्वाः हनूमता क्षताक्षताः सन्तो स्रुताः स्रुङ्गतौ ढ्रमं इगुपधेति किच्चात् गुणाभावः ॥ ८३ ॥ भ०

अक्षेत्यादि । त्रिशिरास्च हनूमता मूर्द्धि हतः सन् रथाङ्गौ अक्षसङ्

मत्तेनामारि संप्राप्य शरभास्त्रां महागदाम् ।
सहस्रहरिणाक्रीडो दृतिकायस्ततो रणे ॥ ८५ ॥
रथेनाविव्यथद्धारीन् व्यचारीच्च निरङ्कुशः ।
विभीषणेन सोऽख्यायि राघवस्य महारथः ॥ ८६ ॥
अतस्तन्मर्म हृदयं वज्रं स्वयमुमतूतुषत् ।

रथाङ्गभौ खलः द्रुघ्नो लुङीति परस्मैपदं द्युतादित्वाद्ङ् किङितीत्यनुनासिकलोपः खलस्य स खड्गं हस्तस्थं द्विषा हनूमता अजीहरत् हारितवान् तेनैव च खड्गेन छिन्नैर्मूर्द्भिर्हृतभूतैः प्राणानौज्झीत् त्यक्तवान् उज्झ उत्सर्गे ॥८४॥ज० म०

अखलदित्यादि । हनूमता मूर्द्धि आहतस्य त्रिशिरा रथात् भ्रष्टः लखनुसुङ्भ्यामे द्युतादित्वात् ङः तेनैव पं हसुङ्लोपः खलः सन् स्वहस्तस्थितं खड्गं द्विषा हनूमता हारितवान् तद्व्याकुलत्वेन हनूमता खड्गो हृत इत्यर्थः हृञ हरणे आत्मनेङ् घोऽञौजेरित्यादिना प्रयोज्यस्य न कर्मत्वं पाक्षिकत्वात् तेनैव खड्गेन छिन्नैर्मूर्द्भिर्हृतभूतैः स त्रिशिराः प्राणान् त्यक्तवान् उज्झ त्यागे ॥ ८४ ॥ भ०

मत्तेनेत्यादि । शरभेण वानरेणास्त्रां क्षिप्रां महागदां प्राप्य मत्तेन सुतानां रक्षार्थं प्रेषितेन राक्षसेनामारि हतं भावे लुङ् ततोऽनन्तरं अतिकायो राजपुत्रो रणे अक्रीडीत् विहरति स्म रथेनेति वक्ष्यति सहस्रं हरयोऽश्वा यस्य रथस्य ॥ ८५ ॥ ज० म०

मत्तेनेत्यादि । शरभेण कपिना क्षिप्रां महागदां समाप्य मत्तेन रक्षसा हतं भावे दण् मत्तेन या गदा शरभास्त्रं क्षिप्रा तयैव शरभस्तं मारयामासेत्यर्थः तदनन्तरं अतिकायः कुमारो रणे क्रीडति स्म क्रीड खेले केन सहस्रहरिणा सहस्राश्वयुक्तेन रथेनेत्यग्रिमश्लोकेन सम्बन्धः ॥ ८५ ॥ भ०

रथेनेत्यादि । अरींश्चाविव्यथत् पीडितवान् व्यथेर्ण्यन्तस्य चङि रूपं निरङ्कुशश्चाप्रतिहतशक्तिर्व्यचारीत् भ्राम्यति स्म रान्तत्वाद्दृद्धिः स विचरन्नहारथः विभीषणेन राघवस्य आख्यायि कथितः कर्मणि लुङ् ॥ ८६ ॥ ज० म०

रथेनेत्यादि । चकारः समुच्चये अरीन् शत्रूनविव्यथत् पीडयामास व्यथेर्ण्यन्तस्य जिभ्रिसुङ् इत्यादिना अङ् निरङ्कुशश्चाव्याहतगतिः सन् व्यचारीत् वभ्राम राघवस्य रामस्य सम्बन्धे विभीषणेन महारथोऽख्यायि सोऽयमागत इति निर्दिष्ट इत्यर्थः ॥ ८६ ॥ भ०

अभिच्चिष्ट महास्त्राणि रणे रक्षांसि राक्षसान् ॥ ८७ ॥
अध्यगीष्टार्थशास्त्राणि यमस्याक्रोष्ट विक्रमम् ।
देवाहवेष्वदीपिष्ट नाजनिष्टास्य साध्वसम् ॥ ८८ ॥
एष रावणिरापादि मानराणां भयङ्करः ।
आहताथ सु काकुत्स्थं धनुश्चापुस्फुरद्गुरु ॥ ८९ ॥

कीदृशः कथित इत्याह

अतस्तम्भादित्यादि । अयं स्वशक्त्या वज्रं अतस्तम्भात् स्तम्भितवान् स्तम्भितस्तम्भ-प्रतिस्तम्भे ष्यन्तस्य णिश्रीत्यादिना चङ् स्वयम्भुवरतुतुषत् उग्रेण तपसा आराधनात् तोषितवान् तुष प्रीतौ ष्यन्तः महास्त्राणि दिव्यानि चाभिच्चिष्ट शिक्षते स्म शिक्षविद्योपादाने रणे च राक्षसानरक्षीत् रक्षति स्म ॥ ८७ ॥ ज० म०

अतस्तम्भादित्यादि । अयं वज्रं स्तम्भयामास निवारितवान् इभिस्तम्भिङ्: स्तम्भे अन्तादङ् स्वयम्भुवं ब्रह्माणं तोषितवान् तपसेत्यर्थात् स्वयमाज्ञया भुवं पालनेन तोषितवानित्यन्ये तुष तुष्टौ अन्तादङ् उङो ह्रस्वत्वे खेः सन्वदिति दीर्घः महास्त्राणि अभिच्चिष्ट शिक्षते स्म शिक्षङ् शिक्षणे राक्षसान् रक्षितवांश्च ॥ ८७ ॥ भ०

अध्यगीष्टेत्यादि । अर्थशास्त्राणि पराभिसन्धानार्थानि अध्यगीष्ट अधीतवान् विभाषा लुङ्लङोरिति इङोगाङादेशः यमस्याप्ययं विक्रममक्रोष्ट अपनीतवान् क्रुङ् अपनयने अकर्मकत्वात्सिचो न किन्तु देवाहवेष्वदीपिष्ट योधिभिः अस्य च साध्वसं भयं नाजनिष्ट न जातं दीपजनेत्यादिना चिण्वद्भावपक्षे रूपम् ॥ ८८ ॥ ज० म०

अध्यगीष्टेत्यादि । अर्थोपयुक्तानि शास्त्राणि असौ अधीतवान् गीङ्टीङ्व्योर्वा यमस्य विक्रममपक्रुतवान् क्रुङ् चौर्ये देवाहवेषु अत्रौ दीप्यते स्म अस्य साध्वं भयं कृत्वापि न जातं पदस्तनोरण् घे इत्यादेरदृत्तिपक्षे सिः ॥ ८८ ॥ भ०

एष इत्यादि । य एवं स एष रावणिः आपादि अस्माकं समीपमागतः पदगतौ चिण् तेपद इति चिण् यतो रावणिर्वानराणां भयङ्करः अथ सोऽतिकायः समीपमागतः काकुत्स्थमाकृत युद्धायाह्वतवान् आत्मनेपदेष्वन्यतरस्यामित्यङ् धनुश्च गुरु महदपुस्फुरत् स्फारितवान् चिस्फुरोर्णावित्यात्वम् ॥ ८९ ॥ ज० म०

एष इत्यादि । य एवंभूतः स एव रावणपुत्रोऽतिकाय आपादि आगतः यौपदङ् गतौ पदस्तनोरण् घे यतो यस्माद्वानराणां भयङ्करत्वमिति विभीषणेनाख्या-

सौमित्रिः सर्पवत् सिंहमार्दिदत्तं महाहवे ।
तौ प्रावोहततां जेतुं शरजालान्यनेकशः ॥ ९० ॥
अच्छैत्ताञ्च महात्मानौ चिरमश्रमतां न च ।
तथा तावास्यतां वाणानतानिष्टां तमो यथा ॥ ९१ ॥
सौर्य्यमृक्षेये व्यकारिष्टामस्त्रे राक्षसलक्ष्मणौ ।

योति सम्बन्धः भयङ्कर इति क्वचित्पाठः सोऽतिकायो रामं आह्वत स्पर्द्धायामाङ इति मं वक्ष्यतेति ङः गुरु मद्वनुः स्फारितवान् स्फुरणे स्फूर्त्तौ आत्मादङ् क्रीजीङ इत्यादिना पाक्षिक उकारस्याकारः ॥ ८९ ॥ भ०

सौमित्रिरित्यादि । यथा सर्पः सिंहं गच्छति तद्वत्तमतिकायमार्दिदत् गतवान् अर्द गतौ अर्दनमर्दः तत्करोतीति णिच् तदन्नाच्छङि रूपं अर्द हिंसायामिति चौरादिको वा तौ सौमित्र्यतिकायौ जेतुं शरजालानि प्रावोहततां बहूनि प्रवर्त्तितवन्तौ उवहदिति णौचङ्यपधाया अपवादस्य कारः ॥९०॥ ज०म०

सौमित्रिरित्यादि । लक्ष्मणस्तं महाहवे आर्दिदत् पीडितवान् सिंहं रुरुं इव एकगुहास्थतया तयोर्विरोधात् अर्दक् च चकाराद्वधे चुरादिःआत्मादङ् अर्द यातनागतियाचन इत्यस्मात् चुरादेर्जिर्वेत्यस्य येगविभागाद्वा जिः घञन्तात् जिरिति केचित् तौ लक्ष्मणातिकायौ जेतुं अनेकशो बहूनि शरजालानि प्रवर्त्तितवन्तौ हृतङ्वल्लवर्त्तते आत्मादङ् वर्तुङोधुरिति पक्षे गुणाभावः॥९०॥भ०

अच्छैत्तामित्यादि । तौ च महात्मानौ परस्परस्य शरजालानि अच्छैत्तां छिन्नवन्तौ इरितो वेत्यङभावपक्षे रूपं झलोझलीति सिचोलोपः चिरं चिरेणापि नाश्रमतां न श्रान्तौ श्रमिः पुषादिः तौ तथा वाणानास्यतां क्षिप्तवन्तौ अस्यति वक्तीत्यङ् अस्यतेस्थुक् यथा अन्धकारमतानिष्टां विस्तारितवन्तौ अतो हलादेर्लघोरिति दृद्धिविकल्पः ॥ ९१ ॥ ज० म०

अच्छैत्तामित्यादि । तौ च महात्मानौ महाबलौ परस्परं शरजालानि छिन्नवन्तौ छिदिरधोऽच्छेदे ङाभावपक्षे सिः अनिमित्तात्सिः भसस्याभसीति सिलोपः आत्मा यत्नो धृतिर्बुद्धिरित्यमरः चिरं बहुनापि कालेन न श्रान्तौ श्रमुतपःखेदक्षोः तथा तौ वाणान् क्षिप्तवन्तौ यथा तमोऽन्धकारं विस्तारितवन्तौ अस्यु रैर्क्षेमे वक्ष्यतेति ङः वच्यस्यश्चिपतामित्यस्यादेशः तनदुज् विस्तृतौ हलादेः सेम इति पक्षे त्रिः ॥ ९१ ॥ भ०

सौर्य्यमृक्षेये इत्यादि । राक्षसः सौर्य्यमस्त्रं व्यकारीत् विक्षिप्तवान् कृ

ते चोपागमतां नाशं समासाद्य परस्परम् ॥ ९२ ॥
अविभ्रजत्ततः शस्त्रमैषीकं राक्षसो रणे ।
तदप्यध्वसदासाद्य माहेन्द्रं लक्ष्मणेरितम् ॥ ९३ ॥
ततः सौमित्रिरस्त्रार्षीद्दैविष्ट च दुर्जयम् ।
ब्रह्मास्त्रं तेन मूर्द्धानमदध्वंसन्नरद्विषः ॥ ९४ ॥

विक्षेपे लक्ष्मणोऽप्याग्नेयं इत्येवं तौ व्यकारिष्टां ते चास्त्रे परस्परमासाद्य प्राप्य नाशमुपागमतां लृदित्वादङ् ॥ ९२ ॥ ज० म०

सौर्य्येत्यादि । राक्षसलक्ष्मणौ सौर्य्याग्नेये अस्त्रे यथाक्रमं व्यकारिष्टां कृष विक्षेपे सूर्य्यो देवताऽस्येति विकारसङ्केत्यादिना ष्णः सौम्येति क्वचित्पाठः अग्निर्देवताऽस्येति पूर्व्वेण ष्णेयः ते चास्त्रे परस्परं समासाद्य प्राप्य नाशमुपागमतां प्रापतुः लदित्वाङ्गमेर्ङः ॥ ९२ ॥ भ०

अविभ्रजदित्यादि । ततोऽनन्तरं रावणिः ऐषीकमस्त्रं इषीकाया इदं तत्सर्व्वस्रोतस्सु प्रविशत् जीवितमपहरति रणे अविभ्रजत् दीपितवान् भ्राजभाशेत्यादिना उपधाया ह्रस्वत्वं तदपि अध्वसन् ध्वस्तं ध्वसिर्द्वंतादिः लक्ष्मणेरितं लक्ष्मणप्रेरितं माहेन्द्रमस्त्रमासाद्य तन्नतिरोधं कृत्वा ध्वंसयति ॥९३॥ ज०म०

अविभ्रजदित्यादि । तदनन्तरं रावणपुत्र ऐषीकमस्त्रं रणे भ्राजयामास भ्राजभासेति पाचिक उङो ह्रस्वः लक्ष्मणेरितं क्षिप्तं माहेन्द्रमस्त्रमासाद्य तदपि ऐषीकमस्त्रं ध्वस्तं महेन्द्रो देवताऽस्येति ष्णः ॥ ९३ ॥ भ०

तत इत्यादि । अनन्तरं सौमित्रिः दुर्जयं अनभिभवनीयं ब्रह्मास्त्रमस्त्रार्षीत् स्मरति स्म सिचि वृद्धिः तच्च स्मरणादुपस्थितं अदेविष्ट द्योतते स्म तेनदेवदेवेन इति अनुदात्तेत् द्योतने द्रष्टव्यः देवनस्थानेकार्थत्वात् तेन च ब्रह्मास्त्रेण प्रयोजककर्त्रा नरद्विषो राक्षसस्य मूर्द्धानमदध्वंसत् पातितवान् सौमित्रिः हेतुमण्यन्ताच्चङि रूपम् ॥ ९४ ॥ ज० म०

तत इत्यादि । तदनन्तरं सौमित्रिर्दुर्जयं ब्रह्मास्त्रं स्मृतवान् स्म स्मृतौ स्मरणादुपस्थितं तत् अदेविष्ट शोभते स्म किंवा स्मरणादुपस्थिते ब्रह्मास्त्रे सौमित्रिर्हर्षात् शोभते स्म जेतुमिच्छति स्मेत्याद्यर्थो वा देवृङ्देवने देवनशब्देन दिवधातोरर्था जिगीषाद्या उच्यन्ते तेन ब्रह्मास्त्रेण प्रयोज्यकर्त्रा नरद्विषो राक्षसस्य मूर्द्धानं लक्ष्मणो ध्वंसयामास ध्वनस्तु लङ् गतौ अंशे अग्नादङ् ॥ ९४ ॥ भ०

ततोऽक्रन्दीद्दशग्रीवस्तमाश्विश्वसदिन्द्रजित् ।
निरयासीच्च संक्रुद्धः प्रार्च्चिच्च स्वयम्भुवम् ॥ ९५ ॥
अहौषीत् कृष्णवर्त्मानं समयष्टास्त्रमण्डलम् ।
सोऽलब्ध ब्रह्मणः शस्त्रं स्यन्दनञ्च जयावहम् ॥ ९६ ॥
तमध्यासिष्ट दीप्राग्रममोदिष्ट च रावणिः ।
क्लृप्तरूपस्ततोऽकर्त्तीद्दिदृक्षान्रावणविद्विषाम् ॥ ९७ ॥

तत इत्यादि । ततः सुतमरणानन्तरं दशग्रीवः अक्रन्दीत् रोदिति स्म तञ्च क्रन्दन्तमिन्द्रजिदाश्विश्वसत् आश्वासितवान् मयि जीवति किं पृथग्जनवद्रोदिषीति हेतुमण्यन्तस्य चङि रूपं संक्रुद्धश्च निरयासीत् रावणगृहान्निर्गतः याप्रापणे निर्गत्य च खगृहे स्वयम्भुवं ब्रह्माणं प्रार्च्चिच्च पूजितवान् अर्च्च पूजायामिति चुरादिः चङि अजादिद्विर्वचनम् ॥ ९५ ॥ ज० म०

तत इत्यादि । पुत्रवधानन्तरं दशग्रीवः क्रन्दति स्म तं रुदन्तं इन्द्रजिदाश्वासितवान् मयि स्थिते का चिन्तेति श्वस प्राणने अदादङ् स च संक्रुद्धः सन् निर्गतः यमरमनमात इति यातेरिम्प्रत्ययनौ सोऽन्तः खगृहान्निर्यातः सन् स्वयम्भुवं ब्रह्माणं अर्चितवान् अर्चक् पूजे चुरादिअत्वादङ् ॥ ९५ ॥ भ०

अहौषीदित्यादि । कृष्णवर्त्मानमग्निमहौषीत् हव्येन प्रीणितवानित्यर्थः अस्त्रमण्डलं आयुधग्रामं समयष्ट पूजितवान् स इन्द्रजित् ब्रह्मणः सकाशात् जयावहमस्त्रं स्यन्दनं चालब्ध लब्धवान् भलोभलीति सिचोलोपः ॥ ९६ ॥ ज० म०

अहौषीदित्यादि । इन्द्रजित् कृष्णवर्त्मानमग्निं हुतवान् हुञ् होमेऽदने अस्त्रमण्डलं समयष्ट पूजितवान् यजैजौ देवार्च्चादानसङ्गतिकृतौ स ब्रह्मणः सकाशात् जयावहं जयजनकं अस्त्रं रथञ्च लब्धवान् लभङ्गौऽषपाप्तौ भसस्वादिति सिलोपः ॥ ९६ ॥ भ०

तमित्यादि । तं स्यन्दनं दीप्राग्रं उपरिभागस्य रत्नप्रत्युप्तत्वात् अध्यासिष्ट अध्यासितवान् अधिशीङिति कर्म्मसंज्ञा तत्रस्थश्च रावणिरिन्द्रजित् अमोदिष्ट हृष्टवान् ततोऽसौ क्लृप्तरूपः अदृश्यः सन् रावणविद्विषां वानराणां देहानकर्त्तीत् क्लिन्नवान् कृती छेदने सेसिचीत्यादिना सिचोऽन्यतरेडिकल्पः रावणिविद्विषामिति पाठान्तरं तत्र देवान्तकादिविद्विषामित्यर्थः ॥ ९७ ॥ ज० म०

तमित्यादि । रावणपुत्र इन्द्रजित् तं स्यन्दनं दीप्राग्रमुपरिभागस्य रत्नमयत्वात् अध्यासितवान् जिलाषङ् उपवेशे कर्म्मक्रियेत्यादिना डस्य ढत्वं अमो-

सप्तषष्टिं प्लवङ्गानां कोटीर्वाणैरस्रूषपत् ।
निशान्ते रावणिः क्रुद्धो राघवौ च व्यमूमुहत् ॥ ९८ ॥
अपिस्कवत् स्वसामर्थ्यमगूहीच्छायकैर्दिशः ।
अघोरीच्च महाघोरं गत्वा प्रैषीच्च रावणम् ॥ ९९ ॥
विभीषणस्ततोऽबोधि सस्नुरौ रामलक्ष्मणौ ।
अपारीत् स ग्टहीतोल्को हतशेषान् प्लवङ्गमान् ॥ १०० ॥

दिष्ट च हर्षं प्राप्त च जिसुदङ् हर्षे असौ छन्नरूपोऽहम्यः सन् रावणविद्विषां वानराणां देहान् क्रन्ति स्म क्रतीशपच्छिदि रावणिविद्विषामिति पाठे देवान्तकादिशत्रूणामित्यर्थः ॥ ९७ ॥ भ०

सप्तषष्टिमित्यादि । वानराणां कोटिं सप्तषष्टिं वाणैरस्रूषपत् स्रापितवान् व्यमूमुहदित्यर्थः स्रापेश्चङीति सम्प्रसारणं निशान्ते च निशावसाने रावणिः क्रुद्धः सन् राघवौ व्यमूमुहत् मोहितवान् मुह वैचित्ये णौ चङि रूपम् ॥ ९८ ॥ ज० भ०

सप्तषष्टिमित्यादि । प्लवङ्गानां सप्ताधिकषष्टिं कोटीर्वाणैरिन्द्रजित् स्रापयामास स्रपौवलुञियये अग्नादङ् स्रपोजिरिति जिः निशाया अन्ते रावणपुत्रः क्रुद्धः सन् राघवावपि मोहयामास मुह जिल्ल वैचित्ये अग्नादङ् ॥९८॥ भ०

अपिस्कवदित्यादि । तौ मोहयित्वा आत्मीयं सामर्थ्यमपिस्कवत् वर्द्धयति स्म ईदृशस्त्वहमोऽहमिति स्कायोव इति णौ वत्वं दिशः शायकैरगूहीत् छादितवान् नेटीति इडिप्रतिषेधः ह्रस्वत्वाद्वा महाघोरञ्चातिरौद्रं शब्दमघोरीत् मुक्तवान् गत्वा च लङ्कां रावणं प्रैषीत् प्रेषितवान् गच्छ तात ममाद्भूतपराक्रमं द्रष्टुमिति दृषु गतौ ॥ ९९ ॥ ज० भ०

अपीत्यादि । इन्द्रजिदात्मीयं सामर्थ्यं वर्द्धयामास स्कायोङ् संवृद्धौ जिः पातिस्कायोरिति वङ् शायकैर्वाणैः शत्रून् अगूहीत् आच्छादितवान् गुहश्च संवृतौ ऊदित्वादेम् गुहोणोरूः महारौद्रं अघोरीत् शब्दं चक्रे घुरध्वनौ भीमार्थे लङ्कां गत्वा रावणं प्रीणाति स्म प्रीञ् तर्पणे प्रीगञ्कान्तौ वेत्यस्य वा रूपं अयमपि चकारात्तर्पणे किंवा रावणं प्रेरयामास जितशत्रून् द्रष्टुमित्यर्थात् दृश्च तर्पणे ॥ ९९ ॥ भ०

विभीषण इत्यादि । ततस्तस्मिन् काले विभीषणः रामलक्ष्मणौ सस्नुरौ पवनौ अबोधि बुद्धवान् जीवितावशिष्टौ दीपजनेत्यादिना कर्त्तरि क्त्रि स्नुरं

मा शोचिष्ट रघुव्याघ्रौ नास्पृषातामिति ब्रुवन् ।
अवाबुद्ध स नीलादीन् निहतान् कपियूथपान् ॥ १०१ ॥
तत्रेषज्जाम्बवान् प्राणीदुदमीलीच्च लोचने ।
पौलस्त्यश्चागदीत् कच्चिदजीवीन्मारुतात्मजः ॥ १०२ ॥

स्फुरः घञर्थे कविधानं यदुक्तं स्यात्तागाव्यधिहनियुध्यर्थमिति तदुपलक्षणं न परिगणनं स विभीषणः अम्बकारात् गृहीतोल्कः सन् हतशेषान् प्लवङ्गमानपारीत् मा भैष्टेति प्रीणितवान् ॥ १०० ॥ ज० म०

विभीषण इत्यादि । तदनन्तरं स विभीषणो रामलक्ष्मणौ सस्फुरौ स्फुरन्तौ अबोधि ज्ञातवान् पदस्तनीण्धे इत्यादिना दृण् स्फुरधि स्फुर्त्तौ घचादित्वादन् कुटांणुञ्जीञ्क्षिपतीति नियमात् गुणाभावः दृजुङत्वात् कगङ्गा ग्रीजुङ इति कप्रत्ययो वा अन्ये तु भावेऽपि कः प्रत्ययः स्यादित्युक्त्वा सस्फुरावित्यत्र सहशब्देन समासं कुर्वन्ति स विभीषणोऽम्बकारात् गृहीतोल्को हतशेषान् वानरान् अपारीत् अभयदानेन पालयामास पलि पालने ॥ १०० ॥ भ०

मा शोचिष्टेत्यादि । यूयं मा शोचिष्ट शोकं मा कुरुत माङि लुङ् यस्माद्रघुव्याघ्रौ नास्पृषातां न हतौ इत्येवं ब्रुवन् अपारीदिति योज्यं ये च निहतास्तान्नीलादीन् कपियूथपान् स विभीषणः परिभ्रमन् अवाबुद्ध अवबुद्धवान् एते हता इति दीपेत्यादिना चिणो विकल्पितत्वादभावपक्षे रूपम् ॥ १०१ ॥ ज० म०

मा शोचिष्टेत्यादि । यूयं मा शोकं कुरुत शुच शोके रघुश्रेष्ठौ रामलक्ष्मणौ नास्पृषातां न हतौ इति ब्रुवन् अपारीदिति पूर्वश्लोकेन सम्बन्धः अथ नीलादीन् कपियूथपान् निहतान् बुद्धवान् पदस्तनीण्धे इत्यस्याप्रवृत्तिपक्षे सिः झसस्खादिति सिलोपः ॥ १०१ ॥ भ०

तत्रेत्यादि । तत्र तेषु जाम्बवान् ईषन्मनाक् प्राणीत् उच्छ्वसिति स्म अन प्राणने अनितेरिति णत्वं लोचने च उदमीलत् उन्मीलितवान् मीलच्मीलनिमेषणे पौलस्त्यश्च विभीषणमगदीत् गदितवान् अतो हलादेरदृङौ रूपं कच्चित् किं हनूमान् अजीवीत् जीवितवान् न हत इति ॥ १०२ ॥ ज० म०

तत्रेत्यादि । तेषु मध्ये जाम्बवान् ईषत्प्राणीत् उच्छ्वसिति स्म अनच्लुप्राणने प्राग्वद्योग इत्यादिना पाक्षिकं णत्वं लोचने अमीमिलत् मीलयामास मीलनिमेषे आन्तादङ् आजआसेति पाक्षिक अङो हुस्वः उदमीलीच्चेति पाठे सिः ईमिमो उदमीलच्चेति पाठोऽशुद्ध एव ङविषयाभावात् न च अप् व्यधिकारात्

तस्य क्षेमे महाराज नाष्टमाच्चाखिला वयम् ।
पौलस्त्योऽशिश्रवत्तच्च जीवन्तं पवनात्मजम् ॥ १०३ ॥
आयिष्ट मारुतिस्तत्र तौ चाप्यहृषतां ततः ।
प्राहैष्टां हिमवत्पृष्ठे सर्व्वौषधिगिरिं ततः ॥ १०४ ॥
तौ हनूमन्तमानेतुमोषधीं मृतजीविनीम् ।

न च प्रश्वरःशिश्रवेति आरत्वेऽपि क्वचिदपवादविषयेऽप्युत्सर्गोऽभिनिविशत इति शप् वक्तुं शक्यः कुत्वचित् केनचिदनुक्तत्वात् पूषादिपाठः स्वीकर्त्तव्य इत्यन्ये पौलस्त्यं विभीषणञ्च गदितवान् गद भाषे इसादेः सेम इमि पक्षे ब्रिः किमगदीदित्याह मारुतात्मजो हनूमान् जीवितवान् कञ्चित् कालप्रवेदने जीवक्षप्राणे आशंसायां टी अभिधानात् माटीवेत्यत्र योगविभागाद्वा ॥ १०२ ॥ भ०

तस्येत्यादि । तस्य हनूमतः क्षेमे जीवितत्वे सति हे महाराज अखिलाः सर्व्व एव वयं नाष्टमहि न मृता इति आशंसायां भूतवच्चेति लुङ् एवमुक्तः पौलस्त्यो जीवन्तं पवनात्मजं तमशिश्रवत् श्रावितवान् श्रृणोतेर्ण्यन्ताच्छङि सन्वद्भावे अभ्यासे वर्णस्य स्रवति श्रृणोतीत्यादिना इत्वपक्षे रूपम् ॥१०३॥ ज०म०

तस्येत्यादि । हे महाराज विभीषण हनूमतः क्षेमे कुशले सति सर्व्व एव वयं न मृताः मृङ्ष्टोढेमं दृगुङुर्म्मढीति क्त्वाङुणाभावः अत्राप्याशंसायां टीत्यन्ये एवमुक्तः पौलस्त्यो विभीषणो जीवन्तं पवनात्मजं तं जाम्बवन्तं श्रावयामास श्रोर्ज्ञ्रान्नादङ् श्रुस्रुस्रुद्रु इत्यादिना खेरतः प्राधिकमित्वं घोञ्जैरिति प्रयोज्यस्य कर्म्मत्वम् ॥ १०३ ॥ भ०

आयिष्टेत्यादि । तत्र पौलस्त्याद्गतो मारुतिरायिष्ट आगतवान् अयगतावाङ् पूर्व्वः ततोऽनन्तरं तौ जाम्बवद्विभीषणौ अहृषातां हृष्टवन्तौ हृष तुष्टौ पुषादिः ततस्तौ हृष्टौ हनूमन्तमिति वक्ष्यमाणेन सम्बन्धः प्राहैष्टां प्रहितवन्तौ णिचि लुङि हि गतौ हिमवत्पृष्ठे हिमवतः पृष्ठे सर्व्वौषधिगिरिं सर्व्वा ओषधयो यस्मिन्निति ॥ १०४ ॥ ज० म०

आयिष्टेत्यादि । तत्र देशे पौलस्त्येनाहूतो मारुतिरांहिष्ट आगतः अहिङ् गतौ आयिष्टेति पाठे अयङ् गतौ ततोऽनन्तरं तौ च जाम्बवद्विभीषणौ हर्षं प्रापतुः हृषञ् तुष्टौ पुषादिः ततस्तौ हिमालयस्य पृष्ठभागे सर्व्वा ओषधयो यत्र तं गिरिं प्राहैष्टां प्रस्थापितवन्तौ हनूमन्तमित्युत्तरश्लोकेनान्वयः हिन वर्द्धने गतौ ॥ १०४ ॥ भ०

सन्धानकरणीं चान्यां विशल्यकरणीं तथा ॥ १०५ ॥
प्रोदपाति नभस्तेन स च प्राप्ति महागिरिः ।
यस्मिन्नज्वलिषूरात्रौ महौषध्यः सहस्रशः ॥ १०६ ॥
निरचायि यदा भेदो नौषधीनां हनूमता ।
सर्व्व एव समाहारि तदा शैलः सहौषधिः ॥ १०७ ॥
प्राणिषुर्निहताः केचित् केचित्तु प्रोदमीलिषुः ।
तमोऽन्येऽहासिषुर्योधा व्यजृम्भिषत चापरे ॥ १०८ ॥

तावित्यादि । या मृतं जीवयति या च क्षतस्य सन्धानं करोति तथा विशल्यञ्च या करोति क्षत्यल्लुटौ बहुलं तामोषधिमानेतुं प्राहैषीदिति योज्यं ओषधेश्च विभक्तावप्रथमायामिति दीर्घत्वम् ॥ १०५ ॥ ज० म०

तावित्यादि । या मृतं जीवति या च क्षतस्य सन्धानं करोति या च विशल्यं करोति ता ओषधीरानेतुं हनूमन्तं तौ प्राहैषीदिति पूर्व्वेणान्वयः क्षभावेऽग्नौ इति कर्त्तरि अनट् नन्द्यादिर्वा ॥ १०५ ॥ भ०

प्रोदपातीत्यादि । तेन हनूमता नभः प्रोदपाति उत्पतितं स च महागिरिस्तेन प्रापि प्राप्तः कर्म्मणि लुङ् यस्मिन् गिरौ महौषध्यः सहस्रशोऽनेकधा रात्रावज्वलिषुः दीप्यन्ते स्म अतो लान्तस्येति वृद्धिः ॥ १०६ ॥ ज० म०

प्रोदपातीत्यादि । तेन हनूमता नभ आकाशमुत्पतितं स च महागिरिः प्राप्तः उभयत्र कर्म्मणि हणः यस्मिन्महागिरौ सहस्रशो महौषधयो रात्रौ ज्वलन्ति स्म व्रजवदेति त्रिः ॥ १०६ ॥ भ०

निरचायीत्यादि । यदा हनूमता ओषधीनां भेदो न निरचायि विशेषतो न निश्चितः तदा क्षतघ्न एव शैलः सहौषधिरोषधिसहितः समाहारि समानीतः ॥ १०७ ॥ ज० म०

निरचायीत्यादि । यदा हनूमता ओषधीनां प्रागुक्तानां भेदो न निश्चितः तदा ओषधिसहितः समस्त एव शैलः समाहृतः समानीतः उभयत्र कर्म्मणीण् सहः सोवेति पक्षे सादेशाभावः ॥ १०७ ॥ भ०

प्राणिषुरित्यादि । तदा ओषधिसन्निधानात् ते निहताः केचिद्योधाः प्राणिषुः उच्छ्वसितवन्तः केचित् उत्प्रोदमीलिषुः उन्मीलितलोचना बभूवुः अन्ये तमो मोहमहासिषुः त्यक्तवन्तः यमरमेति सगिटौ तथान्येऽहासिषुरिति पाठा-

अजिघ्रपंस्तथैवान्यानोषधीरालिपंस्तथा ।
एवं तेऽचेतिषुः सर्वे वीर्य्यञ्चाधिषताधिकम् ॥ १०९ ॥
अजिह्लदत् स काकुत्स्थौ शेषांश्चाजीजिवत् कपीन् ।
हनूमानथ ते लङ्कामग्निनादीदिपन्, द्रुतम् ॥ ११० ॥

न्नरं ते तथाभूतमात्मानं दृष्ट्वा सविलासं हसितवन्तः अपरे व्यजृम्भिषत जृम्भिकां कृतवन्तः जृम्भाजृम्भिगात्रविनाम इत्यात्मनेपदी ॥ १०८ ॥ ज० म०

प्राणिषुरित्यादि । प्रभावान्निहताः केचिद्योधाः प्राणिषुरुच्छ्वसिताः केचिच्च उन्मीलितनेत्रा अभूवन् अन्ये तमो मोहमहासिषुरित्युक्तवन्तः ओहाङ् त्यागे यमरमेति दम्भनो ततोऽन्येऽहसिषुरिति पाठे अनन्तरं आत्मानं दृष्ट्वा हसितवन्त इत्यर्थः हस हसे अपरे जृम्भां कृतवन्तः जृभिङ् च चकारात् जृम्भे ॥ १०८ ॥ भ०

अजिघ्रपन्नित्यादि । तथान्यान् लब्धसंज्ञानोषधीरजिघ्रपन् घ्रापितवन्तः नासिकयाभ्यवहृतवन्त इत्यर्थः गतिबुद्धीत्यादिना प्रत्यवसाने कर्मसंज्ञा जिघ्रतेर्वेति णौचङ्युपधाया इत्वकारः तथालिपन् लिप्तवन्तः अन्यानोषधीभिरित्यर्थात् लिपिसिचीत्यङ् एवमनेन प्रकारेण सर्व्वेऽचेतिषुः संज्ञां लब्धवन्तः चितीसंज्ञाने अधिकञ्च वीर्य्यमोषधिबलाद्धिषत दधति स्म स्माध्वोरिच्च ॥ १०९ ॥ ज० म०

अजिघ्रपन्नित्यादि । अन्ये लब्धसंज्ञाः सन्तः अन्यान् ओषधीर्घ्रापितवन्तः घ्राणभ्यवहरणे तच्च नासिकया भोजनं घ्राणविशेषो वेति धोजौजेत्यादिना प्रयोज्यस्य कर्मत्वं धोरिति पाचिकसुङ इत्वं अन्ये अलिपन् लिप्तवन्तः शरीरमोषधीभिरित्यर्थात् वक्ष्यतीति ङः एवमनेन प्रकारेण ते सर्व्वेऽचेतिषुः संज्ञां प्रापुः चितीसंज्ञाने अधिकञ्च वीर्य्यं शक्तिं दधति स्म स्मादोर्डिष्टीमे न शुः ॥ १०९ ॥ भ०

अजिह्लददित्यादि । एवञ्च सति हनूमान् काकुत्स्थावजिह्लदत् ह्लादितवान् ह्लादी सुखे श्यन्तः शेषांश्च कपीनजीजिवत् जीवयति स्म अथ ते जीविताः सन्तः लङ्कां द्रुतमदीदिपन् दीपितवन्तः भ्राजेत्यादिना हस्वपक्षे रूपम् ॥ ११० ॥ ज० म०

अजिह्लददित्यादि । स हनूमान् रामलक्ष्मणौ ह्लादयामास ह्लादीङ् मोदने जभ्रनादङ् शेषांश्च कपीन् जीवयति स्म भ्राजभ्राशेत्यादिना पक्षे उङो ह्रस्वः अथ जीविताः सन्तः ते द्रुतं लङ्कां वह्निना दीपयन्ति स्म पूर्ववदुङो ह्रस्वः ॥ ११० ॥ भ०

समनात्सीत्ततः सैन्यममार्ज्जीद्भल्लतोमरम् ।
अमार्ज्जीच्चासिपत्रादीनवभासत् परश्वधान् ॥ १११ ॥
कुम्भकर्णसुतौ तत्र समनद्धां महाबलौ ।
निकुम्भश्चैव कुम्भश्च प्रापतां तौ प्लवङ्गमान् ॥ ११२ ॥
अगोपिष्टां पुरीं लङ्कामगोप्तां रक्षसां बलम् ।
अत्याक्षामायुधानीकमनैष्टाञ्च क्षयं द्विषः ॥ ११३ ॥

समनात्सीदित्यादि । ततः सैन्यं समनात्सीत् सन्नद्धं नद्धोऽभूत् इति धत्वं हलन्तलक्षणा वृद्धिः भल्लतोमरममार्ज्जीत् शोधितवत् मृजेरुदित्वात् पक्षे रूपं असिपत्रादीनमार्ज्जीत् इडभावे रूपं उभयत्रापि मृजेर्वृद्धिः परश्वधानवभासत् दीपितवान् भ्राजभासेति हस्वपक्षे रूपं अभासीच्चेति पाठान्तरं तत्रान्तर्भावितो ण्यर्थः ॥ १११ ॥ ज० म०

समनात्सीदित्यादि । ततोऽनन्तरं रावणस्य सैन्यं समनात्सीत् सन्नद्धं णह्यञौ बन्धे अनित्वाद्विः नद्धोऽभूत् भल्लं तोमरञ्चास्त्रं अमार्ज्जीत् शोधितवत् मृजलूष शुद्धौ अदित्त्वाद्वेम् मृजोऽकङितीति त्रिः असिपत्रादीन् खड्गादींश्च अमार्ज्जीत् इडोऽभावपक्षे रूपं शच्छ्राजिति षड् षढोः कः परश्वधान् अवभासत् भासृङ दीप्तौ अप्रत्ताद्ङ् भ्राजभासेति हस्वाभावपक्षे रूपं अभासीच्चेति पाठे भातेरन्तर्भूतञर्थत्वम् ॥ १११ ॥ भ०

कुम्भकर्णेत्यादि । कुम्भश्चैव निकुम्भश्च कुम्भकर्णसुतौ महाबलौ तत्र सैन्ये समनद्धां सन्नद्धौ तौ च प्लवङ्गमान् प्रापतां प्राप्नवन्तौ स्तदित्वादङ् ॥११२॥ ज०म०

कुम्भकर्णेत्यादि । निकुम्भकुम्भौ कुम्भकर्णसुतौ बलवन्तौ सन्नद्धौ नद्धेः पूर्ववत् ध्यङ् तौ वानरान् प्राप्तौ आप्लृणौकि व्यापने स्तदित्वात् ङः ॥ ११२ ॥ भ०

अगोपिष्टामित्यादि । लङ्कां च पुरीं अगोपिष्टां रक्षितवन्तौ गुपेरुदित्वादिट् पक्षे रूपं अगोप्तामितीडभावपक्षे रूपं हलन्तलक्षणा वृद्धिः झलोझलीति सिचो लोपः आयुधानीकं आयुधसमूहमत्याक्षां त्यक्तवन्तौ विसृष्टवन्तौ त्यज हानौ पूर्ववद्वृद्धिः सिचो लोपः द्विषः शतून् क्षयमनैष्टां नीतवन्तौ सिचि वृद्धिः ॥ ११३ ॥ ज० म०

अगोपिष्टामित्यादि । तौ लङ्कां पुरीमगोपिष्टां रक्षितवन्तौ रक्षसां सैन्यञ्च अगोप्तां गुपूरक्षे वाङरे इति आयाभावपक्षे अदित्वाद्वेम् अनिमृपक्षे व्रजवदेति

अकोकूयिष्ट तत् सैन्यं प्रपलायिष्ट चाकुलम् ।
अच्युतच्च क्षतं रक्तं हतञ्चाध्यशयिष्ट गाम् ॥ ११४ ॥
अङ्गदेनाहसातां तौ युध्यकम्पनकम्पनौ ।
अत्यार्हीद्बालिनः पुत्त्रं प्रजङ्घोऽपि समत्सरः ॥ ११५ ॥
तस्याप्यवेभिदिष्टासौ मूर्द्धानं मुष्टिनाङ्गदः ।

त्रिः झषस्वादिति सेर्लोपः आयुधानीकमस्त्रसमूहं त्यक्तवन्तौ कपीनामुपरीत्यर्थात् त्यजौ हाभौ द्विषः शत्रून् क्षयं नीतवन्तौ नीजघ्नां सौ त्रिः ॥११३॥ भ०

अकोकूयिष्टेत्यादि । तत् सैन्यं प्लवङ्गमानां भयादकोकूयिष्ट भृशं शब्दं कृतवत् कुङ्शब्द इत्यस्मात् यङन्ताद्यङ्प्रत्ययस्य न कवतेर्यङीति कूङः श्नुत्वप्रतिषेधः ततो यङन्तात् लङ् प्रपलायिष्ट पलायते स्म अजादेरङ्गस्य आङ्जादीनां परयोरनङ्कत्वाच्च उपसर्गस्यायतावितिवत्वं क्षतञ्च खण्डितञ्च सत् रक्तमच्युतत् क्षरति स्म इरितो वेत्यङ् हतञ्च निहतं सत् गामध्यशयिष्ट भूमौ पतितं चधिशीङिति कर्म्मसंज्ञा ॥ ११४ ॥ ज० म०

अकोकूयिष्टेत्यादि । तत् सैन्यं भयादकोकूयिष्ट भृशं शब्दं चकार कुङ् शब्दे भूतभूवेत्यादिना यङ् कोकुर्व्वेति खेः पात्त्विकं चुत्वं अत्र तदभावः खेर्गुणः घोऽजय्यरे आकुलं तत् सैन्यं प्रपलायितञ्च क्षतं खण्डितं तत् सैन्यं रक्तं अच्युतत् क्षरति स्म इरित्त्वात् ङः हतं सत् गां अध्यशयिष्ट भूमौ पतितं कर्म्मक्रियेति अधिशीङ आधारस्य कर्म्मत्वम् ॥ ११४ ॥ भ०

अङ्गदेनेत्यादि । अकम्पनश्च कम्पनश्च तौ ज्येष्ठत्वात् पूर्व्वनिपातः युधि संग्रामे अङ्गदेन अहसतां कर्म्मणि लुङ् आत्मनेपदेष्वन्यतरस्यामिति बधादेशाभावपक्षे रूपं प्रजङ्घो नाम राक्षसः समत्सरः सक्रोधः बालिनः पुत्त्रमभ्यार्हीत् प्रहृतवान् अर्ह हिंसायाम् ॥ ११५ ॥ ज० म०

अङ्गदेनेत्यादि । तावकम्पनकम्पनौ युधि संग्रामे अङ्गदेन कृतौ हन्तेः कर्म्मणि द्विवचनं हनबधेति मे पक्षे बधादेशाभावः वनतनाद्यनिमिति नस्य लोपः अनन्तरं प्रजङ्घो राक्षसो मात्सर्य्यान्वितः सन् बालिनः पुत्त्रं अत्यार्हीत् जघान अर्दज बधे आभिमुख्येन जगाम इति वा अर्द यातनागतियाचने अथ मत्सरः असह्यपरसम्पत्तौ मात्सर्य्ये क्रपणे क्रुधीति विश्वः ॥ ११५ ॥ भ०

अहार्षीच्च शिरः क्षिप्रं यूपाक्षस्य निराकुलः ॥ ११६ ॥
शरीरं लोहिताक्षस्य न्यभाङ्क्षीद्द्विविदस्तदा ।
क्रुद्धः कुम्भस्ततोऽभैत्सीत् मैन्दं सद्विविदं शरैः ॥ ११७ ॥
आधूर्णिष्टां क्षतौ क्ष्माञ्च तावाश्रिश्रियतासुभौ ।
मातुलौ विह्वलौ दृष्ट्वा कुम्भं वालिसुतो नगैः ॥ ११८ ॥
प्रौर्णावीच्छरवर्षेण तानपोहोन्निशाचरः ।

तस्येत्यादि । प्रजङ्घस्यापि मूर्द्धानमसावक्रूदो मुष्टिनावेभिदिष्ट अत्यर्थं भिन्नवान् भिदेर्यङ्लुक्यस्य अतो लोपः यस्य हल इति यलोपे क्रूरं निराकुलस्य नाम वानरः यूपाक्षस्य राक्षसस्य शिरः क्षिप्रमहार्षीत् छिन्नवान् ॥ ११६ ॥ ज० म०

तस्येत्यादि । असौ अक्रूदस्तस्यापि प्रजङ्घस्यापि मूर्द्धानं मुष्टिना अत्यर्थं भिनत्ति स्म भिदेर्यङ्लुकि सिः निराकुलो नाम वानरो धूम्राक्षस्य शिरः क्षिप्रं शीघ्रं क्षतवान् निराकुल इति अक्रूदस्य विशेषणं केचिदाहुः ॥ ११६ ॥ भ०

शरीरमित्यादि । द्विविदो नाम वानरो लोहिताक्षस्य शरीरं न्यभाङ्क्षीत् चूर्णितवान् भञ्जो आमर्दने ततोऽनन्तरं कुम्भकर्णसुतः मैन्दं वानरं सद्विविदं द्विविदेन सह शरैरभैत्सीत् भिन्नवान् ॥ ११७ ॥ ज० म०

शरीरमित्यादि । द्विविदो नाम वानरो लोहिताक्षस्य शरीरं क्षितौ अभाङ्क्षीत् भञ्जोधौ भोटने ततोऽनन्तरं कुम्भो राक्षसः कुपितः सन् द्विविदेन सह मैन्दं कपिं शरैर्विभेद धौभिदिर्भिदि ॥ ११७ ॥ भ०

आधूर्णिष्टामित्यादि । तावुभौ क्षतौ आधूर्णिष्टां चक्रवदभ्रान्तौ क्ष्माञ्च भूतलमाश्रियतां श्रितवन्तौ भूमौ पतितावित्यर्थः निश्रीत्यादिना चङ् तौ च तारास्थाहत्यात् मातुलौ विह्वलौ दृष्ट्वा वालिसुतो नगैर्हनैः कुम्भं प्रौर्णावीदिति वक्ष्यमाणेन सम्बन्धः ॥ ११८ ॥ ज० म०

आधूर्णिष्टामित्यादि । तावुभौ वानरौ क्षतौ खण्डितौ सन्तौ घूर्णितौ घूर्णेर्जश्चभ्रमणे क्ष्मां भूमिमाश्रितवन्तौ च श्रिञ् सेवने अश्रीत्यङ् तावात्तमातुलौ व्याकुलौ दृष्ट्वा वालिसुतोऽङ्गदः नगैः कुम्भं प्रौर्णावीत्यग्रिमश्लोकेनान्वयः अर्णं वञ् आच्छादने ऊर्णुञ्च्छादनमिति त्रिः न गच्छतीति नगः हनजगादिति डः नञोऽनौवाऽऽऽसोरिति पक्षे आदेशाभावः शैलवृक्षौ नगावगावित्यमरः मातुर्भ्राता मातुलो निपातनात् ॥ ११८ ॥ भ०

वानरानैजिहद्रामस्तूर्णं रक्षितुमङ्गदम् ॥ ११९ ॥
द्रुतमत्रास्त सुग्रीवो भ्रातृव्यं शत्रुसङ्कटात् ।
मुष्टिना कौम्भकर्णिञ्च क्रुद्धः प्राणैरतित्यजत् ॥ १२० ॥
निकुम्भो वानरेन्द्रस्य प्राहैषीत् परिघं ततः ।
हनूमांश्चापतन्तं तमभाङ्क्षीद्भोगिभीषणम् ॥ १२१ ॥
प्रौर्णुवीत्तेजसारातिमरासीच्च भयङ्करम् ।

प्रौर्णावीदित्यादि । प्रौर्णावीत् क्षादितवानित्यर्थः विभाषोर्णोरित्यकित्त्वपक्षे रूपं स च निशाचरस्त्राङ्गगान् शरवर्षेणापौहीत् निरस्तवान् उपसर्गादस्त्यूह्योर्वा वचनमित्यात्मनेपदविकल्पः रामस्य तद्वनुष्कौशलं दृष्ट्वा अङ्गदं रक्षितुं तूर्णं वानरानैजिहत् व्यापारितवान् ईहतिरर्थवन्तः ॥ ११९ ॥ ज० म०

प्रौर्णावीदित्यादि । निशाचरः कुम्भस्तान् बाणवृष्ट्या अपौहीत् निरस्तवान् जहङ् तर्के अपपूर्व्वन्निवारणेऽपि गेर्वाक्षोहोढेचेति मक्ष पाक्षिकत्वात् पं रामश्चाङ्गदं रक्षितुं तूर्णं वानरान् प्रेरयामास ईहङ् चेष्टे जान्तादङ्॥ ११९॥ भ०

द्रुतमित्यादि । सुग्रीवस्तस्माच्छत्रुसङ्कटात् भ्रातृव्यं भ्रातुरपत्यं भ्रातृव्यञ्च द्रुतमत्रास्त रक्षितवान् अपतो भूत्वा त्रैङ् पालने कौम्भकर्णिं कुम्भं क्रुद्धः सन् मुष्टिना प्राणैरतित्यजत् त्याजितवान् त्यजिर्ह्वन्तः ॥ १२० ॥ ज० म०

द्रुतमित्यादि । सुग्रीवस्तस्मात् शत्रुसङ्कटात् भ्रातृव्यं अङ्गदं द्रुतमत्रास्त रक्षितवान् त्रैङ् पालने भ्रातुरपत्यं भ्रातृव्यो निपातनात् क्रुद्धः सन् कुम्भकर्णापत्यं कुम्भं मुष्टिना प्राणान् त्याजयामास त्यजौ ह्यानौ जान्तादङ् अत्र त्यजिस्त्यागपूर्विकायां गतौ वर्त्तते तेन घोऽजौजेरित्यादिना प्रयोज्यानां प्राणानां कर्म्मत्वं आप्रिश्लीयमते शब्दार्थादिभ्योऽन्यस्य शोगे प्रयोज्यस्य पक्षे कर्म्मत्वमिष्यते प्राणैरिति क्वचित्पाठः ॥ १२० ॥ भ०

निकुम्भ इत्यादि । ततो भ्रातृवधात् निकुम्भो वानरस्य सुग्रीवस्य परिघं प्राहैषीत् प्रहितवान् हि गतौ परिघमापतन्तं निकुम्भात् भोगिभीषणं अहिवत् भीषणं हनूमानभाङ्क्षीत् भग्नवान् ॥ १२१ ॥ ज० म०

निकुम्भ इत्यादि । ततो भ्रातृवधात् निकुम्भः सुग्रीवस्य क्रुते परिघं प्रहितवान् हि वर्द्धने गतौ तमापतन्तं भोगिभीषणं सर्पवद्भयङ्करं परिघं हनूमान् बभञ्ज भनुजैरनिमत्याह्निः ॥ १२१ ॥ भ०

ग्रीवाञ्चास्य तथाक्राक्षीद्यजिजीवद्यथा न तम् ॥ १२२ ॥
समगत कपिसैन्यं सम्मदेनातिमात्रं
विटपहरिणनाथः सिद्धिमौच्छिष्ट नित्याम् ।

प्रौर्णुवीदित्यादि । परिघञ्च हनूमान् तेजसा प्रौर्णुवीत् अभिभूतवान् किच्चादृदृद्विपक्षे रूपं भयङ्करं चारासीत् शब्दितवान् अस्य च निकुम्भस्य ग्रीवां तथाक्राक्षीत् आकृष्टवान् ञमागमपक्षे रूपं यथा तं नाजिजीवत् न जीवयति स्म ग्रीवामाकृष्यैव व्यापादितवानित्यर्थः आजभासेत्यहुस्वपक्षः ॥ १२२ ॥ज० म०

प्रौर्णुवीदित्यादि । हनूमान् तेजसा अरिं निकुम्भं प्रौर्णुवीत् अभिभूतवान् णूवभ्रिश्चाभिति उव् क्वचिद्गुणवान् पाठः भयङ्करं यथा स्यात्तथा शब्दं कृतवान् रसशब्दे अस्य निकुम्भस्य ग्रीवां तथाकृष्टवान् तथा तं न जीवयामास ग्रीवामाकृष्य जघानेत्यर्थः क्रुधौ आकृषि क्रुधमृशस्तृशेति पाक्षिकः सिः वद्रोऽकिदिति कृद्रः अनिमृत्याद्विः जीव कृप्राणे अन्नादङ् आजभाशभासेति पक्षे हुस्वः ॥ १२२ ॥ भ०

समगतेत्यादि । प्रधानयोधा निहता इति सम्मदेन हर्षेणातिमात्रमत्यर्थं समगत सङ्गतं कपिसैन्यं समोगन्टच्छीति तङ् वागम इति सिचः किच्चेऽनुनासिकलोपः हुस्वादङ्गादिति सिचोलोपः विटपहरिणनाथः शाखामृगाणां नाथः नित्यां सिद्धिमवश्यंभाविनीमौच्छिष्ट तर्कितवान् रूपतिमतिः रामस्य बुद्धिः प्राग्गकामेव सम्पन्नेच्छेव रावणवधसीतालाभयोः सिद्धिरूपत्वात् हर्षादरंस्त रमते स्म रजनिचरपतीनां मेघनादादीनां शोकः सन्ततोऽविच्छिन्नः अतायि वर्द्धते स्म दीपजनेत्यादिना कर्त्तरि चिण् ॥ १२३ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लुङ्विलसितो
द्वितीयः परिच्छेदः ।

काव्यस्य कुम्भकर्णवधो नाम पञ्चदशः सर्गः ।

नृपतिमतिररंस्त प्राप्तकामेव हर्षात्
रजनिचरपतीनां सन्ततोऽप्यायि शोकः ॥ १२३ ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लुङ्विलसितो नाम
पञ्चदशः सर्गः ।

समगतेत्यादि । कपिसैन्यं सम्मदेन हर्षेण अतिमात्रमत्यर्थं सङ्गतं वैरिनाशात् समीगस्तच्छेति मं दृगुङुर्णढीति पक्षे सेः किच्चे वनतनाद्यनिमामिति मलोपे झस्खादिति सिलोपः विटपहरिणानां वानराणां नाथः सुग्रीवः नित्यामवश्यम्भाविनीं कार्यसिद्धिं ज्ञातवान् जहङ् तर्के नृपते रामस्य मतिः प्राप्तकामेव शत्रुवधं सीताञ्च प्राप्नवती हर्षात् रमते स्म रसुङ्जौक्रीडे रजनिचरपतीनां रावणेन्द्रजितादीनां सन्ततोऽविच्छिन्नः शोको वर्द्धते स्म तायङ्पालनसन्तत्योः पदस्तनीण्ये इति अदिना पाक्षिक दृण् अध्यायीति पाठे तु प्यायोऽद्दृौ ॥ १२३ ॥ भ०

इति हरिहरखानवंशसम्भवगौराङ्गसल्लीकात्मजश्रीभरतसेनकृतायां
सुग्धबोधिन्यां भट्टिटीकायां कुम्भकर्णादिवधो नाम
पञ्चदशः सर्गः ।

षोडशः सर्गः ।

ततः प्ररुदितो राजा रक्षसां हतबान्धवः ।
किं करिष्यामि राज्येन सीतया किं करिष्यते ॥ १ ॥
अतिकाये हते वीरे प्रोत्सहिष्ये न जीवितुम् ।
ह्रेपयिष्यति कः शत्रून् केन जायिष्यते यमः ॥ २ ॥
अतिकायाद्विना पार्श्वं को वा क्षेत्स्यति वारुणम् ।

इतः प्रभृति लटमधिकृत्य विलक्षितमाह तत्र लट्शेषे चेति लट् ततो ऽन्यत्रापि दर्शयिष्यति

तत इत्यादि । ततोऽनन्तरं रक्षसां राजा रावणः हतबान्धवः व्यापादितभ्रातृत्वात् शोकाभिभूतः सन् प्ररुदितः क्रन्दितुमारब्धः किं करिष्यामीत्यादिना आदिकर्मणि क्तः राज्येन किञ्चित् कर्तृनोः स्य इतीट् सीतया च किं करिष्यते ॥ १ ॥ ज० म०

अथ तौ प्रदर्श्यते तस्याः पाणिनिमते लट्संज्ञा

तत इत्यादि । तदनन्तरं हतबान्धवो रक्षसां राजा रावणः प्ररुदितः क्रन्दितुमारब्धवान् अदिढे क्तः रोदनमेवाह अहं राज्येन किं करिष्यामि अहं सीतया च किं करिष्ये बान्धवनाशात् सर्वं निष्फलमेव कृत्र उभयपदित्वं जित्त्वात् स्वरार्थेन इति रम् सीतायां किं करिष्यते इति पाठे मयेति शेषः सीतया कलत्रार्थं वा ॥ १ ॥ भ०

अतीत्यादि । पुगन्तगुणः केन यमः जायिष्यते जिजये कर्मणि लट् स्थिजित्यादिना चिण्वदिटच् ॥ २ ॥ ज० म०

अतिकाय इत्यादि । अतिकाये हते सति जीवितुमहमुत्सहे न करिष्यामि तेन विना कः शत्रून् लज्जयिष्यति ह्री लिलज्जे ह्रीङीति षण् केन यमो जेतव्यः जिजये च कृनग्रहदृश च इति पाञ्चिको णिण् ॥ २ ॥ भ०

रावणं मंस्यते को वा स्वयम्भूः कस्य तोष्यति ॥ ३ ॥
श्लाघिष्ये केन को बन्धून् नेष्यत्युन्नतिमुन्नतः ।
कः प्रेष्यति पितॄन् काले कृत्वा कत्थिष्यते न कः ॥ ४ ॥
उद्यंस्यति हरिर्वज्रं विचरिष्यति निर्भयः ।
भोक्ष्यते यज्ञभागांश्च शूरमानञ्च वक्ष्यति ॥ ५ ॥

अतीत्यादि । पृथक् विनेति पञ्चमी अतिकायाद्विना वारुणं पाशं को वा क्षेत्स्यति द्विधा करिष्यति को वा रावणं मंस्यते पूजयिष्यति स्वयम्भूर्ब्रह्मा कस्य तोष्यति प्रीतिं जनयिष्यति तुष प्रीतौ षढोः कस्सि ॥ ३ ॥ ज० भ०

अतिकायादित्यादि । अतिकायेन विना को वा वरुणपाशं क्षेत्स्यति छिदिरधौजश्छेने अन्यारभ्यार्थेत्यादिना विनायोगे पञ्चमी को वा रावणं पूजयिष्यति मन्यौङ् च चकाराद्बधे अनेकार्थत्वात् पूजायामपि स्वयम्भूः कस्य प्रीतिं जनयिष्यति तुषयौजि च चकारात् तुष्टो षढोः कः ॥ ३ ॥ भ०

श्लाघिष्ये इत्यादि । केनाहं श्लाघां करिष्यामि समेदृशः पुत्र इति कः स्वगुणैरुन्नतः सन् बन्धूनुन्नतिं परां कोटिं नेष्यति काले पितृक्रियोचिते कः पितॄन् प्रेष्यति तर्पयिष्यति प्रीञ् तर्पणे कृत्वा किञ्चित्कार्यं को न कत्थिष्यते कत्थनां न करिष्यति अहमेवंविध इति अतिकायाद्विनेति सर्वत्र योज्यम् ॥ ४ ॥ ज० भ०

श्लाघिष्य इत्यादि । केन पुत्रेणाहं श्लाघ्यो भविष्यामि कर्मणि रूपं केनात्मानं श्लाघ्यं कथयिष्यामीत्यर्थे कर्तरि रूपमित्यन्ये क उन्नतः सन् बन्धून् उन्नतिं प्रापयिष्यति कः काले पितॄन् तर्पयिष्यति प्रीञ् तर्पणे महदपि कार्यं कृत्वा आत्मानं श्लाघां न करिष्यति अतिकायाद्विनेति सर्वत्र योज्यं कत्थऊ श्लाघे ॥ ४ ॥ भ०

उद्यंस्यतीत्यादि । तथा हरिरिन्द्रः हन्तुं वज्रमुद्यंस्यति उद्वारयिष्यति उत्पूर्वाद्यमेरूपं निर्भयश्चेतस्ततो विचरिष्यति यज्ञभागांश्चात्मीयान् भोक्ष्यते भक्षयिष्यति भुजोऽनवन इति तङ् शूरमानञ्च शूरोऽस्मीति वक्ष्यति धारयिष्यति वहेर्ढोढः षढोः कः सि ॥ ५ ॥ ज० भ०

उद्यंस्यतीत्यादि । हरिरिन्द्रो मां प्रति वज्रं उत्थापयिष्यति अतिकायस्य मरणे किं भविष्यति नान्यथेति वक्ष्यमाणेनान्वयः यमौ उपरतौ निर्भयं विचरिष्यति इतस्ततो गमिष्यति आत्मीयान् यज्ञभागांश्च भक्षयिष्यति भुजोऽनवने इति

रविस्तप्स्यति निःशङ्कं वास्त्यनियतं मरुत् ।
निर्वर्त्स्यत्यृतुसङ्घातः स्वेच्छयेन्दुरुदेष्यति ॥ ६ ॥
तीव्रं स्यन्दिष्यते मेघैरुग्रं वर्त्तिष्यते यमः ।
अतिकायस्य मरणे किं भविष्यति नान्यथा ॥ ७ ॥
उन्मीलिष्यति चक्षुर्मे दृथा यद्विनयागतम् ।
आत्मालाभोन्मुखं नम्रं न द्रक्ष्यति नरान्तकम् ॥ ८ ॥

मं शूरमानं शूरोऽहमिति अहङ्कारं धारयिष्यति वहै औप्राप्णे होढः पढोः कः पूर्वं सर्वमिदमतिकायेन निराकृतमिति भावः ॥ ५ ॥ भ०

रविरित्यादि । रविः निःशङ्कं शङ्कां विना तप्स्यति द्योतिष्यति मरुद्वानियतं स्वच्छन्दो वास्यति वागतिगन्धनयोः ऋतुसङ्घातः षड्ऋतवः न वर्त्स्यंति सर्वदा न भविष्यति दृङ्नः स्यसनोरिति यो विकल्पः न दृङ्नश्चतुर्भ्य इतीट्प्रतिषेधः स्वेच्छयेन्दुरुदेष्यति सदा पूर्णमण्डलो नोङ्गमिष्यति दृग्गतौ ॥६॥ ज०म०.

रविरित्यादि । रविः सूर्यो निःशङ्कं यथा स्यात्तथा तप्स्यति द्योतिष्यते वायुः सततं गमनं करिष्यति वालगमनहिंसयोः ऋतुसङ्घातः षण्णामृतूनां मेलनं ममोद्याने निष्टप्तो भविष्यति दृतङ्नश्चत्वर्त्तने दृङ्नो नेम्पे इति दृम्निषेधः अतएव पं चन्द्र उदयं करिष्यति स्वेच्छया नतु ममेच्छया दृग् गतौ ॥६॥ भ०

तीव्रमित्यादि । मेघैस्तीव्रं अतिशयेन स्यन्दिष्यते पूर्वं रजः प्रशमनमात्रं दृष्टम् भावे लट् न दृङ्नः इतीट्प्रतिषेधो न भवति तत्र परस्मैपदमहणमनुवर्त्तते यमः उयं वर्त्तिष्यते रौद्रं चरिष्यति आत्मनेपदेनेट्प्रतिषेधः अतिकायस्य मरणे सति इन्द्रादयः किमन्यथा विपर्ययं न करिष्यन्ति किन्तु करिष्यन्तीति किं भविष्यति नान्यथेति पाठान्तरं तत्र सर्वमेतद्भविष्यतीत्यर्थः ॥ ७ ॥ ज० म०

तीव्रमित्यादि । मेघैस्तीव्रमतिशयं स्यन्दिष्यते वर्षिष्यते पूर्वं हि धूलिप्रशमनं यावदेव मत्पुरे दृष्टिरासीदिति भावः स्यन्दूङ् स्रुतौ भावे रूपं यम उयं वर्त्तिष्यते अतिकायस्य मरणे सर्वमिदं विपरीतं किं न भविष्यति किं करिष्यन्तीति पाठे इन्द्रादय इति शेषः ॥ ७ ॥ भ०

उन्मीलिष्यतीत्यादि । मे मम चक्षुर्दृथा निष्फलमुन्मीलिष्यति यद्यस्मात् विनयागतं विनीतं आत्मालाभोन्मुखं नम्रं ममनशीलं नरान्तकं पुत्रं न द्रक्ष्यति ॥ ८ ॥ ज० भ०

उन्मीलिष्यतीत्यादि । मम नेत्रं दृथा उन्मीलिष्यति मील निमिषे यद्य-

धिङ्मां त्रिशिरसा नाहं सन्दर्शिष्येऽद्य यत् पुनः ।
घानिष्यन्ते द्विषः केन तस्मिन् पञ्चत्वमागते ॥ ९ ॥
शत्रुभिर्निहते मत्ते द्रक्ष्येऽहं संयुगे सुखम् ।
युद्धोन्मत्ताद्विना शत्रून् समाक्रंत्स्यति को रणे ॥ १० ॥
आह्वास्यते विशङ्को मां योत्स्यमानः शतक्रतुः ।
प्रकल्प्स्यति च तस्यार्थो निकुम्भे दुर्हने हते ॥ ११ ॥

आह्विनयेनागतं आह्वालाभाय उन्मुखं नत्वं नरान्तकं न द्रक्ष्यति दृशिरौप्रेक्षे वर्ष्टोऽकिदिति कृद्रः शक्ऋाजिति षड् षढोः कः ॥ ८ ॥ भ०

धिङ्मामित्यादि । यत् त्रिशिरसा अद्य पुनरपि नाहं सन्दर्शिष्ये न दृष्टो भविष्यामि कर्मणि लट् चिण्वदिट् च तस्मिन् त्रिशिरसि पञ्चत्वमागते मृते द्विषः शत्रवः केन घानिष्यन्ते अत्रापि चिण्वदिट् च ॥ ९ ॥ ज० म०

धिङ्मामित्यादि । मां धिक् यस्मात् अद्य पुनरहं त्रिशिरसा दृष्टो न भविष्यामि हनमग्रहदृशच इति कर्मणि भिण् तस्मिन् त्रिशिरसि पञ्चत्वमागते मृते सति द्विषः केन हन्तव्याः पूर्ववन्भिण् पञ्चानां पृथक्त्वं पञ्चत्वम् ॥९॥ भ०

शत्रुभिरित्यादि । मत्ते मत्तनाम्नि शत्रुभिर्निहते तैरेव शत्रुभिः संयुगे सुखमहं द्रक्ष्ये द्रष्टव्योऽस्मि पूर्वं भयाद्दृष्टः अचिण्वद्भावपक्षे रूपम् तस्मै च आतर्युद्धोन्मत्ताद्विना रणे शत्रून् कः समाक्रंत्स्यति अभियास्यति स्कन्दिरगति-शोषणयोः खरि चेति चर्त्वम् ॥ १० ॥ ज० म०

शत्रुभिरित्यादि । मत्तनाम्नि राक्षसे शत्रुभिर्निहते सति तैरेव शत्रुभिः संग्रामे सुखं यथा स्यात्तथाहं द्रष्टव्यः पूर्वं तत्सान्निध्यात् अहं दुर्दर्श इति भावः युद्धोन्मत्तं राक्षसञ्च विना रणे कः शत्रून् समाक्रंत्स्यति शोषयिष्यति अभिभविष्यतीत्यर्थः स्कन्दिरौ शोषणगत्योः ॥ १० ॥ भ०

आह्वास्यत इत्यादि । शतक्रतुरिन्द्रः योत्स्यमानः युद्धं करिष्यन् विशङ्को निर्भयः मां युद्धायाह्वास्यते स्पर्द्धायामाङ् इत्यात्मनेपदं निकुम्भे दुर्हने दुःखेन हन्यत इति ईषदित्यादिना खल् तस्मिन् हते तस्य शतक्रतोरर्थः निष्कण्टक-राज्यलक्षणः प्रकल्प्स्यति सम्पत्स्यते ॥ ११ ॥ ज० म०

आह्वास्यत इत्यादि । शतक्रतुरिन्द्रो युद्धं करिष्यन् निःशङ्कं यथा स्यात्तथा मां युद्धार्थं आह्वास्यते स्पर्द्धायामाङ् इति मं युधेस्तीपमवत्स्यत्समानाविति समानः दुर्हने निकुम्भे हते सति तस्य शतक्रतोरर्थो निष्कण्टकराज्यलाभः

कल्पिष्यते हरेः प्रीतिर्लङ्का चोपहनिष्यते ।
देवान्तक त्वया त्यक्तो रिपोर्यास्यामि वश्यताम् ॥ १२ ॥
मरिष्यामि विजेष्ये वा हताश्चेत्तनया मम ।
हनिष्यामि रिपून् तूर्णं न जीविष्यामि दुःखितः ॥१३॥
स्रेष्यन्ते सुनयो देवाः कथयिष्यन्ति चानिशम् ।

प्रकल्प्यति सम्पत्स्यते क्रपूङ्क्वल्च कल्पने दृतादित्वात् मे इमोऽभावः क्रपक्लृपोऽक्रपादौ दुःखेन हन्यते इति ईषद्दुःसोरिति खल् प्राग्वद्नोण इत्यादौ दुर्व्वर्ज्जनान्न णत्वं केचित्तु णत्वमाङ्कस्तन्न साधु परेषामपि दुर इति णत्वप्रतिषेधकसूत्रदर्शनात् ॥ ११ ॥ भ०

कल्पिष्यत इत्यादि । शत्रुभिः कृत्स्नञ्च निपातितं श्रुत्वा हरेरिन्द्रस्य प्रीतिः कल्पिष्यते भविष्यति लुटि च क्लृप इति चकारात्सनोरपि परस्मैपदविकल्पः आत्मनेपदे च नेट् प्रतिषेधः लङ्का च शत्रुभिरुपहनिष्यते विलोप्यते कर्म्मणि लट् अचिण्णलावपत्तः हृञोः स्य इतीट् इह सुरैरागंस्यते भावे लट् ॥ १२ ॥ ज० म०

कल्पिष्यते इत्यादि । शत्रुभिर्निपातितं कृत्स्नं श्रुत्वा हरेरिन्द्रस्य प्रीतिः कल्पिष्यते भविष्यति दृतादित्वात् मे नेम्निषेधः शत्रुभिर्लङ्का च उपहनिष्यते मिणोऽभावपक्षे स्वस्वर्द्धन इति इम् कर्म्मणि रूपं इह लङ्कायां देवैरपि आगन्तव्यं यमरमनमातः मे स उत्यस्य परविषयत्वान्नेम् भावे रूपम् ॥१२॥ भ०

मरिष्यामीत्यादि । यदि मम तनयाः हताः तदा मरिष्यामि शत्रून् वा विजेष्ये म्रियतेर्लुङ्लिङोरिति नियमात्तङ् न भवति उत्तरत्र विपराभ्याञ्जेरिति तङ् ततो रिपून् तूर्णं हनिष्यामि पुनर्बन्धुं विनाकृतत्वात् दुःखितः सन् न जीविष्यामि ॥ १३ ॥ ज० म०

मरिष्यामीत्यादि । यदि तनया हतास्तदाहं मरिष्यामि म्रङ्नीढेरमिति नियमादन्यत्र परस्मैपदं स्वस्वर्द्धन इति इम् शत्रून् वा जेष्यामि विपराजिरिति नियमात् तूर्णं रिपुं हनिष्यामि अथवा बन्धुनाशात् दुःखितोऽहं न जीविष्यामि ॥ १३ ॥ भ०

स्रेष्यन्त इत्यादि । सुनयो हर्षात् स्रेष्यन्ते हसिष्यन्ति ङित्त्वात्तङ् देवा अनिशं कथयिष्यन्ति यथा दशग्रीवस्य दुर्नीतेर्दुर्नयस्य रक्षसां कुलं विनष्टम् ॥ १४ ॥ ज० म०

दशग्रीवस्य दुर्नीतैर्विनष्टं रक्षसां कुलम् ॥ १४ ॥
केन सम्भावितं तात कुम्भकर्णस्य राघवः।
रणे कर्त्स्यति गात्राणि मर्म्माणि च वितर्त्स्यति ॥ १५ ॥
पतिष्यति क्षितौ भानुः पृथिवी तोलयिष्यते।
नभस्वान् भङ्क्ष्यते व्योम मुष्टिभिस्ताडयिष्यते ॥ १६ ॥
इन्दोः स्यन्दिष्यते वह्निः समुच्छोष्यति सागरः।
जलं धक्ष्यति तिग्मांशोः स्यंत्स्यन्ति तमसाऽऽवृताः ॥१७॥

शोषयन्त इत्यादि। सुनयो हर्षात् शोषयन्ते शिङ् हसने देवाः सततं कथयिष्यन्ति किमित्याह दशग्रीवस्य दुर्नयै रक्षसां कुलं नष्टमिति प्राग्वन्नेण इत्यादौ दुर्व्वर्ज्जनान्न खत्वम् ॥ १४ ॥ भ०

केनेत्यादि। हे तातेति शोकात् बुद्धिस्थं पितरमभिमुखीकरोति केनैतत्सम्भावितं निश्चितं यत् कुम्भकर्णस्य गात्राणि रणे राघवः कर्त्स्यति छेत्स्यति कृती छेदने मर्म्माणि वितर्त्स्यति अपनेष्यति दृतृहिंसानादरयोः सिजित्यादिना इडिकल्पः ॥ १५ ॥ ज० भ०

केनेत्यादि। तातेति बुद्धिस्थं पितरं शोकात् सम्मुखीकरोति शोकोक्तिरियं केनैवं सम्भावितं यत् कुम्भकर्णस्य गात्राणि रणे राघवः कर्त्स्यति कृती-मपच्छिदि ऋतृकृदिति पञ्चेऽनिम् मर्म्माणि च तर्त्स्यति तृदुञ्धिनींदरे च चकारात् हिंसे पूर्ब्बवत् पञ्चे अनिम् ॥ १५ ॥ भ०

पतिष्यतीत्यादि। क्षितौ भूमौ भानुरादित्यः पतिष्यति अधो गमिष्यति पृथ्वी तोलयिष्यते ऊर्द्धं क्षिप्यते तुल उन्माने चुरादावदन्तेषु च पठ्यते कर्म्मणि लट् नभस्वान् वायुः काष्ठवद्भङ्क्ष्यते कर्म्मणि लट् मुष्टिभिर्व्योम ताडयिष्यते हनिष्यते ॥ १६ ॥ ज० भ०

पतिष्यतीत्यादि। भानुः सूर्य्यः क्षितौ पतिष्यति पृथिवी तोलयिष्यते तुलक्षुन्मितौ कर्म्मणि रूपं नभस्वान् वायुः काष्ठवत् भङ्क्ष्यते भनृजोर्धौ भोटने कर्म्मणि रूपं मुष्टिभिर्व्योम आकाशं ताडयिष्यतेऽन्येन तडकत्तिषि सम्भावितानि नेतानीत्यधिमवाक्येन सम्बन्धः यथैतत्सम्भाव्यं तथा कुम्भकर्णस्य रामेण हननमिति भावः ॥ १६ ॥ भ०

इन्दोरित्यादि। इन्दोः वह्निः स्यन्दिष्यते प्रक्षरिष्यति दृङ्गः स्यसनोरिति परस्मैपदविकल्पः सागरः समुच्छोष्यति शोषं यास्यति जलं धक्ष्यति भस्मसात्

कुम्भकर्णो रणे पुंसा क्रुद्धः परिभविष्यते ।
सम्भावितानि नैतानि कदाचित् केनचिज्जने ॥ १८ ॥
कुम्भकर्णे हते लङ्कामारोक्ष्यन्ति प्लवङ्गमाः ।
दङ्क्ष्यन्ति राक्षसान् दृप्ता भङ्क्ष्यन्ति च ममाश्रमान् ॥१९॥
चर्त्स्यन्ति बालवृद्धांश्च नर्त्स्यन्ति च मुदा युताः ।
तेन राक्षसमुख्येन विना तान् को निरोत्स्यति ॥ २० ॥

करिष्यति दह भस्मीकरणे होढः एकाचोवसोर्भवति तिग्मांशोरादित्यात्तमसां चयाः तमःसङ्घाः स्यंत्स्यन्ति स्यन्देः पूर्ववत्परस्मैपदविकल्पः न दृङ्ग्र इतीट्-प्रतिषेधः ॥ १७ ॥ ज० म०

इन्दोरित्यादि । चन्द्रादग्निः स्यन्दिष्यते स्यन्दूङ्वल्लक्षुतौ विच्चाहृतादिः श्रोषं गमिष्यति शुष्यौ ल श्रोषे सप्तम्यूर्वः जलं कर्ष धक्ष्यति दाहं करिष्यति दहौ दाहे दादेर्धः झभान्तस्येति धः तिग्मांशोः सूर्यात् अन्धकारचयाः स्यंत्स्यन्ति चरिष्यन्ति इतादित्वात् मे नेम् सम्भावितानि नैतानीत्यन्वयः ॥१७॥ भ०

कुम्भकर्णे इत्यादि । कुम्भकर्णो रणे क्रुद्धः सन् पुंसा परिभविष्यते कर्मणि लट् एतानि भानुपतनादीनि कुम्भकर्णपरिभवान्तानि जने लोके केन-चित् न सम्भावितानि न चिन्तितानि ॥ १८ ॥ ज० म०

कुम्भकर्णे इत्यादि । रणे क्रुद्धः कुम्भकर्णः अन्येन पुंसा परिभविष्यते जेतव्यः एतानि भानुपतनादीनि लोके कदाचिदपि केनचिन्न सम्भावितानि ॥१८॥ भ०

कुम्भकर्णे इत्यादि । कुम्भकर्णे इत्थं हते सति प्लवङ्गमाः लङ्कामारोक्ष्यन्ति आक्रमिष्यन्ति रूढवीजजन्मनि राक्षसान् दङ्क्ष्यन्ति दशनैः क्षेत्स्यन्ति दृप्ताश्च ममाश्रमान् गृहान् भङ्क्ष्यन्ति चूर्णयिष्यन्ति ॥ १९ ॥ ज० म०

कुम्भकर्णे इत्यादि । कुम्भकर्णे हते नष्टे सति प्लवङ्गमाः कपयो लङ्का-मारोक्ष्यन्ति लङ्कारूढा भविष्यन्ति आङ्पूर्वस्य रूढजन्मनि प्रादुर्भावे इत्यस्य रूपं होढः झषझसोरित्यादिना धस्य कः ते दृप्ता सन्तो राक्षसान् दङ्क्ष्यन्ति दन्तैश्च दंशने ममाश्रमांश्च भङ्क्ष्यन्ति भनुज भङ्गे ॥ १९ ॥ भ०

चर्त्स्यन्तीत्यादि । बालान् वृद्धांश्च चर्त्स्यन्ति व्यापादयिष्यन्ति चृती हिंसा-न्ययोरिति तौदादिकः मुदा हर्षेण युताः सन्तः नर्त्स्यन्ति नृती गात्रविक्षेपे सेधिटीत्यादिना विकल्पेनेट् तेन च राक्षसमुख्येन विना तान् को निरोत्स्यते निवारयिष्यति ॥ २० ॥ ज० म०

अमर्षी मे परः सीतां राघवः कामयिष्यते ।
च्युतराज्यात् सुखं तस्मात् किं किलासाववाप्स्यति ॥२१॥
मारयिष्यामि वैदेहीं खादयिष्यामि राक्षसैः ।
भूमौ वा निखनिष्यामि विध्वंसस्यास्य कारणम् ॥२२॥
नानुरोत्स्ये जगल्लक्ष्मीं घटिष्ये जीवितुं न वा ।
न रंस्ये विषयैः शून्ये भवने बान्धवैरहम् ॥ २३ ॥

चर्त्स्यन्तीत्यादि । प्लवङ्गमा वानरान् दृङ्श्च चर्त्स्यन्ति चृतश हिंसे न्तृङ्लृदिति पक्षे नेम् तर्त्स्यन्तीति पाठे त्रदधातो रूपं सदा हर्षेण युताः सन्तो नृत्यं करिष्यन्ति नृत्य वर्त्तने पूर्ववत् नेम् तेन राक्षसश्रेष्ठेन कुम्भकर्णेण विना कस्मान् वानरान् निवारयिष्यति रुधिर्धौ अजि आवृतौ ॥ २० ॥ भ०

अमर्ष इत्यादि । अमर्षः क्रोधः पर उत्कृष्टः मम यद्राघवः सीतां कामयिष्यते कर्म्मणि लृट् तदन्तादनवक्लृप्त्यमर्षयोरकिंवृत्तेपीति अमर्षे क्रोधे लृट् अन्यत्र च्युतराज्यात्तस्मात् रामादसौ सीता किङ्किल नाम सुखमवाप्स्यति तन्न सम्भावयामि किङ्किलास्त्यर्थेषु लृडिति अनवक्लृप्तावसम्भावनायां लृट् ॥२१॥ ज०म०

अमर्ष इत्यादि । मम अयं अपरोऽमर्षः कोपः राघवोऽपि सीतां कामयिष्यते कमुकङ्स्पृहि कम कान्ति इति जिङ् अन्यैश्चाश्रद्धामर्षे इति तौ च्युतराज्यात्तस्माद्रामात् असौ सीता किं सुखमवाप्स्यति न सम्भावयामि किङ्किलास्त्यर्थाभ्यां तौ ॥ २१ ॥ भ०

मारयिष्यामीत्यादि । अथवा अस्य सर्व्वस्य विध्वंसस्य विनाशस्य कारणं वैदेहीं मारयिष्यामि व्यापादयिष्यामि एतैर्वा राक्षसैः खादयिष्यामि भोजयिष्यामि गतिबुद्धीत्यादिना प्रत्यवसानार्थे कर्म्मसंज्ञायां प्राप्तायामदिखाद्योः प्रतिषेध इति कर्त्तृसंज्ञैव भवति भूमौ वा निखनिष्यामि ॥ २२ ॥ ज० म०

मारयिष्यामीत्यादि । अथवा अस्य विध्वंसस्य बन्धुनाशस्य कारणं सीतामेव मारयिष्यामि राक्षसैर्वा तां खादयिष्यामि घोऽञौजेरित्यादौ अखादनीत्युक्तेर्न प्रयोज्यस्य कर्म्मत्वं भूमौ वा निखनिष्यामि गर्त्ते वा स्थापयिष्यामि ॥२२॥ भ०

नानुरोत्स्य इत्यादि । जगल्लक्ष्मीं नानुरोत्स्ये न कामयिष्ये अनोरुधिः कामे जीवितुं वा न घटिष्ये प्रयत्नं न करिष्यामि तस्माद्भवने बान्धवैः शून्ये विषयैः शब्दादिभिर्न रंस्ये न क्रीडां करिष्ये ॥ २३ ॥ ज० म०

नानुरोत्स्य इत्यादि । जगल्लक्ष्मीं नाहं अनुरोत्स्ये न वाञ्छिष्यामि अमौ-

मोदिष्ये कस्य सौख्येऽहं को मे मोदिष्यते सुखे ।
आदेयाः किं कृते भोगाः कुम्भकर्ण त्वया विना ॥ २४ ॥
या सुहृत्सु विपन्नेषु मामुपैष्यन्ति सम्पदः ।
ताः किं मन्युप्लुता भोगा न विपत्सु विपत्तयः ॥ २५ ॥
विनङ्क्ष्यति पुरी क्षिप्रं तूर्णमेष्यन्ति वानराः ।
असन्धित्सोस्तवेत्येतद्विभीषणसुभाषितम् ॥ २६ ॥

रुधङ्योकामे न वा जीवितं घटिष्ये बान्धवैः शून्ये रक्षिते भवने गृहे विषयैरुपरसादिभिरहं न रंस्ये न क्रीडिष्यामि रसुङ्जौ क्रीडे ॥ २३ ॥ भ०

मोदिष्य इत्यादि । हे कुम्भकर्ण त्वया विना कस्य सौख्ये अहं मोदिष्ये हर्षिष्ये न कस्यचित् मम वा सुखे सति को मोदिष्यते हृष्टो भविष्यति न कश्चिदपि किं कृते किं निमित्तं परभोगा आदेयाः आदातव्याः ॥२४॥ ज० म०

मोदिष्य इत्यादि । हे कुम्भकर्ण त्वया विना कस्य सौख्ये अहं हर्षं करिष्यामि मे मम वा सुखे को हृष्टो भविष्यति किं कृते कस्य निमित्तं परसम्बन्धिनो भोगा मया आदेया ग्राह्याः ॥ २४ ॥ भ०

तदेव दर्शयन्नाह

या इत्यादि । सुहृत्सु स्निग्धेषु विपन्नेषु याः सम्पदो विभूतयः समुद्देष्यन्ति निष्पत्स्यन्ते ताः मन्युप्लुता भोगाः शोकैः खण्डिता भोगाः किं विपत्सु न विपत्तयः क्षतक्षारसंस्थानीया भवन्तीति ॥ २५ ॥ ज० म०

या इत्यादि । सुहृत्सु विपन्नेषु मृतेषु याः सम्पदो मामुपैष्यन्ति उपागमिष्यन्ति ताः सम्पदः किं विपत्सु मध्ये विपत्तितुल्या न भवन्ति अपितु भवन्त्येव मन्युप्लुता शोकेन क्षताः खण्डिता आभोगा विस्तारा यासाम् ॥ २५ ॥ भ०

विनङ्क्ष्यतीत्यादि । असन्धित्सोः रामेण सन्धानमनिच्छोः क्षिप्रमेषा पुरी लङ्का विनङ्क्ष्यति भग्नजिनशोरिति हेतुम् ततः तूर्णं वानरास्तां समेष्यन्ति उभयत्रापि क्षिप्रवचने लृट् तदेतद्विभीषणभाषितं सर्वसुपपन्नं मन्त्रं निर्णीयते नोक्तम् सन्धानमेवास्तु परैरित्यादिना ॥ २६ ॥ ज० म०

विनङ्क्ष्यतीत्यादि । असन्धित्सो रामेण सह सन्धिं कर्तुमनिच्छोस्तव पुरी लङ्का क्षिप्रं विनङ्क्ष्यति नुनृधोसुचां नशेति नुम् विनङ्क्ष्यन्ति पुरीमिति पाठे अन्तर्भूतञ्यर्थात् वानरा विनाशयन्तीत्यर्थः वानरास्तां तूर्णं नयिष्यन्ति

अर्थेन संभृता राज्ञा न भाविष्यामहे वयम् ।
संयोत्स्यामह इत्येतत्प्रहस्तेन च भाषितम् ॥ २७ ॥
मानुषो नाम पत्काषी राजानं पुरुषाशिनाम् ।
योधयिष्यति संग्रामे दिव्यास्त्ररथदुर्जयम् ॥ २८ ॥
संनत्साम्यथवा योद्धुं न कोष्ठे हीनसत्ववत् ।
अद्य तर्पयन्ति मांसादा भूः पास्यत्यरिशोणितम् ॥२९॥

इत्येतत् विभीषणस्य वचनं शोभनमेव मन्त्रनिर्णये तेनोक्तं सन्धानमेवास्तु परैरेत्यादि ॥ २६ ॥ भ०

अर्थेनेत्यादि । राज्ञा वयमर्थेन भृताः ततो न भाविष्यामहे किमत्र युक्तमिति एतत्प्रहस्तेन भाषितं तच्च तथैव सम्पादितम् स्म शब्दोऽत्र निपातः यद्यपीदृशं मन्त्रनिर्णये प्रहस्तेन नोक्तं सन्धानमेवास्तु परैरित्यादिना तथापि विभीषणवचनादनुमीयते तेनाप्ययमर्थोऽभ्युपगत इति रावण एवमाह तथाच विभीषणवचनम् युद्धाय राज्ञा सुभृतैरित्यादि ॥ २७ ॥ ज० स०

अर्थेनेत्यादि । अर्थेन धनेन संभृताः पोषिताः अतो न वक्ष्यामः सन्धिमित्यर्थात् परं किन्तु युद्धं करिष्याम इत्येतत् प्रहस्तेनाप्युक्तं युद्धाय राज्ञा सुभृतैर्भवद्भिरिति विभीषणवचनस्य प्रायुपदर्शितत्वात् प्रहस्तेनापि विभीषणवचनमङ्गीकृतमिति भावः परमिति किन्त्वर्थेऽव्ययम् ॥ २७ ॥ भ०

मानुष इत्यादि । मामेवं दुर्जयं मानुषो नाम पत्काषी पादाभ्यां गमनशीलः पदातिः सन् ष्मिकाषिकृतिषु चेति पादस्य पदादेशः पुरुषाशिनां रक्षसां राजानं दिव्यास्त्ररथतया दुर्जयं दुरभिभवनीयं योधयिष्यति ॥ २८ ॥ ज० म०

मानुष इत्यादि। पत्काषी पदातिः सन् मानुषो रामः संग्रामे दिव्येनास्त्रेण रथेन च दुर्जयं दुर्गमं राक्षसानां राजानं योधयिष्यतीति नाम कुत्सितमित्यर्थः नामेति प्राकाश्यसम्भावनाक्रोधाभ्युपगमकुत्सनेष्वव्ययं पादाभ्यां काषितं गन्तुं शीलमस्येति ष्णिन् पादस्य पदादेश इति परः स्वमते पच्छब्दात् कषेर्ण्यन्तादिचाणिन् युधेर्ऊग्रन्तात् कर्म्मान्नार्थेऽञित्यादिना रूपम् ॥ २८ ॥ भ०

एवं बहुधा विलप्य जातामर्षः पुनराह

सन्नत्स्यामीत्यादि । सत्वहीनवत् सत्वेन हीन इव योद्धुं सन्नत्स्यामि सन्नाहं करिष्येऽहमिति वाशब्दोऽत्र किं इत्येऽप्यर्थे लिङपवादो लृट् नहोधः खरिचत्वं ततश्चाद्यास्मिन्नहनि मांसादाः क्रव्यादाः तर्पयन्ति तृप्ता भविष्यन्ति अदोऽन्न इति

आकर्ष्यामि यशः शत्रूनपनेष्यामि कर्म्मणा ।
अनुभाविष्यते शोको मैथिल्याद्य पतिक्षयात् ॥ ३० ॥
मन्नूयिष्यति यक्षेन्द्रो वल्गूयिष्यति नो यमः ।
ग्लास्यन्त्यपतिपुत्राश्च वने वानरयोषितः ॥ ३१ ॥
सुखं स्वप्स्यन्ति रक्षांसि भ्रमिष्यन्ति च निर्भयम् ।
न विक्रोक्ष्यन्ति राक्षस्यो नरांश्चात्यन्ति हर्षिताः ॥ ३२ ॥

विटि प्राप्ते वासरूपविधिना उणपि भवति भूस्वाङ्क्तानामरीणां शोणितं पास्यति श्येने लट् ॥ २९ ॥ ज० म०

संनत्स्यामीत्यादि । अथवा योद्धुमहं सन्नाहं करिष्यामि नहोधङ् क्षीनसत्ववत् न च कोष्ठे कुङ्शब्दे नेमेकाजिति नेम् अद्य मांसादा ग्टघ्नादयस्तृप्ता भविष्यन्ति जिलटश्च चकारात् प्रीणने रधादित्वात् वेम् भूस्वारीणां रक्तं पास्यति ॥ २९ ॥ भ०

आकर्ष्यामीत्यादि । सर्व्वयोद्धृणां यश आकर्ष्यामि आहरिष्यामि शत्रूंश्च कर्म्मणा युद्धाख्येनापचेष्यामि न्यूनयिष्यामि अद्य पतिक्षयात्पतिविनाशात् शोको मैथिल्या सीतया अनुभाविष्यते संवेदयिष्यते कर्म्मणि लट् चिण्वदिट्॥३०॥ज०म०

आकर्ष्यामीत्यादि । शत्रूणां यश आकर्ष्यामि हरिष्यामि क्षपौत्वाक्षिवद्रौङ्किदिति रक्ष पात्त्विकत्वं कर्म्मणा युद्धेन शत्रून् अपनेष्यामि दूरीकरिष्यामि अपचेष्यामीति पाठे न्यूनीकरिष्यामीत्यर्थः अद्य पतिनाशात् सीतया शोकोऽनुभवितव्यः हनग्रहश्च इति भिण् ॥ ३० ॥ भ०

मन्नूयिष्यतीत्यादि । यक्षेन्द्रो धनदः दाशरथिमापन्नं श्रुत्वा मन्नूयिष्यति दुर्मना भविष्यति, यमश्च न वल्गूयिष्यति हृष्टमना न भविष्यति मन्तुवल्गुशब्दाभ्यां कण्ड्वादिभ्यो यक् तदन्तात् लट् वने वानरयोषितः अपतिपुत्राः सत्यः ग्लास्यन्ति ग्लानिं यास्यन्ति ॥ ३१ ॥ ज० म०

मन्नूयिष्यतीत्यादि । यक्षेन्द्रः कुबेरो मन्नूयिष्यति मन्तुञ रोषणवैमनस्ययोः अपराधे चेति चन्द्रादयः तं करोतीति कण्ड्वादित्वात् यः कण्ड्वादीनां लिङ्गत्वं धातुत्वञ्चेति टीकाकृद्भिरुक्तं धातुपक्षे स्वार्थे य इति च यमो वल्गूयिष्यति शोभनो नो भविष्यति दौर्म्मनस्यात् वल्गु पूजामाधुर्य्ययोः कण्ड्वादिः वानराणां योषितश्च पतिपुत्ररहिताः सत्यो वने ग्लास्यन्ति ग्लै क्लमे ॥३१॥ भ०

सुखमित्यादि । रक्षांसि चैतानि सुखं स्वप्स्यन्ति निर्भयञ्च भ्रमिष्यन्ति

प्राङ्मुहूर्त्तात् प्रभातेऽहं भविष्यामि ध्रुवं सुखी ।
आगामिनि ततः काले यो द्वितीयः क्षणोऽपरः ॥ ३३ ॥
तत्र जेतुं गमिष्यामि त्रिदशेन्द्रं सहामरम् ।
ततः परेण भूयोऽपि लङ्कामेष्याम्यमत्सरः ॥ ३४ ॥

राक्षसश्च न विक्रोश्यन्ति न क्रन्दिष्यन्ति क्रुश आह्वाने रोदने च हर्षिताश्च सत्यो नरानत्स्यन्ति भक्षयिष्यन्ति ॥ ३२ ॥ ज० म०

सुखमित्यादि । ततो रक्षांसि सुखं शयिष्यन्ते ष्वपौ ष्वलुञ्जिश्ये निर्मयञ्च भमिष्यन्ति भ्रस्युजण चाले क्रमिष्यन्तीति क्वचित्पाठः राक्षसो न क्रन्दिष्यन्ति क्रुशजौ रोदने ह्रतौ हृष्टा सत्यो नरांश्च भक्षयिष्यन्ति अदौ भोक्ष्ये हृषुहृष्यञ्जि दरहृष्टौ क्तः वारुषमन्यूषेति पाक्षिक इम् मूर्धीष्टषेत्यादौ सेमोर्णुरित्यस्य योग-विभागात् हर्षार्थे गुणः किंवा हर्षो जात आसामिति इतोऽस्य जाते इति इतः अन्ये तु नाक्तावत्वोर्हृषधोर्द्वान्नि विस्मये प्रतिघाते च रोमहर्षार्थे गुणश्चेत्याहुः हर्षिता मत्पराक्रमेण विस्मिता इत्यर्थ इति विद्यासागरस्तन्न साधु तत्र गुणा-भावात् ॥ ३२ ॥ भ०

प्रागित्यादि । योऽयमागामी प्रभातकालः मुहूर्त्तद्वयसम्मितः तस्मिंस्तस्येति षष्ठीसप्तम्योरभेदात् यो द्वितीयो मुहूर्त्तः तस्मात् प्राक् प्रथमे मुहूर्त्ते अहमवश्यं सुखीभविष्यामि तदानीं हतशत्रुत्वात् ततः प्रभातादागामी यः कालः क्षणद्वय-सम्मितः तस्मिन्नागामिनि काले यो द्वितीयः तस्माद्यदपरक्षणः पूर्वः तत्रेति वक्ष्यमाणेन सम्बन्धः ॥ ३३ ॥ ज० म०

प्राङ्मुहूर्त्तादित्यादि । प्रभाते प्रातःकाले मुहूर्त्तत्रयात्मके तृतीयमुहूर्त्तात् प्राक् प्रथममुहूर्त्तद्वये अहमवश्यं सुखीभविष्यामि तदानीमेव शत्रुहननात् ततः प्रभातादागामिनि काले क्षणद्वयात्मकद्वितीयक्षणात्परः पूर्वक्षणस्तत्र जेतुं गमि-ष्यामीति वक्ष्यमाणेन सम्बन्धः ॥ ३३ ॥ भ०

तत्रेत्यादि । तत्र क्षणे त्रिदशेन्द्रं सहामरं देवैः सहितं जेतुं द्रुतं गमि-ष्यामि प्राक् मुहूर्त्तात् सुखी भविष्यामि क्षणाद्यदपरं तत्र जेतुं गमिष्यामीति कालविभागे वा अहोरात्राणामिति अनद्यतनवत् प्रत्ययप्रतिषेधे लट् तत्र हि नानद्यतनवदिति मर्य्यादावचने परस्मिन्निति चानुवर्त्तते तत्र जेतुं कालमर्य्यादा-विभागे सति योऽपर आद्यंशविभागः तत्र भविष्यति काले अनद्यतनवत् प्रत्यय-

युग्मकम् ।

तमेवंवादिनं मूढमिन्द्रजित् समुपागतः ।
युयुत्सिष्येऽहमित्येवं वदन् रिपुभयङ्करः ॥ ३५ ॥
नाभिज्ञा ते महाराज जेष्यावः शक्रपालितम् ।
दृप्तदेवगणाकीर्णमावां सह सुरालयम् ॥ ३६ ॥
नाभिज्ञा ते सयक्षेन्द्रं भङ्क्ष्यावो यद्यमं बलात् ।
रत्नानि चाहरिष्यावः प्राप्स्यावश्च पुरीमिमाम् ॥ ३७ ॥

विधिर्न भवति ततो लट्प्रतिषेधाल्लृडेव भवति ततः परेणेति यस्मिन्नागामिनि काले शक्रं जेतुं गमिष्यामि तत्र द्वितीयो यः क्षणस्तस्मात् परेणोपरिष्टात्तं शक्रं जित्वा भूयोऽपि लङ्कामेष्यामि आङ्पूर्व्वस्येणो रूपं अमत्सरो विगतक्रोधः सन् अपरस्मिन् विभाषेत्यनेन विभाषालुट्प्रतिषेधाल्लृट् तत्र हि कालविभागे सति भविष्यति काले परस्मिन् विभाषा अनद्यतनवत्प्रत्ययात्प्रत्ययविधिर्न भवतीत्युक्तम् ॥ ३४ ॥ ज० म०

तत्रेत्यादि । तस्मिन् क्षणे सहामरं देवैः सहितं त्रिदशेन्द्रं शक्रं जेतुं गमिष्यामि गेर्धोरणेधिन इनि इणवर्ज्जनात् आदिगेचोरिति त्रिः ॥ ३४ ॥ भ०

तमित्यादि । तं रावणं मूढत्वादेवंवादिनं एवंभाषणशीलं इन्द्रजित् रिपोर्भयङ्करः समुपागतः युयुत्सिष्येऽहं योद्धुमिच्छां करिष्यामीति ब्रुवन् ॥ ३५ ॥ ज० म०

तमित्यादि । एवंवादिनं शोकान्मूढं रावणं रिपूणां भयङ्कर इन्द्रजित् समुपागतः किं कुर्व्वन् इत्येवं वदन् किं वदन्नित्याह अहं योद्धुमिच्छां करिष्यामि युधधोः सन् ॥ ३५ ॥ भ०

तेन सह योद्धुमिच्छामीति चेदाह

नाभिज्ञेत्यादि । हे महाराज ते तव नाभिज्ञा स्मृतिः सुरालयं शक्रेण पालितं दृप्तैश्च देवगणैराकीर्णं व्याप्तम् आवां द्वावपि सह संभूय जेष्यावः जितवन्तौ अभिज्ञावचने लट् तत्र भूतानद्यतन इति वर्त्तते ॥ ३६ ॥ ज० म०

नाभिज्ञा ते इत्यादि । हे महाराज तवाभिज्ञा स्मृतिर्नास्ति आवां त्वञ्च अहञ्च सम्भूय इन्द्रेण पालितं दृप्तेन देवगणेन व्याप्तं सुरालयं स्वर्गं जितवन्तौ स्मर्यं स्मर्यदित्यतीत इति तौ ॥ ३६ ॥ भ०

नाभिज्ञेत्यादि । न सेत्यभिज्ञास्ति सयक्षेन्द्रं धनदसहितं यमं बलात् सामर्थ्येन आवां भङ्क्ष्यावः भग्नवन्तौ रत्नानि च ताभ्यां बलादाहरिष्यावः हृत्वा च

एष पेक्ष्याम्यरीन् भूयो न शोचिष्यसि रावण ।
जगद्रक्ष्यसि नीराममवगाहिष्यसे दिशः ॥ ३८ ॥
सहभृत्यः सुरावासे भयं भूयो विधास्यसि ।
प्रणंस्यत्यद्य देवेन्द्रस्त्वां वक्ष्यति स सन्नतिम् ॥ ३९ ॥
भेष्यते मुनिभिस्त्वत्तस्त्वमधिष्ठास्यसि द्विषः ।
ज्ञास्येऽहमद्य संग्रामे समस्तैः शूरमानिभिः ॥ ४० ॥

पुरीं लङ्कां प्राप्तावः विभाषासाकाङ्क्ष इति लट् लक्षणयोः सम्बन्धे प्रयोक्तुराकाङ्क्षा तत्र भङ्गनं लक्षणं रत्नाद्याहरणञ्च लक्ष्यम् ॥ ३७ ॥ ज० म०

नाभिज्ञा त इत्यादि । तव नाभिज्ञा स्मृतिर्नास्ति यत् सयक्षेन्द्रं कुबेरसहितं यमं बलादावां भग्नवन्तौ भनक्तोर्धौ मोटने तत्सम्बन्धीनि रत्नानि च हृतवन्तौ इमां लङ्कापुरीं प्राप्तवन्तौ च वानेकस्मार्थे इति भूते तौ ॥ ३७ ॥ भ०

एष इत्यादि । एषोऽहं भूयः पुनररीन् पेक्ष्यामि चूर्णयिष्यामि वर्त्तमानसामीप्ये वर्त्तमानिकप्रत्ययस्य विकल्पेन विधानात् लडेव भवति येन हे रावण न शोचिष्यसि शोकं न करिष्यसि भविष्यति लट् जगत् नीरामं रामरहितं द्रक्ष्यसि दिशश्च सर्वा अवगाहिष्यसे व्याप्स्यसि ॥ ३८ ॥ ज० म०

एष इत्यादि । एषोऽहं तव अरीन् चूर्णयिष्यामि धौषिष्ल चूर्णने वर्त्तमानसामीप्यविवक्षयात्र तौ हे रावण भूयस्त्वं न शोकं करिष्यसि शुच शोके जगद्रामशून्यं द्रक्ष्यसि निर्भयः सन् दिशोऽवगाहिष्यसे ॥ ३८ ॥ भ०

सहेत्यादि । भृत्यैः सह सुरावासे स्वर्गे भूयो भयं विधास्यसि करिष्यसि देवेन्द्रश्च त्वां प्रणंस्यति त्वदीयोऽहमिति निवेदयिष्यति वक्ष्यति च सन्नतिं भणिष्यति च नमस्कारम् ॥ ३९ ॥ ज० म०

सहभृत्य इत्यादि । भृत्यैः सहितस्त्वं सुराणामावासे स्वर्गे भूयः पुनरपि भयं जनयिष्यसि शक्रोऽपि त्वां भूयो नमस्करिष्यति भवङ्गयात् सन्नतिं निरहङ्कारतां वक्ष्यति वक्ष्यौ प्रापणे धारणेऽपि दृश्यत इति श्रीपतिः नतिं नमस्कारं वक्ष्यति वदिष्यति वदो रूपमिति केचित् ॥ ३९ ॥ भ०

भेष्यत इत्यादि । मुनिभिस्त्वत्तो भेष्यते भीतैर्भवितव्यं भावे लट् त्वमधिष्ठास्यसि द्विषः शत्रून् परिभविष्यसि अधिशीङिति कर्म्मसंज्ञा यादृशश्चाहं तादृशः संग्रामे ज्ञाते भविष्यामि कर्म्मणि लट् कैः समस्तैः शूरमानिभिः वयं शूरा इत्यात्मानं मन्यमानैः आत्ममाने खश ॥ ४० ॥ ज० म०

ज्ञायिष्यन्ते मया चाद्य वीरमन्या द्विषद्गणाः ।
गूहिष्यामि क्षितिं क्षत्तैरद्य गात्रैर्वनौकसाम् ॥ ४१ ॥
आरोक्ष्यामि युगान्तवारिदघटासङ्घट्टधीरध्वनिं
निर्यास्यन् रथमुच्छ्रितध्वजधनुःखड्गप्रभाभासुरम् ।

भेषज्यत इत्यादि । त्वत्तो मुनिभिर्भयं प्राप्यते जिभीलि भीत्यां भावे रूपं त्वं द्विषः शत्रून् अधिष्ठास्यसि तेषु प्रभुर्भविष्यसीत्यर्थः कर्मक्रियेत्यादिना डस्य ढत्वं गीक इति षत्वं अद्य संग्रामे समस्तैः शूरमान्यैरहं ज्ञातो भविष्यामि कर्मणि ती आत्मानं शूरं मन्यत इति णिन्निति परमते तु यङ्लुगादित्वात् णिन् अयं मननार्थो-ऽभिधानात् किंवा शूरसम्बन्धि मानो विद्यते येषामिति नैकाजादीनि ॥ ४० ॥ भ०

ज्ञायिष्यन्त इत्यादि । एते च द्विषां गणाः शत्रुसंघाः वीरमन्याः अद्य मया ज्ञायिष्यन्ते परिच्छेत्स्यन्ते यादृशा इति कर्मणि लट् चिखदिट् वनौकसां कपीनां गात्रैः छिन्नैरद्य क्षितिं गूहिष्यामि संवरिष्यामि ॥ ४१ ॥ ज० म०

ज्ञायिष्यन्त इत्यादि । मयापि वीरमात्मानं मन्यमाना द्विषद्गणा ज्ञातव्याः हनग्रहदृश इति भिण् यनञ्णिदिति यन् मन्यात्स्वार्थे इति मन् क्षत्तैश्छिन्नैः कपीनां गात्रैरद्य भूमिश्छाद्यिष्यामि गुहू संवृतौ गुहोणौरूः ॥ ४१ ॥ भ०

आरोक्ष्यामीत्यादि । अतोऽहं रथमारोक्ष्यामि निर्यास्यन् इतो निर्गच्छन् आरोक्ष्यामीति क्रियायां क्रियार्थायामुपपदे निर्यास्यन्निति लट् शेषे चेति चकारात्कृट् कीदृशं रथं युगान्ते प्रलयकाले या वारिदघटास्तासां यः संघट्टः परस्पर-संमर्दः तस्येव धीरो गम्भीरो ध्वनिर्यस्य रथस्य उच्छ्रिता ध्वजाः धनूंषि च यत्र खड्गप्रभाभिश्च भासनशीलो यः यस्यादिश्येषणसमासः उच्छ्रितानां वा ध्वजादीनां प्रभाभिर्भासुर इति योज्यम् विकीर्णा इतस्ततो विच्छिन्नाः शकृणाः छिन्नाः विमुखाः छिन्नमस्तकाः पराङ्मुखा व्यापन्ना मृताः शत्रवो यस्मिन् रथे तस्मिन् क्रव्याशिनः शृगालादीन् क्रोशतः फूत्कुर्वतः अद्य श्रोष्यसि कीदृशान् शृगालान् शोणितमांसोपयोगात् शोणितेन शोणानि लोहितानि तत एव भीषणानि भयङ्कराणि मुखानि येषामिति शॄस्वृदिति निष्ठानत्वस्यासिद्धत्वात् चोः कुत्वे शकृण इति ॥ ४२ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे स्खलितं तृतीयः परिच्छेदः ।

काव्यस्य रावणविलापो नाम षोडशः सर्गः ।

श्रोष्यस्यद्य विकीर्णदृक्षविमुखव्यापन्नशत्रौ रणे
दृप्ताञ्छोणितशोणभीषणमुखान् क्रव्याशिनः क्रोशतः॥४२॥

इति भट्टिकाव्ये तिङन्तकाण्डे लृङ्लिलसितो नाम
षोडशः सर्गः ।

आरोक्ष्यामीत्यादि । इतो निर्यास्यन् निर्गमिष्यन्नहं रथमारोक्ष्यामि रथौ जन्यां कीदृशं रथं युगान्ते प्रलये यावारिदघटा मेघपङ्क्तयस्तासां संघट्टः परस्परसम्बन्धस्तस्येव धीरो गम्भीरो ध्वनिर्यस्य उच्छ्रितानां ध्वजादीनां प्रभाभिर्भासनशीलं त्वमपि अद्य क्रोशतः शब्दं कुर्वाणान् क्रव्याशिनः शृगालादीन् श्रोष्यसि कीदृशान् रणे दृप्तान् शोणितेन शोणानि रक्तानि अतएव भीषणानि भयङ्कराणि मुखानि येषां रणे कीदृशे विकीर्णा विच्छिन्ना दृक्षाश्चिन्ना विमुखाः पराङ्मुखाः व्यापन्ना मृताश्च शत्रवो यत्र इत्येवं वदन्निति सम्बन्धः ॥ ४२ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां
सुग्धबोधिन्यां भट्टिटीकायां रावणविलापो नाम
षोडशः सर्गः ।

सप्तदशः सर्गः ।

आशासत ततः शान्तिमस्त्रैरग्नीनहावयन् ।
विप्रानवाचयन् योधाः प्राकुर्वन्मङ्गलानि च ॥ १ ॥
अपूजयन् कुलश्रेष्ठानुपागूहन्त बालकान् ।

इतः प्रभृति लङ्मधिकृत्य विलम्बितमाह तत्र भूतानद्यतने लङ् ततोऽन्यत्र दर्शयिष्यति

आशासतेत्यादि । ततः प्रतिज्ञानन्तरं योधाः इन्द्रजित्सम्बन्धिन इत्यर्थात् उपद्रवपरिहारार्थं शान्तिमाशासत अभीष्टवन्तः आङः शासु इच्छायामित्मनुदात्तेत् आत्मनेपदेष्वन्यतरस्यामित्यदादेशः शान्तिञ्च दर्शयन्नाह अस्नुः स्नाताः स्नाथौचे आत इत्यधिकृत्य लङः शाकटायनस्यैवेति झेर्जुस् अस्य पदान्तादिति पररूपं अग्नीनहावयन् अग्निकर्म्म कारितवन्तः विप्रानवाचयन् स्वस्तिवाचनं कारितवन्तः मङ्गलानि मङ्गलयुक्तानि कर्म्माणि कृतवन्तः ॥ १ ॥ ज० म०

अथ धीमधिकृत्योच्यते पाणिनिना अस्यालङिति संसिद्धो लङ् भूतानद्यतन इत्युक्ता अन्यत्रापि प्रयोगत इति तद्व्यभिचारमाङ्गरन्ये स्वमते भवद्भूतभव्येष्वित्र इति भूतसामान्ये घ्यादय उक्ताः किञ्च स्मृर्थैरित्यर्यादित्यतीते इत्यत्र घ्यपवादोऽयमित्युक्तवतां परेषां भूतानद्यतनपरोक्षत्वादौ लङादिविधानमप्युद्भङ्गितम्

आशासतेत्यादि । तत इन्द्रजित्प्रतिज्ञानन्तरं योधाः कुशलार्थं शान्तिमभीष्टवन्तः आङ्पूर्व्वास्तु शसिङशासुनङङशि स्मृता शास्त्रलङ् अनेकार्थत्वादिच्छायामपि लुगङ्गप्रोऽपः मान्तोऽदन्ततः शान्तिं दर्शयति अस्नुः स्नानं चक्रुः स्नाङ्शौधने द्विषविदातोऽनुस्वा उस्वेचीत्यालोपः अग्नीन् अहावयन् होमं कारितवन्तः ह्वलि होमेऽदने जिः विप्रान् अवाचयन् स्वस्तिवाचनं कारितवन्तः मङ्गलानि दध्यक्षतानि प्राकुर्वन् प्रस्तुतानि चक्रुः तनूभ्यः गुप्गुणः क्रजोऽङ्गौरे ॥ १ ॥ भ०

स्त्रीः समावर्द्धयन् साक्षाः कार्य्याणि प्रादिशंस्तथा ॥ २ ॥
आच्छादयन् व्यलिम्पंश्च प्राश्नन्नथ सुरामिषम् ।
प्रापिवन्मधुमाध्वीकं भक्ष्यांश्चादन् यथेप्सितान् ॥ ३ ॥
न्यश्यन् शस्त्राण्यभीष्टानि समनह्यंश्च वर्म्मभिः ।

अपूजयन्नित्यादि । कुलज्येष्ठान् वृद्धानपूजयन् पूजितवन्तः पादप्रतनादिना बालकानुपागूहन्न आश्लिष्टवन्तः गतानां किं भविष्यतीति साक्षाः स्त्रीः योषितः वार्शसोरितीयङभावपक्षे रूपम् समावर्द्धयन् ताम्बूलादिना संवर्द्धितवन्तः प्रातिपदिकाङ्गात्वर्थे इति णिच् तथा कार्य्याणि गृहकार्य्याणि प्रादिशन् निर्दिष्टवन्तः इदमिदं कार्य्यमिति ॥ २ ॥ ज० म०

अपूजयन्नित्यादि । योधाः कुलश्रेष्ठान् वृद्धान् पूजितवन्तः पूजकपूजे बालकानाश्लिष्टवन्तः पतिनाशशङ्कया साक्षा रोदनान्विताः स्त्रियः समवर्द्धयन् आश्वासितवन्तः इदं कर्त्तव्यमिति कार्य्याणि प्रदिष्टवन्तः दिशेस्तुदादित्वात् दिवसुतुदेति शः अपिदृश डित्वाट्टेरणाभावः ॥ २ ॥ भ०

आच्छादयन्नित्यादि । आच्छादयन् वस्त्राणि पिनद्धवन्तः छदृ संवरणे चुरादिः व्यलिम्पंश्च समालिप्तवन्तः लिप उपदेहे तेसचादीनामिति नुम् न क्व्यप्रगानिति नुत्वं पूर्व्वस्यानुनासिकः अथानन्तरं सुरामिषं प्राश्नन् अभ्यवहृतवन्तः मधुना माध्वीकं मध्वासवं प्रापिवन् सुष्ठु पीतवन्तः भक्ष्यांश्च खण्डपायसादीन् यथेप्सितमदन् भक्षितवन्तः अदित्यनुदात्तौ अदः सर्व्वेषामित्यप्रत्ययः ॥ ३ ॥ ज० म०

आच्छादयन्नित्यादि । योधा आच्छादयन् वस्त्राणि परिहितवन्तः छदृ किञ्संदृतौ व्यलिम्पन् अङ्गरागं चक्रुः लिपो शपञ् लेपे सुचादित्वान्नुण् अनन्तरं सुराणामामिषञ्च भक्षितवन्तः अशगृभोजने क्र्यादित्वात् आद्योरालोप्योऽणौ मधु माध्वीकं मद्यविशेषं पीतवन्तः पा पाने घे शप्रे स्थादानेति पिब लोपोऽतोऽदेचोः यथेप्सितान् भक्ष्यान् खण्डादीन् भक्षितवन्तः अदृ भक्षे ॥ ३ ॥ भ०

न्यश्यन्नित्यादि । अभीष्टानि यथानुभावितानि शस्त्राणि न्यश्यन् तेजितवन्तः श्यतनूकरणे श्योतःश्यनोर्लोपः वर्म्मभिश्च कवचैः समनह्यन् संनद्धाः शरीराण्याहृतवन्त इत्यर्थः सुयानानि शोभनयानानि अध्यासत आरूढाः अधिशीङितिकर्म्मसंज्ञा तथा द्विषद्भिरोऽयन् आक्रुष्टवन्तः पापाः का यास्यथेति लोपश्रुङितित्यादिना सम्प्रदानसंज्ञा ॥ ४ ॥ ज० म०

अध्यासत सुयानानि द्विषद्भश्चाशपंस्तथा ॥ ४ ॥
अपूजयंश्चतुर्वक्त्रं विप्रानार्च्चंस्तथास्तुवन् ।
समालिषत शक्रारिर्यानञ्चाभ्यलषद्वरम् ॥ ५ ॥
आसुञ्चद्वर्म्म रत्नाढ्यमबध्नात् खड्गमुज्ज्वलम् ।
अध्यास्त स्यन्दनं घोरं प्रावर्त्तत ततः पुरः ॥ ६ ॥
आघ्नन् भेरीर्म्महास्वानाः कम्बूंश्चाप्यधमन् शुभान् ।

न्यश्यन्नित्यादि । योधा अभीष्टानि शस्त्राणि न्यश्यन् शितानि चक्रुः शोयनिशाने दिवादित्वात् श्यन् यन्योतृशमादीति ओकारलोपः वर्म्मभिः करणैः सन्नहनं शरीराच्छादनं चक्रुः नह्यञौ बन्धे दिवादिः शोभनानि यानानि अध्यासत कर्म्मक्रियेत्यादिना डस्य ढत्वं द्विषद्भ्रोऽशपन् शपौज् क्रोशे यस्य दित्येति सम्प्रदानत्वम् ॥ ४ ॥ भ०

अपूजयन्नित्यादि । चतुर्वक्त्रं ब्रह्माणमपूजयन् अर्च्चितवन्तः विप्रानर्च्चन् दाननमस्कारादिना पूजितवन्तः तथा अस्तुवन् परस्परं स्तुतवन्तः शक्रारिश्च इन्द्रजित् समालिषत समालिप्तवान् यानं वरसुत्कृष्टमभ्यलषत् अभीष्टवान् वाभ्राश्येत्यादिना श्यनो विकल्पितत्वात् पक्षे शप् ॥ ५ ॥ ज० म०

अपूजयन्नित्यादि । योधाश्चतुर्वक्त्रं ब्रह्माणं पूजितवन्तः विप्रान् अर्च्चितवन्तः अर्च्च चकारात् पूजे तथास्तुवन्तः ष्टुञलस्तुतौ अभ्योरित्युव शक्रारिरिन्द्रजिदङ्गानि लिप्तवान् वरसुत्कृष्टं यानमिच्छति स्म लसञजलसजस्यृहि क्रमक्लमेत्यादिना श्यनो विभाषितत्वात् पक्षे शप् ॥ ५ ॥ भ०

आसुञ्चदित्यादि । रत्नाढ्यं रत्नप्रत्युप्तं वर्म्म कवचमासुञ्चत् शरीरे आसक्तवान् पिनद्धवानित्यर्थः खड्गञ्चोज्ज्वलमबध्नात् कक्षपार्श्वाश्रितं कृतवान् घोरं भीषणं स्यन्दनमध्यास्त आरूढः ततोऽनन्तरं पुरः पुरतः प्रावर्त्तत प्रवृत्तः ॥ ६ ॥ ज० म०

आसुञ्चदित्यादि । इन्द्रजिद्रत्नव्याप्तं वर्म्म कवचं आसुञ्चत् पिन्हितवान् सुञ्चल्लशपञौ मोक्षे आङ्पूर्व्वः परिधाने वर्त्तते तुण्राधो सुचामिति तुण् उत्तमं खड्गं पार्श्वे बद्धवान् बन्धौगन्धनक् बन्धे क्रादित्वात् श्ना अपिद्वस्व क्ङित्त्वात् हसुङ्लोपः घोरं भीषणं रथमध्यास्त आरूढः ततोऽनन्तरं शत्रूणां पुरतः प्रवृत्तः ॥ ६ ॥ भ०

अताडयन् मृदङ्गांश्च भेराश्चापूरयन् कलाः ॥ ७ ॥
अस्तुवन् वन्दिनः शब्दानन्योन्यञ्चोदभावयन् ।
अनदन् सिंहनादांश्च प्राद्रेकत हयद्विपम् ॥ ८ ॥
अनिमित्तान्यथापश्यन्नस्फुटद्रविमण्डलम् ।
औच्चन् शोणितमम्भोदा वायवोऽवान् सुदुःसहाः ॥ ९ ॥

आनद्धित्यादि । तस्मात् प्रदत्ताः महास्वनाः महानादाः स्वनहृषोर्वेत्यप् भेरीः आनद्धं ताडितवन्तः वादका इत्यर्थात् शुभान् सुस्वरान् कम्बून् शंखानधमन् शब्दितवन्तः पाध्मेत्यादिना धमादेशः मृदङ्गांश्चाताडयन् आहतवन्तः ताड आघात इति चुरादिः ॥ ७ ॥ ज० म०

आनद्धित्यादि । तस्मिन् प्रदत्ते वाद्यकारा महानादा भेरीराहतवन्तः हनूलौ बधे गतौ आङ्पूर्व्वत्वादाघाते शोभनान् शङ्खान् अधमन् वादितवन्तः ध्मा अग्नियुतौ ध्वनौ स्यादानमेति धमादेशः मृदङ्गांस्ताडितवन्तः तडकद्विषि आहताः कला अव्यक्तमधुरस्वराः भेरा वाद्यविशेषाः पूरितवन्तः पूरकच चकारात् पूर्त्तौ ॥ ७ ॥ भ०

अस्तुवन्नित्यादि । वन्दिनः स्तुतिपाठका अस्तुवन् जय जीवेत्यादिना स्तुतिं कृतवन्तः अन्योन्यं अन्यस्य अन्यस्य च शब्दात् संज्ञायां नामानि उदभावयन् उद्घाटितवन्तः सैनिका इत्यर्थात् सिंहनादांश्चानदन् शब्दितवन्तः हयद्विपं पशुद्वन्द्वस्य विभाषैकवत् प्राद्रेकत शब्दितवत् द्रेकशब्दोत्साह इत्यनुदात्तेत् ॥ ८ ॥ ज० म०

अस्तुवन्नित्यादि । वन्दिनः स्तुतिपाठका इन्द्रजितमस्तुवन् जयशब्दं चक्रुः अन्योन्यं नामानि उद्घापितवन्तः अमुकस्त्वमीदृगित्युक्तवन्त इत्यर्थः सिंहनादं चक्रुः सैनिका इत्यर्थात् हयद्विपं गतिं चक्रे हयश्च द्विपश्चेति समाहारः द्रेष्टङ् सर्पणे पाणिनीयास्तु हे धधातुरनेकार्थत्वादव्यक्तशब्देऽपि तेन प्राद्रेषत अव्यक्तं शब्दं चकारेत्याङ्ः प्राद्रेकतेति पाठे द्रेकप्रेङ्खनोत्साहे औच्चल्यमिति क्षीरस्वामी उत्साहो दृढ्रिरिति चन्द्रः ॥ ८ ॥ भ०

'अनिमित्तानीत्यादि । अनिमित्तानि कुत्सितनिमित्तानि नजत्र कुत्सायां गच्छन्तोऽपश्यत् दृष्टवन्तः तानि दर्शयति रविमण्डमस्फुटत् स्फुटितं अम्भोदाः शोणितमौच्चन् दृष्टाः उच्चसेचने वायवः सुदुःसहाः प्रचण्डा अवान् वान्ति स्म शाकटायनमतादन्यत्र उषादेशः ॥ ९ ॥ ज० म०

अनिमित्तानीत्यादि । अथानन्तरं इन्द्रजित्प्रभृतयो निन्दितानि निमि-

आर्च्छन् वामं मृगाः कृष्णाः शस्त्राणां व्यस्मरन् भटाः ।
रक्तं न्यष्ठीवदक्लाम्यदखिद्यद्वाजिकुञ्जरम् ॥ १० ॥
न तानगणयन् सर्वानास्कन्दंश्च रिपून् द्विषः ।
अच्छिन्दन्नसिभिस्तीक्ष्णैरभिन्दंस्तोमरैस्तथा ॥ ११ ॥

तानि अपश्यन् स्यादानमेति दृशेः पश्य कृत्वायामत्व नञ् यदुक्तं तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता । अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्त्तिता इति. अनिमित्तानि दर्शयति रविमण्डलं स्फुटितं विदीर्णं स्फुटश्च विकाशे मेघा रक्तं वर्षन्ति स्म उल्लसिभि दुःसहा वायवो वान्ति स्म बालगमनहिंसयोः द्विषविदातोऽनुसर्वेत्यस्याप्रवृत्तिपक्षे रूपम् ॥ ९ ॥ भ०

आर्च्छन्नित्यादि । निर्गच्छतां वामपार्श्वं कृष्णवृगा आर्च्छन् गताः अर्त्तेः पात्रेति कृच्छादेशः कृच्छ्रगताविति क्ष्यस्य वा रूपं भटाश्च शस्त्राणां व्यस्मरन् विस्मृतवन्तः अधीगर्थेति कर्म्मणि षष्ठी वाजिकुञ्जरमखिन्नमश्रान्तमपि रक्तं न्यष्ठीवत् ष्ठिवुनिरसन इति भौवादिकस्य ग्रहणं ष्ठिवुक्लमाचमांशितीति दीर्घः अक्लाम्यत् क्लान्तञ्च ॥ १० ॥ ज० म०

आर्च्छन्नित्यादि । कृष्णा वृगा वामं पार्श्वं गताः कृ प्रापणे च चकारादृत्यां स्यादानप्राप्तेति कृच्छादेशः कृच्छ्र मूर्त्तौ गमनमोहयोरित्यस्य वा रूपं भटा योधाः शस्त्राणां विस्मृतवन्तः कर्म्मणि षष्ठी वाजिनश्च कुञ्जराश्च वाजिकुञ्जरं रक्तं न्यष्ठीवत् प्रच्छादितवत् ष्ठिवुष्ठिव्यष्ठीवनिरासे भ्वाद्यादिष्णु इत्यादौ ष्ठिववर्ज्जनान्न धत्वं ष्ठिवुक्लमाचम इति दीर्घः अक्लाम्यत् क्लान्तञ्चाभवत् जिक्लिश्यक्लमुभिर्ग्लानौ श्यमादित्वात् दीर्घः अखिद्यत् खिन्नञ्चाभवत् खिदज्यधौ दैन्यके अखिद्यदपि अश्रान्तमपि रक्तं न्यष्ठीवदक्लाम्यच्चेति वा योज्यम् ॥ १० ॥ भ०

न तानित्यादि । तान् सर्वानशुभान्नागणयन् नाहतवन्तः किमेतैरिति अपित्तु रिपूनास्कन्दन् अभिगतवन्तः द्विषो राक्षसास्तीक्ष्णैरसिभिररीनच्छिन्दन् छिन्नवन्तः तथा तोमरैस्तीक्ष्णैरभिन्दन् विदारितवन्तः ॥ ११ ॥ ज० म०

न तानित्यादि । द्विषो राक्षसास्तान् सर्वान् पूर्व्वोक्तान् रविमण्डलविदारणादीनशुभान् नागणयन् अवज्ञातवन्तः किमेभिः कार्य्यमिति भावः अपित्वभिगतवन्तश्च पुनरसिभिश्छिन्नवन्तः रिपूनित्यर्थात् छिदेरधादित्वात् श्नु नश्नो नेऽणावपीति अकाररहितत्वं तथा तोमरैर्विदारितवन्तः भिदेः पूर्ब्ववत् यन् ॥ ११ ॥ भ०

न्यकृन्तंश्चक्रधाराभिरतुदन् शक्तिभिर्दृढम् ।
भल्लैरविध्यन्नुग्राग्रैरतृंहंस्तोमरैरलम् ॥ १२ ॥
आस्यन् प्लवङ्गमा वृक्षानधूर्वन् भूधरैर्भृशम् ।
अहिंसन् मुष्टिभिः क्रोधाददशन्दशनैरपि ॥ १३ ॥
प्रादुन्वन् जानुभिस्तूर्णमतुदंस्तलकूर्परैः ।
प्राहिण्वन्नरिमुक्तानि शस्त्राणि विविधानि च ॥ १४ ॥

न्यकृन्नित्यादि । चक्रधाराभिः न्यकृन्तन् छिन्नवन्तः सुचादित्वान्नुम् शक्तिभिश्च दृढमत्यर्थमतुदन् व्यथितवन्तः भल्लैरविध्यन् ताडितवन्तः अहिंस्येति रूपसारणं उग्राग्रैस्तीक्ष्णाग्रैस्तोमरैरलं पर्याप्तमतृंहन् हतवन्तः तृह हिंसायां रुधादित्वात् श्नम् अलोपानुस्वारौ ॥ १२ ॥ ज० म०

न्यकृन्नित्यादि । राक्षसाश्चक्रधाराभिर्न्यकृन्तन् । क्रतौशपच्छिदि सुचादित्वात् नुन् शक्तिभिर्दृढं व्यथयामासुः तुदशजौ व्यथे उग्राग्रैर्निशिताग्रैर्भल्लैरविध्यन् व्यधौ ताडने दिवादित्वात् श्यन् व्यपिद्रश डित्त्वात् अहखपाद्योरिति जिः अलमत्यर्थं तोमरैर्हिंसितवन्तः तृहधृदनुभूशहिंसे रुधादित्वात् नश् नशोनेऽशौ अतृंहन् स्थूलपट्टिशैरिति क्वचित् पाठः पट्टिशो लौहदण्डो यस्तीक्ष्णधारः क्षुरोपम इति वैजयन्ती ॥ १२ ॥ भ०

आस्यन्नित्यादि । प्लवङ्गमा अपि वृक्षानास्यन् क्षिप्तवन्तः असु क्षेपणे तथा भूधरैः पर्वतैरधून्वन् कृतवन्तः उपधायाश्चेदि दीर्घः क्रोधान्मुष्टिभिरहिंसन् ताडितवन्तः दशनैर्दन्तैरदशन् खादितवन्तः दन्शसनजखनजांशपीत्यनुनासिकलोपः ॥ १३ ॥ ज० म०

आस्यन्नित्यादि । वानरा वृक्षान् आस्यन् क्षिप्तवन्तः अस्यतेर्लृटि पर्वतैर्हिंसितवन्तः धुर्विहिंसैर्व्यनचतयीति दीर्घः क्रोधात् मुष्टिभिरहिंसन् हिरधिकिहिंसे रुधादित्वात् श्नम् नशोनलोप इति हृदनुबन्धजातनकारस्य लोपः ततो नशोनेऽशौ दन्तैः खादितवन्तः दन्शौ दंशने सनजदन्शखनजखनजोऽपि न लोपः ॥ १३ ॥ भ०

प्रादुन्वन्नित्यादि । जानुभिस्तूर्णं प्रादुन्वन् पीडितवन्तः टुदु उपतापे स्वादितलकूर्परैः हस्ततलैः प्रकोष्ठैश्चातुदन् व्यथितवन्तः अरिभिर्मुक्तानि विविधानि यानि शस्त्राणि तानि प्राहिण्वन् प्रक्षितवन्तः ॥ १४ ॥ ज० म०

प्रादुन्वन्नित्यादि । जानुभिः प्रादुन्वन् पीडितवन्तः द्रोदुनदुनोपतापे

अटणेट् शक्रजिच्छत्रूनभ्राभ्यच्च समन्ततः ।
अध्वनच्च महाघोरं न च काञ्चन नादुनोत् ॥ १५ ॥
नाजानन् सन्दधानन्तं धनुर्नैच्छन्त बिभ्रतम् ।
नेषूनचेतन्नस्यन्तं हतास्तेनाविदुर्द्विषः ॥ १६ ॥
अभ्रश्यन्नन्यतः शब्दं प्रपलायन्त चान्यतः ।

स्वादित्वात् भ्रुध्वारिति वत्वं तलैश्चपेटैः कूर्परैः कफोणिभिश्चातुदन् तुदश्च व्यधे अनुदन्निति पाठे नुदश्च प्रेरणे तलञ्चाधः स्वरूपे च रूङ्कुष्टिचपेटयोरिति विश्वः स्यात् कफोणिस्तु कूर्पर इत्यमरः अरिभिर्निशाचरैर्यानि शस्त्राणि मुक्तानि तानि पुनस्तेभ्य एव प्रहितवन्तः ह्निनबर्द्धने गतौ प्राग्वत्नोण इति णत्वम् ॥ १४ ॥ भ०

अटणेडित्यादि । ततः शक्रजिदिन्द्रजित् शत्रूनटणेट् हिंसितवान् टहेः अम् तस्य टणह अम् हलङ्ग्रादिलोपः हकारस्य टत्वजस्त्वचर्त्वानि समन्तत्याभ्याम्यत् भ्रान्तवान् महाघोरञ्च भीषणं स्वनं अध्वनत् नादितवान् नच काञ्चन नादुनोत् काञ्चिदपि न नोपतापितवान् अपितु सर्व्वानपि पीडितवानित्यर्थः ॥ १५ ॥ ज० म०

अटणेडित्यादि । इन्द्रजित् अरीन् हिंसितवान् टहधुटनुभुश हिंसे रुधादित्वान्नण् टहदृणद्भिरिति दृन हस्वङ्ग्रादिसेरिति दिलोपः होढः समन्तात् सर्व्वतो भ्राम्यति स्म भ्रामः शमादित्वात् दीर्घः महाघोरं ध्वनिञ्च न नादुनोदिति न किन्तु पीडितवान् ॥ १५ ॥ भ०

नाजानन्नित्यादि । धनुषि शरं सन्दधानमारोपयन्तमिन्द्रजितं नाजानन् न ज्ञातवन्तः धनुर्बिभ्रतं नैच्छन्न धनुर्द्धारयन्तं न दृष्टवन्तः इषून् शरानस्यन्तं क्षिपन्तं नाचेतन् हस्तलाघवात् न ज्ञातवन्तः चिती संज्ञाने ङमो ह्रस्वादिति ङसुट् तेन हताः सन्तो द्विषः अविदुः ज्ञातवन्तः पूर्व्वोक्तं शिजभ्यस्तस्तदिभ्यस्त्रेति रोर्जुस् ॥ १६ ॥ ज० म०

नाजानन्नित्यादि । धनुर्द्धिं शरं सन्दधानमारोपयन्तं तमिन्द्रजितं योधा न ज्ञातवन्तः ज्ञागप्रोष्णे स्यादानपाज्ञेति जादेशः धनुर्बिभ्रतं धारयन्तं तं न दृदृशुः इषून् बाणान् अस्यन्तं क्षिपन्तं अज्ञातवन्तः चिती ज्ञाने सर्व्वत्र हस्तलाघवं हेतुः केवलं तेन हताः सन्तो द्विषः ऋपयः पूर्व्वोक्तं ज्ञातवन्तः विदल मतौ द्विषविदास इति अनु उसः ॥ १६ ॥ भ०

आक्रन्दमन्यतोऽकुर्व्वंस्तेनाहन्यन्त चान्यतः ॥ १७ ॥
प्रालोठन्त व्यभिद्यन्त परितो रक्तमस्रवन् ।
पर्य्यश्राम्यन्नतृष्यंश्च क्षतास्तेनाक्रियन्त च ॥ १८ ॥
सौमित्रिराकुलस्तस्मिन् ब्रह्मास्त्रं सर्व्वरक्षसाम् ।
निधनायाजुहवत्तं व्यष्टभाद्रघुनन्दनः ॥ १९ ॥

अश्रण्वन्नित्यादि । अन्यतः अन्यस्मिन् प्रदेशे केचिद्विषः आक्रन्दन् शब्दमश्रण्वन् श्रुवः श्रुचेति श्रुभावः श्नुप्रत्ययश्च अन्यतः अन्यत्र स्थिताः प्रपलायन्त पलायिता अन्यतोऽन्यत्र प्रदेशे स्थिताः आक्रन्दं अकुर्व्वन् रोदनं कृतवन्तः अन्यतोऽन्यत्र तेनेन्द्रजिता अहन्यन्त व्यापादिताः कर्म्मणि लङ् सर्व्वत्राद्यादित्वान्न श्निः ॥ १७ ॥ ज० म०

अश्रण्वन्नित्यादि । केचित् द्विषोऽन्यतोऽन्यस्मिन् देशे तस्य शब्दं श्रुतवन्तः श्रोशृणेर इति शृजिश्चोरिति सामान्योक्तत्वात् श्रुगताविति भौवादिकस्य श्रुन गतौ श्रुताविति स्वादिपठितस्य च ग्रहणं श्रवणार्थकोऽपि पाणिनिप्रभृतिभिर्भ्वादौ पठ्यते भ्वादिपाठवचनात् भवतीत्यपि स्वादिति टीकाकृतः अन्यत्र च पलायिताः अन्यत्र स्थिता रोदनञ्चक्रुः तेनेन्द्रजिता चान्यत् हताः तस्तेरिति सप्तम्यां तस् ॥ १७ ॥ भ०

प्रालोठन्नेत्यादि । तेन क्षताः सन्तः केचिद्भूमौ प्रालोठन्त लुठ लोठने भुवीतस्ततो व्यभिद्यन्त व्यनीयन्त हताः सन्त इतस्ततो नीताः कर्म्मणि लङ् परितः समन्ताद्रक्तमस्रवन् सुक्तवन्तः पर्य्यश्राम्यन् खिन्नाः अतृष्यन् पिपासिताः दिवादित्वात् श्यन् केचिदक्रियन्त क्रियतेर्लुङश्चेति तङ् ॥ १८ ॥ ज० म०

प्रालोठन्नेत्यादि । तेनेन्द्रजिता क्षताः केचित् भूमौ प्रालोठन्त लुलुठङ् प्रातिपाते व्यभिद्यन्त भिदेः कर्म्मणि रूपं परितः समन्तात् रक्तञ्च स्रुक्तवन्तः पर्य्यश्राम्यन् परिश्रान्ताः असुभ्यञ्च इत्युपः खेदयोः श्रमादित्वाद्दीर्घः अतृष्यन् पिपासिताः अक्रियन्त हताः लुङ्टीढेत्रमम् ॥ १८ ॥ भ०

सौमित्रिरित्यादि । तस्मिन् इन्द्रजिति तथाभूते सति सौमित्रिराकुलो व्यग्रचित्तः सर्व्वरक्षसां निधनाय ब्रह्मास्त्रमाजुहवत् आह्वातमैच्छत् अभ्यस्तस्य चेति अभ्यस्ताकारस्य ह्वयतेः प्रागेव द्विर्व्वचनात् सम्प्रसारणं तञ्च सौमित्रिं रघुनन्दनो रामः व्यष्टभात् निवारितवान् मा भूदिभीषणस्यापि नाश इति स्तुभ स्तुम्भित्यादिना आप्रत्ययः स्तम्भेरिति मूर्द्धन्यः ॥ १९ ॥ ज० म०

ततो मायामयीं सीतां घ्नन् खड्गेन वियद्गतः ।
अदृश्यतेन्द्रजिद्वाक्यमवदत्तं मरुत्सुतः ॥ २० ॥
मापराभ्नोदियं किञ्चिद्भ्रश्यत् पत्युरन्तिकात् ।
सीतां राक्षस मास्मैनां निग्टह्णाः पाप दुःखिताम् ॥ २१ ॥
पीडाकरमिमित्राणां कर्त्तव्यमिति शक्रजित् ।
अब्रवीत् खड्गहस्तश्च तस्या मूर्द्धानमच्छिनत् ॥ २२ ॥

सौमित्रिरित्यादि । तस्मिन्निन्द्रजिति अर्थात्तथाभूते सति सौमित्रिर्लक्ष्मण आकुलः सन् सर्व्वेषां रक्षसां निधनाय ब्रह्मास्त्रं आङ्गातमैच्छत् ह्वोदेर्जिः घौ-ऽञ्चनिङ्गमां तं सौमित्रिं रामो निवारितवान् विभीषणनाशभयात् स्तम्भुसौवः स्वादिः गीक इत्यादिना षत्वम् ॥ १९ ॥ भ०

तत इत्यादि । ततोऽनन्तरं इन्द्रजित् वियद्गतः आकाशगतः सीतां माया-मयीं मायानिर्म्मितां खड्गेन घ्नन् व्यापादयन्नदृश्यत दृष्टः कर्म्मणि लङ् तथाभूतं राक्षसं मरुत्सुतो हनूमान् वाक्यमवदत् भाषितवान् ॥ २० ॥ ज० म०

तत इत्यादि । तदनन्तरमाकाशगतो मायानिर्म्मितां सीतां खड्गेन मारय-न्निन्द्रजिद्दृष्टो हनूमतेत्यर्थात् कर्म्मणि रूपं तं तथाभूतं मरुत्सुतो हनूमान् वाक्यमवदत् ॥ २० ॥ भ०

मापराभ्नोदित्यादि । हे पाप राक्षस सीता पत्युरन्तिकाद्भ्रश्यत् अपगता इयं भवतो नापराभ्नोत् नापराद्धा राधसाधर्संसिद्धाविति स्वादौ तस्मादेनां दुःखितां मास्म निग्टह्णाः मा बधीः क्ष्नोत्तरेलङ् चेति वर्त्तमाने लङ्॥२१॥ज०म०

मापराभ्नोदित्यादि । हे पाप राक्षस इयं सीता पत्युरन्तिकात् अभ्रश्यत् अपगता न किञ्चिदपराधं चकार राभ्नौयसिद्धौ भ्रन्शिर्य्यु अधःपाते तस्मादेनां दुःखितां मास्म निग्टह्णाः मा बधीः मास्मेन घीह्यौ ॥ २१ ॥ भ०

पीडकरमित्यादि । इयमपराद्धा भवतु न वा सर्व्वथा यदमित्राणां पीडा-करं तदवश्यं कर्त्तव्यमिति शक्रजिदब्रवीत् उक्तवान् खड्गहस्तश्च हस्तः खड्गो येन प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवतः तस्या मूर्द्धानमच्छिनत् छिन्नवान् तियो-ऽलङ्ग्रादिलोपः दकारस्य चर्त्वम् ॥ २२ ॥ ज० म०

पीडाकरमित्यादि । अमित्राणां पीडाकरं कर्म्म अवश्यं कर्त्तव्यमित्यनप-राधाया अप्यस्या बधो युक्त इत्यर्थः इति इन्द्रजिदब्रवीत् मूलजुक्तौ मिश्रश्लेष

यत्कृतेऽरीन् व्यगच्छीम समुद्रमतराम च ।
सा हृतेति वदन् रामसुपातिष्ठन्मरुत्सुतः ॥ २३ ॥
ततः प्रामुह्यतां वीरौ राघवावाक्रतां तथा ।
उष्णञ्च प्राणितां दीर्घमुच्चैर्व्याक्रोशतां तथा ॥ २४ ॥
तावभ्यागत पौलस्त्यो मास्म प्ररुदितं युवाम् ।
ध्रुवं स मोहयित्वास्मान् मायोऽगच्छन्निकुम्भिलाम् ॥२५॥

ध्रुवं इतीम् सुकृष्टः खड्गो येन तादृशः सन् तस्या मूर्द्धानं छिन्नवान् प्रहरणस्यो-भयथेति परनिपातः खमतेऽभिधानं नियामकम् ॥ २२ ॥ भ०

यत्कृत इत्यादि । यस्याः कृते यन्निमित्तं परान् अशोकवनिकास्थितान् व्यगच्छीम विगृह्णीतवन्तः नित्यङित इति लङि उत्तमस्य लोपः समुद्रं चातराम तीर्णवन्तः अतो दीर्घोधञीति दीर्घः सा सीता हृतेति वदन्मरुत्सुतः रामसुपा-तिष्ठत् ढौकितवान् अत्र यमुना गङ्गासुपतिष्ठत इत्येवं सङ्गतकरणं उपश्लेषो नास्तीति अपाहेवपूजेत्यादिना तङ् न भवति ॥ २३ ॥ ज० म०

यत्कृत इत्यादि । यस्याः सीतायाः कृते निमित्ते वयं शत्रून् निगृह्णीतवन्तः समुद्रमुत्तीर्णवन्तश्च सा सीता हृता इति वदन् मरुत्सुतो रामं उपस्थितवान् मैत्राध्वसङ्गाराधे इत्यत्र सङ्ग उपश्लेषः स नास्तीति न मम् ॥ २३ ॥ भ०

तत इत्यादि । ततो हनूमद्वचनानन्तरं राघवौ वीरौ प्रामुह्यतां मोहं गतौ अथाक्रतां क्रन्दितवन्तौ रुशब्दे ततो दृद्भिर्न भवति तत्रापि सार्वधातुक इत्यनुवर्त्तते तथा दीर्घमुष्णञ्च प्राणितां निश्वसितवन्तौ अन प्राणने रुदादिभ्यः सार्वधातुक इतीट् तथा उच्चैराक्रोशतां हा सीतेति आहूतवन्तौ ॥२४॥ ज०म०

तत इत्यादि । हनूमतो वचनानन्तरं वीरौ रामलक्ष्मणौ मोहं जग्मतुः मुह्यलजि वैचित्ते तथा अरुतां क्रन्दितवन्तौ रुलभ्यनौ दीर्घमुष्णञ्च प्राणितां निश्वसितवन्तौ अनचलु प्राणने रुद्भ्यो योऽहसस्तेम् प्राग्वद्दीर्घः उच्चैर्व्याक्रोशतां हा सीतेत्याहूतवन्तौ क्रुशजौ वादेर्हतौ ॥ २४ ॥ भ०

तावित्यादि । पौलस्त्यो विभीषण आगत्य तौ तथाभूतावभाषत उक्तवान् युवां मास्म प्ररुदितं मा रोदिष्टं स्मोत्तरे लङ्चेति लङ् यतो ध्रुवमवश्यं स इन्द्रजित्मायः अस्मान् मोहयित्वा मायया विमोह्य कुहेरकर्म्मकत्वाद्गतिबुद्धी-त्यादिना कर्म्मसंज्ञा निकुम्भिलामग्निगृहमगच्छत् गतवान् तत्र भूतानद्यतन एव लङ् ॥ २५ ॥ ज० म०

मास्म तिष्ठत तत्रस्थो वध्योऽसावद्भुतानलः ।
अस्ते ब्रह्मशिरस्युग्रे स्यन्दने चानुपार्ज्जिते ॥ २६ ॥
ब्रह्मादधाद्वधं तस्य तस्मिन् कर्म्मण्यसंस्थिते ।
प्रायच्छदाज्ञां सौमित्रेर्यूथपानाञ्च राघवः ॥ २७ ॥
तां प्रत्यैच्छन् सुसंप्रीतास्ततस्ते सविभीषणाः ।

तावित्यादि । पौलस्त्यो विभीषणस्तौ राघवावूचवान् युवां रोदनं न कुरुतं स पाप इन्द्रजित् निश्चितं अस्मान् मोहयित्वा निकुम्भिलां यज्ञस्थानविशेषं, गतवान् सुहेरकर्म्मकत्वात्तयोज्यस्य कर्म्मत्वम् ॥ २५ ॥ भ०

मास्मेत्यादि । तास्म तिष्ठत मा विलम्बध्वं गच्छत स्मोत्तरे लङ् यतस्तत्रस्थो निकुम्भिलास्थोऽसावद्भुतानलः अद्भुताग्निकार्य्यो बध्यः शक्यो हन्तुं शकि लिङ् चेति चकारात् लङ् क्रियातिपत्तीति वचनात् लङ् क्रियातिपत्तीति वचनात् हनो बधेति उपसंख्यानाद्यत् कथमद्भुतानलो बध्य इति चेत् अस्ते ब्रह्मशिरसि ब्रह्मशिरोनाम्नि उग्रे दुष्प्रयोगे स्यन्दने च अनुपार्ज्जितेऽप्राप्ते सति ॥२६॥ ज० म०

मास्मेत्यादि । यूयं मा तिष्ठत न विलम्बध्वं यतस्तत्रस्थोऽसौ इन्द्रजित् अद्भुतानलोऽक्षतयज्ञ एव बध्यः कथमित्याह ब्रह्मशिरोनाम्नि उग्रे दुःसहे अस्ते स्यन्दने रथे च अनुपार्ज्जिते अप्राप्ते सति तदुभयप्राप्तेरबध्यः स्यादिति भावः ॥ २६ ॥ भ०

कथमुभयं तेनोपार्ज्जित इत्याह

ब्रह्मेत्यादि । यतस्तस्यां निकुम्भिलायां कर्म्मण्यसंस्थिते असमाप्ते ब्रह्मा बधं तस्मादधात् धारितवान् उक्तवानित्यर्थः स्त्रौद्विर्व्वचनं एवं विभीषणवचः श्रुत्वा राघवः सौमित्रेर्यूथपानाञ्च गन्तुमाज्ञां प्रायच्छत् दत्तवान् दानदाने पाघ्रादिना यच्छादेशः ॥ २७ ॥ ज० म०

ब्रह्मेत्यादि । तस्मान्निकुम्भिलायां तस्मिन् होमकर्म्मणि असंस्थिते अप्राप्ते सति तस्य मेघनादस्य बधं ब्रह्मा आहितवानुक्तवानित्यर्थः डुधाञ्धारणे पुष्टौ ह्लादीरेद्विः इति विभीषणवचः श्रुत्वा इन्द्रजिद्बधार्थं रामो लक्ष्मण कपियूथपानाञ्च सुग्रीवादीनाज्ञाञ्च दत्तवान् सम्बन्धे षष्ठी दानदाने स्यादानमेति यच्छादेशः दानोऽनुहोत्यादिनिरासार्थं नानुबन्धस्य पूर्व्याचार्य्यकृतत्वात् स्तुते तथा व्यवहृतम् ॥ २७ ॥ भ०

निकुम्भिलां समभ्यायन्नरुध्यन्त च राक्षसैः ॥ २८ ॥
दिक्पालैः कदनं तत्र सेने प्राकुरुतां महत् ।
ऐतां रक्षांसि निर्जित्य दूरं पौलस्त्यलक्ष्मणौ ॥ २९ ॥
तत्रेन्द्रजितमैक्षेतां कृतधिष्ण्यं समाहितम् ।
सोऽजुहोत् कृष्णवर्त्मानमामनन्मन्त्रमुत्तमम् ॥ ३० ॥
अध्यायच्छुक्रजिद्ब्रह्म समाधेरचलन्न च ।

तामित्यादि । ततस्ते सविभीषणाः सुसंप्रीतास्तामाज्ञां प्रत्यैच्छन् प्रतीष्टवन्तः प्रतिगृहीतवन्तः इषु इच्छायां इषुगमियमां छः ते च निकुम्भिलां समभ्यायन् समभिगताः अयगतौ तत्र च ये दिक्पालाः राक्षसाः तैररुध्यन्त रुद्धाः प्रवेष्टुं पन्थानं न लब्धवन्तः कर्मणि लङ् ॥ २८ ॥ ज० भ०

तामित्यादि । ततोऽनन्तरं विभीषणसहितास्ते लक्ष्मणादयः सुसम्प्रीताः सन्तः तामाज्ञां प्रत्यैच्छन् जगृहुः ईषुगत्वाच्छे स्यादानमेति इच्छादेशः ततस्ते निकुम्भिलां समाजग्मुः ते च राक्षसैर्दिक्पालैश्च निरुद्धाः निकुम्भिलाप्रवेशे निवारिताः कर्मणि रूपम् ॥ २८ ॥ भ०

दिक्पालैरित्यादि । तत्र निकुम्भिलोद्देशे उभे अपि सेने महत्कदनं विनाशनं युद्धं वा प्राकुरुतां कृतवन्तौ तानि रक्षांसि निर्जित्य पौलस्त्यलक्ष्मणौ द्रुतमैतां गतवन्तौ इणगतौ अयि दृष्टिः ॥ २९ ॥ ज० भ०

दिक्पालैरित्यादि । दिक्पालैरिति पूर्वश्लोकेनान्वयः तत्र निकुम्भिलायां द्वे सैन्ये महत्कदनं चक्रतुः कदनं युद्धमाहव इति कोषः तानि रक्षांसि निर्जित्य विभीषणलक्ष्मणौ द्रुतमैतां जग्मतुः इणोभूयोऽम् ॥ २९ ॥ भ०

तत्रेत्यादि । निकुम्भिलायां तावैक्षेतां दृष्टवन्तौ इन्द्रजितं कृतधिष्ण्यं कृताग्न्यगारं समाहितं एकाग्रमानसं स इन्द्रजित् कृष्णवर्त्मानमजुहोत् हुतवान् मन्त्रमुत्तममामनन् आवर्त्तयन् म्ना आवर्त्तने श्रुतरि प्राघ्रादिना मनादेशः ॥३०॥ ज०भ०

तत्रेत्यादि । निकुम्भिलायां कृतधिष्ण्यं कृताग्निगृहं कृतासनं वा समाहितमेकाग्रचित्तं इन्द्रजितं तावैक्षेतां दृष्टवन्तौ ईक्षङ् दर्शने स इन्द्रजित् कृष्णवर्त्मानमग्निं हुतवान् उत्तमं मन्त्रं जपन् म्नाभ्यासे स्यादानेति मनादेशः धिष्ण्यं स्याने गृहे भेऽग्नावित्यमरः ॥ ३० ॥ भ०

अध्यायदित्यादि । शक्रजिदिन्द्रजित्वरं ब्रह्माध्यायत् चिन्तितवान् ध्यैचिन्तायां आत्वं धिति न भवति न च समाधेश्चित्तवृत्तिनिरोधादचलत् चलित-

तमाह्वयत सौमित्रिरगर्ज्जच्च भयङ्करम् ॥ २१ ॥
अकुप्यदिन्द्रजित्तत्र पितव्यञ्चागदद्वचः ।
त्वमत्राजायथा देहमिक्ष्वापुष्यः सुरामिषैः ॥ २२ ॥
दृहाजीव दृढैव त्वं क्रूरमारभथाः कथम् ।
नापश्यः पाणिमार्द्रं त्वं बन्धुत्वं नाप्यपैक्षथाः ॥ २३ ॥

वान् तं तथाभूतमिन्द्रजितं सौमित्रिर्युद्धायाह्वयत आह्वतवान् भयङ्करं चागर्ज्जन् शब्दितवान् ॥ २१ ॥ ज० म०

अध्यायदित्यादि । इन्द्रजित् ब्रह्म वेदमात्मानं वा अध्यायत् ध्यै ङ चिन्तने समाधेश्चित्तनिरोधान्न चलितः तं तथाभूतमिन्द्रजितं लक्ष्मणो युद्धायाह्वतवान् भयङ्करं गर्ज्जनं कृतवांश्च ॥ २१ ॥ भ०

अकुप्यदित्यादि । तत्र तस्मिन्नाह्वाने कृतवति गर्ज्जिते च सति अकुप्यत् क्रुङः कुपक्रोधे दैवादिकः पितव्यञ्च पितृव्यं विभीषणं पितृशब्दाद्भ्रातरि व्यञ्निपातितं वचो वक्ष्यमाणमगदत् उक्तवान् अत्राक्षान् राक्षसकुले त्वमजायथाः जातोऽसि जनौ प्रादुर्भावे दैवादिकोऽनुदात्तेत् दृह च देहः सुरामिषैरपुष्यत् वृद्धिं गतः पुषिर्दैवादिकः देहमपुष्यदिति पाठान्तरं तत्र देहं पोषितवानसि अन्तर्भावितण्यर्थो द्रष्टव्यः ॥ २२ ॥ ज० म०

अकुप्यदित्यादि । तत्र निकुम्भिलायां लक्ष्मणे गर्ज्जिते सति इन्द्रजित् अकुप्यत् कुप्य इर्कोपे पितृभ्रातरं विभीषणं वाचा जगदे च पितृभ्राता पितव्यो निपातनात् अत्र राक्षसकुले त्वं जातः जनोऽयङ्जनने स्यादानपेति जादेशः दृह त्वं सुराभिरामिषैश्च सुराणामामिषैर्व्वा देहं बर्द्धितवानसि लपुष्यौ वृद्धौ चकारात् पुष्टौ सकर्म्मकोऽयं पुष्यति स्म भिक्षामित्यादि प्रयोगात् जयमङ्गलायामकर्म्मकत्वं भ्रान्त्योक्तं ॥ २२ ॥ भ

दृहेत्यादि । दृहाजीवः जीवितोऽसि कथमिहैव त्वं क्रूरं कर्म्म आरभथाः आरब्धवानसि आर्द्रं पाणिञ्च नापश्यस्त्वं न दृष्टवानसि यावता कालेन भुक्त्वा पाणिः शुष्यति तावन्तमपि कालं नापेक्षितवानसीत्यर्थः आस्तां तावदेतत् बन्धुत्वमपि एकगोत्रत्वमपि नापैक्षथाः ॥ २२ ॥ ज० म०

दृहाजीवेत्यादि । अस्मिन् वंशे त्वं जीवितोऽसि जीवस्व जीव प्राणे तत्कथमिहैव त्वं क्रूरं कर्म्म आरब्धवानसि रभौङःस्यात्तुराभसे कथमार्द्रं पाणिं न दृष्टवानसि भोजनानन्तरं यावन्न शुष्कः तावदेव स्तृतवानसीति लोकोक्तिस्याप-

अधर्म्मान्नात्रसः पाप लोकवादान्न चाबिभेः ।
धर्म्मदूषण नूनं त्वं नाजानान्नाश्रुणोरिदम् ॥ २४ ॥
निराकृत्य यथा बन्धून् लघुतं यात्यसंशयम् ।
पिटव्येण ततो वाक्यमभ्यधीयत शक्रजित् ॥ २५ ॥

नायेदसुकं तव स्नेहान् ममार्द्रं हिंसाशून्यं पाणिं कृतो न दृष्टवानसीत्यन्ये आस्तां तावदन्यत् बन्धुत्वमेकगोत्रमपि कृतो नापेक्षितवानसि ॥ २२ ॥ भ०

अधर्म्मादित्यादि । हे पाप अधर्म्मादपि नात्रसः न त्रस्तोऽसि त्रसी उद्वेगे दिवादौ वाभ्राशेत्यादिना पक्षे शप् लोकवादात् जनापवादात् न चाबिभेः न भीतोऽसि श्लौहिर्व्वचनं धातोर्गुणः भीत्यर्थानामित्यपादानसंज्ञा हे धर्म्मदूषण धर्म्मस्य दूषण धर्म्मोच्छेदक अतिविपरीते स्थितत्वात् दुषचवैकृत्ये दोषोणावित्युपधाया ऊत्वम् दूषयतीति दूषणः ऊत्यल्युटो बहुलमिति कर्त्तरि ल्युट् नत्र नन्द्यादिपाठे ल्युः तत्र हि न दिवाग्रिमदिदूषिसाधिपचियोधिरोचिभ्यो ण्यन्तेभ्यः पूजायामित्युक्तं न चात्र पूजा गम्यत इति नूनं अवश्यं त्वं नाजानाः स्वयमिदं न ज्ञातवानसि ज्ञा अवबोधने क्रियादावुदात्तेत् ज्ञाजनोर्जा इदमन्यतोऽपि नाश्रुणोः द्विषड्गो न श्रुतवानसि श्रुचः श्रृच् ॥ २४ ॥ ज० म०

अधर्म्मादित्यादि । हे पाप अधर्म्मादपि न त्रस्तोऽसि त्रस्त्र त्रसीणभये क्रमक्लमभ्रमेत्यादिना श्यनः पाञ्चिकत्वात् शप् लोकापवादादपि न भीतोऽसि जिभीञ्भीत्यां हे धर्म्मदूषण धर्म्मोच्छेदक कुलोच्छेदकत्वात् नूनं निश्चितं त्वमिदं वक्ष्यमाणं न ज्ञातवान् न श्रुतवानसि ॥ २४ ॥ भ०

किमनदित्याह

निराकृत्येत्यादि । यथा बन्धून् निराकृत्य परित्यज्य लघुतां यात्यसंशयमसन्देहं ततः पुक्तोक्तेरनन्तरं पिटव्येण विभीषणेन शक्रजिद्वाक्यमभ्यधीयत अभिहितः कर्म्मणि लङ् घुमेतीत्वं ॥ २५ ॥ ज० म०

निराकृत्येत्यादि । यथा बन्धून् निराकृत्य परित्यज्य असंशयं निश्चितं लघुत्वं लोको याति गच्छति इदं नाजानाः इति पूर्व्वेणान्वेयः धीप्रकरणे यातीति कीप्रवेशो धीविषयेऽपि भूतसामान्ये क्वचित् की स्यादिति सूचनाय वस्तुतस्तु प्रतिज्ञातस्यैकस्य सिद्ध्यर्थमस्यार्पणं न दोषावहं ततस्तद्वचनानन्तरं पिटव्येण विभीषणेन शक्रजित् वक्ष्यमाणवाक्यमुक्तं अभिपूर्व्वधाञ् कर्म्मणि यक् दामागैहागिति ङीः ॥ २५ ॥ भ०

मिथ्या मास्म व्यतिक्रामो मच्छीलं मा न बुध्यथाः ।
सत्यं समभवं वंशे यापानां रक्षसामहम् ॥ ३६ ॥
न त्वजायत मे शीलं तादृग्यादृक् पितुस्तव ।
क्षयावहेषु दोषेषु वार्य्यमाणो मयारमत् ॥ ३७ ॥
दशग्रीवोऽहमेतस्मादत्यजं न तु विद्विषन् ।
परस्वान्यार्ज्जयन्नारीरन्यदीयाः पराभशत् ॥ ३८ ॥

मिथ्येत्यादि । मिथ्या मृषा मास्म व्यतिक्रामः मा परिभूः शिति क्रमेत्यादिना दीर्घः शीलं स्वभावः मा न बुध्यथाः मा न बुद्धास्त्वं अपितु ज्ञातवानसि स्रोत्तरेलङ् वा यापानां रक्षसां वंशेऽहं सत्यं समभवं संभूत इति ॥ ३६ ॥ ज० भ०

मिथ्येत्यादि । मिथ्या व्यतिक्रामं न कुरु क्रमःमेऽपिर्घः मम शीलं स्वभावं न बुद्धवानसि न किञ्चित् ज्ञातवानस्येव बुध्यौङ् वेदने यापानां रक्षसां वंशे सत्यमहं संभूतोऽस्मि किन्तु तादृक न शीलमिति वक्ष्यमाणेनान्वयः ॥ ३६ ॥ भ०

न त्वित्यादि । यद्यप्यहं रक्षःसकुले जातस्तथापि तव पितुर्यादृक् शीलं स्वभावस्तादृक्मेन त्वजायत नैवाभूत् यतोऽसौ क्षयमावहन्तीति क्षयावहाः पचाद्यच् तेषु दोषेषु परस्त्रीहरणादिषु मया वार्य्यमाणोऽपि दशग्रीव इति सम्बन्धः अरमत् रतिं कृतवान् व्याङ्परिभ्यो रम इति परस्मैपदम् ॥ ३७ ॥ ज० भ०

न त्वजायतेत्यादि । यादृशं तव पितुः शीलं जातं न मम तादृशं शीलं जातं स्यादानेति जनोजा स हि क्षयावहेषु दोषेषु परस्त्रीहरणादिषु मया वार्य्यमाणोऽपि रतिं कृतवान् रमङ्जौ क्रीडे आङ्पूर्व्वः षेपंपरेत्यादिना पं क्षयं नाशमावहन्ति कुर्व्वन्तीति पचाद्यच्प्रत्ययादन् ॥ ३७ ॥ भ०

दशग्रीव इत्यादि । एतस्मात्कारणादहं रावणमत्यजं त्यक्तवानस्मि पुनर्द्विषन् अमित्रीभवन् द्विषोऽमित्र इति शतृप्रत्ययः तान् दोषानाह परस्वानि परवित्तानि आर्जयत् अन्यैर्याचितवान् अर्जसर्जन इति भ्वादौ अर्जप्रतियत्न इति चौरादिकस्य वा रूपं अन्यदीयाः नारीश्च पराभशत् स्पृष्टवान् भृश आमर्शन इति तुदादावनुदात्तेत् ॥ ३८ ॥ ज० भ०

दशग्रीव इत्यादि । तस्मात्कारणादहं दशग्रीवं त्यक्तवान् नतु शत्रुर्भवन् परमते द्विषः शत्रौ शत्रु स्वमते न विभीषणेन विद्वेषं वैरं कुर्व्वन्नित्यर्थः शत्रुवाचिते रूढिः तान् दोषानाह परधनानि आर्जयत् आनीय संस्कृतवान् हृतवानित्यर्थः अर्जसंस्कारे किंवा अर्ज्ज अर्ज्जने अिः प्रेरणे अन्यदीया नारीः

व्यजिघ्यत् सुरान्नित्यं प्रामाद्यद्गुणिनां हिते ।
आशङ्कत सुहृद्बन्धून्नदृढान् बहुमन्यत ॥ ३९ ॥
दोषैररमतैभिस्ते पितात्यज्यत यैर्मया ।
ततोऽरुष्यदनर्दच्च द्विविंशतिभिरेव च ॥ ४० ॥
शरैरताडयद्बन्धुं पञ्चविंशतिभिर्वपुः ।
रावणिस्तस्य सौमित्रिरमर्ष्याच्चतुरो हयान् ॥ ४१ ॥

परामृशत् अपहृतवान् स्पृशशौस्पृधि अन्येषामिमा इति विकारसङ्केत्यादिना ईयः दकारागमो निपातनात् किंवा अन्येषां पतिश्वशुरादीनां दा शुद्धियोभ्यस्ता अन्यदाः साध्वीरित्यर्थः दैपशोधने क्विप् ततः स्वार्थे ईयः ॥ ३८ ॥ भ०

व्यजिघ्यदित्यादि । सुरान् नित्यं व्यजिघ्यत् विग्रहीतुमैच्छत् गुणिनां माल्यवत्प्रभृतीनां यदुक्तं हितं तस्मिन् विषये प्रामाद्यत् प्रमादं गतः मदी हर्षे शमामष्टानामिति दीर्घः सुहृदो बन्धूंश्च सुहृद्बन्धून् आशङ्कत विकल्पितवान् अदृढवान् अविदुषः प्रहस्तादीन् बहुमन्यत श्लाघितवान् ॥ ३९ ॥ ज० भ०

व्यजिघ्यदित्यादि । नित्यं देवान् विग्रहीतुं योधयितुं इष्टवान् ग्रहेः सन् ग्रहस्वपप्रच्छांजि नेशुगृहग्रहः गुर्नानिमि हीढः भभान्नस्येति घः षढोः कः गुणिनां मातामहादीनां सम्बन्धे हिते सल्लोकानां हिते वा प्रामाद्यत् अनवहितोऽभवत् प्रमादोऽनवधानतेति कोषः मदीभिर्यज्ञि हर्षे शमादित्वाद्दीर्घः सुहृदो बन्धून् ज्ञातींश्च शङ्कितवान् शकिङलाशङ्कयोः अदृढान् अपण्डितान् प्रहस्तादीन् बहु अमन्यत उरु श्लाघितवान् ॥ ३९ ॥ भ०

दोषैरित्यादि । एभिर्दोषैस्तव पिता रावणः अरमत क्रीडितवान् यैर्दोषैर्मया अत्यज्यत कर्मणि लङ् ततः पितुर्दोषप्रकाशनवचनादनन्तरं रावणिरिति वक्ष्यमाणेन सम्बन्धः अरुष्यत् रुष्टः रुष रुष्टौ अनर्दच्च विस्फूर्जितवांश्च ॥ ४० ॥ ज० भ०

दोषैरित्यादि । एभिर्दोषैस्तव पिता रावणो रमते स्म यैर्दोषैर्मया त्यक्तः कर्मणि रूपं ततः पितृदोषश्रवणात् रावणिरिति वक्ष्यमाणेन सम्बन्धः अरुष्यत् रुषेर्डिक्रुधि अनर्दत् शब्दं चकार द्विविंशतिभिरिति उत्तरश्लोकेनान्वयः ॥ ४० ॥ भ०

शरैरित्यादि । बन्धुं विभीषणं द्विविंशतिभिरताडयत् चत्वारिंशतेत्यर्थः द्वे विंशती येषां शराणामिति बहुव्रीहिः एवञ्च द्वयोनः संख्यायामित्यत्वं न

सारथिञ्चालुनाद्बाणैरभनक् स्यन्दनन्तथा ।
सौमित्रिमकिरद्बाणैः परितो रावणिस्ततः ॥ ४२ ॥
तावस्कावयतां शक्तीर्व्बाणांश्चाकिरतां मुहुः ।
वारुणं लक्ष्मणोऽक्षिप्यदक्षिपद्रौद्रमिन्द्रजित् ॥ ४३ ॥
ते परस्परमासाद्य शस्त्रे नाशमगच्छताम् ।

तथा पञ्चविंशतिभिः शरैर्म्बाणं लक्ष्मणं अताडयत् शतेनेत्यर्थः द्वौ च विंशतिश्च पञ्चविंशतिश्चेत्यस्मिन् व्याख्याने द्वाविंशत्या पञ्चविंशत्येति च प्राप्नोति सौमित्रिस्तु तस्य रावणेश्चतुर्थ्यान् बाणैरमथात् मथ विलोडन इति क्रियादौ ॥ ४१ ॥ ज० म०

शरैरित्यादि । बन्धुं विभीषणं द्विविंशतिभिः शरैः रावणिरताडयत् नृपं लक्ष्मणं पञ्चविंशतिभिः शरैरताडयत् द्वे विंशती संख्ये येष्विति बहुव्रीहिः सौमित्रिस्त्वेन्द्रजितोऽश्वान् बाणैर्हिंसितवान् मन्यमगाहे ॥ ४१ ॥ भ०

सारथिमित्यादि । तस्य रावणेः सारथिं चालुनात् छिन्नवान् त्वादीनां लुक्सः तथा स्यन्दनमभनक् भग्नवान् भञ्जो मर्दन इति रुधादिः ततोऽनन्तरं रावणिः सौमित्रिं परितः समन्तात् बाणैरकिरत् क्षादितवान् ॥ ४२ ॥ ज० म०

सारथिञ्चेत्यादि । लक्ष्मणो रावणिं सारथिञ्च बाणैश्छिन्नवान् लूञ्गिलिदि घादेः खोने इति लुक्सः तथा स्यन्दनं रथं भग्नवान् भन्जोधौमोटने नणोनलोप्यः हसदङ्गप्रांदिग्येरिति दिलोपः चुडिति कङ् ततोऽनन्तरं रावणिः सौमित्रिं परितः समन्तात् बाणैराक्षादितवान् कृग्विक्षेपे ऋदिरणादिति दुर् ॥ ४२ ॥ भ०

तावित्यादि । तावेन्द्रजिल्लक्ष्मणौ शक्तिं सामर्थ्यमस्कावयतां वर्द्धितवन्तौ स्कायोवः बाणांश्च मुहुरकिरतां विक्षिप्तवन्तौ वारुणमस्त्रं लक्ष्मणोऽक्षिपत् दैवादिकस्य रूपं इन्द्रजिद्रौद्रं पाशुपतमक्षिपत् क्षिप्तवान् नौदादिकस्य रूपम् ॥ ४३ ॥ ज० म०

तावस्कावयतामित्यादि । तौ इन्द्रजिल्लक्ष्मणौ शक्तिं स्वसामर्थ्यं वर्द्धितवन्तौ शक्तीरिति पाठे अस्त्रविशेषानित्यर्थः स्कायोङ् इदौ जिः पातिस्कायोरिति वङ् मुहुर्व्वारं वारं बाणानकिरतां क्षिप्तवन्तौ लक्ष्मणो वरुणदेवताकमस्त्रं प्रेरितवान् इन्द्रजिद्रुद्रदैवतमस्त्रं प्रेरितवान् क्षिपश्चौ क्षिप्यो नुदि ॥ ४३ ॥ भ०

ते परस्परमित्यादि । ते शस्त्रे परस्परमासाद्य प्राप्य नाशमगच्छतां गते ततस्तदाशादनन्तरं राक्षसो रावणिः आसुरं असुरदैवतं शस्त्रं घोरं भीषणं व्यसर्ज्जयत् क्षिप्तवान् ॥ ४४ ॥ ज० म०

आसुरं राक्षसः शस्त्रं ततो घोरं व्यसर्ज्जयत् ॥ ४४ ॥
तस्मान्निरपतद्भूरि शिलाशूलर्ष्टिमुद्गरम् ।
माहेश्वरेण सौमित्रिरस्तभ्नात्तत् सुदुर्ज्जयम् ॥ ४५ ॥
ततो रौद्रसमायुक्तं माहेन्द्रं लक्ष्मणोऽस्मरत् ।
तेनागम्यत घोरेण शिरश्चाच्छियत द्विषः ॥ ४६ ॥
अतुष्यन्नमराः सर्व्वे प्राहृष्यन् कपियूथपाः ।
पर्य्यष्वजत सौमित्रिं मूर्द्ध्न्यजिघ्रच्च राघवः ॥ ४७ ॥

ते परस्परमित्यादि । ते इन्द्रजिल्लक्ष्मणसम्बन्धिनी शस्त्रे परस्परं प्राप्य नाशं जग्मतुः तदनन्तरं राक्षस इन्द्रजित् घोरं असुरसम्बन्धि शस्त्रं विसर्जितवान् ॥ ४४ ॥ भ०

तस्मादित्यादि । तस्मादासुरादस्त्रात् शिलाशूलेष्टिमुद्गरं निरपतत् इष्टिः प्रहरणविशेषः तच्चासुरं सुदुर्ज्जयं सौमित्रिः माहेश्वरेण अस्तभ्नात् स्तम्भितवान् स्तन्भित्यादिना श्ना चकारात् श्नश्च ॥ ४५ ॥ ज० म०

तस्मादित्यादि । तस्मादासुरास्त्रात् भूरि प्रचुरं शिलादिकं निरपतत् निर्गतं ऋष्टिः खड्गः प्रसारोऽसिर्धर्म्मपालः प्रजाकर इति वैजयन्ती सौमित्रिस्तत् सुदुर्जयमासुरास्त्रं माहेश्वरदैवतेन शस्त्रेण स्तम्भितवान् स्तन्भुस्तुम्भुस्कन्भुस्कुन्भ ग्लुम्बोधने ॥ ४५ ॥ भ०

तत इत्यादि । ततोऽनन्तरं रौद्रसमायुक्तं रौद्रास्त्रेण सहितं माहेन्द्रमस्त्रं लक्ष्मणोऽस्मरत् चिन्तितवान् तेन स्मरणादेवागम्यत आगतं भावे लङ् तस्य द्विषः शत्रोः शिरश्चाच्छियत छिन्नं कर्म्मणि लङ् ॥ ४६ ॥ ज० म०

तत इत्यादि । तदनन्तरं रुद्रदैवतेनास्त्रेण संयुक्तं माहेन्द्रदैवतमस्त्रं लक्ष्मणः सस्मार तेनास्त्रेण स्मरणात् आगतं भावे यक् घोरेण द्विष इन्द्रजितः शिरो हृतं छिन्नमित्यर्थः कर्म्मणि यक् ॥ ४६ ॥ भ०

अतुष्यन्नित्यादि । तस्मिन् हृते अमरा देवाः अतुष्यन् तुष्टाः कपियूथपाः प्राहृष्यन् प्रहृष्टाः राघवश्च सौमित्रिं पर्य्यष्वजत् आश्लिष्टवान् दन्शसन्जेत्यनुनासिकलोपः प्राक्सितादड्व्यवायेपीति वचनात् परिनिविभ्य इत्यादिना षत्वं मूर्द्ध्न्यजिघ्रच्च आघ्रातवान् ॥ ४७ ॥ ज० म०

अतुष्यन्नित्यादि । तस्मिन् हृते सति सर्व्वे देवास्तुष्टाः तुष्लृयौङिच चकारात् तुष्टौ कपियूथपाः सुग्रीवादयः सर्व्वे हृष्टाः हृष्य जितष्टौ रामः सौमित्रिं

अरोदीद्राक्षसानीकमरोदन्नृभुजां पतिः ।
मैथिल्यै चाशपद्धन्तुं तां प्राक्रमत चातुरः ॥ ४८ ॥
अयुक्तमिदमित्यन्ये तमाप्ताः प्रत्यवारयन् ।
न्यरुन्धंश्चास्य पद्यानं बन्धुता शुचमारुणत् ॥ ४९ ॥
आस्कायतास्य वीरत्वममर्षश्चायतायत ।
रावणस्य ततः सैन्यं समस्तमयुयुत्सयत् ॥ ५० ॥

आलिङ्गितवान् ष्वन्जौ सङ्के सन्जट्नश्खन्जोऽपि नलोपः ग्लेक इत्यादिना षत्वं मूर्द्धि तमाघ्रातवांश्च घ्रा गन्धग्रहणे स्यादानेत्यादिना जिघ्रः ॥ ४७ ॥ भ०

अरोदीदित्यादि । राक्षसानीकं राक्षससैन्यमरोदीत् रुदितं रुदश्च पञ्चभ्य इतीट् नृभुजां पतिः रावणः अरोदत् रुदितः अङ्गार्ग्यगालवयोरित्यडागमः मैथिल्यै चाशपत् आक्रुष्टवान् सर्वदोषस्य मूलमिति श्लाघङ्क्रित्यादिना कर्म्मणि सम्प्रदानसंज्ञा तां च हन्तुं आत्मनो मनुप्रचतः प्राक्रमत प्रारब्धवान् प्रोपाभ्यामिति तङ् ॥ ४८ ॥ ज० म०

अरोदीदित्यादि । राक्षससैन्यं अरोदीत् लधिररुदरोदे रुदाद्युक्ति सेरिति दिप ईम् रक्षसां पती रावणश्च अरोदत् दिरोरम्वेति दिपः पक्षेऽम् सीतायै चाशपत् आक्रुष्टवान् शपौञ् क्रोशे यस्मैदित्येत्यादिना सम्प्रदानत्वं क्रोधेनातुरः सन् तां हन्तुं प्रारब्धवान् प्रोपादारम्भ इति मम् ॥ ४८ ॥ भ०

अयुक्तमित्यादि । अन्ये आप्ताः राक्षसाः अयुक्तमेतदिति मन्यमानाः तं तथाविधं प्रत्यवारयन् आवार्य्य स्थिताः हृञ् वरण इति चुरादिः अरुन्धंश्च हस्तपादादिग्रहणेन रुद्धवन्तः बन्धुता बन्धुसमूहः अस्य शोकमारुणत् अपनीतवती हलङ्यादि लोपः धकारस्य जश्त्वम् ॥ ४९ ॥ ज० म०

अयुक्तमित्यादि । अन्ये आप्ता एतदिष्टा राक्षसा अयुक्तमेतत् स्त्रीहननमित्युक्त्वा तं निवारितवन्तः शनैः पादादिग्रहणैस्तं रुद्धवन्तः बन्धुता बन्धुसमूहश्चास्य शोकमारुणत् अपनीतवान् ॥ ४९ ॥ भ०

आस्कायतेत्यादि । अथ निरुद्धशोकस्य रावणस्य वीरत्वं शौर्य्यं आस्कायत वृद्धिं गतं अमर्षश्च क्रोधः अतायत विस्तारं गतः ततः स रावणः समस्तं सैन्यं अयुयुत्सयत् युयुत्समानं प्रयोजितवान् ॥ ५० ॥ ज० म०

आस्कायतेत्यादि । अथ शोकापनयनानन्तरं रावणस्य वीरत्वं शौर्य्यं वर्द्धते स्म स्कायीङ संवृद्धौ अमर्षः क्रोधश्च विस्तीर्णः तायृङ्पालनसन्तत्योः

अग्नीनवरिवस्यंश्च ते नमस्यंश्च शङ्करम् ।
द्विजानप्रीणयन् शान्त्यै यातुधाना भवद्भियः ॥५१॥
परितः पर्य्यवाद्वायुराज्यगन्धिर्मनोरमः ।
अश्रूयत सपुण्याहः स्वस्तिघोषः समुच्चरन् ॥ ५२ ॥
योद्धारोऽविभरुः शान्त्यै साक्षतं वारि मूर्द्धभिः ।
रत्नानि चाददुर्गाश्च समवाञ्छन्नथाशिषः ॥ ५३ ॥

तदनन्तरं स रावणः समस्तं सैन्यं योद्धुमिच्छां कारयति स्म युधेः सनन्तात् जिः ॥ ५० ॥ भ०

अग्नीनित्यादि । ते यातुधानाः भवद्भियः उत्पद्यमानभीतयः अग्नीनवरिवस्यन् परिचारितवन्तः नमोवरिवः श्वित्रङ् अजिति वरिवसः परिचर्यायामिति क्यच् तदन्तात्क्विप् शङ्करञ्च महादेवमनमस्यन् पूजितवन्तः अत्र मनसः पूजायां क्यच् द्विजांश्च शान्त्यै शान्त्यर्थमप्रीणयन् प्रीणितवन्तः धूञ्प्रीञोर्नुर्व्वक्तव्यः ॥ ५१ ॥ ज० भ०

अग्नीनित्यादि । भवन्तो उत्पद्यमाना भीर्भयं येषां ते राक्षसा अग्नीन् सेवितवन्तः नमस्तपोवरिव इति क्यः शङ्करं प्रणमुः पूर्व्ववत् क्यः शान्त्यै कल्याणाय द्विजान् प्रीणितवन्तः प्रीधूञोर्नेणवा ॥ ५१ ॥ भ०

परित इत्यादि । अग्निसन्तर्पणादाज्यगन्धिः आज्यस्य गन्धो यस्मिन्वायौ स वायुर्मनोरमः परितः सर्व्वतः वेश्मस्वपर्य्यवात् वाति स्म स्वस्तिघोषश्च सपुण्याहः पुण्याहशब्देन सह समुच्चरन्नश्रूयत श्रूयते स्म कर्म्मणि लङ् ॥ ५२ ॥ ज० भ०

परित इत्यादि । परितः सर्व्वतः आज्यस्य घृतस्य गन्धो यस्मिन् स मनोहरो वायुः प्रकृष्टं वाति स्म गन्धशब्दात् स्वार्थेणिः आगन्धोर्व्वेति समासान्त इति परः गन्ध इति क्वचित्पाठः पुण्याहसहितः स्वस्तिघोषः समुच्चरन् जनैः श्रूयते स्म ॥ ५२ ॥ भ०

योद्धार इत्यादि । योद्धारः शान्त्यै शान्त्यर्थं साक्षतं अक्षततण्डुलैर्युक्तं सलाजञ्च वारि जलं मूर्द्धभिरविभरुः दधति स्म सिजभ्यस्तेति झेर्जुस् भ्वादिभ्योत्यं रत्नानि गाश्चाददुः दत्तवन्तः आशिषश्रेष्टेभ्यः समवाञ्छन् काङ्क्षितवन्तः वांछि इच्छायाम् ॥ ५३ ॥ ज० भ०

योद्धार इत्यादि । योद्धारः शान्त्यर्थं मूर्द्धभिर्लक्षितं तण्डुलादिसहितं वारि दधति स्म टुडुभृञ्भृतिपुष्णोः ह्लादीरेद्विः पृभ्वादेर्ड्डिःखेरे अनुसृसिद्वेः गुरुस्थां रत्नानि गाश्च द्विजेभ्योऽददुः उस्रेचीत्यालोपः अग्रे आशीर्व्वादांश्च

अदिहंश्चन्दनैः शुभ्रैर्विचित्रं समवस्त्रयन् ।
अधारयन् स्रजः कान्ता वर्म्म चान्येऽदधुर्द्रुतम् ॥ ५४ ॥
समक्ष्णुवत शस्त्राणि प्राम्रजन् खड्गसंहतीः ।
गजादीनि समारोहन् प्रातिष्ठन्ताथ सत्वराः ॥ ५५ ॥
अपूरयन्नभः शब्दो बलसंवर्त्तसम्भवः ।
अपूर्य्यन्त च दिग्भागास्तुमुलैस्तूर्य्यनिस्वनैः ॥ ५६ ॥

तेभ्यो वाञ्छितवन्तः स्रजोऽकङिति ङिरिति पक्षे ङिः ये गजादीन् समारूढाः अथ त्वरान्विताः प्रस्थिताः ॥ ५३ ॥ भ०

अदिहन्नित्यादि । शुभ्रैः शुक्लवर्णैश्चन्दनैः अदिहन् गात्राणि लिप्तवन्तः दिह उपचये विचित्रं शोभनं समवस्त्रयन् आच्छादितवन्तः सुखमित्यादिना वस्त्रात्समाच्छादने णिच् कान्ताः शुभ्राः स्रजः अधारयन् धारितवन्तः धृञ् धारणे अयत्नस्य प्रयोग एव नास्ति अन्ये च वर्म्माणि कवचानि द्रुतमदधुः धारितवन्तः ॥ ५४ ॥ ज० म०

अदिहन्नित्यादि । शुक्लैश्चन्दनैर्गात्राणि लिप्तवन्तः दिहऊौ लिपि विचित्रं वस्त्रं परिहितवन्तः विचित्रं शोभनं समाच्छादयन्ति स्वेत्यर्थो वा वस्त्रात् समाच्छादने परिधाने वा ञिःकल्यादेरिति ञिः कान्ताः शोभनाः स्रजो धारितवन्तः धृक्च चकारात् धृत्वा अन्ये कवचं धृतवन्तः ॥ ५४ ॥ भ०

समक्ष्णुवतेत्यादि । शस्त्राणि समक्ष्णुवत क्ष्णु तेजने समःक्ष्णुव इति तङ् खड्गसंहतीः प्राम्रजन् शोधितवन्तः स्रजेरजादौ विभाषा दृडिः गजादीनि यानानि समारोहन् आरूढाः गजादिष्विति पाठान्तरं तत्राधिकरणत्वं विवक्षितं अथानन्तरमारूढाः सत्वराः प्रातिष्ठन्त प्रस्थिताः समवप्रविभ्य स्थ इति तङ् ॥ ५५ ॥ ज० म०

समक्ष्णुवतेत्यादि । योधाः शस्त्राणि निशितानि चक्रुः क्ष्णु ल तेजने संक्ष्णोरिति खड्गसमूहान् शोधितवन्तः स्रजोऽकङिति ङिरिति पक्षे ङिः गजादीन् समारूढाः अथ त्वरान्विताः प्रस्थिताः ॥ ५५ ॥ भ०

अपूरयदित्यादि । बलानां संवर्त्त एकीभावः तस्मात्सम्भवो यस्य स शब्दः नभ आकाशमपूरयत् पूरितवान् तुमुलैस्तूर्य्यनिस्वनैः महद्भिर्वीर्यैर्दिग्भागा अपूर्य्यन्त पूर्णाः कर्म्मणि लङ् ॥ ५६ ॥ ज० म०

अपूरयदित्यादि । शब्दो नभः पूरितवान् पूरक्च चकारात् पूर्णो कीदृशः

आसीद्द्वारेषु सङ्क्षुब्धो रथाश्वद्विपरक्षसाम् ।
सुमहाननिमित्तैश्च समभूयत भीषणैः ॥ ५७ ॥
कपयोऽविभयुस्तस्मिन्नभञ्जंश्च महाद्रुमान् ।
प्रोदखायन् गिरींस्तूर्णमग्रहीषुश्च महाशिलाः ॥५८ ॥
ततः समभवद्युद्धं प्राहरन् कपिराक्षसाः ।
अन्योन्येनाभ्यभूयन्त विमर्दमसहन्त च ॥ ५९ ॥
प्रावर्तत रजो भौमं तद्व्याप्नुत दिशो दश ।

बलानां सम्वर्त्त एकीभावस्तस्मात् सम्भवो यस्य सम्भवति यस्मादिति व्युत्पत्त्या स एव सम्भवो यस्येति वा तूर्य्याणां तुमुलैः संकुलैः शब्दैर्दिग्भागाः पूरिताः कर्म्मणि रूपम् ॥ ५६ ॥ भ०

आसीदित्यादि । रथादीनां निर्गच्छतां लङ्काद्वारेषु सङ्क्षुब्धः सुमहानासीत् जनभूयस्त्वया सङ्क्षुभितोऽभूत् अस्तिसितोष्टक्त इतोट् अनिमित्तैः स्वभीषणैर्भयङ्करैर्म्लेच्छैः समभूयत क्षयकरैर्निमित्तैर्भूतं भावे लङ् ॥ ५७ ॥ ज० म०

आसीद्वारेष्वित्यादि । लङ्काद्वारेषु रथादीनां निर्गच्छतां सुमहान् सङ्क्षुब्ध आसीत् रदाद्यस्तीति रिम् भीषणैर्भयानकैरनिमित्तैरमाङ्गलैः सम्भूतं भावे यक् ॥ ५७ ॥ भ०

कपय इत्यादि । तस्मिन्निर्गते कपयोऽविभयुः भीतवन्तः महाद्रुमांश्च योद्धुमभञ्जन् भग्नवन्तः गिरीन् प्रोदखायन् उत्खातवन्तः खै खनने गिति आत्वं न भवति महाशिला अग्रहीषुः ग्रहीतवन्तः ॥ ५८ ॥ ज० म०

कपय इत्यादि । तस्मिन् रावणे निर्गते सति वानरा भीताः जिभीलिभीत्यां अनुसृसिद्रे: शुरुस्यां महाद्रुमान् योद्धुं भग्नवन्तः तुङ्गान् पर्व्वतान् उत्खातवन्तः खैतुर्य्यखननहिंसयोः महाशिलाः ग्रहीतवन्तः ॥ ५८ ॥ भ०

तत इत्यादि । ततोऽनन्तरं युद्धं समभवत् प्रहृत्तं कपिराक्षसाः प्राहरन् प्रहृतवन्तः अन्योन्येनाभ्यभूयन्त कपयो राक्षसैः राक्षसाश्च कपिभिरिति कर्म्मणि लङ् विमर्दमसहन्त च सोढवन्तः ॥ ५९ ॥ ज० म०

तत इत्यादि । तदनन्तरं युद्धं विस्तृतं कपयो राक्षसाश्च प्रहारं चक्रुः अन्योन्यं अभ्यभूयन्त कपयो राक्षसैस्ते च कपिभिरभिभूताः कर्म्मणि यक् ते विमर्दं सोढवन्तः ॥ ५९ ॥ भ०

परात्मीयविवेकञ्च प्रामुष्णात् कपिरक्षसाम् ॥ ६० ॥
ततोऽद्विषुर्निरालोके स्वेभ्योऽन्येभ्यश्च राक्षसाः ।
अद्विषन् वानराश्चैवं वानरेभ्योऽपि निर्दयाः ॥ ६१ ॥
अघुरंस्ते महाघोरमस्रोतन्नथ शोणितम् ।
समपद्यत रक्तेन समन्तात्तेन कर्दमः ॥ ६२ ॥
गम्भीराः प्रावहन्नद्यः समजायन्त च ह्रदाः ।
हृष्टञ्च तद्रजोऽशाम्यत् समवेदन्त च द्विषः ॥ ६३ ॥

प्रावर्द्धत इत्यादि । बलद्वयप्रक्षोभात् भौमं रजः प्रावर्द्धत प्रहृष्टं तद्रजो दश दिशो व्याप्नुत व्याप्नोत् अयं परोऽयं चात्मीय इति यो विवेकस्तञ्च प्रामुष्णात् अपनीतवत् सुपस्ते ये क्त्रादिः ॥ ६० ॥ ज०म०

प्रावर्द्धत इत्यादि । भूमिसम्बन्धि रजः प्रहृष्टं सैन्यक्षोभात् तद्रजो दश दिशो व्याप्नुवत् अस्मृक्कव्याप्निसंहत्योः अयं परः अयमात्मीय इति यः कपिरक्षसां विवेकस्तञ्च प्रामुष्णात् अपनिनाय मुषगस्मषनलुटने ॥ ६० ॥ भ०

तत इत्यादि । ततोऽनन्तरं निरालोके समरे राक्षसाः स्वेभ्योऽन्येभ्यश्चाद्विषुः क्रुध्यन्ति स्म वानरा अपि वानरेभ्योऽद्विषन् निर्दयाः सन्तः अपिशब्दात् राक्षसेभ्योऽपि द्विषन्तीत्यनेन शाकटायनमते भेजुस् अन्येषामद्विषन् क्रुधद्रुहेत्यादिना संप्रदानसंज्ञा ॥ ६१ ॥ ज०म०

तत इत्यादि । रजोवाहुल्यात् निरालोके रणे राक्षसाः स्वेभ्यो राक्षसेभ्यो अन्येभ्यो वानरेभ्यश्च द्वेषं चक्रुः वानरा वानरेभ्योऽपिशब्दात् राक्षसेभ्यश्च द्वेषं चक्रुः लक्षिणोऽवैरे द्विषविदातोऽनुस्वा यस्मैदित्यादिना चतुर्थी ॥ ६१ ॥ भ०

अघुरच्चित्यादि । अथानन्तरं ते हताः अघुरन् घोरं रौद्रं शब्दितवन्तः घुरभीमार्थशब्दयोः शोणितं चाप्यस्रोतत् स्रवति स्म तेन च रक्तस्रुतेन समन्तात्तर्व्वतः कर्दमः समपद्यत सम्पन्नः कर्मणि लङ् ॥ ६२ ॥ ज०म०

अघुरच्चित्यादि । ते हताः कपिराक्षसा महाघोरं शब्दं चक्रुः घुरध्वनौ भीमार्थे अनन्तरं शोणितं अस्रोतत् स्रवति स्म तेन रक्तेन समन्तात् कर्दमः सम्पन्नः यौषदङ्गतौ ॥ ६२ ॥ भ०

गम्भीरा इत्यादि । तेन रक्तेन वर्द्धिष्णुना गम्भीरा अगाधाः नद्यः प्रावहन् प्रवृत्ताः ह्रदास्तडागाः समजायन्त सञ्जाताः तच्च रजः प्रहृष्टमशाम्यत् शान्तं

ततोऽचित्रीयतास्त्रौघैर्धनुश्चाधूनयन्महत् ।
रामः समीहितं तस्य नाचेतन् स्वे न चापरे ॥ ६४ ॥
छिन्नानैक्षन्त भिन्नांश्च समन्ताद्रामसायकैः ।
क्रुष्टं हाहेति चाशृण्वन्न च रामं न्यरूपयन् ॥ ६५ ॥
अभिनच्छत्रुसंघातानजुणद्वाजिकुञ्जरम् ।

उद्गमाभावात् उत्पन्नस्य च पतनात् रजःशमनात् द्विषश्च समवेद्यन्ते स्म संवेद्यन्ते स्म विदवेदनाख्यानिवासनेष्विति चौरादिकः कर्मणि लङ् ॥ ६३ ॥ ज० म०

गम्भीरा इत्यादि । तेन रक्तेन गम्भीरा नद्यः प्रवहन्ति स्म गम्भीरा ह्रदाश्च सञ्जाताः ततः प्रहृष्टं तत्र रजः शान्तमभवत् ततश्च द्विषः शत्रवो ज्ञाता विदक-ज्ञेताख्यानिवासे कर्मणि यक् ॥ ६३ ॥ भ०

तत इत्यादि । ततोऽनन्तरं रामः शस्त्रौघैरचित्रीयत आश्चर्यीभूतः नमोवरिव इति चित्रङ् आश्चर्ये ङित्वात्तङ् धनुश्च महद्धूनयत् विधूनितवान् धूञ्प्रीञोनुस्वकृत्यः तस्य रामस्य समीहितमभिप्रेतं स्वे आत्मीयाः वानराः न च अपरे परकीया नाचेतन् न ज्ञातवन्तः ॥ ६४ ॥ ज० म०

तत इत्यादि । तदनन्तरं अस्त्रसमूहैराश्चर्यरूपैर्जातं चित्रीच आश्चर्ये कण्ड्वादिः रामश्च महद्धनुराधूनितवान् धूनगिधुञ्च चकारात् कम्मे ग्रीधूर्णनवा तस्य रामस्य समीहितं अभिप्रेतं स्वे वानरा अपरे राक्षसाश्च न ज्ञातवन्तः शीघ्रकारित्वात् क्षिती ज्ञाने ॥ ६४ ॥ भ०

छिन्नानित्यादि । रामसायकैश्छिन्नान् भिन्नांश्च समन्तादैक्षन्त हाहेति च क्रुष्टं शब्दमन्योन्यस्य चाशृण्वन् न च नैव रामं न्यरूपयन् राम इति च न निश्चितवन्तः रूपव्याक्रियायामिति चौरादिकः ॥ ६५ ॥ ज० म०

छिन्नानित्यादि । संग्रामस्थाः कांश्चित् रामस्य सायकैर्वाणैश्छिन्नान् खण्डितान् कांश्चिद्भिन्नान् विदारितान् ऐक्षन्त स्म समन्तात् सर्वतः हाहेति क्रुष्टं शब्दं श्रुतवन्तः अत्र रामोऽस्ति न वेति नैवेति निश्चितवन्तः शीघ्रभ्रमणात् रूपतत्कृतत्कृतौ ॥ ॥ ६५ ॥ भ०

अभिनदित्याह । शत्रुसङ्घातानभिनत् भिन्नवान् वाजिकुञ्जरमजुणत् सम्पिष्टवान् क्षुदि सम्पेषणे रथानीकं रथसमूहमपिनट् पिष्टवान् पिष्लृ संचूर्णने सर्वे राक्षादिकाः न च सञ्जगृः रामः अज्ञायत न ज्ञातः स्वैः परैश्चेत्यर्थात् कर्मणि लङ् ॥ ६६ ॥ ज० म०

अभिनट् च रथानीकं न चाज्ञायत सञ्चरन् ॥ ६६ ॥
दश दन्तिसहस्राणि रथिनाञ्च महात्मनाम् ।
चतुर्दशसहस्राणि सारोहाणाञ्च वाजिनाम् ॥ ६७ ॥
लक्षे च द्वे पदातीनां राघवेण धनुर्भृता ।
अनीयन्ताष्टमे भागे दिवसस्य परिक्षयम् ॥६८ ॥
यमलोकमिवाग्रथ्नाद्रुद्राक्रीडमिवाकरोत् ।
शैलैरिवाचिनोद्भूमिं बृहद्भीराक्षसैर्हतैः ॥ ६९ ॥
अस्तुवन् देवगन्धर्वा व्यस्मयन्त मरुद्गणाः ।

अभिनदित्यादि । रामः शत्रुसमूहान् विभेद अधौ भिदिर्भिदि वाजिनः कुञ्जरांश्च चूर्णितवान् अधौर्त्तुदिर्त्तुदि रथसानीकं समूहञ्च पिष्टवान् धौपिष्लृ चूर्णने सञ्चरन् रामः परैर्न ज्ञातः ॥ ६६ ॥ भ०

दशेत्यादि । अनेन श्लोकद्वयेन राघवेण धनुर्भृता दिवसस्याष्टमे भागे अर्द्धप्रहरे दन्तिनां दशसहस्राणि रथिनाञ्च महात्मनां चतुर्दशसहस्राणि सारोहाणाञ्च वाजिनां तावन्त्येव पदातीनां द्वे लक्षे परिक्षयं विनाशमनीयन्त नीताः कर्म्मणि लङ् अनीयतेति पाठान्तरं तत्र सर्व्वमेतदनीयतेति योज्यम् ॥ ६७ ॥ ६८ ॥ ज० म०

दशेत्यादि । अग्रिमश्लोकेनान्वयः धनुर्भृता रामेण दिवसस्याष्टमे भागे प्रहरार्द्धमध्ये दन्तिनां दशसहस्राणि महात्मनां रथिनाञ्च चतुर्दशसहस्राणि सारोहाणां वाजिनाञ्च चतुर्दशसहस्राणि पदातीनां लक्षद्वयञ्च परिक्षयं विनाशं नीतानि अनीयतेति पाठे सर्व्वमेतत्तु परिक्षयं नीतं भावे वा प्रत्ययः कर्म्मोपादानेऽपि भावे इति परवचनात् स्वमतेऽपि कर्म्मोपादाने भावप्रत्ययस्य न निषेधः ॥ ६७ ॥ ६८ ॥ भ०

यमेत्यादि । स राघवः तैः राक्षसैः बृहद्भिः यमलोकमिवाग्रथ्नात् सन्दर्भितवान् अन्थग्रन्थसन्दर्भ इति क्र्यादिः रुद्राक्रीडमिव रुद्रस्य क्रीडास्थानं श्मशानमिवाकरोत् भूमिं शैलैरिवाचिनोत् आदितवान् ॥ ६९ ॥ ज० म०

यमलोकमित्यादि । बृहद्भिर्हतै राक्षसै रामो यमलोकमिव सन्दर्भितवान् चकारेत्यर्थः ग्रन्थकिर्भे रुद्रस्याक्रीडं क्रीडास्थानं श्मशानमिव अकरोत् अतनोदिति क्वचित्पाठः भूमिं शैलैरिव अचिनोत् आच्छादितवान् रक्षसां बृहत्त्वात् चिनचिञ्चित्याम् ॥ ६९ ॥ भ०

कपीन्द्रेऽतन्यत प्रीतिः पौलस्त्योऽमन्यताद्भुतम् ॥ ७० ॥
राक्षस्यः प्रारुदन्नुच्चैः प्राजुगुप्सन्त रावणम् ।
असुह्यद्बालदृङ्नश्च समरौदितरो जनः ॥ ७१ ॥
सर्वतश्चाभयं प्राप्नोन्नैच्छन्नृभ्यस्तु रावणः ।
फलं तस्येदमभ्यायादुरुक्तस्येति चाब्रुवन् ॥ ७२ ॥
ततोऽधावन्महाघोरं रथमास्थाय रावणः ।

अस्तुवन्नित्यादि । तमद्भुतकर्म्मकारिणं देवा अस्तुवन् स्तुवन्ति स्म प्लवङ्गमाः कपयः व्यस्मयन्त विस्मिताः ङित्वात्तङ् कपीन्द्रे सुग्रीवे प्रीतिरतन्यत तन्यते स्म कर्म्मकर्त्तरि लङ् पौलस्त्यो विभीषणः आश्चर्य्यं ज्ञातवान् ॥७०॥ ज० म०

अस्तुवन्नित्यादि । देवा गन्धर्व्याश्च अर्थात् तमस्तुवन् स्तुवन्ति स्म कपयो विस्मयं प्राप्ताः सुग्रीवे प्रीतिर्विस्तृता विभीषणश्चाश्चर्य्यं ज्ञातवानित्यर्थः ॥७०॥ भ०

राक्षस्य इत्यादि । राक्षसो भर्त्रादिवधदुःखिता उच्चैः प्रारुदन् रुदितवत्यः रुदादिभ्य इतीण् न भवति अचलादित्वात् रावणं प्राजुगुप्सन्त निन्दितवत्यः एतद्दुर्णयात् सर्व्वमिति बाला दृङ्नाश्च तद्भयं असुह्यात् भयान्मोहं गतं इतरो जनः राक्षसीबालदृङ्भ्योऽन्यः समरौत् आक्रुष्टवान् सुशब्दे उतो वृद्धिर्लुकि ॥ ७१ ॥ ज० म०

राक्षस्य इत्यादि । पत्यादिवधात् राक्षसो रोदनञ्चक्रुः उच्चै रावणं निन्दन्ति स्म गुपेः कित्त्वेजगुप इति निन्दायां सन् इन्निषेधश्च बालदृङ्नं कर्त्तृ भयात् असुह्यत् मोहं प्राप बालाश्च दृङ्नाश्चेति समाहारः इतरो राक्षसीबालदृङ्भ्योऽन्यो जनः संरावं चकार रुलध्वनौ संपूर्व्वः रपिङ्क्षुतोऽङ्हेर्त्रिः ॥७१॥ भ०

सर्व्वत इत्यादि । सर्व्वतो देवादिभ्यः अभयं रावणः प्राप्नोत् प्राप्नवान् यतो ब्रह्मणि वरं दातुमुद्यते देवादीनामवध्यो भूयासमित्युक्तवान् नृभ्यस्तु मत्काशादभयं नैच्छन्नेष्टवान् के मम मानुषा इति तस्य दुरुक्तस्य फलमभ्यायात् उपागतं इत्येवमपरे अब्रुवन् उक्तवन्तः ॥ ७२ ॥ ज० म०

सर्व्वतश्चेत्यादि । रावणः सर्व्वेभ्यो देवगन्धर्व्वादिभ्योऽभयं प्राप्तवान् ब्रह्मसेवयेत्यर्थात् नृभ्यो मनुष्येभ्यस्त्वभयमसौ नेष्टवान् ब्रह्माणं न प्रार्थितवान् तेषां भक्ष्यत्वात् तस्य दुरुक्तस्य दुष्टभाषितस्य वरप्रार्थनाकाले मनुष्यावज्ञासूचकस्य फलमिदं अभ्यायात् उपगतमित्येवं केचिदुक्तवन्तः पूर्व्वश्लोकात् समरौदित्यस्य विभक्तिव्यत्ययेनानुषङ्गः ॥ ७२ ॥ भ०

अच्छावत मही रटभ्रास्तमारार्यन्त भीषणाः ॥ ७३ ॥
मेघाः सविद्युतोऽवर्षंश्चेलक्नोपञ्च शोणितम् ।
अवान् भीमा नभस्वन्तः प्रारुवन्नशिवाः शिवाः ॥ ७४ ॥

तत इत्यादि । ततोऽनन्तरं महाघोरं रथमास्थायारुह्य रावणः योद्धुं वेगेन गतवान् तस्य च धावतो मही अच्छावत कम्पिता च्छायी विधूनने रटभ्राश्च भीषणाः समरार्यन्त अत्यर्थं गतवन्तः रूचिस्रूत्रिमत्रिभ्यो यङ् सुपीतीनां ग्रहणं यङ्धावनेकाजहलाद्यर्थमित्युपसंख्यानात् अर्त्तेर्यङ् गुणोर्त्तिसंयोगाद्योरित्यधिकृत्य यङि चेति गुणः ॥ ७३ ॥ ज० म०

तत इत्यादि । तदनन्तरं महाघोरं रथमारुह्य रावणोऽधावत् वेगेन योद्धुं गत धावुञ्जवे सृजि परे तु सर्त्तेर्धावो वेगेगतीति सूत्रं कृत्वा सृगताविति सूत्रस्य रूपं वदन्ति तत्तु व्यर्थं फलतो विशेषाभावात् दुर्निमित्तान्याह भूमिश्चलति स्म च्छायीऽविधूनने भीषणा रटभ्रास्तमत्यर्थं कुटिलञ्च गताः रटभ्रापणे च चकारात् गत्यर्थादिति यङ् सूत्रसूत्रेत्यादिना वा पृथग्ग्रहणात् स्वाद्यर्त्तेर्गुणोर्युङिति गुणः स्वादौ नवद्रोऽये इति यसंयोगविषये द्वित्वस्य निषेधाभावः घर्षेऽनित इति खेर्दीर्घः ॥ ७३ ॥ भ०

मेघा इत्यादि । सविद्युतो मेघाश्चेलक्नोपं शोणितं रक्तं अवर्षन् वर्षितवन्तः यावता रक्तेन चेलं वासः क्नोपयते सिच्यते तावत्प्रमाणं दृष्टवन्तः क्नुयीशब्द इत्यस्य ण्वुल्तृचौ इत्यादिना पुकि यलोपः चेले क्नोपेरिति णमुल् भीमाः नभस्वन्तः वायवः अवान् वान्ति स्म लङः शाकटायनस्यैवेति नियमादन्यमतेन तु स न भवति शिवाः शृगाल्यः अशुभाः अनिष्टंसिन्यः प्रारुवन् शब्दितवत्यः ॥ ७४ ॥ ज० म०

मेघा इत्यादि । सविद्युतो मेघाश्चेलक्नोपं वस्त्रक्लेदनप्रमाणं शोणितं वर्षन्ति स्म यावता रुधिरेण वस्त्रं सिच्यते तावत्प्रमाणमित्यर्थः क्नुयीङ् दुर्गन्धि आर्द्रत्वे शब्दे दीर्घकारवानयं क्नुयीक्ष्णायति ते विदेवयद्भ्मे सेविस्वसविस्तथेति च ऊःखः ह्वोवल्टोरीक्नुयीति षण् गुणश्च हसाक्नोप इति यलोपः चेलं क्नोपयति क्लेदयतीति ढात्षण् वर्षणक्रियाविशेषणं एतद्विशेषणादेतन्मानं गम्यते अन्यथा एतद्विशेषणस्य वैयर्थ्यं स्यात् परे तु वस्त्रार्थाद्दृष्टिमाने क्नोपयतेः त्काणमित्याहुः स्वमतेऽपि चणम्भेत्यस्य योगविभागात्तत्र चणम् स्यादेव तदा चेलं क्नोपयन्नित्यर्थः भीमा वायवो वान्ति स्म द्विषद्विदात इत्यस्य प्राधिकत्वान्नात्र उम् शिवाः शृगाला अशुभसूचकं रवं चक्रुः ॥ ७४ ॥ भ०

अटाट्यतातवमत्यासौ दुर्निमित्तानि संयुगे ।
अधुनोद्धनुरस्त्रौघैः प्रौर्णोनूयत विद्विषः ॥ ७५ ॥
व्यनाशयंस्ततः शत्रून् सुग्रीवास्ता महीभृतः ।
ततो व्यरसदग्लायदध्यशेत महीतलम् ॥ ७६ ॥
अस्रयोतद्रुधिरं तोयमलसन्नातिविह्वलम् ।

अटाट्यतेत्यादि । असौ रावणः दुर्निमित्तान्यवमत्य युद्धार्थमटाट्यत अत्यर्थमाटत् स्रुचिस्नुवीत्यादिना यङ् संयुगे युद्धे धनुरधुनोत् कम्पितवान् अस्त्रौघैर्विद्विषः शत्रून् प्रौर्णोनूयत भृशं छादितवान् जर्णुञ् आच्छादने जर्णोतेर्णुवद्भावात् स्रुचिस्नुवीत्यादिना वा यङ् अजादेर्द्वितीयस्येति द्विर्वचने नन्द्रा इति रेफो न द्विरुच्यते नुशब्दस्य द्विर्वचनं गुणोयङ्लुकोरिति गुणः ऋकलार्ब्धातुकयोरिति दीर्घः ॥ ७५ ॥ ज० म०

अटाट्यतेत्यादि । एतानि दुर्निमित्तानि अवमत्य अवज्ञाय असौ रावणो भृशं कुटिलञ्च अगच्छत् अट गतौ मूत्रस्नुवेति यङ् गत्यर्थादित्यादिना च संयुगे युद्धे धनुरधुनोत् कम्पितवान् धूञनकम्पे अस्त्रौघैर्द्विषः शत्रून् भृशं पुनःपुनर्वा आच्छादितवान् जर्णुञआच्छादने मूत्रस्नुवेति यङ् स्वादीनवद्भोऽय इति निषेधात् रेफं विश्लिष्य नोर्यो द्वित्वं अय इत्यनेन यसंयोगादिस्थितस्य निषेधाभावः ॥ ७५ ॥ भ०

व्यनाशयन्नित्यादि । ततोऽनन्तरं सुग्रीवास्ताः सुग्रीवेण छिन्ना महीभृतः पर्वताः शत्रुसैन्यं व्यनाशयन् मारितवन्तः ततो मांसादां रक्षसां बलं सुग्रीवबाधितं पीडितमित्युत्तरश्लोकेन सम्बन्धः व्यरसत् आक्रन्दितवत् अग्लायत् ग्लानिं गतं महीतलमध्यशेत महीतले पतितं शीङः सार्वधातुके गुणः ॥७६॥ ज०म०

व्यनाशयन्नित्यादि । तदनन्तरं सुग्रीवेणास्ताः छिन्ना महीभृतः पर्वताः शत्रून् नाशितवन्तः ततो नृमांसादां रक्षसां बलं सुग्रीवेण बाधितं सत् व्यरसत् आक्रन्दं चकार इत्युत्तरश्लोकेनान्वयः रसशब्दे ग्लैकान्निसंज्ञये भूतलमधिशेते स्म निपतितमित्यर्थः शीङो रेषुः ॥ ७६ ॥ भ०

अस्रयोतदित्यादि । रुधिरमस्रयोतत् अस्रवत् विह्वलञ्च सत् तोयमभ्यलसत् अभिलषितवत् वाञ्छायेत्यादिना विकल्पेन शप् श्यौ यते च अवसन्नं शृदेः शित इति तङ् पाघ्रेत्यादिना शीयादेशः मांसमदन्तीति अदोनन्न इति विट् ॥ ७७ ॥ ज० म०

ASIATIC SOCIETY LIBR

अशीयत नृमांसादां बलं सुग्रीवबाधितम् ॥ ७७ ॥
विरूपाक्षस्ततोऽक्रीडत् संग्रामे मत्तहस्तिना ।
मुष्टिनादालयत्तस्य मूर्द्धानं वानराधिपः ॥ ७८ ॥
अचूर्णयच्च यूपाक्षं शिलया तदनन्तरम् ।
संक्रुद्धो मुष्टिनातुभ्रादङ्गदोऽलं महोदरम् ॥ ७९ ॥
ततोऽकृष्णाद्दशग्रीवः क्रुद्धः प्राणान् वनौकसाम् ।
अगोपायच्च रक्षांसि दिशश्चारीनभाजयत् ॥ ८० ॥
आलोकयत् स काकुत्स्थमधृष्णोद्वीरमध्वनत् ।

अस्रोतदित्यादि । रुधिरं रक्तमक्षरत् पानार्थं तोयं जलमतिविह्वलं अतिकातरं यथा स्यात्तथा याचते स्म अशीयत च अवसादं प्राप्तमित्यर्थः स्यादानेत्यादिना शीयादेशः अदोऽपिमित्यादिना मम् ॥ ७७ ॥ भ०

विरूपाक्ष इत्यादि । ततो विरूपाक्षो नाम राक्षसः मत्तहस्तिना संग्रामे अक्रीडत् भ्रान्तवान् तस्य मूर्द्धानं वानराधिपः सुग्रीवः मुष्टिना अदालयत् दलितवान् दल विशरणे चुरादिः ॥ ७८ ॥ ज० म०

विरूपाक्ष इत्यादि । ततो विरूपाक्षनामा राक्षसः सङ्गरे युद्धे मत्तहस्तिना क्रीड़ति स्म तस्य मूर्द्धानं सुग्रीवो मुष्टिना विदारितवान् दलमिभेदे ॥७८॥भ०

अचूर्णयदित्यादि । तदनन्तरं वानराधिपः यूपाक्षं नाम राक्षसं शिलया अचूर्णयत् चूर्णितवान् तत्करोतीति णिच् अङ्गदोऽपि संक्रुद्धः मुष्टिना महोदरं अलं पर्याप्तमतुभ्रात् व्यापादितवान् नभतुभ हिंसायां क्र्यादिः ॥७९॥ज०म०

अचूर्णयच्चेत्यादि । विरूपाक्षवधानन्तरं वानराधिपः शिलया यूपाक्षं राक्षसं चूर्णितवान् संक्रुद्धोऽङ्गदोऽपि मुष्टिना महोदरमलमत्यर्थं अतुभ्रात् जघान तुभ्यगच चकारात् हिंसे ॥ ७९ ॥ भ०

तत इत्यादि । ततो दशग्रीवः क्रुद्धः वनौकसां वानराणां प्राणानकृष्णात् कृष्टवान् कृष निष्कर्षे रक्षांसि च राक्षसांश्चागोपायत् रक्षितवान् गुपूधूपेत्यादिना आयप्रत्ययः अरींश्च दिशोऽभाजयत् प्रहितवान् ॥ ८० ॥ ज० म०

तत इत्यादि । अनन्तरं क्रुद्धो रावणो वानराणां प्राणानकृष्णात् देहेभ्यो बहिश्चकार कृषण निष्कर्षे रक्षांसि रक्षितवान् गुपू रक्षे कमरुतो गुपूधूपेत्यायः अरींश्च दिशः प्रापितवान् भजेर्जिः प्रेरणे ॥ ८० ॥ भ०

धनुरभ्रमयङ्घीममभीषयत विद्विषः ॥ ८१ ॥
आस्कन्दल्लक्ष्मणं वाणैरत्यक्रामच्च तं द्रुतम् ।
राममभ्यद्रवज्जिष्णुरस्रुनाच्चेषुदृष्टिभिः ॥ ८२ ॥
अपौहदाशुवर्षं तद्भल्लै रामो निराकुलः ।
प्रत्यस्रुनोद्दशग्रीवं शरैराशीविषोपमैः ॥ ८३ ॥

आलोकयदित्यादि । स दशग्रीवः काकुत्स्थमालोकयत् दृष्टवान् घोरदर्शनमधृष्णोत् धृष्टवान् जिष्टषाप्रागल्भ्य इति स्वादिः ताननुसरन् घोरमध्वनत् ध्वनितवान् रामं मारयामीति भीमं धनुरभ्रमयत् भ्रमितवान् मितां ह्रस्वः मान्तत्वान्मित्त्वं ये विद्विषो न पलायिताः तानभीषयत त्रासितवान् भियो हेतुभये षुक् माम्प्रोर्हेतुभय इति तङ् ॥ ८१ ॥ ज० म०

आलोकयदित्यादि । स रावणः काकुत्स्थं दृष्टवान् लोकृक् दीप्तौ आङ्पूर्व्वो दर्शने तमालोक्य प्रगल्भ्यते स्म जिष्टषा न प्रागल्भ्ये घोरमध्वनत् सिंहनादं चकार भीमं धनुर्भ्रामयामास घटादिजनीत्यादिना अमन्तत्वात् ह्रस्वः तान् द्विषः शत्रून् त्रासितवान् भीर्भीष्वेति भीषादेशो मच्च ॥ ८१ ॥ भ०

आस्कन्ददित्यादि । जिष्णुर्जयशीलो दशग्रीवः लक्ष्मणं वाणैरास्कन्दत् बाधितवान् स्कन्दगतिशोषणयोः तच्च लक्ष्मणं द्रुतमत्यक्रामत् तिष्ठेत्याक्रान्तवान् थिति दीर्घः अतिक्रम्य च राममभ्यद्रवत् अभिमुखं गतवान् द्रुगतौ द्रुषुदृष्टिभिरस्रुनात् क्षादितवान् स्रुञ् आवरणे स्रुन्भुस्तुन्भ्वित्यादिना चकारात् नात् ॥ ८२ ॥ ज० म०

आस्कन्ददित्यादि । जिष्णुर्जयशीलो रावणो वाणैर्लक्ष्मणं आस्कन्दत् पीड़ितवान् स्कन्दिरौ शोषणे गत्यां तच्च लक्ष्मणं द्रुतमतिक्रान्तवान् क्रमः मेथिर्घः राममभिमुखेन ययौ द्रुस्रुतौ गतौ वाणदृष्टिभिः तमाच्छादितवान् स्रुञ्नञ आप्तौ ॥ ८२ ॥ भ०

अपौहदित्यादि । तद्बाणवर्षं रामो निराकुलः सन् भल्लैरपौहत् अपनीतवान् उपसर्गादस्यूह्योर्वा वचनमिति पक्षे तिप् दशग्रीवं वाणैराशीविषोपमैः दुःसहत्वात्प्रत्यस्रुनोत् प्रतीपं क्षादितवान् अत्र श्रुप्रत्ययः ॥ ८३ ॥ ज० म०

अपौहदित्यादि । निराकुलो रामस्तां बाणवृष्टिं भल्लैर्बाणविशेषैरपनीतवान् जहङ् तर्के गेर्वाऽस्योऽहो ढे चेति मस्य पाक्षिकत्वादत्र पं आशीविषोपमैर्दुःसहत्वात् सर्पतुल्यैर्बाणैर्दशग्रीवं प्रत्यस्रुनोत् आक्षादितवांश्च आशीः स्रा-

मण्डलान्याटतां चित्रमच्छित्तां शस्त्रसंहतीः ।
जगद्विस्मापयेतां तौ न च वीरावसीदताम् ॥ ८४ ॥
व्योम प्राचिनुतां बाणैः क्ष्मामच्छापयतां गतैः ।
अभित्तां तूर्णमन्योन्यं शिक्षाश्चातनुतां मुहुः ॥ ८५ ॥
समाधत्तासुरं शस्त्रं राक्षसः क्रूरविक्रमः ।
तद्धरन्महासर्पान् व्याघ्रसिंहांश्च भीषणान् ॥ ८६ ॥

दन्दिदंष्ट्रेऽपि तत्र विषमस्येति मनीषादिः आशीमिव कलामिन्दोरिति दर्शनात् रैकारान्तमपि प्रकृत्यन्तरम् ॥ ८३ ॥ भ०

मण्डलानीत्यादि । चित्रमाश्चर्यं मण्डलान्याटतां चक्रवद्भ्रान्तौ शस्त्रसंहतीः अच्छित्तां छिन्नवन्तौ जगत् विस्मापयेतां विस्मापितवन्तौ निसस्मयतेरित्यात्वं न च तौ वीरौ असीदतां अवसन्नौ माभूदिति सीदादेशः ॥८४॥ज० भ०

मण्डलानीत्यादि । तौ युध्यमानौ रामरावणौ मण्डलानि आटतां चक्रवद्भ्रान्तौ अट गतौ अन्योन्यं अस्त्रसमूहान् छिन्नवन्तौ जगद्विस्मितं चक्रतुः विस्मेरार्थादिति आ मश्च छीव्रीति पगु नच खिन्नौ यतो वीरौ स्यादानेति सदेः सीदः ॥ ८४ ॥ भ०

व्योमेत्यादि । बाणैर्व्योम प्राचिनुतां छादितवन्तौ क्ष्मां पृथिवीं अच्छापयतां कम्पितवन्तौ क्ष्मायी विधूनने अर्त्तिह्वीत्यादिना पुक् अन्योन्यमभित्तां विदारितवन्तौ असोरल्लोपः चर्त्वेन च तकारः तूर्णं शिक्षा धनुषि कौशलानि मुहुरतनुतां विस्तारितवन्तौ ॥ ८५ ॥ ज० भ०

व्योमेत्यादि । तौ बाणैर्व्योम आकाशं प्राचिनुतां छादितवन्तौ चिनचिञ चित्यां प्राहणुतामिति पाठे हृणगहञ हृतौ गतैर्गमनैः क्ष्मां कम्पितवन्तौ क्ष्मायीङ् विधूनने ञिः ह्वीव्रीति पगु हसाल्लोप इति यलोपः तूर्णमन्योन्यं भिन्नवन्तौ अधौभिदिर्दंभिदि मनीषादित्वात् सवर्गात् सवर्गस्य सवर्गे वा लोप इति बोध्यं तेन एकतकारवानपि पाठः शिक्षाश्च धनुषि कौशलानि मुहुरातनुतां मनदुञ विस्तारे ॥ ८५ ॥ भ०

समाधत्तेत्यादि । राक्षसः आसुरं शस्त्रं समाधत्त धनुष्यारोपितवान् ह्वौ हिर्वचनमभ्यासकार्यं आभ्यस्तयोरित्याकारलोपः दधस्योश्चेति भष्भावः झषस्योर्धः ध इति प्रतिषेधात् तकारस्य धत्वं न भवति तत्संहितं सर्पादीन् प्रावरत् मुक्तवत् ॥ ८६ ॥ ज० भ०

न्यषेधत् पावकास्त्रेण रामस्तद्राक्षसस्ततः ।
अदीव्यद्रौद्रमत्युग्रं सुपलाद्यगलत्ततः ॥ ८७ ॥
गान्धर्व्वेण न्यविध्यत्तत् क्षितीन्द्रोऽथ नराशनः ।
सर्व्वमर्म्मसु काकुत्स्थमौन्मत्तीक्ष्णैः शिलीमुखैः ॥ ८८ ॥
ततश्चिच्छिरसं तस्य प्राहरच्चक्ष्मणो ध्वजम् ।
अमथ्नात् सारथिञ्चाशु भूरिभिश्चातुदच्छरैः ॥ ८९ ॥

समाधत्तेत्यादि । क्रूरविग्रहो भीमविग्रहो राक्षसः धनुषि असुरदैवतं शस्त्रं समाधत्त आरोपितवान् डुधाञ्धारणे पुष्टौ दाने सम्पूर्व्वः सन्धाने ह्वादीरेहिः आद्योरालोप इत्यालोपो धोदधोऽन्तलोप इति खेर्धत्वं तत् शस्त्रं संहितं भीषणान् सर्पादीन् चरति स्म ॥ ८६ ॥ भ०

न्यषेधदित्यादि । तदासुरं शस्त्रं रामः पावकास्त्रेण न्यषेधत् निषिद्धवान् ततो राक्षसो रौद्रमस्त्रमत्युग्रमदीव्यत् क्षिप्तवान् अत्र दिवितौ वर्त्तते ततो रौद्रात् क्षिप्तात् सुपलादि प्रहरणमगलत् निर्गतवत् गल अदने अनेकार्थत्वाद्धातूनां गलिरत्र निर्गमे वर्त्तते ॥ ८७ ॥ ज० म०

न्यषेधदित्यादि । रामस्तदासुरास्त्रं पावकास्त्रेण विनिवारितवान् षिधु गत्यां निपूर्व्वो निवारणे णीक इति षत्वं ततो राक्षसो रुद्रदैवतमस्त्रमदीव्यत् तेन जिगीषाञ्चकार दिवो धेवेति करणे ह्वी दिवुजिगीषेच्छापणिद्युतौ क्रीड़ागत्योः गताविह दिवरिति जयमङ्गला व्यनच् तयोरिति दीर्घः ततो रौद्रास्त्रात् सुपलादि प्रहरणं गलितम् ॥ ८७ ॥ भ०

गान्धर्व्वेणेत्यादि । क्षितीन्द्रो रामः तद्रौद्रमस्त्रं गान्धर्व्वणास्त्रेण न्यविध्यत् ताड़ितवान् अथ नराशनो राक्षसः शिलीमुखैर्वाणैः सर्व्वमर्म्मसु काकुत्स्थमौन्मत्तं पूरितवान् उन्म पूरणे तुदादौ ॥ ८८ ॥ ज० म०

गान्धर्व्वेणेत्यादि । क्षितीन्द्रो रामो गन्धर्व्वदैवतेनास्त्रेण तत् रौद्रास्त्रं विव्याध व्यध्यो ताड़े अहस्त्रपाद्योरिति जिः अथ नराशनो रावणस्तीक्ष्णैः शिलीमुखैर्वाणैः सर्व्वत्र मर्म्मस्थाने काकुत्स्थं पूरितवान् उन्भुभुभ्रूर्त्तौ तनूपां न लुग्वाशणाविति पक्षे नलोपाभावः ॥ ८८ ॥ ज० म०

तत इत्यादि । ततोऽनन्तरं लक्ष्मणस्य रावणस्य ध्वजं त्रिशिरसं त्रिशूलाग्रं प्राहरत् क्षिप्तवान् ओव्रश्चूच्छेदने तुदादौ सारथिं चामथ्नात् ध्वस्तवान् मथ विलोडने क्र्यादिः भूरिभिश्च प्रभूतैः शरैरतुदत् व्यधितवान् ॥८९॥ज०म०

अश्वान् विभीषणोऽतुभात्यस्रन्नञ्चास्त्रिणोत् द्रुतम् ।
नाऽतुभाद्राक्षसो भ्रातुः शक्तिञ्चोदटहद्गुरुम् ॥ ९० ॥
तामापतन्तीं सौमित्रिस्त्रिधाऽकृन्तच्छिलीमुखैः ।
अशब्दायन्त पश्यन्तस्ततः क्रुद्धो निशाचरः ॥ ९१ ॥
अष्टघण्टां महाशक्तिमुदयच्छन्महत्तराम् ।

तत इत्यादि । ततस्तदनन्तरं लक्ष्मणस्तस्य त्रिशिरसं त्रिलेखं ध्वजं छिन्नवान् त्रसूशृच्छेदे यङ्लुबाद्योरिति जिः सारथिञ्च हतवान् गमन्थ च गाढे भूरिभिर्बाणैः शरैस्ताडितवान् तमित्यर्थात् ॥ ८९ ॥ भ०

अश्वानित्यादि । विभीषणस्त्वश्वानतुभात् हतवान् नभतुभ हिंसायां स्यन्दनं चास्त्रिणोत् भग्नवान् स्त्रिण हिंसायां तनादौ राक्षसो रावणः नाऽतुभात् न क्षोभं गतः क्षुभ सञ्चलने क्र्यादौ ऽटह्यते न दिवादौ भ्रातुर्विभीषणस्य कृते गुरुं शक्तिमुदटहत् उद्यतवान् टह उद्यमने तुदादौ गुरुमिति बोतो गुणवचनादिति विकल्पेन ङीष् ॥ ९० ॥ ज० भ०

अश्वानित्यादि । तस्माश्वान् विभीषणो हतवान् तुभ्यगच चकारात् हिंसे श्रीघ्रं स्यन्दनं चास्त्रिणोत् त्रणस्त्रिणदुजवधे नोपधाऽऽ णुरिति गुणाभावः एतावत्यपि राक्षसो न क्षोभं प्राप क्षुभग च चकारात् सञ्चलने मनीषादित्वात् भकारवगयुक्तस्य नत्वमिति बोध्यं भ्रातुर्विभीषणस्य कृते गुर्वीं शक्तिं अस्त्रविशेषं उत्थापितवान् भूटङ उद्यमे भ्रातुरुपरि नाऽतुभात् यदुपक्तस्थितत्वादित्यन्वये योजयन्ति ॥ ९० ॥ भ०

तामित्यादि । तस्योपरि शक्तिमापतन्तीं सौमित्रिः शिलीमुखैस्त्रिधा त्रिप्रकारं अकृन्तत् छिन्नवान् कृती छेदने तुदादौ यत्र प्रेक्षकाः पश्यन्तः ते अशब्दायन्त शब्दं कृतवन्तः वीर लक्ष्मण साधु कृतमिति शब्दवैरेत्यादिना करोत्यर्थे यङ् ततोऽनन्तरं निशाचरः क्रुद्धः क्रोधं कृतवान् ॥ ९१ ॥ ज० भ०

तामापतन्तीमित्यादि । विभीषणोपरि आपतन्तीं तां शक्तिं लक्ष्मणो बाणैः प्रकारत्रयेण कृन्तति स्म कृतीत्यपच्छिदि पश्यन्तः समरप्रेक्षका देवादयः शब्दञ्चक्रुः शब्दसुखकटादेरिति ङ्यः तत इत्यादिकमुत्तरश्लोकेन सम्बध्यते ॥ ९१ ॥ भ०

क्रुद्धो निशाचरः किं कृतवानित्याह

अष्टेत्यादि । अष्टौ घण्टा यस्यां महाशक्तौ तां शक्तिं प्रभावेण महत्तरां

रामानुजं तयाविध्यत् स महीं व्यसुराश्रयत् ॥ ९२ ॥
राघवस्याभ्यशायन्त शायकास्तैरुपद्रुतः ।
ततस्तूर्णं दशग्रीवो रणक्ष्मां पर्य्यशेषयत् ॥ ९३ ॥
सस्फुरस्योदकर्षच्च सौमित्रेः शक्तिमग्रजः ।
असिञ्चदोषधीस्ता याः समानीता हनूमता ॥ ९४ ॥
उदजीवत् सुमित्राभूर्भ्रातास्मिंस्तत्तमायतम् ।

महतीं अतिशयेन महाप्रमाणां उदयच्छत् उद्यतवान् सन्नुदङभ्योयमोयन्य इति तङ् भवति अकर्त्तृभिप्रायत्वात् तया च करणभूतया रामानुजं लक्ष्मणमविध्यत् विद्धवान् राममनुजातवानिति अनौकर्म्मणीति ङः स च लक्ष्मणो विद्धः व्यसुः विगतप्राणः महीमाश्रयत् आश्रितवान् भुवि पतित इत्यर्थः ॥९२॥ज०म०

अष्टघण्टामित्यादि । तदनन्तरं क्रुद्धो रावणो महाप्रमाणां शक्तिं उदयच्छत् उत्थापितवान् कीदृशीं अष्टौ घण्टा यस्यास्तां प्रभावेण महत्तरां महतीशब्दात्तरप्रत्यये सति पुम्वत् स्यादानेति यमेर्यच्छः तया शक्त्या रामानुजं लक्ष्मणमविध्यत् ताडितवान् स लक्ष्मणो व्यसुर्विगतप्राणः सन् भूमिमाश्रितवान् ॥ ९२ ॥ भ०

राघवस्येत्यादि । तस्मिन् पतिते राघवस्य सम्बन्धिनो वाणाः अभ्यशायन्त अभ्यग्रा मृशा अभवन् शीघ्रगतयो जाता इत्यर्थः ततस्तैरुपद्रुतो दशग्रीवः तूष्णीं-भूत्वा रणक्ष्मां रणभूमिं पर्य्यशेषयत् त्यक्तवान् शिष असर्व्वोपयोगे चुरादिः ॥ ९३ ॥ ज० म०

राघवस्येत्यादि । लक्ष्मणे पतिते सति राघवस्य शराः पूर्व्वमभ्यग्रास्तदानीं मृशा अभवन् शीघ्रगतयो जाता इत्यर्थः अग्रादेस्यर्थ इति ङः तदनन्तरं तैः सायकैरुपद्रुतो दशग्रीवस्तूष्णीं शीघ्रं रणभूमिं पर्य्यशेषयत् त्यक्तवान् शिषकि असर्व्वोपयोगे ॥ ९३ ॥ भ०

सस्फुरस्येत्यादि । अथजश्च रामः सौमित्रेः सस्फुरस्य उच्छ्वसतः शक्तिं हृदयलग्नामुदकर्षत् उत्कृष्टवान् याश्च हनूमतौषध्यः समानीतास्ता असिञ्चत् व्रणदेशेषु क्षारितवान् ॥ ९४ ॥ ज० म०

सस्फुरस्येत्यादि । सोऽग्रजो रामः सस्फुरस्य उच्छ्वसतः सौमित्रेः शक्तिं हृदि लग्नां उदकर्षत् आकृष्टवान् स्फुरश्चि स्फूर्त्तौ चले पचादित्वादन् कुटादित्वात् कुटांगुन्नीज्ञ्णितीति निषेधान्न गुणः या ओषधयो हनूमता समानीतास्ता ओषधीरसिञ्चत् व्रणदेशे इत्यर्थात् षिचषत्रीज् क्षरणे ॥ ९४ ॥ भ०

सम्यग्मूर्ध्न्युपाघ्रिङ्क्ष्दृष्ट्वा च निरामयम् ॥ ६५ ॥
ततः प्रोद्वहन् सर्वे योद्धुमभ्यद्रवत् परान् ।
अक्लक्ष्यायत च प्राप्तो रथेनान्येन रावणः ॥ ६६ ॥
भूमिष्ठस्यासमं युद्धं रथस्थेनेति मातलिः ।

उज्जीवदित्यादि । ततः सुमित्राभूर्लक्ष्मणः उज्जीवत् प्रत्युज्जीवितवान् तञ्च जीवितं भ्राता रामः आयतं दीर्घकालमश्लिष्यत् आलिङ्गितवान् मूर्ध्नि च सम्यगुपाघ्रिङ्क्ष्त् आघ्रातवान् घ्रिषि आघ्राणे निरामयञ्च कुशलमपृच्छत् पृष्टवान् किं व्यपगता पीडेति ॥ ६५ ॥ ज० म०

उज्जीवदित्यादि । सुमित्राभूर्लक्ष्मण उज्जीवितवान् मातृनामसङ्कीर्त्तनं पराजितत्वेनापकर्षात् भ्राता राम आयतं दीर्घकालं तं लक्ष्मणमालिङ्गितवान् घ्रिषौ यङ्लुञि आलिङ्गन् मूर्ध्नि च सम्यगाघ्रातवान् घ्रिष्याघ्राणे स्नेहाभिव्यङ्ग्यमिदं निरामयं पीडाया अभावञ्च पृष्टवान् आमयस्याभाव इत्यव्ययीभावः ॥ ६५ ॥ भ०

तत इत्यादि । पुनः सर्व्व एव रामादयो योद्धुं प्रोत्साहन् प्रोत्साहितवन्तः सहमर्षण इति चौरादिकः परस्मैपदी आष्टमाद्देति णिच् भवति नतु भौवादिकः तस्मान्मनेपदित्वात् रावणश्चान्येन रथेन प्राप्तः सन् परानुत्सहतोऽभ्यद्रवत् अभिमुखं गतवान् अक्लक्ष्यायत च क्लक्ष्याय पापाय कर्म्मणे क्रमितवान् सत्कल्पकष्टक्लक्ष्यगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यमिति क्यङ् कण्वचिकीर्षा पापचिकीर्षा ॥ ६६ ॥ ज० म०

तत इत्यादि । पुनः सर्व्व एव रामादयो योद्धुं प्रोत्सहने स्म सह्यकियङ्क्तौ क्यनुबन्धत्वाद्धा चुरादिः रावणोऽपि अन्येन रथेन समाप्तः सन् परान् शत्रून् अभ्यद्रवत् अभिमुखं गतः आत्मनश्च क्लक्ष्यं इन्द्रजिद्धात्रिजन्यं वेदितवान् सुखादित्वात् शब्दसुखकष्टादेरिति ङ्यः क्लक्ष्यं कर्म्म करोतीति कष्टादिरित्यन्ये तन्मते कूटयुद्धादिना पापदृत्तिः प्रक्लप्तमन्तरमिति कालापाः क्लक्ष्यशब्दस्य तद्वति पुरुषे वर्त्तमानत्वात् क्लक्ष्यवानिवाचरति क्लेति घानुङ्यकी इति ङ्य इति केचित् ॥ ६६ ॥ भ०

भूमिष्ठस्येत्यादि । भूमिष्ठस्य रामस्य अज्ञाज्ञेति मूर्ध्न्यः रथस्थेन रावणेन सह योद्धुमसममतुल्यमयुक्तमिति निरूपितवतो मघवतः इन्द्रस्य आज्ञया मातलिः सप्तस्वं रथमन्युग्यमाहरत् आनीतवान् ॥ ६७ ॥ ज० म०

आहरद्रथमत्युग्रं सशस्त्रं मघवाज्ञया ॥ ९७ ॥
सोऽध्यष्ठीयत रामेण शस्त्रं पाशुपतं ततः ।
निरास्यत दशास्यस्तच्छक्रास्त्रेणाजयन्नृपः ॥ ९८ ॥
ततः शतसहस्रेण रामः प्रौर्णोन्निशाचरम् ।
वाणानामच्छिणोद्धुर्य्यान् सारथिञ्चादुनोत् द्रुतम् ॥ ९९ ॥
अदृश्यन्तानिमित्तानि प्राह्वलत् क्षितिमण्डलम् ।
रावणः प्राहिणोच्छूलं शक्तिञ्चैन्द्रीं महीपतिः ॥ १०० ॥

भूमिष्ठस्येत्यादि । भूमिस्थितस्य रामस्य रथस्थितेन रावणेन सह युद्धमसम-मतुल्यमयुक्तमिति विचारयतो मघोन इन्द्रस्याज्ञया मातलिस्तस्य सारथिः सशस्त्रं अत्युग्रं रथं आहरत् आनीतवान् भूमौ तिष्ठतीति हृभजनादिति डः मनीषादित्वात् षम् ॥ ९७ ॥ भ०

सोऽध्यष्ठीयतेत्यादि । स रथो रामेणाध्यष्ठीयत अध्यासितः कर्म्मणि लङ् घुमास्थेतीत्वं गुणोऽर्त्ति इत्यादिना षत्वं अद्यप्रवायेऽपि ततोऽनन्तरं दशास्यः पाशुपतमस्त्रं निरास्यत क्षिप्तवान् उपसर्गादस्यत्यूह्योर्वा वचनमिति तङ् तत्पाशुपतं रूपो रामः शक्रास्त्रेणाजयत् जितवान् ॥ ९८ ॥ ज० म०

सोऽध्यष्ठीयतेत्यादि । स रथो रामेणाधिष्ठितः कर्म्मणि यक् दामागैहागित्यादिना ङीः गोक इति षत्वं ततो दशास्यः पशुपतिदैवतं शस्त्रं क्षिप्तवान् गेर्व्यासोऽर्त्ति इति षत्वे मं रूपो रामस्तत् पाशुपतशस्त्रं शक्रास्त्रेण जितवान् ॥ ९८ ॥ भ०

तत इत्यादि । ततोऽनन्तरं रामः निशाचरं वाणानां शतसहस्रेण लक्षेण प्रौर्णोत् छादितवान् गुणोऽर्त्ति इति गुणः द्रुतं धुर्य्यानश्वान् धुरोयद्भावीति यत् अच्छिणोत् हतवान् सारथिं चादुनोत् उपतापितवान् ॥ ९९ ॥ ज०म०

तत इत्यादि । तदनन्तरं रामो वाणानां शतसहस्रेण लक्षेण निशाचरं रावणं प्रौर्णोदाच्छादितवान् ऊर्णुञ आच्छादने घ्यामिति गुणः द्रुतं धुर्य्यान् रथाश्वान् अच्छिणोत् हिंसितवान् क्षणच्छिणदुञ् बधे धुरं वहतीति ढधेकादिति यः व्यनच्तयोस्तुक्तेन दीर्घः सारथिञ्च पीडितवान् ॥ ९९ ॥ भ०

अदृश्यन्तेत्यादि । रावणस्यानिमित्तानि अदृश्यन्त दृष्टानि कर्म्मणि लङ् क्षितिमण्डलं प्राह्वलत् चलितं ह्वलचलने रावणस्यानिमित्तानि दृष्ट्वा मह्यदक्षशूलं

ताभ्यामन्योन्यमासाद्य समवाप्यत संयमः ।
लक्ष्मणेषुभिरक्तः क्रुद्धो रामस्य राक्षसः ॥ १०१ ॥
अस्तृणादधिकं रामस्ततोऽदेवत शायकैः ।
अक्लाम्यद्रावणस्तस्य सूतो रथमनाशयत् ॥ १०२ ।
राक्षसोऽतर्ज्जयत् सूतं पुनश्चाढौकयद्रथम् ।
निरास्येतामुभौ बाणानुभौ धुर्य्यानविध्यताम् ॥ १०३ ॥

प्राहिणोत् क्षिप्रवान् महीपतिः स रामः ऐन्द्रीं शक्तिं प्राहिणोत् क्षिप्रतरो स्वादिः ॥ १०० ॥ ज० म०

अदृश्यन्तेत्यादि । रावणेन अनिमित्तानि दुर्निमित्तानि दृष्टानि कर्म्मणि यक् क्षितिमण्डलं प्राक्षलत् चचाल क्षलक्षण चाले रावणः शूलं प्राहिणोत् क्षिप्रवान् महीपतौ राम ऐन्द्रीं शक्तिं प्राहिणोत् क्षिप्रवर्त्तनेगतौ ॥१००॥ भ०

ताभ्यामित्यादि । ताभ्यां शूलशक्तिभ्यामन्योन्यमासाद्य संश्लिष्य संयमः संयमनं यजि नोदात्तेति दृड्डिप्रतिषेधः समवाप्यत प्राप्तः कर्म्मणि लङ् अनन्तरं क्रुद्धो राक्षसः पत्रिणां शराणां मतवक्षस्येण लक्ष्मणेण रामस्य वक्षः अस्तृणादिति वक्ष्यमाणेन सम्बन्धः क्षादितवान् घादीनां क्षुखः ॥ १०१ ॥ ज०म०

ताभ्यामित्यादि । ताभ्यां शूलशक्तिभ्यां अन्योन्यमासाद्य आश्लिष्य संयमः क्षयः प्राप्तः कर्म्मणि यक् संयमनं संयमः यजि जनवधः सेम इति क्षुखः ततो रावणः क्रोधात् पत्रिणां बाणानां लक्ष्मणेण रामस्य वक्षो हृदयं अस्तृणादित्युत्तरश्लोकेनान्वयः स्तृञगिक्षादने घादेः खोने इति खः ॥ १०१ ॥ भ०

अस्तृणादित्यादि । ततोऽनन्तरं रामो राक्षसादधिकं अदेवत क्रीडितवान् तेष्टदेङ्देवन इति घादावनुदात्तेत् स तथा देवमानेनाहतो रावणः अक्लाम्यत् ग्लानिमुपगतः तस्य तथाभूतस्य रावणस्य सूतः सारथिः स्वामिजीवितेच्छया रथमनाशयत् दूरं अपनीतवान् ॥ १०२ ॥ ज०म०

अस्तृणादित्यादि । ततो रामो रावणसायकाधिकसायकैरदेवत क्रीडितवान् देष्टङ्देवने रामेण हतो रावणोऽक्लाम्यत् क्लम्युञ्जिभिर्ग्लानौ तस्य तादृशस्य रावणस्य सूतः सारथी रथं अनाशयत् स्वामिजीवनेच्छया दूरमपनीतवान् नक्षूनाशे जिः ॥ १०२ ॥ भ०

राक्षस इत्यादि । राक्षसो रावणः सूतमतर्जयत् भर्त्सितवान् हा पाप किं यत्वमीपाद्रथं पराङ्मुखयसीति इत्थं संतर्जितः सूतः पुनरपि रथमढौकयत्

उभावक्रन्तां केतूनव्यथेतामुभौ न तौ ।
आदीप्येतामुभौ धृष्णू प्रायुङ्क्षाताञ्च नैपुणम् ॥ १०४ ॥
उभौ मायां व्यतायेतां वीरौ नाश्राम्यतामुभौ ।
मण्डलानि विचित्राणि क्षिप्रमाक्रामतामुभौ ॥ १०५ ॥
न चोभावप्यलक्ष्येतां यन्तारावाहतामुभौ ।

ढौकितवान् रामसमीपमित्यर्थात् उभौ रामरावणौ बाणान्निराक्षेतां क्षिप्रवन्तौ अक्षत्यूह्योर्वेति तङ् धुर्य्यानश्वानविध्यतां ताडितवन्तौ ॥ १०३ ॥ ज०म०

राक्षस इत्यादि । रावणः सूतं तर्जितवान् रथापसरणेन लज्जोपादानात् तर्जकङ्तर्जभर्त्सने चुरादित्वात् आवुभयपदित्वं चुर्यो जिर्वेति जिः पाक्षिकत्वात्तदभावपक्षे ङ्तुवन्धाद्रात्मनेपदं कानुवन्धान्नित्यञ्जन्तेति चेत् क्वचिदात्मनेपदिनोऽपि परस्मैपदित्वं परिव्रजति पाञ्चाली मध्यमं पाण्डुनन्दनमित्यादि प्रयोगदर्शनात् भौवादिकात् प्रेरणजावर्थासङ्गतिः कर्मकर्तृत्वविवक्षया पुनः प्रेरणे जिरिति केचित् पुनश्च रथं अढौकयत् रामान्तिकं प्रापितवान् ढौकतौकतिक्लङ्गत्यां प्रेरणे जिः उभौ रामरावणौ बाणान् क्षिप्रवन्तौ गेर्व्याऽध्योह इति मं ततो धुर्य्यानश्वान् अविध्यताम् ॥ १०२ ॥ भ०

उभावित्यादि । तावुभौ रामरावणौ केतून् ध्वजानक्रन्तां क्षिप्रवन्तौ तावुभौ नाव्यथेतां न व्यथितवन्तौ उभावदीप्येतां शोभितवन्तौ धृष्णू च प्रगल्भौ नैपुणं कौशलं प्रायुङ्क्षातां प्रयुक्तवन्तौ ॥ १०४ ॥ ज० म०

उभावित्यादि । तत उभौ रामरावणौ केतून् ध्वजान् अक्रन्तां क्रतीषपच्छिदि तावुभौ न व्यथेतां न भीतौ व्यथश्चाङ् दुःखे चाखेभये उभौ अदीप्येताम् शोभितवन्तौ दीपीङ्श्चर्दीपने धृष्णू प्रगल्भौ नैपुणं युद्धकौशलं प्रयुक्तवन्तौ युजिधौंजच युतौ युजिरोक्तृच इति मं निपुणाङ्गावे विकारसंधेति णः ॥ १०४ ॥ भ०

उभौ मायामित्यादि । तावुभौ मायां व्यतायेतां विस्तारितवन्तौ तायृसन्तानपालनयोः श्वादौ उभौ वीरौ नाश्राम्यतां न श्रान्तौ युध्यमानौ च तावुभौ मण्डलानि विचित्राणि गतिवैचित्र्यात् क्षिप्रमाक्रामतां भ्रान्तौ वाभ्रायेति णप् ॥ १०५ ॥ ज० म०

उभौ मायामित्यादि । उभौ मायां व्यतायेतां विस्तारितवन्तौ तायृङ्पालनसन्तत्योः नाश्राम्यतां न श्रान्तौ यतो वीरौ युध्यमानावुभौ विचित्राणि मण्डलानि क्षिप्रमाक्रामतां भ्रान्तौ क्रमः मेघिर्भः ॥ १०५ ॥ भ०

स्यन्दनौ समसृच्येतामुभयोर्दीप्तवाजिनौ ॥ १०६ ॥
ततो मायामयान्मूर्ध्नो राक्षसोऽप्रथयद्रणे ।
रामेणैकशतं तेषां प्राहरच्छत शिलीमुखैः ॥ १०७ ॥
समक्षुभ्णन्क्षुदन्वन्तः प्राकम्पन्त महीभृतः ।
सन्त्रासमविभः शक्रः प्रैङ्खच्च क्षुभिता क्षितिः ॥ १०८ ॥

न चेत्यादि । तावुभौ नाप्यलक्ष्येतां प्रेक्षकैर्न ज्ञातौ अयं रामः अयञ्च रावण इति कर्मणि लङ् यन्तारौ सूतौ कर्मपदमेतत् उभौ परस्परस्याहतवन्तौ व्यतिदात्तोपदेशेत्यादिनानुनासिकलोपः स्यन्दनौ रथौ उभयोः रामरावणयोः दीप्तवाजिनौ चामरादिभण्डनात् दीप्ता उज्ज्वला वाजिनो ययोः तयोः स्यन्दनौ समसृच्येतां संसृष्टौ सृष्टीसम्पर्के कर्मणि लङ् ॥ १०६ ॥ ज० म०

न चेत्यादि । तावुभौ न चालक्ष्येतां प्रेक्षकैर्न दृष्टौ लक्षकञ दर्शनेऽङ्के कर्मणि यक् तावुभौ यन्तारौ सारथी सकर्मकत्वान्न मं हन्तेरनिमित्त्वात् वनतनादिनिमामिति नलोपः उभयोस्तयोः स्यन्दनौ संसृष्टौ सृष्टधीसम्पर्के कर्मणि कर्मकर्तरि वा यक् चामरादिना दीप्ता वाजिनोऽश्वाः ययोः स्यन्दनयोः ॥ १०६ ॥ भ०

तत इत्यादि । ततोऽनन्तरं राक्षसः मायामयान् मायास्वभावान्मूर्ध्नः शिरांसि अप्रथयत् प्रदर्शितवान् प्रथप्रख्यान इति घटादौ तेषाञ्च शिरसाम् एकशतं एकाधिकं शतं रामेण शिलीमुखैः शरैः प्राहरच्छत छिन्नं कर्मणि लङ् ॥ १०७ ॥ ज० म०

तत इत्यादि । तदनन्तरं रावणो मायमयान् मायास्वभावान् मूर्ध्नः शिरांसि अप्रथयत् विस्तारितवान् स्वाभाविकमस्तकानां रक्षार्थं वह्निर्वर्त्तीन्यन्यानि शिरांसि कृतवानिति भावः प्रथषमङ् ख्यातौ घटादित्वात् हुस्वः मयट्तद्रूपे तेषां शिरसामेकाधिकं शतं रामेण प्राहरच्छत छिन्नं कर्मणि यक् ॥ १०७ ॥ भ०

समक्षुभ्णन्नित्यादि । छिन्नानाञ्च पततां क्षोभादुदन्वन्तः सागराः समक्षुभ्णन् सञ्चलिताः क्षुभसञ्चलने इति क्र्यादि महीभृतः प्राकम्पन्त कम्पिताः शक्र इन्द्रः संत्रासमविभः भृतवान् पततां शिरसां पुनः पुनरुदयात् मायया विमोह्यायं राममजैषीदिति विभर्त्तेः लौहित्यवचनं भ्रजामित् धातोर्गुणः परूपत्वमिति लोपविसर्जनीयौ प्रैङ्खत् क्षुभितश्च स शक्र उखेत्यादा इखिरिति पठ्यते क्षितिश्च क्षुभिता चलिता ॥ १०८ ॥ ज० म०

समक्षुभ्णन्नित्यादि । छिन्नानां मूर्ध्नां पतनादुदन्वन्तः समुद्राः संक्षोभिताः क्षुभ्यगच चकारात् सञ्चले मनीषादित्वाणभावः पर्व्वताः कम्पिताः शक्रः

ततो मातलिना शस्त्रमस्मार्यत महीपतिः ।
बधाय रावणस्योग्रं स्वयम्भूर्यदकल्पयत् ॥ १०९ ॥
नभस्वान् यस्य वाजेषु फले तिग्मांशुपावकौ ।
गुरुत्वं मेरुसङ्काशं देहः सूक्ष्मो वियन्मयः ॥ ११० ॥
राजितं गारुडैः पत्त्रैर्विश्वेषां धाम तेजसाम् ।
स्मृतं तद्रावणं भित्त्वा सुघोरं भुव्यशाययत् ॥ १११ ॥

सन्त्रासं वभार छिन्नानां शिरसां खड्गेनाप्युत्क्षेपणात् भटुडुञभटतिपुष्पोः क्लादीरेद्विः पृभ्रादेर्डिः गुर्घुङ इति गुणः कसञ्जामिति दिप्लोपः मस्तकभारात् प्रक्षुभिता क्षितिः प्रैङ्कत्कम्पिता दक्षिरैक्षिगतौ शक्रः प्रैक्षत् क्षितिःप्रक्षुभितेत्यन्ये ॥ १०८ ॥ भ०

तत इत्यादि । रावणस्य वधाय स्वयम्भूर्यदस्त्रमकल्पयत् कल्पितवान् कृपेर्णौ गुणः कृपेरोलः तदस्त्रं मातलिना अस्मार्यत स्मारितं स्मरतेरण्णिजात् कर्म्मणि लङ् भित्त्वादृह्रस्वत्वं महीपतेरित्यधीङर्थेति षष्ठी ॥ १०९ ॥ ज० म०

तत इत्यादि । तदनन्तरं रावणस्य वधाय स्वयम्भूर्ब्रह्मा यदुग्रं शस्त्रं अकल्पयत् तत् शस्त्रं मातलिना महीपतौ रामेऽस्मार्यत स्मारितः स्मृ स्मृतौ ज्ञप्यात् कर्म्मणि यक् महीपतेरिति पाठे भावे यक् कर्म्मणि सम्बन्धविवक्षया वा षष्ठी ॥ १०९ ॥ भ०

कीदृशं तदित्याह

नभस्वानित्यादि । यस्य शस्त्रस्य वाजेषु नभस्वान् वायुः सन्निहित इत्यर्थात् फले तिग्मांशुरादित्यः पावकश्च यस्य गुरुत्वं मेरुवत् मेरोरिव दृढत्वं मेरुसङ्काशमिति पाठान्तरं तत्र मेरुस्थगौरवसदृशमित्यर्थः सूक्ष्मो देहो दिव्यचक्षुर्गम्यः वियन्मय आकाशस्वभावः ॥ ११० ॥ ज० म०

नभस्वानित्यादि । यस्यास्त्रस्य वाजेषु पत्त्रेषु नभस्वान् वायुः सन्निहित इत्यर्थात् यस्य फलेऽग्ने तिग्मांशुपावकौ सूर्य्योऽग्निश्च यस्य गुरुत्वं मेरुवत् मेरोरिव मेरुसङ्काशमिति पाठे मेरोर्यद्गुरुत्वं तत्तुल्यमित्यर्थः यस्य देहः सूक्ष्मः दिव्यदृष्टिदृश्यः अथच वियन्मय आकाशस्वभावः स्मृतमिति वक्ष्यमाणेनान्वयः ॥ ११० ॥ भ०

राजितमित्यादि । गारुडैः पत्त्रै राजितं शोभितं तेजसां विश्वेषां अनेकप्रकाराणां धाम स्थानं तदस्त्रं रामेण स्मृतं स्मृतिमागत्य सुघोरं रावणं भित्त्वा

आबभ्रन् कपिवदनानि संप्रहासं
प्राशंसत् सुरसमितिर्नृपं जितारिम् ।
अन्येषां विगतपरिप्लवा दिगन्ता
पौलस्त्योऽजुषत शुचं विपन्नबन्धुः ॥ ११२ ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लङ्विलसितो नाम
सप्तदशः सर्गः ।

भुवि अशाययत् शायितवान् रावणस्योदरं भित्त्वा भूमौ पातितवानित्यर्थः ॥ १११ ॥ ज० म०

राजितमित्यादि । गरुडसम्बन्धिभिः पक्षै राजितं दीप्तं विश्वेषां तेजसां धामस्थानं तदस्त्रं रामेण स्मृतं सुघोरं अतिभीषणं रावणं हत्वा भुवि शायितवान् पातयामासेत्यर्थः शीङ् निद्राने णिः प्रेरणे शाच्छासाह्वेति यन् ॥ १११ ॥ भ०

आबभ्रन्नित्यादि । तस्मिन् हते कपिवदनानि कर्तृभूतानि तोषात् संप्रसादभावभ्रन् सेवितवन्ति सुरसमितिः सुरसमूहः नृपं जितारिं प्राशंसत् स्तुतवती अन्येषां मनिजनानां दिगन्ताः रावणवधाद्विगतपरिप्लवा निरुपद्रवा जाता इत्यर्थात् पौलस्त्यो विभीषणः विपन्नबन्धुः मृतभ्रातृकः शुचं शोकमजुषत् सेवितवान् जुषिस्तुदादावनुदात्तेत् ॥ ११२ ॥ ज० म०

इति भट्टिकाव्यटीकायां तिङन्तकाण्डे लङ्विलसितश्चतुर्थः परिच्छेदः
काव्यस्य रावणवधो नाम सप्तदशः सर्गः ।

आबभ्रन्नित्यादि । तस्मिन् हते सति कपीनां वदनानि सम्यक्प्रसादं प्रसन्नतासम्भावबन्धुः सम्यक्काशमिति क्वचित् पाठः सम्यक्हासमिति केचित् सुरसमितिः देवानां सभा जितारिं नृपं प्राशंसत् अन्येषां जनानां दिगन्ता रावणवधाद्विगतपरिप्लवा निरुपद्रवा अभवन् पौलस्त्यो विभीषणः विपन्नबन्धुर्हतभ्रातृकः शुचं शोकं जुषते स्म सेवितवान् जुषीङ्जुषसुदिसेवे । प्रहर्षिणीच्छन्दः लक्षणं यथा त्रयोदशाभिर्मनजरगाः प्रहर्षिणीयम् ॥ ११२ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां सुग्धबोधिन्यां भट्टिटीकायां रावणवधो नाम
सप्तदशः सर्गः ।

अष्टादशः सर्गः ।

व्यश्नुते स्म ततः शोको नाभिसम्बन्धसम्भवः ।
विभीषणमसावुच्चै रोदिति स्म दशाननम् ॥ १ ॥
भूमौ शेते दशग्रीवो महार्हशयनोचितः ।
नेक्षते विह्वलं मां च न मे वाचं प्रयच्छति ॥ २ ॥

इतः प्रभृति लटमधिकृत्य लड्विलसितमाह तत्र वर्त्तमाने लट् ततोऽन्यत्रापि दर्शयिष्यति

व्यश्नुत इत्यादि । ततो बधादनन्तरं शोको विभीषणं व्यश्नुते स्म व्याप्तवान् लङ् स्म इति भूतानद्यतन परोक्षे लट् नाभिसम्बन्धेन एकोदरसम्बन्धेन सम्भवो यस्य शोकस्य असौ प्रवृद्धशोको विभीषणः उच्चैर्मकृता शब्देन दशाननं नामग्राहं रोदिति स्म रुदितवान् ॥ १ ॥ ज० म०

अथ कीमधिकृत्याह अस्याः परमते लङिति संज्ञा

व्यश्नुते इत्यादि । ततो रावणबधानन्तरं शोको विभीषणं व्यश्नुते स्म व्याप्तवान् अभूदुव्याप्तिसंहत्योः कीक्ष्णेनातीत इति भूते को कीदृशः शोकः नाभिसम्बन्धेन गोत्रसम्बन्धेन सम्भव उत्पत्तिर्यस्य असौ शोकार्त्तो विभीषण उच्चैर्मकृताशब्देन दशाननं रोदिति स्म लक्षिरुदरोद पूर्ववद्भूते को रुद्गुरोऽय इतीम् ॥१॥ भ०

तदेव दर्शयन्नाह

भूमावित्यादि । महार्हशयने उचितो यः स भूमौ शेते शोकाद्विह्वलञ्च मां नेक्षते मे वाचं प्रतिवचनं न प्रयच्छति न ददाति दाणदाने प्राग्वेत्यादिना यच्छादेशः ॥ २ ॥ ज० म०

भूमावित्यादि । दिव्यशय्यास्थायी दशग्रीवो भूमौ शेते शीङ् लक्षिरूपे भवदुभूतभव्ये इति वर्त्तमाने को शीङोरेशुः विह्वलं शोकव्याकुलं मां न ईक्षते न पश्यति ईक्षङ् दर्शने मह्यं वाचं न प्रयच्छति न ददाति दा दाने स्यादानमेति-यच्छादेशः ॥ २ ॥ भ०

विपाकोऽयं दशग्रीव संदृष्टोऽनागतो मया ।
त्वं तेनाभिहितः पथ्यं किं कोपं न नियच्छसि ॥ ३ ॥
भजन्ति विपदस्तूर्णमतिक्रामन्ति सम्पदः ।
तान्मदान्नावतिष्ठन्ते ये मते न्यायवादिनाम् ॥ ४ ॥
अपथ्यमायतौ लोभादामनन्त्यनुजीविनः ।
प्रियं शृणोति यस्तेभ्यस्तच्छन्ति न सम्पदः ॥ ५ ॥

विपाक इत्यादि । हे दशग्रीव अयं विपाको मरणलक्षणं फलं अनागतो भविष्यन्नेव मया संदृष्टः सम्यगुपलब्धः इदानीं पश्यसि तेन कारणेन योऽभिहितोऽसि सीतां मुञ्चेति अतः किमिति कोपं न नियच्छसि नापनयसि नास्त्येव मम दोषः निपूर्वोयमिरपनयने वर्तते ॥ ३ ॥ ज० म०

विपाक इत्यादि । हे दशग्रीव अयमनागतो भविष्यन् विपाको मरणरूपो मया संदृष्टः सम्यगुपलब्धः तेन कारणेन पथ्यं सीतां मुञ्चेति हितं त्वमभिहित उक्तोऽसि लोपोऽस्यशेरिति सलोप इदानीं कृत एव किं कोपं न नियच्छसि नापनयसि मम दोषो नास्त्येव यतोऽविरतौ निपूर्वोऽपनयने स्यादानमेति यच्छादेशः ॥ ३ ॥ भ०

भजन्तीत्यादि । अन्यच्च ये स्वामिनो मदादवलेपात् न्यायवादिनां माल्यवत्प्रभृतीनां मते नावतिष्ठन्ते समवप्रविभ्य स्थ इति तङ् ते पुरुषाः विपदस्तूर्णं भजन्ति अवसादं सेवन्ते भजिरुभयपदी सम्पदश्चातिक्रामन्ति त्यजन्ति ॥ ४ ॥ ज० म०

भजन्तीत्यादि । ये स्वामिनो न्यायवादिनां मते मदादहङ्कारात् नावतिष्ठन्ते प्रतिज्ञानिर्णयेत्यादिना अवपूर्वात् स्थो मं तान् विपदस्तूर्णं भजन्ति सेवन्ते भजौभागसेवनयोः सम्पदस्तान् अतिक्रामन्ति त्यजन्ति क्रमःमेऽर्थिः न्यायवादिनां माल्यवदादीनां यन्मतं त्वया नादृतं तेनेयं विपत् सम्पच्च गतेति भावः ॥ ४ ॥ भ०

अपथ्यमित्यादि । प्रायेण ह्यनुजीविनः प्रहस्तादिसदृशाः आयतावागामिनि काले दृढावस्थायामपथ्यमनिष्टं फलं लोभेन तृष्णया वा प्रियमामनन्ति उपदिशन्ति साध्विदमिति तेभ्यो यः शृणोति तं सम्पदो न मुञ्चन्ति अर्ते मुच्छादेशः ॥ ५ ॥ ज० म०

अपथ्यमित्यादि । अनुजीविनः प्रहस्तादिसदृशाः प्रायेण लोभात् तृष्णया आयतौ उत्तरकाले अपथ्यमनिष्टफलं आपाततः सुखश्राव्यत्वात् प्रियं भर्तृषु आमनन्ति उपदिशन्ति स्म अभ्यासे स्यादानेति मनादेशः यस्तेभ्यः प्रियं साधू-

प्राज्ञास्तेजस्विनः सम्यक् पश्यन्ति च वदन्ति च ।
तेऽवज्ञाता महाराज क्लाम्यन्ति विरमन्ति च ॥ ६ ॥
लेढि भेषजवन्नित्यं यः पथ्यानि कटून्यपि ।
तदर्थं सेवते चान्नान् कदाचिन्न स सीदति ॥ ७ ॥
सर्वस्य जायते मानः स्वहिताच्च प्रमाद्यति ।
दृङ्गौ भजति चापथ्यं नरो येन विनश्यति ॥ ८ ॥

क्लमिदमिति दृश्योति श्रोःशुर्धरेजिश्च सम्यदस्तं न कृच्छ्रन्ति न गच्छन्ति कृप्रापणे च पूर्ववत् कृच्छादेशः कृच्छ्धातोरूपं वा ॥ ५ ॥ भ०

प्राज्ञा इत्यादि ! ये प्राज्ञाः तेजस्विनः अक्षद्विधाः सम्यगविपरीतं शास्त्रचक्षुषा पश्यन्ति वदन्ति च सम्यक् हे महाराज अवज्ञातास्ते तिरस्कृताः क्लाम्यन्ति खिद्यन्ते विरमन्ति च विसुखा भवन्ति तदवज्ञानफलमेतदिति भावः ॥ ६ ॥ ज० म०

प्राज्ञा इत्यादि । ये प्राज्ञास्तेजस्विनोऽक्षद्विधाः सम्यक् अविपरीतं शास्त्रदृष्ट्या पश्यन्ति दृशेः पूर्ववत् पश्यादेशः ज्ञातिहितार्थं वदन्ति च हे महाराज ते युष्मद्वक्षारोऽक्षद्विधास्त्वयावज्ञाताः तिरस्कृताः सन्तः क्लाम्यन्ति खिद्यन्ति क्लमुग्लानौ भिर्ज्ग्लानौ यन्योतृशमादीति घः विरमन्ति मौनमाचरन्ति च वे पं परानुक्लमतीत्यादिना विपूर्वरमः पं तदवज्ञाफलमिदमिति भावः ॥ ६ ॥ भ०

लेढीत्यादि । यस्तु स्वामी आदौ कटून्यपि पथ्यानि परिणामसुखानि भेषजवदौषधमिव नित्यं लेढि श्रोतेन्द्रियेणानुभवति तदर्थं चान्नानविसम्वादिनः सेवते स कदाचिन्नावसीदति इह च परत्र चावसन्नो न भवति ॥ ७ ॥ ज०म०

लेढीत्यादि । यः स्वामी पथ्यानि सर्वदा हितानि कटून्यपि लेढि अभिलष्यति भेषजवत् तिक्तौषधमिव पिबति लिहौ लज्जास्वादे लेढः ढभात्तथोर्धः ष्टुभिरिति ढः तदर्थं पथ्यार्थं अन्नान् अविसम्वादिनः सेवते स कदाचित् न अवसीदति नावसन्नो भवति स्वादानेति सदेः सीद ॥ ७ ॥ भ०

सर्वस्येत्यादि । प्रायेण दृङ्गौ सत्यां सर्वो जनो मानी सञ्जायते दृङ्नेश्चित्तविकारित्वात् स्वहिताच्च प्रमाद्यति हिताद्भ्रष्टो भवति अपथ्यञ्च भजति सेवते येनापथ्येन सेवितेन नरो विनश्यति ॥ ८ ॥ ज० म०

सर्वस्येत्यादि । प्रायेण दृङ्गौ सत्यां सर्वस्य जनस्य मानो गर्वो जायते जनीभ्यङ्जनने स्वहितात् प्रमाद्यति दृङ्गा प्रमत्तमतित्वात् स्वीयमुपकारं न

द्वेष्टि प्रायो गुणिभ्योऽपि न च क्ष्विह्यति कस्यचित् ।
वैरायते महद्भिश्च श्रीयते दृद्धिमानपि ॥ ९ ॥
समाश्वसिमि केनाहं कथं प्राणिमि दुर्गतः
लोकत्रयपतिर्भ्राता यस्य मे स्वपिति क्षितौ ॥ १० ॥
अहो जागर्त्ति कृच्छ्रेषु दैवं यद्बलभिज्जितः ।
लुठन्ति भूमौ क्ष्वेडन्ति बान्धवा मे स्वपन्ति च ॥ ११ ॥

जानाति मदेः शमादित्वाद्दोर्घः अपथ्यञ्च भजति सेवते येनापथ्येन विनाशं गच्छति षगलृ नाशे ॥ ८ ॥ भ०

द्वेष्टीत्यादि । यद्यस्माद्धेतो सत्यां प्रायेण गुणिभ्यः वृद्धसेवित्वादिभ्यः प्रभुर्द्वेष्टि क्रुधद्रुहेति सम्प्रदानसंज्ञा न च कस्यचित् क्ष्विह्यति प्रीयते महद्भिश्च सह वैरायते वैरं करोति शब्दवैरेति क्यङ् तस्मात्कारणात् वृद्धियुक्तोऽपि श्रीयते विनश्यति श्रदेः क्षिति श्रीयादेशः श्रदेः शित इति तङ् ॥ ९ ॥ ज० म०

द्वेष्टीत्यादि । यः प्रभुः प्रायो गुणिभ्यो वृद्धपण्डितादिभ्यो द्वेष्टि लक्षिधौज-वैरे यक्षेदित्येत्यादिना चतुर्थी न च न कस्यचित् क्ष्विह्यति प्रीयते सम्बन्धविव-क्षया षष्ठी क्ष्विह्यल्लज्जिप्रीतौ महद्भिः सह वैरायते वैरं करोति शब्दसुख-कष्टादेरिति क्यङ्ः तस्मात्कारणात् वृद्धियुक्तोऽपि श्रीयते विनश्यति स्यादानेति श्रदेः श्रीयादेशः ॥ ९ ॥ भ०

समाश्वसिमीत्यादि । यस्य मम भ्राता लोकत्रयपतिः क्षितौ स्वपिति सोऽहं केनोपायेन समाश्वसिमि शोकं त्यजामि रुदादिभ्य इतोऽङ् दुर्गतो दुःखितः कथं केन प्रकारेण प्राणिमि जीवामि ॥ १० ॥ ज० म०

समाश्वसिमीत्यादि । केन प्रकारेणाहं समाश्वसिमि रुदादिभ्यात् सञ्ज्ञोऽय इति इम् दुःखी अहं केन प्रकारेण प्राणिमि जीवामि पूर्ववदिम् प्राग्वतो णः इत्यादिना णत्वं यस्य मे मम त्रैलोक्यस्य शासिता भ्राता रावणः क्षितौ स्वपिति शेते पूर्ववदिण् सोऽहमिति ये.ज्यम् ॥ १० ॥ भ०

अहो इत्यादि । अहो इति विस्मये कृच्छ्रेषु दुःखेषु दैवं जागर्त्ति व्यवहित-मित्यर्थः नित्यं दुःखोत्पादनात् यद्यस्मात्कारणादपरमपि मम बन्धवः बलभिज्जितः बलं भिनत्तीति बलभिदिन्द्रः तं जयन्तीति क्विप् भूमौ लुठन्ति लुठलुठोटने दिवादौ तथा क्ष्विह्यन्ति पूतीभवन्ति स्वपन्ति दीर्घनिद्रां प्रवेशिताः ॥ ११ ॥ ज० म०

अहो इत्यादि । अहो आश्चर्यं कृच्छ्रेषु कष्टेषु विषयेषु दैवं दि जागर्त्ति

शिवाः कृष्णन्ति मांसानि भूमिः पिबति शोणितम् ।
दशग्रीवसनाभीनां समदन्त्यामिषं खगाः ॥ १२ ॥
येन पूतक्रतोर्मूर्ध्नि स्थीयते स्म महाहवे ।
तस्यापीन्द्रजितो दैवात् ध्वाङ्क्षैः शिरसि लीयते ॥ १३ ॥
स्वर्भानुर्भास्करं ग्रस्तं निष्ठीवति कृताङ्किकः ।
अभ्युपैति पुनर्भूतिं रामग्रस्तो न कञ्चन ॥ १४ ॥

चेष्टते सदा देहिनां कष्टं जनयतीत्यर्थः यद्यस्मात् बलभिज्जितः शक्रपराभवकारिणोऽपि मम बान्धवा रावणादयो भूमौ लुठन्ति लुठिता भवन्ति क्लिद्यन्ति क्लेदयुक्ता भवन्ति स्वपन्ति च महानिद्रां प्रविशन्तीत्यर्थः ॥ ११ ॥ भ०

शिवा इत्यादि । दशग्रीवसनाभीनां दशग्रीवेण तुल्यगोत्राणां ज्योतिर्जनपदेत्यादिना समानस्य सभावः मांसानि शिवाः शृगालाः कृष्णन्ति कृष निष्कर्षे भूमिः शोणितं पिबति खगाः पक्षिणः मांसशोणितव्यतिरिक्तं वसामज्जादिकं समदन्ति भक्षयन्ति ॥ १२ ॥ ज० म०

शिवा इत्यादि । दशग्रीवसनाभीनां रावणसजातीयानां मांसानि शिवाः शृगालाः कृष्णन्ति भूमिः पृथिवी च तेषां रक्तं पिबति खगाः पक्षिणस्तेषामामिषं मांसशोणितातिरिक्तं वसामज्जादिकं समदन्ति भक्षयन्ति कृष निष्कर्षे ॥ १२ ॥ भ०

येनेत्यादि । येनेन्द्रजिता पूतक्रतोरिन्द्रस्य महाहवे महासमरे मूर्ध्नि अयतः स्थीयते स्म स्थितं अपरोक्षे चैति लट् विभीषणस्य ह्यपरोक्षभूतानद्यतनत्वादर्थस्य तस्यापीन्द्रजितः शिरसि दैवाद्रामाङ्गेतुभूतात् ध्वाङ्क्षैः काकैर्लीयते वर्त्तमान एव भावे लट् ॥ १३ ॥ ज० म०

येनेत्यादि । येन इन्द्रजिता पूतक्रतोरिन्द्रस्य महाहवे महायुद्धे मूर्ध्नि अयतः स्थीयते स्म दामगेहागिति ङीः तस्यापि इन्द्रजितः शिरसि अस्तके दैवात् ध्वाङ्क्षैः काकैर्लीयते लीङ्यश्लिषि उभयत्र भावे की ॥ १३ ॥ भ०

स्वर्भानुरित्यादि । स्वर्भानुः राहुः भास्करं यस्तं ग्रासीकृतं कृताङ्किकः कृताहारः निष्ठीवति स्वमुखाच्चिरस्थति रामग्रस्तो रामाभिभूतः पुनर्भूतिं नाभ्युपैति कञ्चन कञ्चिदपि भूतिं न प्राप्नोति एतल्लेधत्यूट्स्विति दृद्भिः अभ्यक्रीति पाठान्तरं तदयुक्तं छान्दसत्वात् यतः अभो वहुलं छन्दसि छलादावनन्तरे सार्वधातुके तुरुस्तुशम्यमः सार्वधातुक इतीट् ॥ १४ ॥ ज० म०

त्वमजानन्निदं राजन्नीडिषे स्म स्वविक्रमं ।
दातुं नेच्छसि सीतां स्म विषयाणाञ्च नेशिषे ॥ १५ ॥
मन्त्रे जातु वदन्त्यज्ञास्त्वं तानप्यनुमन्यसे ।
कथं नाम भवांस्तत्र नावैति हितमात्मनः ॥ १६ ॥

स्वभानुरित्यादि । स्वभानूराङ्पूर्वस्य यासीकृतं सूर्यं कृताङ्किकः दनुश्च कृताहारः सन निष्ठीवति निरस्यति छिवुल्लसाचम इति दीर्घः श्वद्यादिषु इत्यादौ छिव वर्ज्जनान्नादौ यस्य सत्वं रामेण यस्तोऽभिभूतः कश्चित् पुनर्भूतिं वृद्धिं नाभ्युपैति न प्राप्नोति गेर्धोरनेधिष इति दृणवर्ज्जनात् आदिगेचोरिति त्रिः ॥ १४ ॥ भ०

त्वमित्यादि । हे राजन् त्वमिदं यथोदितमजानन् स्वविक्रममीडिषे स्म स्तुतवानसि ईङ्जनोध्वेचेति चकाराल्लेशब्दस्यापीट् एवञ्च कृत्वा त्वं सीतां दातुं नेच्छसि स्म नेष्टवानसि विषयाणां शब्दादीनां नेशिषे स्म विषयाञ्च जितवानसि ईशश्च इतीट् अधी गर्धेति कर्म्मषष्ठी सर्व्वत्रापरोक्षे चेति लट् ॥ १५ ॥ ज० म०

त्वमित्यादि । हे राजन् त्वमिदं यथोक्तं अजानन् अहमेव शूर इति स्वविक्रमं ईडिषे स्म स्तुतवान् ईडलङस्तुतौ सध्वोरसेमिति इम् स्वपराक्रमाहङ्कारात् सीतां रामाय दातुमर्पयितुं नेच्छसि स्म दृशश्चवाच्छे स्यादानेत्यादिना इच्छादेशः विषयाणाञ्च न ईशिषे स्म न यथेष्टं विनियुङ्क्षे स्म सध्वोरसेतीम् कर्म्मणि षष्ठी ॥ १५ ॥ भ०

मन्त्र इत्यादि । मन्त्रविषये अपण्डिताः मूर्खाः सन्तः जातु कदाचिदपि वदन्ति गर्हितमेतत् तानपि त्वमनुमन्यसे अनुमतवान् इदमप्यतिगर्हितं गर्हायां लडपि जात्वोरिति अपिजात्वोरुपपदयोः कालसामान्ये लट् कथमेतत् न्याय्यं यत्तत्र भवान् रावणः विद्वानपि नात्मनो हितमवैति न विदितवान् विभाषाकथमिति लङ् चेति कथंशब्द उपपदे चकारात् गर्हायां लट् तत्र भवानिति इतराभ्योऽपि दृश्यन्त इति भवदादियोगे प्रथमान्तात् त्वल्प्रत्ययः ॥ १६ ॥ ज० म०

मन्त्र इत्यादि । मन्त्रणाविषये अज्ञा मूर्खा जातु कदाचिद्वदन्ति वक्ष्यन्ति गर्हितमेतत् अनधिकारात् तानपि त्वं अनुमन्यसे अनुमतवानसि एतदपि गर्हितं जात्वपिभ्यां सदाक्षेप इति की अज्ञा अपि वदन्तु तत्र भवान् रावणो विद्वानपि आत्मनो हितं नावैति नालोचितवान् कथन्नाम कथमेतदन्याय्यं कथमाखीच वेति की ॥ १६ ॥ भ०

अपृष्टोऽनुब्रवीति त्वां मन्त्रे मातामहो हितम् ।
न करोमीति पौलस्त्य तदा मोहात्त्वमुक्तवान् ॥ १७ ॥
त्वं स्म वेत्थ महाराज यत्स्माह न विभीषणः ।
पुरा त्यजसि यत् क्रुद्धो मां निराकृत्य संसदि ॥ १८ ॥
हविर्जक्षिति निश्शङ्को मखेषु मघवानसौ ।
प्रवाति स्वेच्छया वायुरुद्गच्छति च भास्करः ॥ १९ ॥

अपृष्ट इत्यादि । किमस्मिन् काले युज्यत इति मन्त्रे मातामहो माल्यवान् अपृष्टः सन् हितं नु ब्रवीति हे पौलस्त्य त्वं पुनर्हितमकार्षीरिति माल्यवता पृष्टं तदा तस्मिन् काले न करोमीति मोहादज्ञानादुक्तवान् अत्र नुशब्दे नशब्दे चोपपदे ननौपृष्टप्रतिवचन इति भूते धात्वर्थे नत्वोर्विभाषेति विभाषा लट् ॥ १७ ॥ ज० म०

अपृष्ट इत्यादि । त्वया मन्त्रविषये प्रश्ने अपृष्टोऽपि मातामहो माल्यवान् स्वयमुपेत्य त्वां हितं ब्रवीति उक्तवान् अभिधानाद्वर्त्तमानसामीप्ये की पिङ्गस्खेम् ब्रुव इति इम् हे पौलस्त्य रावण न करोमीति मोहादज्ञानात् त्वं उक्तवान् ॥ १७ ॥ भ०

त्वमित्यादि । हे महाराज विभीषणो यदाह स्म उक्तवान् तत्त्वं न वेत्थ स्म न विदितवानसि किमेतेन हितमुक्तं न वेति उभयत्रापरोक्षे चेति लट् तत्र पूर्वस्मिन् विदोलटो वेति सिपस्यादेशः अपरस्मिन् ब्रुवः पञ्चानामिति तिप्तोषलादेशः यद्यस्मात्त्वं क्रुद्धः सन् मां संसदि सभायां निराकृत्य पादप्रहारेण पुरा पूर्वं त्यजसि त्यक्तवानसि पुरिलुङ् चास्मे इति चकारात्लट् ॥ १८ ॥ ज० म०

त्वमित्यादि । हे महाराज विभीषणो यदाह स्म उक्तवान् पञ्च तिप्तझिसिप्थव्याहस्येति ब्रुवस्तिप्तस्थाने पक्षे आहादेशश्च तत्त्वं न वेत्थ न ज्ञातवान् श्रुतवानित्यर्थः वेत्तेः कीयं ठीयं वेति सिपस्यप् यद्यस्मात् क्रुद्धः सन् त्वं सदसि सभायां मां पादप्रहारेण निराकृत्य पुरा पूर्वं त्यजसि त्यक्तवान् यावत्पुराभ्यां भव्य इत्यत्र चकाराध्याहारात् कीरुनातीत इत्यस्मात् अतीत इत्यनुवर्त्तत इति बोध्यं तेनात्र पुरायोगे भूते की ॥ १८ ॥ भ०

हविरित्यादि । असौ मघवान् इन्द्रः मखेषु यज्ञेषु हविराज्यादिकमधुना जक्षिति भक्षयति अदादिभ्य इतीट् वायुश्च स्वेच्छया प्रवाति गच्छति पवतीति पाठान्तरं पवित्रीकरोतीत्यर्थः भास्करश्च यथेष्टमुद्गच्छति उदेति ॥ १९ ॥ ज० म०

धनानामीशते यक्षा यमो दास्यति राक्षसान् ।
तनोति वरुणः पाशमिन्दुनोदीयतेऽधुना ॥ २० ॥
शाम्यत्यृतुसमाहारस्तपस्यन्ति वनौकसः ।
नो नमस्यन्ति ते बन्धून् वरिवस्यन्ति नामराः ॥ २१ ॥
श्रीर्न हृष्यति लङ्कायां विरज्यन्ति सस्पृहयः ।
न वेद तत्र यस्यास्ति हृते त्वयि विपर्ययः ॥ २२ ॥

हृविरित्यादि । असौ मघवानिन्द्रो निर्भयः सन् मखेषु यज्ञेषु हृविर्हव-नीयं हृतादिकं जक्षिति भक्षयति हृदादित्वादिम् वायुः स्वेच्छया वाति गच्छति भास्करः स्वेच्छया उद्गच्छति न वेद तं न यस्यास्ति हृते त्वयि विपर्ययः इति चतुर्थश्लोकेनान्वयः त्वयि सति एवं नासीदिति भावः ॥ १९ ॥ भ०

धानानामित्यादि । यक्षेन्द्रो धनानामीष्टे स्वयमेव धनस्वामी भवति ईश ऐश्वर्ये यमोऽपि राक्षसान् दास्यति वशीकरोति वरुणः पाशन्तनोति विस्तारयति इन्दुनोदीयतेऽधुना भावे लट् अधुनेति सर्वत्र योज्यं अणुनेति पाठान्तरं अर्थ-पूर्णत्वात् ॥२० ॥ ज० म०

धानानामित्यादि । यक्षा धनानामीशते पालयन्ति ईश लङ ऐश्वर्ये मान्नोऽदनतः यमो राक्षसान् दास्यति वशीकरोतीति शमादित्वाद्दीर्घः वरुणः पाशं तनोति विस्तारयति अधुना इदानीं शशिना उदीयते भावे की अधुनेति सर्वत्र योज्यं पूर्वमेवं नासीदिति भावः ॥ २० ॥ भ०

शाम्यतीत्यादि । ऋतूनां समाहारः समूहावस्थानं शाम्यति अपैति वनौ-कसो वनवासिनो मुनयः तपस्यन्ति तपश्चरन्ति कर्मणो रोमन्थेत्यादिना क्यङ् तपसः परस्मैपदञ्च ते त्वद्बन्धूनमरा नो नमस्यन्ति न प्रणमन्ति न वरिवस्यन्ति नाप्रतिषेधेन परिचरन्ति नमोवरिवश्चित्रङः क्यच् । यथास्वं स्वे स्वभुजां पते ज्योतींषि नक्षत्राणि यथास्वं यथा प्रधानमाक्रमन्ते अधुना इदानीमैरावतो वज्रश्च न पराजीयते तयोस्त्र वीर्यं वर्द्धते स्म ॥ २१ ॥ ज० म०

शाम्यतीत्यादि । ऋतूनां वसन्तादीनां समाहारः समूहावस्थानं शाम्यति वनौकसो मुनयस्तपस्यन्ति तपः कुर्वन्ति नमस्तपोवरिव इति क्यः अमरास्तव बन्धून् नो नमस्यन्ति न प्रणमन्ति पूर्ववत् क्यः नच वरिवस्यन्ति न परिचरन्ति तव बन्धूनां परिचर्यां न कुर्वन्तीत्यर्थः पूर्ववत् क्यः ॥ २१ ॥ भ०

श्रीरित्यादि । लङ्कायां पुर्यां अधुना श्रीर्न कुष्यति कुष रोषे कुपिरक्ष्वेः

शचीं संस्वजते शक्रो गोपायति हरिः श्रियम् ।
देववन्द्यः प्रमोदन्ते चित्रीयन्ते घनोदयाः ॥ २३ ॥
विभ्रत्यस्त्राणि सामर्षा रणकाम्यन्ति चामराः ।
चकासति च मांसादास्तथा रन्ध्रेषु जाग्रति ॥ २४ ॥

प्राचांश्यन् परस्मैपदञ्च सस्वङ्गयश्च विरज्यन्ति अपयान्ति सर्व्वथा तद्वस्तु न वेद न वेद्मि विदो लटो वेति मिपोणल् यस्य त्वयि सते न विपर्य्ययः नान्यथा-भावः ॥ २२ ॥ ज० म०

श्रीरित्यादि । लङ्कायां श्रीर्न हृष्यति न हृष्टा भवति सस्वङ्गयो विभूतयो विरज्यन्ति विरक्ता भवन्ति रनुज्यरनुजमौज्रागे दिवादित्वात् श्यन् अपिङ्गस्य ङित्वात् हस्वङ्गलोपेऽणौ त्वयि सते सति यस्य विपर्य्ययो नास्ति यस्त्वत्कृतां मर्य्यादां न लङ्घते तमहं न वेद्मि वेत्तेःकोपमिति मिपोणप् ॥२२॥ भ०

शक्तिमित्यादि । शक्रः शक्तिं प्रहरणमधुना संस्वजते गृह्णाति स्वनुजां शपीत्यनुनासिकलोपः हरिर्विष्णुः श्रियं गोपायति आत्मनेव कृत्वा रक्षति देववन्द्यः प्रमोदन्ते हृष्यन्ति घनोदयाश्चित्रीयन्ते नानारूपेणाद्भुतायन्ते सते त्वयीति सर्व्वत्र योज्यम् ॥ २३ ॥ ज० म०

अन्यमपि विपर्य्ययमाह

शचीमित्यादि । शक्रः शचीं संस्वजते सम्यगालिङ्गते चिरं तदकरणात् त्वद्भयहर्षाच्च स्वनुजौजिङालिङ्गे घनुजदनुशस्वनुजोऽपि नलोपः हरिर्विष्णुः श्रियं लक्ष्मीं गोपायति रक्षति एतावन्तं कालं त्वदृष्टेः सम्यद्रूपाभीदिति भावः भ्रमकृतो गुपू इति आयः देवानां वन्द्यो हठस्त्रियः प्रमोदन्ते प्रहृष्यन्ति घनोदया मेघाश्चित्रीयन्ते नानाविधा भवन्ति चित्तङाश्चर्य्ये कण्ड्वादि ॥ २३ ॥ भ०

विभ्रतीत्यादि । अमराः सामर्षाः सकोपाः अस्त्राणि विभ्रति धारयन्ति रणकाम्यन्ति च आत्मनो रणमिच्छन्ति आत्मेच्छायां काम्यच् चकासति दीप्यन्ते च जक्षित्यादित्वादभ्यस्तसंज्ञायां झेरदादेशः तथा मांसादा राक्षसानां अदोऽनन्न इति विट् रन्ध्रेषु व्यसनेषु जाग्रति सावधाना भवन्ति वा ॥ २४ ॥ ज० म०

विभ्रतीत्यादि । अमराः सामर्षाः सकोपाः सन्तः अस्त्राणि बिभ्रति धारयन्ति लिटुडुलटञ्भृञिपुञ्भ्योः ह्वादीरेद्भिः पृच्छादेर्ङिः खेरे आत्मनो रण-मिच्छन्ति च लेः काम्यक् स्वेच्छायां चकासति दीप्यन्ते च चकासृत्लृ दीप्तौ

चङ्क्रम्यन्तेऽभितो लङ्कामस्मांश्चाप्यतिशेरते ।
भूमयन्ति स्वसामर्थ्यं कीर्त्तिं नः कनयन्ति च ॥ २५ ॥
दिशो व्यश्नुवते दृप्ताश्चत्वत्कृतां जहति स्थितिम् ।
चोदयन्ति च नः क्षुद्रा हसन्तस्त्वां विपङ्क्षतम् ॥ २६ ॥

अन्तोऽहेः तथा मांसादां राक्षसानां रन्ध्रेषु जाग्रति सावधाना भवन्ति जाग्टङ्लु जागरे ॥ २४ ॥ भ०

चङ्क्रम्यन्त इत्यादि । लङ्कामभितः बाह्यतोऽभ्यन्तरतश्च पर्य्यभिभ्यां सर्व्वो भयार्थे तसिः चङ्क्रम्यन्ते गर्हितं चरन्ति लपसदेति भावगर्हायां यङ् चरफलोरेत्यभ्यासस्य लुक् उत्तरस्यात इत्वं अतिशेरते च अतिशयिता भवन्ति च स्वसामर्थ्यं भूमयन्ति बहुयन्ति बहूनां भाव इति पृथ्वादिभ्य इमनिच् बहोर्लोपो भूच बहोरिति बहोर्भूयादेशः इमनिहादिलोपश्च भूमानं कुर्व्वतीति णिचि णाविष्ठवत्प्रातिपदिकस्येतीष्ठवद्भावात् टिलोपयणादिपरलोपः विन्मतोर्लुगर्थमिति वचनाद्वा टिलोपः किञ्च नोऽस्माकं कीर्त्तिं कनयन्ति अल्पां कुर्व्वन्ति अमरा इति योज्यं अल्पां कुर्व्वन्तीति णिचि णाविष्ठवद्भावाद्युवाल्पयोः कनन्यतरस्यामिति कनादेशः ॥ २५ ॥ ज० म०

चङ्क्रम्यन्त इत्यादि । अमरा इत्यनुषज्यते लङ्कां अभितः उभयतो बाह्यतोऽभ्यन्तरतश्च चङ्क्रम्यन्ते गर्हितं चरन्ति परिभ्रमन्तीत्यर्थः गत्यर्थाकर्म्मकपसदचरेति यङ् चरफलोरुपोङ् इति खेर्नुक् उङ उकारश्च लङ्कामिति धिक्समयेति द्वी तथा अस्मानपि अतिशेरते अतिक्रामन्ति शिङोरेषुः मान्नोरम् मान्नोदनतः स्वसामर्थ्यं स्वशक्तिं भूमयन्ति बहुयन्ति बहोर्भावे भूमादेशः भूयो भूमन्भूयिष्ठा इति निपातनात् बहुशब्दस्य इमनप्रत्ययान्तस्य रूपं तं करोतीति तेः कृत्याख्यानेजिः ओमंश्चेति डित टेर्लोपः भावयन्तीति क्वचित्पाठः तदा बहुशब्दस्य औ भादेशः स्यादिति परः स्वमतेः भूधातोर्ज्ञप्तस्य रूपं एतावन्तं कालमनवस्थितत्वादुज्ज्वलयन्तीत्यर्थः भूययन्तीति क्वचित्पाठः तदा बहुशब्दस्य औ भूयादेशोवेति परः स्वमते बहुशब्दस्य ईयसौभूय इति रूपं तस्मात् जिः बहुतरं कुर्व्वन्तीत्यर्थः तथा नोऽस्माकं कीर्त्तिं कनयन्ति अल्पयन्ति अल्पशब्दात् पूर्ववत् जिः युवाल्पौकनुवेति कनादेशः ॥ २५ ॥ भ०

दिश इत्यादि । दृप्ताः मत्तः दिशो व्यश्नुवते व्याप्नुवन्ति स्थितिं व्यवस्थां त्वत्कृतां प्रत्ययोत्तरपदयोश्चेति त्वदादेशः जहति त्यजन्ति विपङ्क्षतञ्च त्वां

शमं शमं नभस्वन्तः पुनन्ति परितो जगत् ।
उज्जिहीर्षे महाराज त्वं प्रशान्तो न किं पुनः ॥ २७ ॥
प्रोर्णोति शोकश्चित्तं मे सत्त्वं संशाम्यतीव मे ।
प्रमार्ष्टि दुखमालोकं सुज्ञाय्यूर्ज्जं त्वया विना ॥ २८ ॥

हसन्ति क्षुद्राः अल्पकायाः क्षोदयन्तीव क्षूद्रमिवाचक्षत इति भुवने यो हि न्यक्षतत्रिलोकः स कथं क्षुद्र उच्यते स्थूलदूरेत्यादिना क्षौयणादिपरलोपः पूर्वस्य च गुणः ॥ २६ ॥ ज० म०

दिश इत्यादि । अत्राप्यमरा इत्यनुषज्यते दृप्ताः सन्तो दिशो व्यश्नुवते व्याप्नुवन्ति अश्नूङ् व्याप्तिसंहत्योः अश्नोरित्युव मान्तोऽदन्तः त्वया कृतां स्थितिं व्यवस्थां जहति त्यजन्ति ओहाक्त्यागे आद्योरालोप्यः अन्तोऽद्देः क्षुद्रा अल्पा अपि विपन्नतं त्वां हसन्तो नोऽस्मान् क्षुद्रान् कुर्वन्त्याचक्षते वा क्षुद्रशब्दात् पूर्ववत् ञिः वाढान्तिकेत्यादिना क्षोदादेशः दृप्ता दुष्टलोकाः क्षुद्राः क्षुद्रलोका इत्यन्ये ॥ २६ ॥ भ०

शममित्यादि । नभस्वन्तो वायवः शमं शमं शान्त्वा शान्ता आभीक्ष्ण्ये णमुल् नोदात्तेति वृद्धिप्रतिषेधः आभीक्ष्ण्ये द्वे भवतः परितः सर्वतो जगत् पुनन्ति पवित्रयन्ति प्रशान्ता अपि पुनर्भूत्वा जगत् पुनन्ति हे महाराज त्वं पुनः प्रशान्तोऽपि किन्नोज्जिहीर्षे नोत्तिष्ठसि ओहाङ्गतावित्यभ्यासस्य झजामित् पुमास्यादिन दैत्यम् ॥ २७ ॥ ज० म०

शममित्यादि । नभस्वन्तो वायवः शमं शमं शान्त्वा शान्त्वा परितो सर्वतो जगत् पुनन्ति पवित्रयन्ति पृञ्गिच चकारात् शोधे त्वादेः खोने इति हुस्वः चणित्वाभीक्ष्ण्ये इति शमेश्चणम् आभीक्ष्ण्ये द्वित्वं लोकतः सिद्धं हे महाराज त्वं पुनः प्रशान्तः सन् किं न उज्जिहीर्षे न उद्गच्छसि ओहाङ्गतौ आद्योरालोप्य इति दैः ॥ २७ ॥ भ०

प्रोर्णोतीत्यादि । हे महाराज त्वया विना शोको मम चित्तं प्रोर्णोति आच्छादयति स त्वं अवष्टम्भः संशाम्यतीव अपगच्छतीव मां त्यजतीत्यर्थः दुःखञ्च कष्टं आलोकं प्रज्ञानं प्रमार्ष्टि अपनयति अतस्त्वया विना ऊर्ज्जं बलं सुज्ञामि अबलो भवामीत्यर्थः ॥ २८ ॥ ज० म०

प्रोर्णोतीत्यादि । हे महाराज शोको मे मम चित्तं प्रोर्णोति वोर्णोः पिद्भ्यस्नुरिति पक्षे णुः प्रोर्णौतीति पाठे गुणाभावपक्षेरपिद्भ्यस्नुत इति त्रिः

के न संविद्रते नान्यस्त्वत्तो बान्धववत्सलः ।
विरौमि शून्ये प्रोर्णौमि कथं मन्युसमुद्भवम् ॥ २९ ॥
रोदिम्यनाथमात्मानं बन्धुना रहितस्त्वया ।
प्रमाणं नोपकाराणामवगच्छामि यस्य ते ॥ ३० ॥
नेदानीं शक्नुयत्त्वेन्द्रौ विभीतो न दरिद्रितः ।
न गर्वं जहितो दृप्तो न क्लिश्नीतो दशानन ॥ ३१ ॥

सर्वं शास्त्रमतीव शान्तमिव दुःखं कर्तृ आलोकमालोचनं प्रमार्ष्टि निवोधयति स्तृजोऽकङिति त्रिः जर्ज्जं जर्ज्जस्वलत्वं सुस्रामि सुस्रुल्लयपर्जौमोक्षे. तुण् न त्वया विनेति सर्वत्र योज्यं ॥ २८ ॥ भ०

के नेत्यादि । त्वत्तोऽन्यो बान्धववत्सलो नेति के न संविद्रते न जानते समोगमिति तङ् वेत्तेर्विभाषेति लुट् बन्धुरेव बान्धवः प्रज्ञादित्वादण् अतोऽहं शून्ये बन्धुविरहिते विरौमि फूत्करोमि कथं केन प्रकारेण मन्युसमुद्भवं शोकोत्पादं प्रोर्णौमि आच्छादयामि ॥ २९ ॥ ज० भ०

के नेत्यादि । त्वत्तोऽन्यो बान्धवेषु वत्सलः स्नेहवान् नास्ति इति के जना न जानन्ति समोगमश्नुत्रेत्यादिना वेत्तेर्न भान्तोरम् विदस्तु वेति पाक्षिको रम् अहं शून्ये बन्धुरहितप्रदेशे विरौमि शब्दं करोमि रुलध्वनौ रपिद्वस्युत इति त्रिः कथं केन प्रकारेण मन्युसमुद्भवं शोकोत्पादं प्रोर्णौमि आच्छादयामि वोर्णोः-पिदित्यस्याप्रवृत्तिपक्षे पूर्ववद्विः ॥ २९ ॥ भ०

रोदिमीत्यादि । त्वया बन्धुना रहितत्वादनाथोऽस्मीति आत्मानमेव रोदिमि न त्वां कृतकार्य्यं यस्य ते उपकाराणां प्रमाणमियत्तां नावगच्छामि ॥ ३० ॥ ज० भ०

रोदिमीत्यादि । बन्धुना त्वया रोहितोऽहं अतएव नाथहीनमात्मानं रोदिमि त्वामुपस्तृत्य सशब्दक्रन्दनेन युक्तं करोमि रुङ्गोऽय इति इम् यस्य ते तव उपकाराणां प्रमाणं संख्यां नावगच्छामि न जानामि अपरिमितत्वात् संख्यां कर्तुं न शक्नोमीत्यर्थः ॥ ३० ॥ भ०

नेदानीमित्यादि । इदानीं त्वय्येवंभूते शक्नुयत्त्वेन्द्रौ न विभीतः न भयं कुरुतः भियोऽन्यतरस्यामिति इत्यभावपक्षे रूपं न दरिद्रितः दरिद्रो न भवतः दद्दरिद्रस्येति हलादौकिङि सार्वधातुकं इत् दृप्तौ न गर्वं जहितः परित्यजतः जहातेश्चेतीत्वं न क्लिश्नीतः क्लेशं नानुभवतः ईदित्यद्योरितीत्वम् ॥ ३१ ॥ ज० भ०

त्वयापि नाम रक्षिताः कार्य्याणि तनुमो वयम् ।
कुर्म्मश्च जीविते बुद्धिं धिक् तृष्णां कृतनाशिनीम् ॥ ३२ ॥
तृणेच्छि देहमात्मीयं त्वं वाचं न ददासि चेत् ।
द्राघयन्ति हि मे शोकं स्मर्य्यमाणा गुणास्तव ॥ ३३ ॥
उन्मुच्य स्वजमात्मीयां मां स्वजयति को हसन् ।
नेदयत्यासनं को मे को हि मे वदति प्रियम् ॥ ३४ ॥

नेदानीमित्यादि । हे दशानन इदानीं त्वयि मृते इन्द्रकुवेरौ न भयं कुरुतः जिभीलि भीत्यां न दरिद्रितः न दीनतां गच्छतः दरिद्राज्दुर्गत्यां दरिद्रोर्डिर्हसेणाविति डिः इत्नौ सन्तौ नाहङ्कारं परित्यजतः ओहाक्त्यिाने पूर्वेण पक्षे डिः न क्लेशमनुभवतः क्लिशूगविबाधे आद्योरिति ईः ॥ ३१ ॥ भ०

त्वयेत्यादि । यद्वयं त्वया विना कार्य्याणि राज्याङ्गानि तनुमः प्रसारयिष्यामः जीविते च बुद्धिं कुर्म्मः तदिमां कार्य्ये जीविते च तृष्णां कृतनाशिनीं धिक् गर्हायां लडपि जात्वोरिति भविष्यति लट् ॥ ३२ ॥ ज० म०

त्वयापीत्यादि । त्वयापि रक्षिताः स्मेत्युक्ता वयं कार्य्याणि तनुमः विस्तारयामः तनडुज विस्तृतौ नूपोऽस्मेत्यस्याप्रवृत्तिपक्षे रूपं नाम प्रकाशे तथा जीविते बुद्धिमाशां कुर्म्मः कुरुवृञोपोस्वेत्र इति सुपोलोपः व्यंजनचतयेत्यादौ कुर्व्वर्जनात्र दीर्घः तस्मात् कृतनाशिनीं कृतघ्नीं तृष्णां धिगस्तु ॥ ३२ ॥ भ०

तृणेच्छीत्यादि । मम प्रतिवचनं न ददासि चेत् यदि त्वं तर्हि आत्मीयं देहं तृणेच्छि हन्मि तृणहदम् हि यस्मात् स्मर्य्यमाणास्तव गुणाः मम शोकं द्राघयन्ति दीर्घं कुर्व्वन्ति णाविष्ठवङ्भावेन प्रियस्थिरेत्यादिना दीर्घशब्दस्य द्राघादेशः ॥ ३३ ॥ ज० म०

तृणेच्छीत्यादि । चेद्यदि त्वं वाचं न ददासि तदात्मीयं देहं तृणेच्छि छिनत्सि तृहधत्नभूधृच्छिसे तृहदन् पिङ्क्ते हि यस्मात् तव गुणाः स्मर्य्यमाणाः सन्तः नोऽस्माकं शोकान् द्राघयन्ति दीर्घान् कुर्व्वन्ति दीर्घशब्दात् लेःक्त्याख्याने इति जिः वाढान्तिकेति द्राघादेशः ॥ ३३ ॥ भ०

उन्मुच्येत्यादि । आत्मीयां स्वजं मालामुन्मुच्यापनीय देहात् हसन् परितोषात् को मां स्वजयति स्वग्विणं करोति णाविष्ठवङ्भावात् विन्मतोर्लुगिति विनोलुक् प्रकृत्यैकाजिति टिलोपाभावः को वा ममासनं नेदयति अन्तिकं

न गच्छामि पुरा लङ्कामायुर्यावद्दधाम्यहम् ।
कदा भवति मे प्रीतिस्त्वां पश्यामि न चेदहम् ॥ २५ ॥
ऊर्द्धं म्रिये मुहूर्त्ताद्धि विह्वलः ज्ञातबान्धवः ।
मन्त्रे ऽस्य हितमाख्यामि न करोमि तवाप्रियम् ॥ २६ ॥

करोति अत्रापि णौ इष्टवद्भावादन्तिकवाढयोर्नेदसाधाविति अन्तिकशब्दस्य नेदादेशः कर्हि कदा को मे प्रियं वदति वदिष्यति विभाषाकदाकर्ह्योरिति भविष्यति लट् ॥ २४ ॥ ज० म०

उन्मुच्येत्यादि । आत्मीयां मालां उन्मुच्य अपनीय परितोषात् हसन् को मां स्रजयति स्रग्विणं करोति पूर्ववन्ञिः लुङ्मद्वहिनामिति विनुलुक् को वा मे मम आसनं नेदयति अन्तिकं करोति पूर्ववन्ञिः नेदादेशश्च कर्हि कदा को वा मह्यं प्रियं वदति वदिष्यति त्वया विनेति शेषः कदाकर्हिभ्यां वेति भव्ये की ॥ २४ ॥ भ०

न गच्छामीत्यादि । यावदहमायुर्दधामि धारयिष्यामि यावत्पुरानिपातयोर्लडिति भविष्यति लट् पुराशब्दोऽत्र भविष्यदासत्तिमाह प्रीतेर्हि लङ्काप्रवेश इति दर्शयन्नाह चेद्यद्यहं त्वां जीवन्तं न पश्यामि वर्त्तमाने लट् कदा कस्मिन् काले मे मम प्रीतिर्भवति भविष्यति विभाषाकदाकर्ह्योरिति भविष्यति लट् ॥ २५ ॥ ज० म०

न गच्छामीत्यादि । यावदहमायुर्दधामि धारयिष्यामि तावत् पुरा लङ्कां न गच्छामि यावत्पुराभ्यां भव्य इति की पुराशब्दो भविष्यदासत्तिमाह लङ्काप्रवेशस्य कारणं प्रीतिस्तत्रोच्यते कदा मम प्रीतिर्भवति भविष्यति कदा कर्हिभ्यां वेति चेद्यदि त्वां जीवन्तं न पश्यामि ॥ २५ ॥ भ०

ऊर्द्धमित्यादि । मुहूर्त्तादूर्द्धं उपरि अहं म्रिये मरिष्यामि ज्ञातबान्धवत्वात् विह्वलः सन् अनेन मरणस्य निमित्तभूतं प्राप्तकालं लोडर्थं दर्शयति तेन लिङोर्ध्वमौहूर्तिक इति लोडर्थलक्षणे भविष्यति लट् लोडर्थश्च प्रैषादिकः म्रियतेर्लुङ्लिङोश्चेति चकारात् शितश्चात्मनेपदं अन्यच्च मन्त्रे मन्त्रविषये हितमाख्यामि स्म आख्यातवानहं अपरोक्षेचेति लट् ममाप्रियं मा कार्षीरिति पृष्टः सन्नहं न करोमि तवाप्रियमिति न कृतवानस्मि नन्वोर्विभाषेति पृष्ट प्रतिवचने लट् ॥ २६ ॥ ज० म०

ऊर्द्धमित्यादि । ज्ञातबान्धवत्वाद्विह्वलो व्याकुलोऽहं मुहूर्त्तादूर्द्धं म्रिये

अन्तःपुराणि पौलस्त्यं पौराश्च भृशदुःखिताः ।
संश्रुत्य स्माभिधावन्ति हतं रामेण संयुगे ॥ २७ ॥
मूर्द्धजान् स्म विलुञ्चन्ति क्रोशन्ति स्मातिविह्वलाः ।
स्माधोयन्त्युपकाराणां भर्तुः प्रमन्यवः ॥ २८ ॥
रावणस्य नमन्ति स्म पौराः सास्रा रुदन्ति च ।
भाषते स्म ततो रामो वचः पौलस्त्यमाकुलम् ॥ २९ ॥

मरिष्यामि प्राप्तकालोऽहमित्यर्थः अभिधानाद्वर्त्तमानप्राये की भृङ्टीढेत्रमं मन्त्रविषये हितमाख्यामि स्म उक्तवान् ख्यालख्यातौ कथने तवाप्रियं न करोमि स्म न कृतवान् स्मेत्यनुषज्यते किस्मेनातीत इति कारणाख्याभ्यां भूते कीति परः ॥ २६ ॥ भ०

अन्तःपुराणीत्यादि । अनन्तरं पौलस्त्यं रामेण हतं संश्रुत्य अन्तःपुराणि पौराश्च दुःखिताः अभिधावन्ति स्म ढौकन्ते स्म लट् स्म इति भूतानद्यतनपरोक्षे लट् ॥ २७ ॥ ज० म०

अन्तःपुराणीत्यादि । अथ अन्तःपुराणि पौराश्च संयुगे युद्धे रामेण हतं पौलस्त्यं रावणं संश्रुत्य श्रुत्वा अत्यर्थं दुःखिताः सन्तः अभिधावन्ति स्म वेगेनाभिमुख्यं गच्छन्ति स्म ॥ २७ ॥ भ०

मूर्द्धजानित्यादि । केशान्विलुञ्चन्ति स्म अपनयन्ति स्म अतिविह्वलं अतिवैक्लव्यं गुणप्रधानोनिर्देशः क्रोशन्ति स्म फुत्कारं कुर्व्वन्ति स्म अन्तःपुराणीत्यर्थः भर्त्तुश्चोपकाराणां सुष्ठुरधीयन्ति स्म इकस्मरणे अधीगर्थेति कर्म्मणि षष्ठी प्रमनुज्ञ चेति क्रियाविशेषणं प्रक्लिष्टशोकमित्यर्थः प्रमन्यव इति पाठान्तरं प्रक्लष्टशोका इत्यर्थः ॥ २८ ॥ ज० म०

मूर्द्धजानित्यादि । अन्तःपुराणि पौराश्चेत्यनुषज्यते मूर्द्धजान् केशान् विलुञ्चन्ति स्म अपनयन्ति स्म लुञ्चापनयने अतिव्याकुलाः सन्तः क्रोशन्ति स्म रोदनं कुर्व्वन्ति स्म क्रुशजौरोदेरुक्तो भर्त्तुरुपकाराणां सुष्ठुर्वारंवारं ध्यायन्ति स्म कर्म्मणि षष्ठी पादावित्यध्याहरन्त्यन्ये ॥ २८ ॥ भ०

रावणस्येत्यादि । पौराश्च रावणस्य नमन्ति स्म नमस्यन्ति पादावित्यर्थात् तत्सम्बन्धित्वात्तत्सास्रा सन्तः रुदन्ति च स्म ततोऽनन्तरं रामः पौलस्त्यं विभीषणं आकुलं वचो भाषते स्म उक्तवान् ॥ २९ ॥ ज० म०

दातुः स्यातुर्द्विषां मूर्द्धि यष्टुस्तर्पयितुः पितॄन् ।
युद्धाभग्नाविपन्नस्य किं दशास्यस्य शोचसि ॥ ४० ॥
वोभवीति न सम्मोहो व्यसने स्म भवादृशाम् ।
किं न पश्यसि सर्व्वोयं जनस्त्वामवलम्बते ॥ ४१ ॥
त्वमर्हसि भ्रातुरनन्तराणि
कर्त्तुं जनस्यास्य च शोकभङ्गम् ।

रावणस्येत्यादि । पौरा रावणस्य नमन्ति स्म नमस्यन्ति स्म कर्म्मणि षष्ठी पादादित्यध्याहरन्त्यन्ये ततः साक्षाः मन्त्रो रुवन्ति स्म शब्दितवन्तः रुलध्वनौ ततोऽनन्तरं रामः आकुलं प्रौलस्त्यं विभीषणं वचो वक्ष्यमाणं भाषते स्म उक्तवान् ॥ २९ ॥ भ०

दातुरित्यादि । दशास्यो दाता द्विषां मूर्द्धि स्याता यष्टा यज्ञानां पितॄन् तर्पयिता ष्टप ष्टञौ चूरादिः युधि देवादीनां संग्रामेऽभग्नः अविपन्नः तस्यैवं विधस्य किं शोचसि शोच्यमेव नास्ति वर्त्तमाने लट् ॥ ४० ॥ ज० भ०

दातुरित्यादि । हे विभीषण दशास्यस्य किं शोचसि अस्य शोच्यमेव नास्तीत्यर्थः कीदृशस्य दातुर्धनादीनां द्विषां शत्रूणां मूर्द्धि स्यातुः यष्टुर्यज्ञानां पितॄन् तर्पयितुस्तर्पणशीलस्य युधि देवानां संग्रामे अभग्नाविपन्नस्य अपलायनकृतस्य ॥ ४० ॥ भ०

वोभवीतीत्यादि । भवादृशां युष्मद्विधानां व्यसनेषु दुःखेषु सम्मोहः अज्ञानं न वोभवीति अत्यर्थं न भवति यङ्लुकि रूपं एवञ्च सति स्वार्थो न हीयते यतः किं न पश्यसि अयं सर्व्वो जनः त्वामवलम्बते त्वमेव स्वामीति प्रतीक्षते ॥ ४१ ॥ ज० भ०

वोभवीतीत्यादि । भवादृशां भवद्विधानां ज्ञानिनां कृच्छ्रेषु व्यसनेष्वपि सम्मोहोऽज्ञानं न वोभवीति नात्यर्थं भवति यङो लुकि पिङ्क्तस्खेमिति रैम् अयं सर्व्वो जनो रावणानुगतस्त्वां अवलम्बते आश्रयति एतत् किं न पश्यसि ॥ ४१ ॥ भ०

त्वमर्हसीत्यादि । तस्मात् भ्रातुरनन्तराण्यग्निसात्कारादीनि कर्त्तुं त्वमर्हसि युक्तोसि अस्य च जनस्य शोकभङ्गं शोकापनयनं कर्त्तुञ्च-अन्यथा त्वयि धुर्य्ये धुरं वहति विपन्ने विनष्टे सति हे क्षणदाचरेन्द्र राज्यभारो अनूढो अन्यैरन-

धुर्य्ये विपन्ने त्वयि राज्यभारो
मज्जत्यनूढः क्षणदाचरेन्द्र ॥ ४२ ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लङ्लिलसितो
नामाष्टादशः सर्गः ।

धिष्ठितः सन् मज्जति अधोयाति शत्रुभिर्विनश्यति तस्मात् त्वया समाहितेन राज्यभारो वोढव्य इति ॥ ४२ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लङ्लिलसितो
नाम पञ्चमः परिच्छेदः ।
काव्यस्य विभीषणप्रलापो नाम अष्टादशः सर्गः ।

त्वमर्हसीत्यादि । तथा त्वं भ्रातुरनन्तराणि अग्निकार्य्यादीनि कर्त्तुमस्य त्वामाश्रयतः सर्व्वस्य जनस्य शोकभङ्गं शोकापनयनञ्च कर्त्तुं त्वं अर्हसि अन्यथा हे क्षणदाचरेन्द्र त्वयि धूर्य्ये धुर्व्वहे विपन्ने नष्टे सति अयं राज्यभारोऽनूढोऽधृतः सन् मज्जति अधोगच्छति ॥ ४२ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेन-
कृतायां सुग्धबोधिन्यां भट्टिटीकायां विभीषणविलापो
नामाष्टादशः सर्गः ।

ऊनविंशः सर्गः ।

अपमन्युस्ततो वाक्यं पौलस्त्यो राममुक्तवान् ।
अशोच्योऽपि व्रजन्नस्तं सनाभिर्दुनुयान्न किम् ॥ १ ॥
तन्नो देवाविधेयासुर्येन रावणवद्वयम् ।
सपत्नांश्चाधिजीया स्म संग्रामे च स्थिरीमहि ॥ २ ॥

इतः प्रभृति लिङमधिकृत्य विलसितमाह तत्र विध्यादिषु लिङ् ततोऽन्यत्रापि दर्शयिष्यति

अपमन्युरित्यादि । ततोऽनन्तरं पौलस्त्यो विभीषण अपगतशोक अपगतो मन्युर्यस्य प्रादिभ्यो धातुजस्य बहुव्रीहिर्वा चोत्तरपदे लोपश्च रामं वाक्यमुक्तवान् देव किमेवमभिधत्से अशोच्य इति यतः सनाभिः सगोत्रोऽस्तं व्रजन् विनाशं गच्छन्नशोच्योऽपि सन् किं न दुनुयात् नियोगेन अवश्यतया किं नोपतापयेत् निमन्त्रणे नियोगकरणे लिङ् ॥ १ ॥ ज० म०

अथ खीत्यावधिकृत्योच्यते तयोः परमते लिङिति संज्ञा

अपमन्युरित्यादि । ततोऽनन्तरं अपगतशोकः पौलस्त्यो विभीषणो रामं वाक्यमुक्तवान् किं तदित्याह अशोच्योऽपि सनाभिः सगोत्रः अस्तं विनाशं व्रजन् किं न दुनुयात् अपितु तापयत्येव द्रोदुन अनुतापे विधिनिमन्त्रणेत्यादिना नियोगकरणे खौ ॥ १ ॥ भ०

तत्र इत्यादि । युष्मद्वचनादात्मा मया स्थिरीकृतः किन्त्विदमाशंसे तमुपायं नोऽस्माकं देवाविधेयासुः घुमास्थेत्यनुवृत्तौ एर्लिङीत्येकारादेशः येनोपायेन रावणवत् सपत्नान् वयमधिजीयास्म उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति सकर्मकता संग्रामे च स्थिरीमहि लिङश्चेति लिङः कित्त्वान्न गुणः आर्द्धधातुकत्वान्न सलोपः सर्व्वत्रैवाशिषि लिङ् ॥ २ ॥ ज० म०

तत्र इत्यादि । देवा नोऽस्माकं तद्विधेयासुः कुर्व्वन्तु ढ्राशिषि दमागंहागिति धाञोदासंज्ञत्वात् डेः येन रावणवत् सपत्नान् वैरिणो वयं अधिजीया

क्रियेरन्न दशास्येन यथान्येनापि नः कुले ।
देवद्रुह्वो नराहारा न्यङ्क्वश्च द्विषतां गणाः ॥ २ ॥
स एव धारयेत्प्राणानीदृशे बन्धुविप्लवे ।
भवेदाश्वासको यस्य सुहृच्छक्तो भवादृशः ॥ ४ ॥
क्रियेयोर्द्धं मुहूर्त्ताद्धिः न स्याः त्वं यदि मे गतिः ।
आशंसा न हि नः प्रेते जीवेम दृशमूर्जनि ॥ ५ ॥

स्म मारयामः पूर्ववदाशिषि ढौ घोंज्यरे युद्धे हतौमहि प्राणान् त्यजामः अत्राप्याशिषि ढौ दृगुङ्नढौति कित्त्वाङ्गुणाभावः एतेन युष्मद्वचनात् मया स्थिरीकृतोऽन्तरात्मा किन्तु युष्मत्प्रसादादेवमेवं भवत्विति भावः ॥ २ ॥ भ०

क्रियेरन्नित्यादि । यथा दशास्येन नराहाराः राक्षसा देवद्रुह्वः देवैः सहाङ्गतो गच्छन्तः क्रियेरन् कृताः विष्वग्देवयोश्चेत्यादिना देवशब्दाकारस्याद्रादेशः द्विषताञ्च गणाः न्यङ्क्वः नीचैरञ्चन्तः कृताः तिरस्कृताः तथा नोऽस्माकं कुले अन्येनाधिक्रियेरंश्चाशंसायां कर्म्मणि लिङ् क्रषीरन्निति वा पाठः आशिषि कर्म्मणि लिङ् ॥ २ ॥ ज० म०

क्रियेरन्नित्यादि । यथा दशास्येन नराहारा राक्षसा देवद्रुह्वो देवानञ्चन्तो-गच्छन्तः कृताः द्विषतां शत्रूणां गणाश्च न्यङ्को निकृष्टमञ्चन्तो गच्छन्तः कृताः तिरस्कृता इत्यर्थः तथा नोऽस्माकं कुलेऽन्येनापि क्रियेरन् इत्यहमाशंसे विधिनिमन्त्रणेति आदिशब्दात् परक्रियाशंसायां स्त्री संप्रश्ने वा कर्म्मणि यक् क्रद्रिः देवानञ्चतीति क्विप् श्विविष्वग्देवस्यटेरिति टेरद्रिः ॥ २ ॥ भ०

स एवेत्यादि । ईदृशे बन्धुविप्लवे बन्धुविनाशेऽपि स एव प्राणान् धारयेत् नियोगतो विभृयात् निमन्त्रणे नियोगकरणे लिङ् यस्य भवादृशः सुहृन्मित्रं शक्त आश्वासकः सान्त्वयिता भवेत् सम्भाव्येत सम्भावनायां लिङ् ॥४॥ ज०म०

स एवेत्यादि । ईदृशे बन्धूनां विप्लवे विनाशे स एव प्राणान् धारयेत् नियोगतः धारयेत् विधिनिमन्त्रणेति आदिशब्दात् नियोगकरणे स्त्री यस्य भवादृशः शक्तः समर्थः सुहृन्मित्रं आश्वासकः सान्त्वयिता भवेत् सम्भवति प्रोढ्या-सम्भावन इति स्त्री ॥ ४ ॥ भ०

क्रियेयेत्यादि । यदि मे मम गतिः शरणं त्वं न स्याः न भवेः लिङ् तदा यस्मिन्मुहूर्त्ते रावणोऽपि मृतः तस्मान्मुहूर्त्तादूर्द्धं क्रियेय नियोगतः प्राप्तकालः प्राणांस्त्यक्तवानहं अत्र प्राप्तकाले गम्यमाने कार्ममौहूर्त्तिक इति भूते लिङ् तत्र हि

प्रकुर्य्याम वयं देशे गर्ह्यां तत्र कथं रतिम् ।
यत्र विंशतिहस्तस्य न सोदर्य्यस्य सम्भवः ॥ ६ ॥
आमन्त्रयेत तान् प्रह्वान् मन्त्रिणोऽथ विभीषणः ।
गच्छेत त्वरितं लङ्कां राजवेश्म विशेत च ॥ ७ ॥
आदीध्वं महार्हाणि तत्र वासांसि सत्वराः ।
उज्जुगीयात सत्केतून् निर्हरेताग्रचन्दनम् ॥ ८ ॥

प्रैषादयोऽनुवर्त्तन्ते क्षियतेर्लुङ्लिङ्चेति तङ् ततः सार्व्वधातुकत्वात् यः हि यस्मा-न्नोऽस्माकं नेयमार्यंसा यद्यमूर्द्धनि दशानने प्रेते मृते त्वयि बाधरथे जीवेम प्राणान् धरयिष्याम इति अत्रार्यंसावचनस्योपपदत्वात् लिङ् ॥ ५ ॥ ज० म०

क्षियेयोर्द्धमित्यादि । यदि त्वं मे मम गतिस्तारको न स्याः न भवेः तदा यस्मिन् मुहूर्त्ते रावणो मृतस्तस्मान्मुहूर्त्तादूर्द्धमहं क्षियेय प्राप्तकालः सन् प्राणां-स्त्यक्तवानहं विधिनिमन्त्रणेति खी हि यस्मान्नोऽस्माकमियमार्यशङ्का दृष्टार्यंसनं दशमूर्द्धनि रावणे प्रेते मृते सति वयं न जीवेम प्राणान् न धारयामेति गीचे-च्छार्थैरिति कामोक्ति खी ॥ ५ ॥ भ०

प्रकुर्य्यामित्यादि । यत्र देशे सोदर्य्यस्य भ्रातुर्विंशतिहस्तस्य न सम्भवोऽस्ति तत्र कथं वयं गर्ह्यां निन्द्यां रतिं प्रकुर्य्याम करिष्यामः नैवेत्यर्थः अत्र गर्हायामित्यधि-कृत्य विभाषाकथमिति लिङ्चेति कथमित्युपपदे भविष्यति लिङ् ॥६॥ ज० म०

प्रकुर्य्यामेत्यादि । यत्र देशे सोदर्य्यस्य सहोदरस्य विंशतिहस्तस्य रावणस्य सम्भवो नास्ति दुर्लभत्वात् तत्र देशे कथं गर्ह्यां निन्द्यां रतिं वयं प्रकुर्य्याम करिष्यामः नैवेत्यर्थः कथमाखीच वेति खी ॥ ६ ॥ भ०

आमन्त्रयेतेत्यादि । अथानन्तरं विभीषणः सदसि यैर्मन्त्रिभिः सह उत्थितः तान्मन्त्रिणः प्रह्वानामन्त्रयेत कर्म्मसु नियोगतः सञ्चिक्षितवानित्यर्थः निमन्त्रणे नियोगकरणे लिङ् तदेव दर्शयति लङ्कां त्वरितं यूयङ्गच्छेत यात गतास्य राजवेश्म विशेत च प्रविशत च अत्र विधौ प्रेषणे लिङ् सर्व्व-लकाराणामपवादः ॥ ७ ॥ ज० म०

आमन्त्रयेतेत्यादि । अथानन्तरं प्रह्वान् प्रणतान् मन्त्रिणो विभीषण आमन्त्रयेत सम्बोधितवान् सम्बोधनार्थस्यामन्त्रणं विधिनिमन्त्रणेति प्रेषणे खी अध्येषणे विधौ वा ॥ ७ ॥ भ०

आदीध्वमित्यादि । तत्र राजवेश्मनि वासांसि महार्हाणि महामूल्यानि

सुञ्चेताकाशधूपांश्च ग्रथ्नीयात स्रजः शुभाः ।
आनयेतामितं दारु कर्पूरागुरुकुङ्कुमम् ॥ ९ ॥
उह्येरन् यज्ञपात्राणि हूयेत च विभावसुः ।
भ्रियेत चाज्यमृत्विग्भिः कल्प्येत च समित्कुशम् ॥१०॥
स्नानीयैः स्नापयेताशु रम्यैर्ह्रिष्यते वर्षकैः ।
अलङ्कुर्यात रत्नैश्च रावणार्हैर्दशाननम् ॥ ११ ॥

सत्वरा आददीध्वं गृह्णीत आभ्यस्तयोरात इत्याकारलोपः सत्केतून् शोभनध्वजान् उड्डनीयात ऊर्ध्वीकरिष्यथ ध्वदीनां हुस्वः ईहल्यघोः अग्रचन्द्नं सच्चन्दनकाष्ठानि निर्हरेत निर्गमयत ॥ ८ ॥ ज० म०

आददीध्वमित्यादि । तत्र राजवेश्मनि स्थितानि महामूल्यानि वासांसि यूयं सत्वराः सन्तः आददीध्वं गृह्णीयथ सत्केतून् शोभनध्वजान् उड्डनीयात ऊर्ध्वं करिष्यथ धूनगिधूञकम्पे अग्रचन्द्नं शोभनचन्द्नं निर्हरेत निर्हरिष्यथ ॥ ८ ॥ भ०

सुञ्चेतेत्यादि । धूपघटिकाभिराकाशधूपांश्च सुञ्चेत प्रवर्त्तयत स्रजः पुष्पमालाः शुभाः ग्रथ्नीयात गुम्फिष्यथ अन्यग्रन्थसन्दर्भ इति क्र्यादिः दारु काष्ठं अमितं प्रभूतं कर्पूरागुरुकुङ्कुमञ्च आनयेत सर्व्वत्र विधौ लिङ् पुषादिद्युतादिभ्यो ङ्गश्च ॥ ९ ॥ ज० म०

सुञ्चेतेत्यादि । यूयमाकाशधूपान् सुञ्चेत प्रवर्त्तयिष्यथ ऋञ्चुगतिपूजनयोः शुभाः शोभनाः स्रजो माला ग्रथ्नीयात ग्रथिष्यथ अन्यत्किगर्भे आद्योरिति ईः अमितं प्रचुरं दारु काष्ठं कर्पूरादि च आनयेत आनेष्यथ सर्व्वत्र विधौ खौ ॥९॥ भ०

उह्येरन्नित्यादि । यज्ञपात्राणि स्रुगादीनि उह्येरन् आनीयन्तां विभावसुश्चाग्निः हूयेत ऋत्विग्भिः आज्यमपि भ्रियेत समित्कुशं कल्प्येत च कल्प्यतां सर्व्वत्र विधौ कर्म्मणि लिङ् ॥ १० ॥ ज० म०

उह्येरन्नित्यादि । ऋत्विग्भिरेव नान्यैर्यज्ञपात्राणि उह्येरन् आनेष्यन्ते वहौजे प्रापणे अहस्वपाद्योरिति जिः विभावसुरग्निर्हूयेत आनेष्यते आज्यं हृविर्भिर्येत भरिष्यते समित्कुशं कल्प्येत कल्पयिष्यते सर्व्वत्र कर्म्मणि विधौ खौ ॥ १० ॥ भ०

स्नानीयैरित्यादि । यथा सविहितञ्च कृत्वा रम्यैः स्नानीयैर्दशाननं राजसाधिपं स्नापयेत स्नापयिष्यथ ग्लास्नातुच सञ्चिति विकल्पेन ईर्च्चं तत्र

वासयेत सुवासोभ्यां मेध्याभ्यां राक्षसाधिपम् ।
ऋत्विक् सम्विणमादध्यात् प्राङ्मूर्द्धानं मृगाजिने ॥ १२ ॥
यज्ञपात्राणि गात्रेषु चिनुयाच्च यथाविधि ।
जुहुयाच्च हविर्वह्नौ गायेयुः साम सामगाः ॥ १३ ॥
गत्वाथ ते पुरीं लङ्कां कृत्वा सर्वं यथोदितम् ।
समीपेऽन्त्याऽऽहृतेः साक्षाः प्रोक्तवन्तो विभीषणं ॥ १४ ॥

ज्वलङ्कलनमामनुपसर्गाद्देति वायहणमनुवर्त्तते वर्णकैश्चन्दनादिभिः रम्यैर्लिम्पेत विलेप्यथ रत्नैश्च रावणार्हैर्नित्यनैमित्तिकैरलङ्कुर्यात अलङ्करिष्यथ ॥ ११ ॥ ज० म०

स्नानीयैरित्यादि । यूयं दशाननं स्नानीयैः स्नानार्हैर्जलैः स्नापयेत स्नापयिष्यथ ज्वलङ्कलेत्यादिना हुस्य विभाषितत्वादत्र न हुस्वः वर्णकैश्चन्दनादिभिः लिम्पेत विलेप्यथ सुचादित्वान्नुण् नानाकारैर्नानाविधैरत्नैरलंकुर्यात अलंकरिष्यथ रावणार्हैरिति क्वचित्पाठः सर्व्वत्र विधौ स्वौ ॥ ११ ॥ भ०

वासयेतेत्यादि । वासोभ्यां मेध्याभ्यां पूताभ्यां वासयेत च आच्छादयिष्यथ ऋत्विक् यज्ञा स्वग्विणं कृत्वा मालाभूषितं कृत्वा मृगाजिने प्राङ्मूर्द्धानं प्राच्यां मूर्द्धा यस्य पूर्व्वशिरसमादध्यात् स्थापयेत् ॥ १२ ॥ ज० म०

वासयेतेत्यादि । यूयं मेध्याभ्यां पवित्राभ्यां सुवासोभ्यां शोभनवस्त्राभ्यां राक्षसाधिपं रावणं वासयेत आच्छादयिष्यथ वसलङ्ऋतौ ऋत्विक् यजनशीलः स्वग्विणं मालावन्तं राक्षसाधिपं मृगाजिने प्राङ्मूर्द्धानं पूर्व्वशिरसं आदध्यात् स्थापयिष्यति आद्योरित्यालोपः अद इत्युत्तेर्न ई उभयत्र विधौ स्वौ ॥ १२ ॥ भ०

यज्ञपात्राणीत्यादि । स एव यथाविधि यथाक्रमं यज्ञस्य पात्राणि स्रुगादीनि गात्रेषु विचिनुयात् हविराज्यं वह्नौ जुहुयात् सामगः छान्दोगः साम च गायेत सर्व्वत्र विधौ लिङ् ॥ १३ ॥ ज० म०

यज्ञपात्राणीत्यादि । ऋत्विक् यथाविधि विधेरनतिक्रमेण यज्ञपात्राणि स्रुगादीनि रावणस्य गात्रेषु चिनुयात् स्थापयिष्यति चिञ्चिञ्चित्यां वह्नौ हविराज्यं जुहुयात् होष्यति सामगाः साम गायेयुः आवर्त्तयिष्यन्ति गै गाने सर्व्वत्र विधौ स्वौ ॥ १३ ॥ भ०

गत्वेत्यादि । अथानन्तरं ते सम्विणः लङ्कां गत्वा यथोदितञ्च कृत्वा अन्त्याऽऽहृतेर्हताऽऽहृतेः समीपे अनन्तरं साक्षाः सभ्याः विभीषणं प्रोक्तवन्तः ॥ १४ ॥ ज० म०

कृतं सर्व्वं यथादिष्टं कर्त्तुं वह्निजलक्रियाम् ।
प्रयतेथा महाराज सह सर्व्वैः स्वबन्धुभिः ॥१५॥
अत्तवन्नोत्सहेथास्त्वं धेया धीरत्वमच्युतम् ।
स्थेयाः कार्य्येषु बन्धूनां हेयाः शोकोद्भवं तमः ॥ १६ ॥
नावकल्प्यमिदं ग्लायेद्यत्कृच्छ्रेषु भवानपि ।
न पृथग्जनवज्जातु प्रमुह्येत्पण्डितो जनः ॥ १७ ॥

गत्वेत्यादि । अथानन्तरं ते मन्त्रिणो लङ्कां पुरीं गत्वा यथोदितं सर्व्वं कृत्वा अन्त्याहुतेः समीपे अन्त्याहुतिकर्म्मसमीपे सास्रा विद्यमानास्रा विभीषणं प्रोक्तवन्तः ॥ १४ ॥ भ०

कृतमित्यादि । यथोदिष्टं यथाविहितं सर्व्वमस्माभिः कृतं त्वमिदानीं आतुर्व्वह्निक्रियां जलक्रियाञ्च कर्त्तुं स्वबन्धुभिः सर्व्वैः सह प्रयतेथाः प्रार्थनायां लिङ् ॥ १५ ॥ ज० म०

कृतं सर्व्वमित्यादि । हे महाराज यथादिष्टं सर्व्वमस्माभिः कृतं सम्प्रति वह्निक्रियां जलक्रियाञ्च कर्त्तुं सर्व्वैः स्वबन्धुभिः सह प्रयतेथाः यत्नं कुरु विधिनिमन्त्रणेति प्रार्थनायां खौ ॥ १५ ॥ भ०

अत्तवदित्यादि । शोकादप्रवर्त्तमानं पुनराहुः अत्तवत् किं नोत्सहेथाः किमवसीदसि गर्हितमेतत् किं ब्रूते लिङ्लुटाविति गर्हायां लिङ् इयं चास्माकमाशंसा यत्तु धीरत्वं धैर्य्यं अच्युतमपि नाम धेयाः धास्यसि बन्धूनाञ्च कार्य्येषु स्थेयाः स्थास्यसि शोकोद्भवञ्च तमो हेयास्त्यक्ष्यसि सर्व्वत्राशिषि लिङ् आर्द्धधातुकत्वादेर्लिङीत्यसंयोगादेरेत्वम् ॥ १६ ॥ ज० म०

अत्तवदित्यादि । अभिधीयमानस्य कर्म्मणोऽतिशोकाद्प्रवृत्तेः पुनः प्रवृत्त्यर्थमुच्यते अत्तवन्मूर्ख इव किं न उत्सहेथाः किमवसीदसि गर्हितमेतत् किम्भः खीत्यादिति खी इयमस्माकमाशंसा यत्तं अच्युतं अविनाशं धीरत्वं धैर्य्यं धेया धास्यसि ढ्राधिषि दामागैहागिति धाजोदासंज्ञकत्वात् ङेः बन्धूनां कार्य्येषु स्थेयाः स्थास्यसि पूर्व्ववत् ढौ ङेश्च बन्धुशोकोद्भवं तमो हेयास्त्यक्ष्यसि ओहाक्लि त्यागे पूर्व्ववत् ढौ ङेश्च ॥ १६ ॥ भ०

नावकल्प्यमित्यादि । अन्यच्च नावकल्प्यमिदं न सम्भाव्यमेतत् येन कृच्छ्रेषु दुःखेषु भवानपि ग्लायेत् ग्लानिं याति अनवकृप्तौ असम्भावनायां अनवकृप्त्यमर्ष-

यच्च यत्र भवांस्तिष्ठेत्तत्रान्यो रावणस्य न ।
यच्च यत्र भवान् सीदेन्महद्भिस्तद्विगर्हितम् ॥ १८ ॥
आश्चर्यं यच्च यत्र त्वां ब्रूयाम वयं हितम् ।
अपि साक्षात्प्रशिष्यास्त्वं कृच्छ्रेष्विन्द्रपुरोहितम् ॥ १९ ॥

त्यादिना लिङ् सार्वधातुकत्वाद्धान्यस्येत्येत्वं न विकल्प्यते यस्मात्पण्डितो जनः पृथग्जनवत् अपण्डितवत् जातु कदाचिदपि न प्रमुह्येत् न मोहं यातीति सम्भावयाम जातुयदोर्लिङ्लित्यनवक्लृप्तौ लिङ् ॥ १७ ॥ ज० म०

नावकल्प्यमित्यादि । अन्यच्च नावकल्प्यमिदं न सम्भाव्यमेतत् यद्भवानपि कृच्छ्रेषु दुःखविषयेषु ग्लायेत् ग्लानिं यास्यति विधिनिमन्त्रणेति आदिशब्दात् सम्भावनायां खौ कथमेतदुच्यते इत्याह यस्मात् पण्डितो जनः पृथग्जनवत् मूर्खवत् जातु कदाचिन्न प्रमुह्येत् न मोहं गच्छति जातुयद्यदायदिभिः खौ ॥ १७ ॥ भ०

यच्चेत्यादि । यत्र देशे काले वा भवांस्तिष्ठेत् तत्र यच्च अन्यो रावणस्य कश्चिष्ठेत् अवस्थानं कः करिष्यति नैतत्सम्भावयामः तस्य तत्र न्यूनत्वात् अन्यश्चिन्नवक्लृप्तिः यच्छब्देनोपपदेन योगात् यच्चयत्रयोरित्यनवक्लृप्तौ भविष्यति लिङ् यच्चेति निपातसमुदायो यच्छब्दस्यार्थे वर्त्तते किञ्च यत्र देशे काले वा यच्च भवान् सीदेत् अवसादं करोतीति महद्भिः पण्डितैः विगर्हितं निन्दितं गर्ह्यायां चेति सर्वलकाराणामपवादो लिङ् यच्चयत्रयोरित्यनुवर्त्तते अनवक्लृप्ताविति निष्टत्तम् ॥ १८ ॥ ज० म०

यच्च यत्रेत्यादि । यत्र देशे काले वा भवान् यच्च तिष्ठेत् अवस्थानं करिष्यति तत्र रावणस्य अन्यो न तिष्ठेत् नावस्थानं करिष्यति यत्र देशे काले वा भवान् सीदेत् अवसादं गमिष्यति तन्महद्भिर्विगर्हितं यच्चयत्राभ्यां क्षेपचित्रे चेति खौ ॥ १८ ॥ भ०

आश्चर्यमित्यादि । यत्र देशे काले वा यच्च यद्वयमपि त्वां हितं प्रब्रूयाम तदाश्चर्यं विचित्रमेतत् चित्रीकरणे चेति लिङ् यत्रयच्चयोरिति वर्त्तते त्वामित्यकथितं कर्म अतस्त्वं कृच्छ्रेषु व्यसनेषु साक्षादिन्द्रपुरोहितं बृहस्पतिं प्रशिष्याः वाढं शिक्षयसि उताप्योः समर्थयोर्लिङ् अपिशब्दस्योपपदत्वात् समर्थे चानयोर्वाढमिति यस्मिन् अर्थे शासिवसीत्यादिना षत्वम् ॥ १९ ॥ ज० म०

आश्चर्यमित्यादि । यत्र देशे काले वा यच्च त्वां हितं वयं प्रब्रूयाम तदा-

कामो जनस्य जह्यास्त्वं प्रमादं नैर्ऋताधिप ।
उत द्विषोऽनुशोचेयुर्विप्लवे किमु बान्धवाः ॥ २० ॥
स भवान् भ्रातृवद्रक्षेद्यद्यावदखिलं जनम् ।
न भवान् संप्रमुह्येच्चेदाश्वस्युश्च निशाचराः ॥ २१ ॥
ततः स गतवान् कर्त्तुं भ्रातुरग्निजलक्रियाम् ।

अर्थं चिन्तयेत्यादि पूर्ववत् स्त्री कथमाश्वर्थमित्याह यस्मात्त्वं लक्ष्मेषु व्यत्ययेन साक्षात् इन्द्रपुरोधसं बृहस्पतिं शिक्षयसि वाढेऽभ्युताभ्यां स्त्री ॥ १९ ॥ भ०

काम इत्यादि, हे नैर्ऋताधिप राक्षसां नाथ त्वं विषादं जह्याः त्यज अस्य जनस्य पौरस्य काम इच्छा कामप्रवेदनेऽकञ्चितीति लिङ् कञ्चिच्छब्दस्याप्रयोगात् कामप्रवेदनञ्च जनाभिप्रायप्रकाशनं अन्यच्च अस्मिन् विप्लवे विनाशे द्विषः शत्रवोऽपि उत अनुशोचेयुः अनुशोचन्ति किमु बान्धवाः उताथोः समर्थयोर्लिङ् ॥ २० ॥ ज० म०

काम इत्यादि । हे नैर्ऋताधिप राक्षसेश्वरः त्वं प्रमादं विषादं शोकं वा जह्याः त्यज जनस्य पौरस्यार्थं कामः कामोक्तेऽकञ्चितीति स्त्री हाकोऽन्तलोपः स्त्रियां शोको युज्यत एवेति दर्शयति विप्लवे विनाशे द्विषः शत्रवोऽपि ततोऽनुशोचेयुः वाढं शोकं कुर्वन्ति किमु बान्धवाः सुतरामेव शोचन्ति वाढेऽभ्युताभ्यां स्त्री ॥ २० ॥ भ०

स इत्यादि । चेद्यदि भवाञ्च सम्यग्मुह्येत् मोहं न गच्छेत् तदा स भवान् भ्रातृवत् यथा भ्राता जनो रक्ष्यते तद्वदिमं अखिलं जनं यथावत् सम्यक् रक्षेत् एते च निशाचरा आश्वसुराश्वासं गच्छेयुर्हेतुमतोर्लिङ् अत्र प्रमोहो हेतुः जनरक्षणं निशाचराश्वासनञ्च हेतुमत् श्वसेरदादित्वाच्छपो लुक् आश्वसेयुरिति पाठान्तरं आश्वास इवाचरेयुरित्यर्थः आश्वसतीत्याश्वासः पचाद्यच् तदन्तात्पूर्वप्रातिपदिकेभ्य इति क्विप् ॥ २१ ॥ ज० म०

स भवानित्यादि । चेद्यदि भवान् न प्रमुह्येत् मोहं न गच्छेत् तदा स भवानिमम्मखिलं जनं भ्रातृवत् रावण इव रक्षेत् रक्षिष्यति यथावत् सम्यक् ते निशाचरा आश्वसुः आश्वासं गच्छेयुः भव्येवाफलहेत्वोरिति स्त्री श्वसघसु प्राणे ॥ २१ ॥ भ०

तत इत्यादि । ततो वचनानन्तरं भ्रातुरग्निक्रियां जलक्रियाञ्च कर्त्तुं गतवान् अथ कृतकर्त्तव्यं कृतकृत्यं राक्षसं रामः वचः प्रोक्तवान् ॥ २२ ॥ ज० म०

प्रोक्तवान् कृतकर्त्तव्यं वचो रामोऽथ राक्षसम् ॥ २२ ॥
अम्भांसि रुक्मकुम्भेन सिञ्चन्मूर्द्ध्नि समाधिमान् ।
त्वं राजा रक्षसां लङ्कामवेक्षेथा विभीषण ॥ २३ ॥
क्रुद्धाननुनयेः सम्यक् धनैर्लुब्धानुपार्ज्जयेः ।
मानिनो मानयेः काले त्रस्तान् पौलस्त्य सान्त्वयेः ॥ २४ ॥
इच्छा मे परमानन्देः कथं त्वं वृत्रशत्रुवत् ।
इच्छेद्धि सुहृदं सर्व्वो वृद्धिसंस्थं यतः सुहृत् ॥ २५ ॥

तत इत्यादि । ततस्तद्वचनानन्तरं स विभीषणो भ्रातुरभिक्रियां जलक्रियाञ्च कर्त्तुं गतवान् अथानन्तरं कृतकृत्यं राक्षसं विभीषणं रामो वचः प्रोक्तवान् ॥ २२ ॥ भ०

अम्भांसीत्यादि । रुक्मकुम्भेन स्वर्णकलसेनाम्भांसि जलानि मूर्द्ध्नि सिञ्चन् पातयन् रामः प्रोक्तवानिति पूर्व्वेणान्वयः हे विभीषण त्वमद्यप्रभृति रक्षसां राजा लङ्कामवेक्षेथाः कार्य्याकार्य्यनिरूपणेन द्रक्ष्यसि ॥ २३ ॥ ज० म०

अम्भांसीत्यादि । रुक्मकुम्भेन सुवर्णकलसेन अम्भांसि तस्य मूर्द्ध्नि सिञ्चन् पातयन् समाधिमान् कृतसमाधानरचनः प्रोक्तवानिति पूर्व्वेणान्वयः समाधिनेति पाठे समाहितेन चेतसेत्यर्थः किमुक्तवानित्याह हे विभीषण त्वमद्यप्रभृति रक्षसां राजा लङ्कां अवेक्षेथाः कार्य्याकार्य्यविचारणेन द्रक्ष्यसि विधिनिमन्त्रणेति आमन्त्रणे खौ ॥ २३ ॥ भ०

क्रुद्धानित्यादि । हे पौलस्त्य क्रुद्धाननुनयेः प्रसादयिष्यसि ये लुब्धास्तान् धनैनोपार्ज्जयेः दानेन ग्रहीष्यसि मानिनः सत्कारोचिते काले मानयेः पूजयिष्यसि त्रस्तान् भीतान् सान्त्वयेः समाश्वासयिष्यसि सर्व्वत्र निमन्त्रणे नियोगकरणे प्रार्थनायां वा लिङ् ॥ २४ ॥ ज० म०

क्रुद्धानित्यादि । हे पौलस्त्य त्वं क्रुद्धाननुनयेः प्रसादयिष्यसि लुब्धान् धनैर्धनदानेन उपार्ज्जयेः ग्रहीष्यसि मानिनः सत्कारोचितकाले मानयेः पूजयिष्यसि त्रस्तानुद्विग्नान् सान्त्वयेः समाश्वासयिष्यसि सर्व्वत्र विधिनिमन्त्रणेति प्रार्थनायां विधौ वा खौ ॥ २४ ॥ भ०

इच्छेत्यादि । इयञ्च मे इच्छा परमा महती यत्त्वं वृत्रशत्रुवदिन्द्र इव कथमानन्देः सुदितो भविष्यसि इच्छार्थेषु लिङ् लोटाविति लिङ् इच्छार्थस्य

वर्द्धिषीष्ठाः स्वजातेषु बध्यास्त्वं रिपुसंहतीः ।
भूयास्त्वं गुणिनां मान्यस्तेषां स्थेया व्यवस्थितौ ॥ २६ ॥
धेयास्त्वं सुहृदां प्रीतिं वन्दिषीष्ठा दिवौकसः ।
सोमं पेयास्त्व हेयास्त्व हिंस्रा हानिकरीः क्रियाः ॥ २७ ॥
अवसेयास्त्व कार्य्याणि धर्म्मेण पुरवासिनाम् ।

धातोरुपपदत्वात् यतः सर्व्व एव सुहृत् सुहृदं दर्द्धिमंस्थं उदयस्थमिच्छेत् इच्छति इच्छार्थेभ्यो विभाषावर्त्तमान इति लिङ् ॥ २५ ॥ ज० म०

इच्छेत्यादि । इयं मम परमा महती इच्छा त्वं कथं इत्थंभूतवत् आनन्देः सुदितो भविष्यसि गीचेच्छार्थैरिति कामोक्ते खी तवैतेन किमित्याह यतो यस्मात् सर्व्वः सुहृन्मित्रं सुहृदं दर्द्धिमंस्थं उदयस्थं इच्छेत् वाञ्छेदिति भवद्भूतभव्ये क्रियः क्यादा इति वर्त्तमाने खी इच्छार्थे वर्त्तमाने वा लिङिति परः ॥ २५ ॥ भ०

वर्द्धिषीष्ठा इत्यादि । स्वजातेषु स्वजातिषु राजसेषु मध्ये त्वं वर्द्धिषीष्ठाः दर्द्धिमान् भविष्यसि आशिषि लिङ् एवं वक्ष्यमाणेष्वपि सर्व्वत्र रिपुसंहतीः शत्रुसमूहान् बध्याः विनाशयिष्यसि हनोवधलिङि भूयास्त्व गुणिनां मान्यः सुतशीलवतां मानार्हश्च भविष्यसि तेषाञ्च गुणिनां व्यवस्थायां चिरकालं स्थेयाः स्थास्यसि ॥ २६ ॥ ज० म०

वर्द्धिषीष्ठा इत्यादि । स्वजातिषु ज्ञातिसमूहेषु त्वं वर्द्धिषीष्ठा वर्द्धमानो-भविष्यसि शत्रुसंहतीः शत्रुसमूहान् त्वं बध्याः हनिष्यसि हनोवधष्टीढ्रलीति बधादेशः त्वं गुणिनां मान्यो भूयाः भविष्यसि तेषां गुणिनां व्यवस्थितौ व्यवस्थायां स्थास्यसि दामागैहागितिङेः सर्व्वत्र ढ्राशिषि ॥ २६ ॥ भ०

धेया इत्यादि । त्वं सुहृदां प्रीतिन्धेयाः जनयिष्यसि दिवौकसो देवान्-वन्दिषीष्ठाः प्रणंस्यसि सोमं पेयाः पास्यसि तथा हिंस्राः परोपघातिकाः हानि-करीः अपचयहेतुकाः क्रियाः हेयाः त्यक्ष्यसि ॥ २७ ॥ ज० म०

धेया इत्यादि । त्वं सुहृदां प्रीतिं धेयाः धास्यसि जनयिष्यसि पूर्व्ववत् ङेः दिवौकसो देवान् वन्दिषीष्ठाः प्रणंस्यसि सोमं पेयाः सोमपानं करिष्यसि पूर्व्ववत् ङे तथा हिंस्राः परोपतापिकाः हानिकरीः अपचयहेतुभूताः क्रियाः हेयाः त्यक्ष्यसि पूर्व्ववत् ङेः सर्व्वत्र ढ्राशिषि ॥ २७ ॥ भ०

अवेत्यादि । पुनः पुरवासिनां पौराणां कार्य्याणि धर्म्मेणावसेयाः ज्ञास्यसि

अनुरागं क्रिया राजन् सदा सर्व्वङ्कषं जने ॥ २८ ॥
घानिषीष्ट त्वया मन्युर्ग्राहिषीष्ट समुन्नतिः ।
रक्षोभिर्दर्शिषीष्टास्त्वं द्रक्षीरन् भवता च ते ॥ २९ ॥
मन्युं बध्या भटवधकृतं बालवृद्धस्य राजन्
शास्त्राभिज्ञाः सदसि सुधियः सन्निधिं ते क्रियासुः ।

घोऽन्तकर्म्मणि हे राजन् अत्र जने अनुरागं सर्व्वगतं सर्व्वव्यापिनं क्रियाः करिष्यसि ॥ २८ ॥ ज० म०

अवसेयास्सेत्यादि । पुरवासिनां पौराणां कार्य्याणि धर्म्मेण अवसेयाः ज्ञास्यसि शोभनार्थे पूर्व्ववत् ङेः हे राजन् विषये सर्व्वङ्कषमनुरागं अनन्यकृतमनुरञ्जनक्रियाः करिष्यसि क्षजडदक्षतौ ऋदिरयकृढीमे उभयत्र ढ्राग्धिषि ॥ २८ ॥ भ०

घानिषीष्टेत्यादि । मन्युः क्रोधः त्वया घानिषीष्ट हनिष्यते चिखङ्गावोदृद्धिर्घत्वञ्च समुन्नतिरभ्युदयः ग्राहिषीष्ट ग्रहीष्यते रक्षोभिर्दर्शनपरैर्दर्शिषीष्टाः त्वं द्रक्ष्यसे ते च राक्षसाः भवता दर्शनमात्रेण च द्रक्षीरन् अचिखङ्गावपक्षः ॥ २९ ॥ ज० म०

घानिषीष्टेत्यादि । मन्युः कोपस्त्वया घानिषीष्ट समुन्नतिर्नामाभ्युदयस्त्वया ग्राहिषीष्ट ग्रहीष्यते रक्षोभी राक्षसैस्त्वद्दर्शनलालसैस्त्वं दर्शिषीष्टाः भवता च ते राक्षसा द्रक्षीरन् द्रक्ष्यन्ते इत्यर्थः ॥ २९ ॥ भ०

मन्युमित्यादि । अन्यच्च हे राजन् बालानां वृद्धानाञ्च सर्व्वो हन्तो विभावैकवद्भवतीति बालाश्च वृद्धाश्च बालवृद्धं तस्य मनुजं शोकं भटवधकृतं भटानाम् पितृपुत्रादीनाञ्च यो वधः तत्कृतं बध्याः प्रियवचनार्थप्रदानादिभिरपनेष्यसि शास्त्रार्थज्ञाः शास्त्रार्थकुशलाः ते तव सदसि सभायां सन्निधिं क्रियासुः सन्निहिता भवन्त्वित्यर्थः सुरैर्मुनिभिश्च गते सेविते वर्त्मनि मार्गे प्राज्यधर्म्मे भूरिपुण्ये संरंसीष्टाः रंस्यसे द्विषां शत्रूणां दृहितानि चेष्टितानि सुनयनयनैः शोभनाः ये नयाः तैरेव नयनैश्चक्षुर्भिरिवावस्थितैः सम्भुत्सीष्टाः जानीयाः शास्त्रसि बुध अवगमने एकाचोवशोभम् ॥ ३० ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लिङ्लिलसितः षष्ठः परिच्छेदः ।

काव्यस्य विभीषणाभिषेको नामैकोनविंशतितमः सर्गः ।

संरंसीष्टाः सुरमुनिकृते वर्त्मनि प्राज्यधर्म्मे
संभुत्सीष्टाः स्वनयनयनैर्व्विद्विषामीक्षितानि ॥ ३० ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लिङ्विलसितो
नामैकोनविंशतितमः सर्गः ।

मन्युमित्यादि । हे राजंस्त्वं बालवृद्धस्य मन्युं शोकं वध्याः प्रियवचनेन प्रसादेन चापनेष्यसि मनुः किम्भूतं भटानां योधानां पितृपुत्रादीनां यो वधस्तत्कृतं बालाश्च वृद्धाश्चेति समाहारः तव सदसि सभायां शास्त्रतत्त्वविदः पण्डिताः सन्निधिं क्रियासुः सन्निहिता भविष्यन्ति सरमुनिभिः सेविते प्रचुरधर्म्मे पथि त्वं संरंसीष्टाः सम्यक्प्रकारेण रतिं करिष्यसि तथा सुनया एव नयनानि तैर्द्विषां शत्रूणां ईक्षितानि त्वं संभुत्सीष्टाः सम्यक् ज्ञास्यसि सर्व्वत्र ढ्राग्धिषि बुध्यौङ् वेदने झभान्नस्झादिजवानिति वो भः ॥ ३० ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगोराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां
मुग्धबोधिन्यां भट्टिटीकायां विभीषणराज्याभिषेको
नामैकोनविंशतितमः सर्गः ।

विंशः सर्गः ।

समुपेत्य ततः सीतामुक्तवान् पवनात्मजः ।
दिष्ट्या वर्द्धस्व वैदेहि हतस्त्रैलोक्यकण्टकः ॥ १ ॥
अनुजानीहि हन्यन्तां मयैताः क्षुद्रमनसः ।
रक्षिकास्तव राक्षस्यो गृहाणैतासु मत्सरं ॥ २ ॥

इतःप्रभृति लोटमधिकृत्य तद्विलसितमाह तत्र लोट्वेति वचनाद्विध्यादिष्वर्थेषु लोट् ततोऽन्यत्रापि दर्शयिष्यति

समुपेत्येत्यादि । ततोऽनन्तरं पवनात्मजः रामाज्ञया सीतां समुपेत्य समुपगम्योक्तवान् हे वैदेहि रावणस्त्रैलोक्यस्य प्रतीदृक्त्वात् कण्टको हतस्तेन दिष्ट्या प्रियवचनेन वर्द्धस्व नियोगतो वर्त्स्यसीति निमन्त्रणे लोट् ॥१॥ ज०म०

अथ गौमधिकृत्योच्यते तस्याः परमते लोडिति संज्ञा

समुपेत्येत्यादि । तदनन्तरं हनूमान् रामाज्ञया समुपेत्य समीपेषूपागम्य सीतामुक्तवान् किमुक्तवानित्याह हे वैदेहि त्रैलोक्यकण्टकः शत्रू रावणो हतः तेन दिष्ट्या आनन्देन त्वं वर्द्धस्व विधिनिमन्त्रणेत्यादिना निमन्त्रणेऽनुमतौ वा गौ दिष्ट्येत्यानन्देऽव्ययं त्रिलोक्यां त्रैलोक्यं विकारसङ्केति स्वार्थे ष्णः ॥१॥ भ०

अनुजानीहीत्यादि । अनुज्ञां प्रयच्छ प्रार्थनायां लोट् येन मयैता राक्षस्यस्तव रक्षिकाः क्षुद्रमानसाः पापाशयाः हन्यन्तां विनाशयिष्यन्तां अत्र विधौ कर्म्मणि लोट् तस्मादेतासु मत्सरं गृहाण जनय प्रार्थनायां लोट् येन गृहीतक्रोधा मामनुज्ञास्यसि ॥ २ ॥ ज० म०

अनुजानीहीत्यादि । अनुज्ञां देहि आद्योरित्यादिना ङीः मया एतास्तव रक्षिकाः क्षुद्रमानसाः पापाशयाः राक्षस्यो हन्यन्तामिति विधौ गौ कर्म्मणि यक् तस्मादेतासु मत्सरं क्रोधं गृहाण धृतक्रोधा सती मामनुज्ञास्यसीति प्रार्थनायां गौ गयगृहजच चकारादादाने यगृह्यस्यादोरिति जिः हसान्मान्हणावितीनः ह्रस्वोपः ॥ २ ॥ भ०

तृणहानि दुराचारा घोररूपाशयक्रियाः ।
हिंसा भवतु ते बुद्धिरेतासु कुरु निष्ठुरम् ॥ ३ ॥
पश्चिमं करवामैतत्प्रियं देवि वयं तव ।
ततः प्रोक्षवती सीता वानरं करुणाशया ॥ ४ ॥
उपशाम्यतु ते बुद्धिः पिण्डनिर्वेशकारिषु ।
लघुसत्वेषु दोषोऽयं यत्कृते निहतोऽसकौ ॥ ५ ॥

तृणहानीत्यादि । एता दुराचाराः घोररूपाशयक्रियाः क्रूराणि आकाराभिप्रायानुष्ठानानि यासां तास्तृणहानि हनिष्यामि तदेतासु हिंसा हिंसनशीला तव बुद्धिर्भवतु निष्ठुरञ्च नैष्ठुर्यं कुरु भावप्रधानो निर्देशः ॥ ३ ॥ ज० म०

तृणहानीत्यादि । घोरं भयानकरूपं आशयो ऽभिप्रायः क्रिया कर्म्म च यासां ता एता दुराचारा दुष्टशीला राक्षसीरहं तृणहाणि हनामि तृहधतृभूशहिंसे रुधादित्वात् श्नु षत्वं एतासु ते तव बुद्धिर्हिंसा हिंसनशीला भवतु निष्ठुरम् नैष्ठुर्यं कुरु भावप्रधाननिर्देशः ॥ ३ ॥ भ०

पश्चिममित्यादि । हे देवि किमत्र विचारितेन तव पश्चिममन्त्यं प्रियं एतद्वयं करवाम करिष्यामः अस्य एकत्वे वद्भवचनमन्यतरस्यां ततोऽनन्तरं सीता करुणाशया सती वानरं प्रोक्षवती ॥ ४ ॥ ज० म०

पश्चिममित्यादि । हे देवि अलं विचारेण तवैतत् पश्चिममन्त्यं प्रियं वयम् करवाम अस्मद् एकत्वे वद्भत्वाविवक्षया आमन्त्रणे प्रार्थने वा गौ अनन्तरं करुणाशया सीता वानरं प्रोक्षवती ॥ ४ ॥ भ०

उपेत्यादि । लघुसत्वेषु स्त्रीजनेषु पिण्डनिर्वेशकारिषु पिण्डस्य ग्रासस्य निर्वेशोनिष्क्रयः तत्कारिषु ते बुद्धिरुपशाम्यतु सकरुणा भवतु सर्व्वत्र विधौ लोट् किमिति चेत् यत्कृतो यज्जनितोऽयं दोषः ममैताभिः कृतः असकौ असौ रावणो निहतो व्यापादितः कृत्यायामव्ययसर्व्वनाम्नामकच्प्राक्रेरिति अकच् ॥ ५ ॥ ज० म०

उपशाम्यत्वित्यादि । पिण्डस्य ग्रासस्य निर्वेशो निष्क्रयस्तत्कारिषु अन्नार्थं परायत्तेषु अतएव लघुसत्वेषु अल्पबलेषु स्त्रीजनेषु तव बुद्धिरुपशाम्यतु कृपापरा भवतु विधौ लोट् यत्कृते यन्निमित्तकोऽयं दोषः मदुपद्रवरूपः असकौ रावणो हत एव अदसस्यादिव्यासेत्यादिना अक् स चात्र कृत्यार्थे तल वाशब्दस्य व्यवस्थि-

न हि प्रेष्यवधं घोरं करवाण्यस्तु ते मतिः ।
एधि कार्य्यकरस्त्वं मे गत्वा प्रवद राघवम् ॥ ६ ॥
दिदृक्षुर्मैथिली राम पश्यतु त्वाविलम्बितम् ।
तथेति स प्रतिज्ञाय गत्वा राघवमुक्तवान् ॥ ७ ॥
उत्सुकानीयतां देवी काकुत्स्थकुलनन्दन ।
त्वां लिखित्वा विनिश्वस्य स्वरालोक्य विभीषणम् ॥ ८ ॥

तद्विभाषितत्वात् तदुक्तं कृपायां निन्दने ज्ञाने नीतौ दाने च मानिते । प्रायोऽन्त्यस्वरात् पूर्व्वोऽवासर्व्वनामतिङव्ययादिति ॥ ५ ॥ भ०

न हीत्यादि । अन्यच्च न हि नैव घोरं प्रेष्यवधं करवाणि करिष्यामीत्यस्मतिस्तवाप्यस्तु आशिषि लिङ्लोटाविति लोट् अतस्त्वं कार्य्यकरः कार्य्यकरणे अनुकूलः आनुलोम्येन एधि भव असोरल्लोपः व्यसोरेद्धावभ्यासलोपश्च एत्वस्य समानाश्रयत्वादसिद्धत्वे हुझल्भ्योहेर्द्धिः कार्य्यमाह गत्वा प्रवद राघवं गत्वा राघवं ममादेशं ब्रूहि ॥ ६ ॥ ज० म०

न हि प्रेष्यवधमित्यादि । अहं प्रेष्यवधं न करवाणि समर्थनाशिषोगीर्णीति आशिषि गौ इति ते तव मतिरस्तु त्वं मे मम कार्य्यकर एधि भव इतो गत्वा राघवं प्रवद विधौ गौ जह्योर्धिशाधीति ह्यियुक्तस्यास्तेरेध्यादेशः स्हकुष्ट इति क्रञष्टः आनुकूल्यार्थोऽत्राभिधानात् ॥ ६ ॥ भ०

किं मया वक्तव्यमिति चेत्तदाह

दिदृक्षुरित्यादि । हे राम द्रष्टुमिच्छुर्मैथिली सीता अविलम्बितं द्रुतं त्वा त्वां पश्यतु सर्व्वत्र प्रार्थनायां लोट् स पवनात्मजस्तथेति यथाज्ञापयसीति प्रतिज्ञाय स्वीकृत्य गत्वा राघवमुक्तवान् ॥ ७ ॥ ज० म०

दिदृक्षुरित्यादि । हे राम सीता त्वा त्वां द्रष्टुमिच्छुरविलम्बितं शीघ्रं त्वाम् पश्यतु प्रार्थने गौ इति गत्वा प्रवदेत्यन्वयः ॥ ७ ॥ भ०

किमित्याह

उत्सुकेत्यादि । हे काकुत्स्थकुलनन्दन उत्सुका देवी आनीयतामिति प्रार्थनायां कर्म्मणि लोट् एवमुक्ते रावणवधे महति प्रयासे कृतेऽपि जनवादभयात् न तया सह वासः कार्य्य इत्यभिप्रायेण राघवः त्वामङ्कुशेन लिखित्वा विनिश्वस्य स्वरालोक्य आकारं दृष्ट्वा स्वरित्यव्ययं विभीषणमुक्तवानिति वक्ष्यमाणेन सम्बन्धः ॥ ८ ॥ ज० म०

उक्तवान्राघवः सीतामानयालङ्कृतामिति ।
गत्वा प्रणम्य तेनोक्ता मैथिली मधुरं वचः ॥ ९ ॥
जहीहि शोकं वैदेहि प्रीतये धेहि मानसम् ।
रावणे जहिहि द्वेषं जहाहि प्रमदावनम् ॥ १० ॥
स्नाह्यनुलिम्प निवस धूपाय विध्य च स्रजम् ।
रत्नान्यामुञ्च संदीप्ते हविर्जुह्वधि पावके ॥ ११ ॥
अङ्घ्रि त्वं पञ्चगव्यञ्च क्ष्विन्धि संरोधजन्तमः ।
आरोह शिविकां हैमीं हिवां जहि मनोरथान् ॥१२ ॥

उत्सुकेत्यादि । एवमुक्ते सति राघवो जनापवादशङ्कया किं कर्त्तव्यमिति चिन्तयन् क्ष्मां लिखित्वा विनिश्वस्य खरालोक्य आकाशं दृष्ट्वा विभीषणमुक्तवान् इत्यग्रिमश्लोकेनान्वयः भूमिलिखनादिकं चिन्तया भवतीति जातप्रक्तिः भावस्त्वयम् अजितेन्द्रियस्य रावणस्य वशा सीता कथं याह्या लोको मां किं वदिष्यति अविचारेण त्यागेऽपि महादोषस्तस्मात् समानयतु विचार्य यदुक्तं कर्त्तव्यमिति ॥ ८ ॥ भ०

उक्तवानित्यादि । सीतामलङ्कृतामानयेति राघव उक्तवान् विधौ लोट् विभीषणेन तेन गत्वा प्रणम्य च मैथिल्युक्ता मधुरं वचः ॥ ९ ॥ ज० म०

उक्तवानित्यादि । अलङ्कृतां सीतां त्वमानय विधौ गी इति विभीषणमुक्तवानित्यन्वयः तदनन्तरं विभीषणेन गत्वा प्रणम्य मधुरं वाक्यं सीता प्रोक्ता ॥ ९ ॥ भ०

जहीहीत्यादि । शोकं पतिवियोगजं जहीहि जहातेश्चेत्यन्यतरस्यामित्वमीत्वञ्च आचहाविति आकार इति रूपत्वयं प्रीतये प्रीत्यर्थं पुनर्मानसं धेहि घटयस्व धासाहेरीडावाभ्यासलोपश्च रावणे रावणविषये द्वेषं जहिहि तस्य विनष्टत्वात् प्रमदावनं अशोकवनिकां जहाहि पत्युरन्तिकं याहीत्यर्थः सर्व्वत्र विधौ लोट् ॥ १० ॥ ज० म०

जहीहीत्यादि । हे वैदेहि शोकं जहीहि त्यज आह्योरिति जहातेरी प्रीतये प्रीत्यर्थं पुनर्मानसं धेहि घटय ह्योर्धोरिति धाञोधेः रावणविषये द्वेषं जहिहि तस्य हतत्वात् दरिद्रोर्ज्जिर्हस्य इत्यादिना पक्षे र्ज्जिः प्रमदावनं अशोकवनिकां जहाहि हौ ङावेति पक्षे ङा सर्व्वत्र विधौ गी ॥ १० ॥ भ०

स्नाहीत्यादि । श्लोकद्वयं मिश्रेण व्याख्यातं स्नाहि स्नानं कुरु ततः

तृणेदु त्वद्वियोगोत्थां राजन्यानां पतिः शुचम् ।
भवतादवियुक्ता त्वमत ऊर्द्ध स्वेवेश्मनि ॥ १२ ॥

कायशुद्ध्यर्थं सदनुपहतपञ्चगव्यमद्धि भक्षय ङ्भक्षल्भ्यो हेर्द्धिः गोरेतानि गव्यानि सर्व्वत्र गोरजादिप्रत्ययप्रसङ्गे यत् पञ्चगव्यानि समाहृतानीति पात्रादिदर्शनान्न ङीप् ततः पवित्रीकृतकाया सन्दीप्ते पावके हविर्जुहुधि ततः स्वामिनं गन्तुमनुष्ठितदेवकार्या सती त्वमालिम्प समालभस्व ततो निवस आच्छादय वस आच्छादने अदादित्वाच्छपो लुक् धातुसकारस्य परगमनं ततो धूपाय धूपितमात्मानं कुरु धूपेरायप्रत्ययः आविध्य च स्रजं मालां शिरस्याच्छिद्य व्यध ताडने श्यनि यङ्लिङ्यादिना सम्प्रसारणं रत्नान्याभुञ्ज विन्यस्येत्ययमर्थवशात् क्रियाक्रमो द्रष्टव्यः यथा देवदत्तं भोजय स्नापय उद्वर्त्तयेति किञ्च संरोधजन्तमः अस्रतन्त्रीकरणजं शोकं छिन्धि अपनय हैमीं शिविकां सौवर्णयानमारोह अधितिष्ठ सर्व्वत्र भर्त्तुर्नियोगकरणे लोट् तामारूढा द्विषां मनोरथान् हृदये स्थितानभिप्रायान् जहि नाशय हौ परतो हन्तेर्जः ॥ ११ ॥ १२ ॥ ज० भ०

स्नाहीत्यादि । स्नाहि स्नानं कुरु ततोऽनुलेपनं चन्दनादिना कुरु लिपिर्मुचादिः धूपाय आत्मानं धूपाश्रितं कुरु धूपताप्ये कमकृतो गुपूधूपेत्यायः विवस वस्त्रं परिधेहि वसलङ् स्तृतौ स्रजं मालाञ्च आविध्य परिधेहि व्यधो ताडे आङ्पूर्व्वः परिधाने यङ्लुपाद्योरिति जिः रत्नानि आभुञ्ज परिधत्स्व सन्दीप्ते पावके हविर्जुहुधि ङ्भक्षलो हेर्धिः ॥ ११ ॥ भ०

अद्धि त्वमित्यादि । शरीरशुद्ध्यर्थं पञ्चगव्यं गोधूमादिकं अद्धि भक्षय अदृलौभक्षे ङ्भक्षलोहेर्धिः गोरेतानि गव्यानि विकारसंज्ञेति ष्णञः ओदौतोऽज्वदिति अज्वद्भावात् यलायवायाव इत्यव् पञ्चानां गव्यानां समाहार इति पात्रादित्वान्न ङीप् संरोधो बन्दीकरणं तज्जनितं तमः शोकं छिन्धि अपनय छिदेरुधादित्वात् श्नु हेर्धिः हैमीं स्वर्णमयीं शिविकां नरयानं आरोह आरूढा सती द्विषां मनोरथान् अभिलाषान् जहि नाशय जहोधिश्राधीति श्नियुक्तस्य हन्तेर्जह्यादेशः सर्व्वत्र विधौ निमन्त्रणे वा गी ॥ १२ ॥ भ०

तृणेदित्यादि । गतायां त्वयि राजन्यानां क्षत्रियाणां पती रामः शुचं शोकं त्वद्वियोगोत्थां त्वद्वियोगप्रभवां सुषिष्म इति कः उदस्यास्तम्भोरिति पूर्व्वसवर्णः तृणेदु छिनत्तु यतः अस्मात्कालादूर्द्धकालं स्वेवेश्मनि अयोध्यायां अवियुक्ता त्वं भवतात् भूयाः तह्योरिति तातङ् ॥ १२ ॥ ज० भ०

तृणेदित्यादि । राजान्यानां क्षत्रियाणां पती रामस्त्वद्वियोगात् उत्थितां

दीक्षस्व सह रामेण त्वरितं तुरगाध्वरे ।
दृश्यस्व पत्या प्रीतेन प्रीत्या प्रेक्षस्व राघवम् ।। १४ ॥
अयं नियोगः पत्युस्ते कार्य्या नात्र विचारणा ।
भूषयाङ्गं प्रमाणञ्चेद्रामो गन्तुं यतस्व च ॥ १५ ॥
सुदा संयुहि काकुत्स्थं स्वयञ्चाप्नुहि सम्मदम् ।
उपेहूर्द्धं मुहूर्त्तात्त्वं देवि राघवसन्निधिम् ॥ १६ ॥

शुचं तृणेदु हन्तु हनजनादिति स्थो डः उदसःस्थास्तम्भोरिति सलोपः अतोऽस्मात् कालादूर्द्धं स्वेश्मनि अयोध्यायां त्वं पत्या अवियुक्ता भवतात् भूयात् उभयत्राशिषि गौ तुह्योस्तातङ्वाशिषि ॥ १३ ॥ भ०

दीक्षस्वेत्यादि । तुरगाध्वरे अश्वमेधे रामेण सह त्वरितं दीक्षस्व दीक्षिता भूयाः आशिषि लोट् प्रीतेन पत्या दृश्यस्व दृष्टा भव दृशेरपि कर्म्मणि लोट् प्रीता च सती राघवं त्वं प्रेक्षस्व ॥ १४ ॥ ज० भ०

दीक्षस्वेत्यादि । तुरगाध्वरे अश्वमेधे रामेण सह त्वरितं त्वं दीक्षस्व दीक्षिता भूयाः प्रीतेन पत्या दृश्यस्व दृष्टा भूयाः कर्म्मणि यक् त्वमपि प्रीता सती राघवं प्रेक्षस्व सर्व्वत्राशिषि गौ ॥ १४ ॥ भ०

अयमित्यादि । तव पत्युरयं नियोगः यत्कृतः स्नानादिव्यापारः अत्र वस्तुनि विचारणा न कार्य्या किमेवं न वेति एतत्प्रमाणं चेत् भूषयाङ्गं स्नानादिपूर्व्वकमलङ्कुरु रामं गन्तुं यतस्व ॥ १५ ॥ ज० भ०

अयं नियोग इत्यादि । तव पत्युरयं स्नानादौ नियोग आज्ञा अत्रार्थे किं कर्त्तव्यमिति विचारणा न कार्य्या यदि तव रामः प्रमाणं तदा अङ्गं भूषय स्नानादिपूर्व्वकमलङ्कुरु रामान्तिकं गन्तुं यतस्व यत्नं कुरु ॥ १५ ॥ भ०

सुदेत्यादि । गत्वा च काकुत्स्थं सुदा हर्षेण संयुहि मिश्रय युमिश्रणे तत्र गमनेन स्वयञ्च सम्मदं हर्षं प्राप्नुहि प्रमदसंमदौ हर्षे सर्व्वत्र प्रार्थनायां लोट् हे देवि अस्मान्मुहूर्त्तादूर्द्धं राघवसन्निधिं राघवः सन्निधीयते यस्मिन् प्रदेशे इति कर्म्मण्यधिकरणे चेति किप्रत्ययः तं त्वमुपेहि गच्छ ॥ १६ ॥ ज० भ०

सुदेत्यादि । इतो गत्वा रामं सुदा हर्षेण संयुहि संमिश्रय युमिश्रणे स्वयञ्च सम्मदं हर्षं प्राप्नुहि प्रार्थनायामाशिषि वा गौ संयुक्तनोर्हलोपाभावः हे देवि यस्मात् मुहूर्त्तात् ऊर्द्धं राघवसन्निधिं त्वं उपेहि गमिष्यसि विधिनिमन्त्रणेत्यादिना प्राप्तकाले गौ राघवसन्निधिं गन्तुं प्राप्तकालासीत्यर्थः ॥ १६ ॥ भ०

ऊर्द्धं मुहूर्त्तादङ्गोऽङ्ग स्वामिनी स्म भव क्षितेः ।
राजपत्नीनियोगस्थमनुशाधि पुरीजनम् ॥ १७ ॥
उत्तिष्ठस्व मते पत्युर्यतस्वालङ्कृतौ तथा ।
प्रतिष्ठस्व च तं द्रष्टुं द्रष्टव्यं त्वं महीपतिम् ॥ १८ ॥
अनुष्ठाय यथादिष्टं नियोगं जनकात्मजा ।

ऊर्द्धमित्यादि । तथा मुहूर्त्तादूर्द्धं क्षितेः स्वामिनी भव स्म अङ्गेति सम्बोधनपदं अत्र स्मेलोडित्यनेन प्रैषे लोट् तत्र हि प्रैषातिसर्गप्राप्तकालेषु क्त्वाश्चेति और्द्धमौहूर्त्तिक इति च वर्त्तते प्राप्तकालतायां लोट् राघवसन्निधिं गन्तुं क्षितेः स्वामिनी भवितुं प्राप्तकाला देवी अन्यथा कालातिक्रमे मयि विरक्तेति रामो विरज्यते अन्यच्च इयमस्माकमार्यंसा त्वं राजपत्नीनियोगस्थं महादेव्याज्ञाकरणतत्परं पुरीस्थमयोध्यावस्थितं जनं अनुशाधि विधेयीकुरु आशिषि लोट् शाहाविति शादेशः तस्य समानाश्रयत्वादसिद्धत्वे झभञतर्द्धो-ढेर्द्धिः ॥ १७ ॥ ज० म०

ऊर्द्धमित्यादि । अङ्गेति सानुनयसम्बोधनेऽव्ययं मुहूर्त्तात् ऊर्द्धं त्वं क्षितेः स्वामिनी भव पूर्ववत् प्राप्तकाले गौ क्षितेः स्वामिनी भवितुं प्राप्तकाला-सीत्यर्थः राजपत्नीनियोगस्थं महादेव्याज्ञाकरणतत्परं पुरीजनं अयोध्यावासिनं अनुशाधि आज्ञापय आशिषि गौ शासन्त्वनुशासने जह्योर्भिन्नाधिहन्याक्ष्णिशास्ति-क्ष्विना ॥ १७ ॥ भ०

उत्तिष्ठस्वेत्यादि । तस्मात्प्रार्थयेऽहं पत्युर्मते अभिप्राये मत्समीपमागन्त-व्यमिति उत्तिष्ठस्व तदर्थं घटस्व उदोऽनूर्द्ध्वकर्म्मणीति तङ् तथा अलङ्कृतौ अलङ्करणे यतस्व यत्नं कुरु लज्जया कदाचिन्नोत्तिष्ठेतेति पुनःपुनरभिधानं अविरुद्धं यथा स्नाह्योत्यादि भक्षयाङ्गमिति मन्यते तेन वारद्वयमुक्तमेवं अलङ्कृत्य त्वं महीपतिं द्रष्टव्यं दर्शनार्हं अर्हे कृत्यतृचश्चेति अवश्यद्रष्टव्ये वा आवश्यके कृत्याश्चेति संद्रष्टुं प्रतिष्ठस्व गच्छ प्रार्थनायां लोट् समवप्रविभ्य स्थ इति तङ् ॥ १८ ॥ ज० म०

उत्तिष्ठस्वेत्यादि । मत्समीपे आगन्तव्यमिति पत्युर्मतेऽभिप्राये उत्तिष्ठस्व घटस्व उदोऽनूर्द्ध्वे इति मं तथा अलङ्करणे यतस्व दर्शनार्हं महीपतिं रामं संद्रष्टुं च प्रतिष्ठस्व प्रतिज्ञानिर्णयेत्यादिना मं सर्वत्र प्रार्थनायां गौ ॥ १८ ॥ भ०

अनुष्ठायेत्यादि । श्लोकत्रयं एवमुक्त्वा भर्तुर्यथोद्दिष्टं नियोगं स्नानादिक-

समारूढवती यानं पट्टांशुकपटाननना ॥ १९ ॥
लज्जानता विसंयोगदुःखस्मरणविह्वला ।
सासा गत्वान्तिकं पत्युर्दीना रुदितवत्यसौ ॥ २० ॥
प्राप्तचारित्र्यसन्देहस्तत्सामुक्तवान्नृपः ।
दृच्छा मे नाद्दे सीते त्वामहं गम्यतामतः ॥ २१ ।
रावणाङ्कपरिश्लिष्टा त्वं हृल्लेखकरी मम ।
मतिं बधान सुग्रीवे राक्षसेन्द्रं रुहाण वा ॥ २२ ॥

मनुष्याय कृत्वा जनकात्मजा मां कश्चिन्मा द्राक्षीदिति पट्टांशुकपटाननना यानं शिबिकामारूढवती पत्युरन्तिकञ्च गत्वा यानादवतीर्य्येत्यर्थात् ॥१९॥ ज० म०

अनुष्ठायेत्यादि । पत्युर्यथादिष्टं नियोगे स्नानादिकं अनुष्ठाय कृत्वा जनकात्मजा लज्जया पट्टांशुकेनावृताननना सती यानं समारूढवती ॥१९॥ भ०

लज्जानतेत्यादि । लज्जया आनता वियोगदुःखस्य पूर्व्वानुभूतस्य स्मरणेन विह्वला सासा दीना सा पत्युरन्तिकं गत्वा सीता रुदितवती ॥२०॥ ज०म०

लज्जानतेत्यादि । असौ लज्जया अवनता सीता पत्युरन्तिकं गत्वा सासा सती रुदितवती यतो वियोगदुःखस्य पूर्व्वानुभूतस्य स्मरणेन विह्वला अतएव दीना विह्वलेति ह्वलचाले पचाद्यचि वलवेति पाठे ल्वादिभ्यश्च भये ॥२०॥भ०

प्राप्तेत्यादि । ततोऽनन्तरं रुषो रामः रावणः किमस्यां खण्डितचारित्र्यशीला न वेति प्राप्तचारित्र्यसन्देहस्तत्सामुक्तवान् किमित्याह हे सीते ममेयमिच्छा यत्त्वामहं नाद्दे न रुहाणि दृच्छार्थेषु लिङ्लोटाविति लोट् अतोऽनिच्छातः कारणाद्यथेष्टं गम्यताम् ॥ २१ ॥ ज० म०

प्राप्तेत्यादि । तदनन्तरं रावणेनेयमुपभुक्ता न वेति प्राप्तः सीताचारित्रसन्देहो येन स रुषो रामस्तां सीतामुक्तवान् चरित्रमेव चारित्रं स्वार्थे ष्णः सन्देहविशेषणं मे ममेयमिच्छा त्वामहं नाद्दे न रुहाणीयां गीचेच्छार्थैरिति कामोक्तेर्गी विधावितिं विद्यासागरः प्रार्थनाविवक्षेति दुर्गः अतो हेतोर्यथेष्टं त्वया गम्यतामिति ॥ २१ ॥ भ०

किमिति नेच्छसि चेदाह

रावणेत्यादि । रावणाङ्कपरिश्लिष्टा हरणसमये रावणोत्सङ्गे स्थिता सती परिश्लिष्टा परिरब्धवती त्वं मम हृल्लेखकरी चेतःपीडनशीला कञोहेतुताच्छील्येति टः हृदयस्य हृल्लासेति हृदादेशः कमहं शरणं यास्यामीति चेदाह

अशान भरताद्भोगान् लक्ष्मणं प्रहणीष्व वा ।
कामाद्वा याहि मुच्यन्तामाशा रामनिबन्धनाः ॥ २३ ॥
क्व च ख्यातो रघोर्वंशः क्व त्वं परुषदूषिता ।
अन्यस्मै हृदयं देहि नानभीष्टे घटामहे ॥ २४ ॥

सुग्रीवे मतिं बधान बध्नीयाः इत्यादय राक्षसेन्द्रं विभीषणं वा अनुग्रहाय स्वीकुरु ॥ २२ ॥ ज० म०

रावणाङ्केत्यादि । पूर्वोक्तो हेतुरयं हरणसमये रावणाङ्के परिक्लिष्टा परिमृदिता त्वं मम हृल्लेखकरी चेतःपीडाकरी हृदो लेखं खण्डनं करोतीति हृत्कृष्टः चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मन इत्यमरवचनात् हृच्छब्देन समासः परे तु हृदयस्य हृल्लासादाविति हृदं कृत्वा लेखस्य लासादित्वात् हृदयशब्दस्य हृदादेशमाहुः लासादौ हृच्छब्दस्य प्रयोगोऽभिधानात् हृदयशब्दस्य त्वप्रयोगोऽनभिधानादिति स्वमतं साधु लाघवात् कुत्र गन्तव्यमित्याह सुग्रीवे मतिम् बधान कुरुः बन्धौगवन्धे राक्षसेन्द्रं विभीषणं वा ग्रहाय हसाद्यानहौ ॥२२॥ भ०

अशानेत्यादि । भरताद्वा भोगानशान भुङ्क्ष्व सर्व्वत्र हलः श्नः शानजिति शानच् लक्ष्मणं प्रहणीष्व वा अङ्गीकुरु हृञकरण इत्यस्य रूपं पृादीनां ह्रस्वः स्वेच्छया वा याहि भवत्यै यत्र रोचते तत्र गम्यतां रामनिबन्धनाः पुनरपि रामो मे पतिर्भूयादित्याशा मुच्यन्तां त्यज्यन्ताम् ॥ २३ ॥ ज० म०

अशानेत्यादि । भरताद्वा भोगान् अशान भुङ्क्ष्व अशगभोजने हसाद्यानहौ लक्ष्मणं वा हणीष्व वृणिञ इत्यां पृादित्वात् ह्रस्वः कामात् स्वेच्छया वा यत्र कुत्रापि याहि गच्छ रामनिबन्धना आशास्त्वया मुच्यन्तां पुनरपि रामो नेष्यतीत्याशास्त्यज्यन्तामित्यर्थः विधौ गी ॥ २३ ॥ भ०

किमिति चेदाह

क्व चेत्यादि । परिशुद्धत्वात्सर्व्वत्र ख्यातः लोके विदितो रघोर्वंशः क्व क्व च त्वं परुषदूषिता जातकलङ्कत्वात् इयमप्येतदूरं भिन्नं सर्व्वत्र विधौ लोट् अतोऽन्यस्मै हृदयं देहि चित्तं परस्मै देहि मद्विधाः अनभिमते विषये न घटामहे निमन्त्रणे लोट् ॥ २४ ॥ ज० म०

क्व चेत्यादि । परित्यागे हेतुरयं ख्यातो लोकविदितो रघुवंशः क्व परुषदूस्थिता त्वञ्च क्व उभयं परस्परविरुद्धमिति भावः अतोऽन्यस्मै चित्तं देहीति विधिः अनभीष्टेऽनुचिते वस्तुनि वयं न घटामहे ॥ २४ ॥ भ०

यथेष्टं चर वैदेहि पन्थानः सन्तु ते शिवाः ।
कामास्तेऽन्यत्र तायन्तां विशङ्कां त्यज मङ्क्षताम् ॥२५॥
ततः प्रगदिता वाक्यं मैथिलाभिजना नृपम् ।
स्त्रीसामान्येन सम्भूता शङ्का मयि विमुच्यताम् ॥ २६ ॥
दैवादिभीहि काकुत्स्थ जिह्रीहि त्वं तथा जनात् ।
मिथ्या मामभिसंक्रुध्यन्नवशां शत्रुणा हृताम् ॥ २७ ॥

यथेष्टमित्यादि । यथेष्टं चर यथेष्टचारिणी भव विधौ लोट् तत्र च यथेष्टं चरन्त्याः पन्थानो मार्गाः शिवा निर्विघ्नाः सन्तु भूयासुः आशिषि लोट् किञ्च कामाः अभिलाषास्तवान्यत्र तायन्तां स्फीता भवन्तु अत्राप्याशिषि यथेष्टचारित्वात्किमयं करिष्यतीति मङ्क्षतां विशङ्कां भयं त्यज त्यक्ष्यसि विधौ लोट् ॥ २५ ॥ ज० म०

यथेष्टमित्यादि । हे वैदेहि यथेष्टं चर यथेष्टचारिणी भव विधौ गौ यथेष्टं चरन्त्यास्तव पन्थानः शिवा निर्विघ्ना भवन्तु आशिषि गौ तव कामा अभिलाषा अन्यत्र तायन्तां स्फीता भवन्तु तायङ्पालनसन्तत्योः आशिषि गौ मयि यथेष्टचारिण्यां रामः किङ्करिष्यतीति मङ्क्षतामाशङ्कां त्यज विधौ गौ ॥२५॥भ०

तत इत्यादि । ततस्तद्वचनानन्तरं मैथिलाभिजना सीता नृपं वाक्यं प्रगदिता गदितुं प्रवृत्ता आदिकर्मणि क्तः स्त्रीसामान्येन स्त्रीति कृत्वा या तव मयि शङ्का दृयं सती न वेति सा विमुच्यतां मिथ्यात्वात् प्रार्थनायां लोट् ॥ २६ ॥ ज० म०

तत इत्यादि । तद्वचनानन्तरं मिथिलाभिजना मिथिलदेशे सम्भूता सीता नृपं रामं प्रगदितुं प्रवृत्ता घेचादिढे क्तः जनः पचादित्वात् अन् अभिजनः पूर्ववान्धव इति वर्द्धमानः कुलान्यभिजनान्वयावित्यमरः स्त्रीसामान्येन योषिदन्तरसाधारण्येन सम्भूता शङ्का मयि विमुच्यतां प्रार्थनायां गौ ॥ २६ ॥ भ०

दैवादित्यादि । अन्यच्च हे काकुत्स्थ मामवशां पराधीनां शत्रुणा हृताम् मिथ्या अभिसंक्रुध्यन् अलीकेन क्रुधद्रुहोरुपसृष्टयोः कर्मेति कर्मसंज्ञा दैवात् अनिष्टफलात् विभीहि भयं जनय भीतो भव हेरपित्त्वात्कित्त्वे गुणो न भवति दृतश्च जनादिमं जनं वीक्ष्य जिह्रीहि लज्जस्व ह्यव्लोपे पञ्चमी विधौ लोट् ॥ २७ ॥ ज० म०

चेतसस्त्वयि वृत्तिर्मम शरीरं रक्षसा हृतम् ।
विदांकुर्वन्तु सम्यञ्चो देवाः सत्यमिदं वचः ॥ २८ ॥
त्वं पुनीहि पुनीहीति पुनन् वायो जगत्त्रयम् ।
चरन् देहेषु भूतानां विद्धि मे बुद्ध्यविप्लवम् ॥ २९ ॥

दैवादित्यादि । हे काकुत्स्थ अवशं परायत्तां रावणायत्तां वा शत्रुणा हृतां मां अभिसंक्रुध्यन् दोषं विना मह्यं कुप्यन् दैवादधर्म्माद्विभीहि भयं कुरु जिभीलिभीत्यां दरिद्रोडिर्हस्व इत्यादिना पक्षे ङि तथा जनाल्लोकात् जिह्रीहि लज्जितो भव जनं वीक्ष्येत्यर्थः यवर्धे पञ्चमी विधौ गी क्रुधद्रुहोरुपसर्गे सम्प्रदानस्य कर्म्मत्वमिति परः स्मते क्रियाव्याप्यत्वं विवक्ष्यम् ॥२७॥ भ०

त्वयसंक्रान्तायां मम कीदृशं भयं लज्जा चेति चेत्तदाह

चेतस इत्यादि। मे चेतसो वृत्तिरात्मव्यापारः त्वयि तिष्ठति अनन्यमनस्कत्वात् रक्षसा हृतायां मम न सर्वं हृतं अपितु शरीरं हृतं नैवेदं मिथ्या तथाहि हे महाभूताधिष्ठानाः सम्यञ्चः सर्व्वत्र वर्त्तमानाः अञ्चन्तीति क्विन् अञ्चतावप्रत्यये समः समीति सम्यादेशः एते मदर्थिताः मम वचः सत्यं विदांकुर्वन्तु अवगच्छन्तु प्रार्थनायां लोट् विदांकुर्वन्त्विति निपातनम् ॥ २८ ॥ ज० म०

चेतस इत्यादि । शङ्का विमुच्यतामिति पूर्व्वोक्ते हेतुरयं रक्षसा मम चित्तं न हृतं किन्तु शरीरमेव हृतं चेतसस्तु वृत्तिस्त्वयि स्थिता न चेदेवं तदा देवाः सम्यञ्चः सर्व्वत्र वर्त्तमाना इदं मम सत्यं वचो विदांकुर्वन्तु जानन्तु डाम्बाद्यां ग्यामिति वेत्तेर्डाम् समसञ्चतीति क्विप् सहसन्निर इति सम्यादेशः ॥२८॥ भ०

प्रत्येकं प्रार्थनामाह

त्वं पुनीहीत्यादि । हे वायो पुनीहि पुनीहीति जगत्त्रयं पुनःपुनः पुनामि भृशं वा पुनामीत्यभिप्रायस्त्वं जगत्त्रयं पुनन् भूतानां देहेषु चरन् मम बुद्धिविप्लवं बुद्धेरन्यथात्वं विद्धि अवगच्छ प्रार्थनायां लोट् पूर्व्ववत् क्रियासमभिहारे लोडिति लोट् तस्य परस्मैपदसम्बन्धी हिरादेशः क्रियासमभिहारे द्विर्व्वचनं पुनश्चिति यथाविध्यनुप्रयोगः पूर्व्वस्मिन्नित्यनेन पुनातेरनुप्रयोगः तत्र हि क्रियासङ्ख्याभावात् ॥ २९ ॥ ज० म०

त्वमित्यादि । हे वायो त्वं जगत्त्रयं पुनीहि पुनीहीति पुनन् भृशं पुनः पुनर्व्वा पुनासीत्यर्थः सङ्घर्षार्थे हितस्वध्वमिति सर्व्वस्मिन् काले हि वीप्सायाम् द्वित्वं लोकतः सिद्धं पुनर्द्वित्वस्याप्रयोगोऽप्यभिधानात् इति हेतोः जगत्त्रितयी-

खमट द्यामटोर्व्वीमित्यटन्त्योऽतिपावनाः ।
यूयमापो विजानीत मनोवृत्तिं शुभां मम ॥ २० ॥
जगन्ति धत्स्व धत्स्वेति दधती त्वं वसुन्धरे ।
अवेहि मम चारित्रं नक्तन्दिवमविच्युतम् ॥ २१ ॥
रसान् संहर दीप्यस्व ध्वान्तं जहि नभो भ्रम ।
इतीहमानस्तिग्मांशो वृत्तं ज्ञातुं घटस्व मे ॥ २२ ॥

करणाय भूतानां प्राणिनां देहेषु चरन् मम बुद्धेरविप्लवं अव्यभिचारं विद्धि जानीहि ॥ २९ ॥ भ०

खमित्यादि । यूयमापोऽतिपावनाः अतिपवित्राः खमट द्यामट उर्व्वीमट इति वयमन्तरीक्षमटाम देवलोकमटाम भूर्लोकमटामेत्येवमभिप्रायः सर्व्वत्राटन्त्यो मम शुभां चित्तवृत्तिं विजानीतेति अत्र प्रार्थनायां लोट् पूर्व्वत्र तु व्याकायादिकारकभेदात् अनेकाटनक्रियासमुच्चयः ततश्च समुच्चयेऽन्यतरस्यामिति लोट् अटेति समुच्चये सामान्यवचनस्येत्यनुप्रयोगः आकाशाद्युपगामिनीनामटनक्रियाणां पुनरटनक्रियायाः सामान्याया अनुप्रयोगात् ॥ २० ॥ ज० म०

खमटेत्यादि । हे आपो यूयमतिपावना अतिपवित्राः खमाकाशं द्यां स्वर्गं उर्व्वीं भूमिञ्च अटन्त्योऽटः पूर्व्ववत् सदाहि इति हेतोर्म्मम शुभां मनोवृत्तिं यूयं विजानीत प्रार्थनायां गौ ॥ २० ॥ भ०

जगन्तीत्यादि । त्वं वसुन्धरे धत्स्व धत्स्वेति अहं पुनः पुनर्दधे भृशं वा दध इति एवमभिप्राया जगन्ति दधती मम चारित्रं नक्तं दिनमविच्युतं अस्खलितमवेहि अत्र प्रार्थनायां लोट् पूर्व्वत्र क्रियासमभिहारे तस्य चात्मनेपदसम्बन्धिनः स्वादेशः ॥ २१ ॥ ज० म०

जगन्तीत्यादि । हे वसुन्धरे जगन्ति धत्स्व धत्स्व त्वं दधती भृशं पुनः पुनर्वा जगन्ति दधासीत्यर्थः आद्योरिति धाञआलोप्यः ऋभान्तस्यादिजवामिति खेर्धत्वं इति हेतोस्त्वं मम चारित्रं चरित्रं नक्तन्दिवं अविच्युतं रात्रौ दिवा चास्खलितं अवेहि जानीहि प्रार्थने गौ नक्तन्दिवमिति अच्निभ्रुवादित्वात् साध्यम् ॥ २१ ॥ भ०

रसानित्यादि । हे तिग्मांशो त्वमपि अहं रसान् भौमान् संहर संहरामीति दीप्यस्व दीप्ये ध्वान्तं जहि हन्मि नभो भ्रम भ्रमामीत्येवमभिप्रायः ईहमानः जगत्यर्थक्रियासु चेष्टमानः मम वृत्तं चरित्रं ज्ञातुं घटस्व यतस्व अत्र

स्वर्गे विद्यस्व भुव्यास्व भुजङ्गनिलये भव ।
एवं वसन् ममाकाश संबुध्यस्व कृताकृतम् ॥ ३३ ॥
चितां कुरु च सौमित्रे व्यसनस्यास्य भेषजम् ।
रामस्तुष्यतु मे वाद्य पापां मुष्णातु वानलः ॥ ३४ ॥

प्रार्थनायां लोट् पूर्ववत् सप्तम्यन्यतरस्यामिति तस्य च यथायोगं हिस्वादेशः ईहमान इति सप्तम्ये सामान्यवचनस्येत्यनुप्रयोगः संहरेत्यादीनामीहतेः सामान्यवचनस्यानुप्रयोगात् ॥ ३२ ॥ ज० म०

रसानित्यादि । हे तिग्मांशो सूर्य त्वमीहमानश्चेष्टमानो रसान् जलानि संहरसि दीप्यसे ध्वान्तं हंसि नभो भ्रमसि सर्वत्र मुक्तभ्रंशार्थत्वविवक्षया हिस्रौ क्रियासप्तम्ये हिस्रौ क्रियासामान्यस्यानुप्रयोग इति ईहतेरनुप्रयोग इति परे इति हेतोर्मम वृत्तं चरित्रं ज्ञातुं घटस्वेति प्रार्थना ॥ ३२ ॥ भ०

स्वर्गं इत्यादि । त्वं चाकाश स्वर्गे विद्यस्व अहं विद्ये भुवि आस्व आसे भुजङ्गनिलये पाताले भव भवामीत्येवमभिप्रायः सर्वत्र सन्निहन् मम कृताकृतं युक्तायुक्तं बुध्यस्व अवगच्छ अत्र प्रार्थनायां लोट् पूर्ववत् सप्तम्यन्यतरस्यामिति तस्य च यथायोगं हिस्वादेशः वसन्निति सप्तम्ये सामान्यवचनस्येत्यनुप्रयोगः विद्यमानादीनां सतः सामान्यवचनस्यानुप्रयोगात् ॥ ३३ ॥ ज० म०

स्वर्गं इत्यादि । हे आकाश त्वमपि वसन् स्वर्गे विद्यसे भुवि तिष्ठसि भुजङ्गनिलये पाताले वससि पूर्ववत् स्थशार्थत्वविवक्षया हिस्रौ एवं ममापि कृताकृतञ्च कर्म्म बुध्यस्वेति प्रार्थना ॥ ३३ ॥ भ०

एवं पृथिव्यादीनि महाभूतानि कथयित्वा लक्ष्मणमाह

चितामित्यादि । हे सौमित्रे व्यसनस्यास्य मिथ्यादूषणस्य भेषजं प्रतिक्रियां चितां कुरु विधौ लोट् मम अग्नौ विशुद्धाया रामो नियोगतस्तुष्यतु अनलो वा मां पापां नियोगतः मुष्णातु दहतु दहन् मर्त्यलोकान् मोचयतीत्यर्थः निमन्त्रणे लोट् मुषप्रुषस्नेहनमोचनपूरणेष्विति क्र्यादिः मोचने द्रष्टव्यः अनेकार्थत्वाद्धातोः ॥ ३४ ॥ ज० म०

चितामित्यादि । हे सौमित्रे अस्य व्यसनस्य मिथ्यादूषणस्य भेषजं प्रतिक्रियां चितां कुरु विधौ गी अद्य वह्नौ विशुद्धायां मयि रामस्तुष्यतु अनलो वा पापां मां मुष्णातु दहतु आमन्त्रणे गी मुषेरनेकार्थत्वादत्र दाहार्थः सदाहार्थस्तु भौवादिक एव यद्वा प्रुषप्लुषेकपूर्त्योश्च प्रुषदह्यमूरेलाविति ॥ ३४ ॥ भ०

राघवस्य मतेनाथ लक्ष्मणेनाचितां चिताम् ।
दृष्ट्वा प्रदक्षिणीकृत्य रामं प्रगदिता वचः ॥ २५ ॥
प्रवपाणि वपुर्वक्त्रौ रामाहं शङ्किता त्वया ।
सर्वे विदन्तु शृण्वन्तु भवन्तः सप्लवङ्गमाः ॥ २६ ॥
मां दुष्टां ज्वलितवपुः प्लुषाण वक्त्रे
संरक्ष क्षतमलिनां सुहृद्यथा वा ।

राघवस्येत्यादि । अथ राघवस्य मतेनानुज्ञातेन क्तस्य च वर्त्तमान इति षष्ठी मतिबुद्धिपूजार्थेभ्यश्चेति वर्त्तमाने क्तः तस्य वा मतेनानुज्ञया चितामाचितां रचितां दृष्ट्वा प्रदक्षिणीकृत्य सीता रामं प्रगदिता वचो गदितुं प्रवृत्ता॥२५॥ ज० म०

राघवस्येत्यादि । अथानन्तरं राघवस्य मतेनानुज्ञया अनुज्ञातेन वा लक्ष्मणेनाचितां रचितां चितां दृष्ट्वा प्रदक्षिणीकृत्य सीता रामं वचः प्रगदिता कथितुं प्रवृत्ता ॥ २५ ॥ भ०

प्रवपाणीत्यादि । येऽत्र सन्निहिता देवादयः ते सर्वे सप्लवङ्गमाः वानरैः सह भवन्तः विदन्तु चेतसा शृण्वन्तु श्रोत्राभ्यां मद्वचनं हे राम त्वया दुष्टेति शङ्किता अहं वक्त्रौ वपुः शरीरं प्रवपाणि नियोगतः प्रक्षिपाणि निमन्त्रणे लोट् व्यानिलोडिति णत्वम् ॥ २६ ॥ ज० म०

प्रवपाणीत्यादि । हे राम त्वया दुष्टेति शङ्किताहं वक्त्रौ वपुः प्रवपाणि क्षिपाणि निमन्त्रणे गौ प्राग्वेडो ण इत्यादिना णत्वं हे अत्र सन्निहिता देवादयो भवन्तः प्लवङ्गमैः सह वक्ष्यमाणं मद्वचनं शृण्वन्तु ते च सर्वे तदर्थं जानन्त्विति प्रार्थये ॥ २६ ॥ भ०

मामित्यादि । हे वक्त्रे यद्यहं दुष्टा तदा ज्वलितवपुः ज्वलितशरीरः सन् मिथ्याभावप्रसङ्गे रूपं प्लुषाण देहं मर्त्यलोकात् मोचय यथा वा क्षतमलिनां विप्लुतां सुहृदिव संरक्ष वा आमन्त्रणे कामचारकृतेऽपि लोट् एवाहं त्वां विधिवत् सम्यक् प्राप्ता क्रतुषु यज्ञेषु वसोः राज्ञः आज्यधारेव उदीर्णदीप्तिमालं उद्गतज्वालासमूहं त्वामिति ॥ २७ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लोडिलधिकारः
नाम सप्तमः परिच्छेदः ।
काव्यस्य सीताप्रत्याख्यानं नाम विंशतितमः सर्गः ।

एषाहं क्रतुषु वसोर्यथाज्यधारा
त्वां प्राप्ता विधिवदुदीर्णदीप्तिमालम् ॥ ३७ ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लोटप्रदर्शनो नाम
विंशतितमः सर्गः ।

मां दुष्टामित्यादि । हे वह्ने, यद्यहं दुष्टा तदा ज्वलितशरीरः सन् मां दुष्टां मुञ्चाण दह पूर्ववत् यद्यहं सुव्रतमलिना स्वप्नापा अन्यतचरितमिति क्वचित्पाठः तदा मां सुहृदिव रक्ष आमन्त्रणे प्रार्थने वा गी एषाहं उदीर्णदीप्तिमालं उद्गतज्वालासमूहं त्वां विधिवत् सम्यक् प्राप्ता क्रतुषु यज्ञेषु वसोराज्यधारेव ॥ ३७ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां सुबोधबोधिन्यां भट्टिटीकायां सीतापरीक्षणो नाम
विंशतितमः सर्गः ।

एकविंशः सर्गः ।

तामुत्क्षिप्य ततो वक्षिमैथिलीं राममुक्तवान् ।
काकुत्स्थ दयितां साध्वीं त्वमाशङ्किष्यथाः कथम् ॥ १ ॥
नाभविष्यदियं शुद्धा यदापास्यमहं ततः ।
न चैनां पक्षपातो मे धर्म्मादन्यत्र राघव ॥ २ ॥

इतः प्रभृति लङ्मधिकृत्य विलसितमाह तत्र लिङ्निमित्ते लङ् क्रियातिपत्तौ भविष्यति भूते च हेतुमतोर्लिङित्येवमादिकं लिङोनिमित्तं क्रियातिपत्तिश्च कुतश्चिद्गुणैर्यात् क्रियाया अनिष्पत्तिः क्रियातिपत्तिर्वैगुण्यञ्च विधुरप्रत्ययोपनिपातात् सामग्र्याभावाच्च द्रष्टव्यम्

समुत्क्षिप्येत्यादि । ततोऽनन्तरं मैथिलीं समुत्क्षिप्य हस्ताभ्यामाकाशे धृत्वा वक्षिर्दहनवान् रामसक्तवान् हे काकुत्स्थ साध्वीं पतिव्रतामपि दयितां असाध्वीति त्वं यदाशङ्किष्यथाः शङ्कितवानसि तत्कथं गर्हितमेतत् न युक्तमाशङ्कितुमित्यर्थः विभाषाकथमिति लिङ्त्वेति अत्र कथं शब्दो गर्हायाञ्च लिङो निमित्तं यतस्तत्र गर्हायामित्यनुवर्त्तते तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ लङ् भविष्यतीत्यधिक्रियते अतोसाधुत्वं क्रियायाः तद्विरुद्धसाधुत्वाभियोगोपनिपातादतिपत्तिर्गम्यते तदेव साधुत्वं दर्शयति ॥ १ ॥ ज० म०

अथ धीमधिकृत्योच्यते तस्माः परमते लङिति संज्ञा

तामुत्क्षिप्येत्यादि । ततोऽनन्तरं वक्षिस्तां मैथिलीं उत्क्षिप्य हस्ताभ्यामाकाशे उद्धृत्य रामसक्तवान् किमदित्याह हे काकुत्स्थ दयितां प्रियां साध्वीं पतिव्रतां त्वं कथमाशङ्कितवान् तदयुक्तमाशङ्कितं ध्वर्थासम्भवे धीति धी अत्र धात्वर्थस्यानिष्पत्तिर्वाक्यादेव गम्यते ॥ १ ॥ भ०

नेत्यादि । यदाहमेनां नैवापास्य नैव रक्षितवान् ततोऽरक्षणादियं शुद्धा नाभविष्यत् न भूता येनैव मया रक्षिता तेनैवेयं शुद्धेति भावः हेतुहेतुमतोर्लिङित्यतः हेतुर्हेतुमांश्च लिङो निमित्तं तत्र पालनस्य परिशुद्धेश्च हेतुहेतुमत्के

अपि तत्र रिपुः सीतां प्रार्थयिष्यत दुर्मतिः ।
क्रूरं जात्वदिष्यच्च जात्वस्तोष्यत् श्रियं स्वकाम् ॥ २ ॥
सङ्कल्पं नाकरिष्यच्च तत्रेयं शुद्धमानसा ।

लिङ् निमित्ते क्रियातिपत्तौ सत्यां भूते नित्यं लङ् तत्र वोताप्योरिति विकल्पेनाधिक्रियते अत्रापालनोपनिपातादतिपत्तिर्गम्यते तदतिपाताङ्गे तुमतोऽपि पक्षपातात् त्वयैवमाचरितमिति चेदाह हे राघव धर्मादन्यत्र अधर्मे न मे पक्षपातोऽनुरागः ॥ २ ॥ ज० म०

आशङ्कां व्यावर्त्तयन्नाह

नाभविष्यदित्यादि । यदि इयं सीता शुद्धा नाभविष्यत् न भूतवती तदाहमेनां अधक्ष्यं दग्धवानस्मि दहौदाहे दाहेर्घः झभान्स्यो ति धः हे राघव धर्मादन्यत्र मे मम पक्षपातो नास्त्येव अपितु धर्माश्रित एव ॥ २ ॥ भ०

इदानीं सीतारावणयोर्यद्वृत्तमासीत् तच्चानेनावधार्य्य प्रकाशयन्नाह-

अपीत्यादि । तत्र रिपुः स भावन् रिपुः स रावणः भवच्छब्दोऽर्धाङ्गम्यते तेनेतराभ्योऽपि दृश्यन्त इति त्वत्अपि वाढं नार्थयिष्यत् दुर्मतिः यद्यदुर्मतिरदुष्टचेता अभविष्यत् तदा सीतां वाढं नार्थयिष्यत् भार्या मम भवेति न प्रार्थितवान् उताप्योः समर्थयोरिति अत्रापिशब्दो वाढार्थः लिङ्निमित्ते तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते नित्यं लङ् तत्र वोताप्योरिति अनुवर्त्तते अत्रार्थनक्रियायाः तद्विरुद्धदुर्मतित्वोपनिपातादतिपत्तिर्गम्यते अर्थनमर्थः याचनं तत्करोतीति णिच् नाहमवकल्पयामि यद्यदुर्मतिरभविष्यत् क्रूररूपं जातु कदाचित् नावदिष्यत् नोक्तवान् श्रियं विभूतिं स्वकामात्मीयां ईदृशी मे विभूतिरिति नास्तोष्यत् न स्तुतवान् स्तुतवांश्च जातयदोर्लिङ् इत्यत्र जातु शब्देऽनवक्लृप्तिश्च लिङो निमित्तं तत्रानवक्लृप्त्यमर्षयोरिति वर्त्तते चत्र क्रूराभिधानक्रियायाविभूत्यास्तवनक्रियायाश्च तद्विरुद्धदुर्मतित्वोपनिपातादतिपत्तिः केचिल्लङपिजात्वोरित्येतदुदाहरन्ति तदयुक्तं तस्यालिङ्निमित्तत्वात् ॥ २ ॥ ज० म०

अपि तत्रेत्यादि । तत्र लङ्कायां रिपूरावणः सीतामपि दुर्मतित्वात् नार्थयिष्ट न प्रार्थितवान् अपितु प्रार्थतवानेव क्रूरं परुषं जातु कदाचिन्नावदिष्यत् नोक्तवान् अपितु उक्तवानेव स्वकामात्मीयां श्रियं नास्तोष्यत् अपितु ममेदृशी महती सम्पत्तिरिति स्तुतवानेव अत्र निषिद्धस्य प्रार्थनादिधात्वर्थस्यानिष्टत्वात् ॥ २ ॥ भ०

सृषामर्षमवाप्स्यस्वं राम सीतानिबन्धनम् ॥ ४ ॥
त्वयादृश्यत किं नास्याः शीलं संवसता चिरम् ।
अदर्शिष्यन्त वा चेटाः कालेन बहुना न किम् ॥ ५ ॥
यावज्जीवमशोचिष्यो नाहास्यस्येदृदन्तमः ।

सङ्कल्पमित्यादि । तत्रेयं शुभमानसेति नाहमवकल्पयामि यदीयं शुद्धमानसा नाभविष्यत् तत्र तस्मिन् रावणे दृष्टं प्रीयमाणेऽपि सङ्कल्पमभिप्रायमकरिष्यत् कृतवती स्यात् न च कृतवती शुद्धमानसत्वात् सत्यामर्षमवाप्स्यस्वमिति हे राम न मर्षयामि यद्यशुद्धमानसा अभविष्यत् तदा सीतानिबन्धनं सीताहेतुकम् अमर्षं क्रोधं सत्यरूपभूतमवाप्स्यं प्राप्नुयाः तत्तु सत्यं यतः शुद्धमानसा अनवकल्पयमर्षयेरकिंवृत्तेऽपीत्यत्र अनवकल्पयमर्षयोर्लिङ्निमित्तं तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ भूते वा लङ् तत्र वोताप्योरित्यधिक्रियते अत्र सङ्कल्पक्रियायाः सत्यामर्षक्रियायाश्च तद्विरुद्धशुद्धमानसत्वोपनिपातादतिपत्तिः ॥ ४ ॥ ज० म०

सङ्कल्पमित्यादि । तत्र दृष्टं प्रयतमाने रावणे सङ्कल्पं सङ्गमाभिप्रायमियम् सीता नाकरिष्यत् न कृतवती यत दृष्टं शुद्धमानसा शुद्धहृदयत्वात् धात्वर्थस्यानिष्पत्तिः हे राम सीता निबन्धनं अमर्षं क्रोधं अवाप्स्यः अवाप्नुयानसि इदं सृषा सङ्कल्पक्रियायामसत्यां क्रोधस्यानिष्पत्तिरत्र वाक्यार्थस्यते ॥ ४ ॥ भ०

अन्यथास्मिन्वस्तुनि नाहमेवैकः प्रमाणं भवानपि प्रमाणमेवेति दर्शयन्नाह त्वयेत्यादि । किं नाम तच्छीलं तद्वृत्तं यदस्याः सीतायाः शीलं चिरं कालं सम्वसता त्वया नादृश्यत नोपलब्धमेव चेतोधर्मत्वान्नोपलब्धमिति चेत् किं वा नाम चेटाः शीलनिबन्धनाः क्रियाः बहुनापि कालेन त्वया नादर्शिष्यन्त न दृष्टा अभूवन् अपितु दृष्टा एव किं वृत्तेलङ्लुटाविति किंशब्दो विभाव्यलोगर्हांच लिङ्निमित्तं तत्र गर्हायामिष्यनुवर्त्तते तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ भूते लङ् कर्म्मण्येव चिरवादिट् अत्र शीलानुपलब्धिक्रियायाश्च तद्विरुद्धचिरवासोपनिपातादतिपत्तिर्गम्यते तथाहि शीलं संवसता ज्ञेयं तच्च कालेन भूयसेति ॥ ५ ॥ ज० म०

त्वयेत्यादि । अस्याः सीतायाः शीलं चरित्रं चिरं चिरकालं संवसता सहवासं कुर्वता त्वया किं नादृश्यत नोपलब्धमभूत् अपितूपलब्धमेव चेतोधर्मत्वान्नोपलब्धमिति चेदाह अस्याश्चेष्टाः क्रिया वा किं बहुना कालेन नादर्शिष्यन्त अपितु दृष्टा एव अत्र शीलचेष्टादर्शनस्य धात्वर्थस्य संवासेनानिष्पत्तिर्वाक्यार्थस्यते हनुमद्धृदय च इति पक्षे मिश्र ॥ ५ ॥ भ०

भानुरप्यपतिष्यत् क्ष्मामक्षोभिष्यत चेदियम् ॥ ६ ॥
समपत्यत राजेन्द्र स्त्रैणं यदत्र चापलम् ।
लोकपाला इहायास्यंस्ततो नामी कलिद्रुहः ॥ ७ ॥
आश्चर्यं यच्च यत्र स्त्री कृच्छ्रे वर्त्स्यन्मते तव ।

यावदित्यादि । अन्यच्च लोकस्याज्ञानमूलं परगृहोषितेत्येतावतैवापरिशुद्धेत्यज्ञानमुत्पन्नमिदं तमः अज्ञानं यदि त्वं नाहास्यः न त्यक्ष्यसि तदास्या वैलक्षण्येन मरणादवश्यं यावज्जीवमशोचिष्यः शोकमेष्यसि अतो मयाभिधीयमानः स्वयञ्च विशदयन् परिशुद्धा हीयमित्यवेहि येन न शोचिष्यसि अत्र भविष्यदज्ञानात्यागो हेतुः यावज्जीवशोचनं हेतुमत् तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भविष्यति नित्यं लृङ् अत्राज्ञानत्यागक्रियायास्तद्विरुद्धोपदेशकत्वमर्थितज्ञानोत्पादनिपातादतिपत्तिर्गम्यते अन्यच्च अभूतवस्तूत्पादकमूचकत्वातो भवति न च तथाभूतोऽस्तीति दर्शयन्नाह यदीयमक्षोभिष्यत् दुष्टचित्ताभूत् तदा भानुरपि द्यां पृथ्वीमपतिष्यत् गतोऽभूत् अत्रापि क्षोभो हेतुः भानुपतनं हेतुमत् तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लृङ् अत्र क्षोभक्रियायास्तद्विरुद्धाक्षोभोपनिपातादतिपत्तिः ॥ ६ ॥ ज० म०

यावज्जीवमित्यादि । चेद्यहि इदं तमः परगृहोषिता सीता न परिशुद्धेति लोकावज्ञानं त्वं नाहास्यः न त्यक्ष्यसि तदा यावज्जीवं अशोचिष्यः शोकं करिष्यसि अन्यच्च चेद्यहि इयं सीता अक्षोभिष्यत् दुश्चेष्टा अभविष्यत् तदा भानुरपि ऊर्द्धगामी अंशुमानपि द्यां पृथिवीं अपतिष्यत् तत्र पतितोऽभवदित्यर्थः ॥६॥भ०

अन्यच्च सत्येन सविता लोकपाला अदुष्टचित्तेषु सन्निधीयन्ते इति दर्शयन्नाह

समेत्यादि । स्त्रीणामिदं स्त्रैणं चापलं चारित्रबन्धनं तदत्र सीतायां हे राजेन्द्र समपत्यत सम्पन्नमभूत् ततः कारणादमी लोकपालाः एवमादयो मूर्त्तिमन्तः कलिद्रुहः पापस्य द्रोग्धारः इह नायास्यन् नागता अभूवन् चापलमत्र हेतुः लोकपालागमनं हेतुमत् ततो हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लृङ् अत्र चापलाचरणक्रियायास्तद्विरुद्धाचापलोपनिपादतिपत्तिः ॥ ७ ॥ ज० म०

समेत्यादि । हे राजेन्द्र अत्र सीतायां यदि स्त्रैणं स्त्रीसम्बन्धि चापलं चाञ्चल्यं समपत्यत सम्पन्नमभूत् तदा अमी कलिद्रुहः पापद्रोहणशीला लोकपाला इन्द्रादयो मूर्त्तिमन्तो नायास्यन् आगता नाभूवन् ॥ ७ ॥ भ०

त्वासादस्यां विनष्टायां किं किमालप्स्यथाः फलम् ॥ ८ ॥
यत्र अच्चामरिष्यत् स्त्री साध्वसाद्दोषवर्जिता ।
तदाश्चर्यारतौ लोके तस्या वाच्यास्पदं नृपा ॥ ९ ॥

अन्यच्च योषित्सामान्येन नेयं द्रष्टव्येति दर्शयन्नाह

आश्चर्यमित्यादि । यच्च यत्र यां भवति स्त्री यत्तव क्रच्छ्रे मते सङ्कटेऽभिप्राये अवर्त्स्यत् प्रवृत्तिमती तदाश्चर्यं चित्रमेव वर्त्तते नान्येति भावः चित्रीकरणे चेत्यत्र यच्च यत्रयोरित्यनुवर्त्तते यच्च यत्र शब्द उपपदे गम्यमानं चित्रीकरणं लिङ्निमित्तं तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लङ् अत्र क्रच्छ्राभिप्रायानुवर्त्तनक्रियायास्तस्यां योषिदनुवर्त्तनं सामग्र्यभावान्नश्यते अन्यच्च स्वभावत एवं योषित् कातरा भवति ततश्च परगतदोषस्थित्या दुष्टेति क्रोधादहमवच्छिन्नेति त्वासादस्यां विपन्नायां प्रच्छन्नविषयं गतायां सत्यां किंकिमालप्स्यथाः फलं नाहमवकल्पयामि किं नाम तत्र फलं यदालप्स्यसि नैवेत्यर्थः अनवक्लृप्तमर्षयोरकिंवृत्तेऽपीत्यत्रापिशब्दात् किंवृत्तमनवक्लृप्तिश्च लिङो निमित्तं तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ सत्यां भविष्यति लङ् अत्र फलप्राप्तिक्रियायास्तद्दोषसामग्र्यभावात् गम्यते किंकिलालप्स्यथाः फलमिति पाठान्तरं तदयुक्तं किंकिलास्त्यर्थेऽप्यित्यत्रास्य व्यलिङ्निमित्ताभावात् ॥ ८ ॥ ज० म०

आश्चर्यमित्यादि । तव मतेऽभिप्राये यत्र देशे काले वा स्त्री योषित् यच्च क्रच्छ्रे एवंविधे व्यसनेऽवर्त्स्यत् वर्त्तमानाभवत् तदाश्चर्यं नह्येवंविधे कर्मणि पतिव्रता वर्त्तत इति भावः स्त्रीवर्त्तमानक्रियाया असामग्र्यात् धात्वर्थानिष्पत्तिः अन्यच्च स्वस्त्रीपरगतदोषिता दुष्टेत्यग्नौ विच्छिद्येति चेदाह त्वासादस्यां विपन्नायां मृतायां सत्यां त्वं नाम किं फलं अलप्स्यथाः नाहं दुष्टेति सीतायास्त्वासाभावेन विपत्तेरभावात् फललाभस्यानिष्पत्तिः ॥ ८ ॥ भ०

अथवा नाहं दुष्टेत्यवगच्छन्त्या योषितस्त्वास एव नास्ति येन गर्हितं मरणमाचरेदिति दर्शयन्नाह

यत्रेत्यादि । गर्हितमेतत् यच्च यत्र या भवति स्त्री दोषवर्जिता शुद्धचरित्रापि साध्वसात् पतित्वासादमरिष्यत् मृताभूत् नैवेत्यर्थः अदुष्टायाः साध्वसाभावात् गर्हायामित्यत्र यच्चयत्र शब्द उपपदं गर्हा च लिङ्निमित्तं तस्मिन् लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते वा लङ् अत्र मरणक्रियायास्तद्विरुद्धसाध्वसे परनिपातादतिपत्तिर्गम्यते यदि हि त्वासान्म्रियेत दोष एव स्यादित्याह तन्मरणं

अमंस्यत भवान् यद्दत्तथैव च पिता तव ।
नागमिष्यद्विमानस्थः साक्षाद्दशरथो नृपः ॥ १० ॥
नाकल्प्स्यत्स्वन्निधिं स्थाणुः शूली वृषभवाहनः ।
नान्वभाविष्यतान्येन मैथिली चेत्यतिव्रता ॥ ११ ॥

लोकेऽस्मिन्नस्यारतौ सत्यपि गुणेषु दोषाविष्करणपरे तस्या अदुष्टाया योषितो वाच्यास्पदं वचनीयास्पदं मृषा अलीकमेव दुष्टैवेयम् मृषा अलीकमेव येन प्रच्छन्नमृतेति यदि मरणमकरिष्यत् मृषावचनीयास्पदमभविष्यत् रतिक्रियातिपत्तौ योज्यं अन्यथा वाक्यमिदमशरीरकं स्यात् इदमवगच्छन्त्यानया प्रच्छन्नमरणं नानुष्ठितम् ॥ ९ ॥ ज० म०

यत्रेत्यादि । यच्च यत्र दोषवर्जिता सुचरित्रा पतिव्रता स्त्री साध्वसात् अमरिष्यत् मृता भूता तस्या मृतायाः अस्यामवस्थायां दोषाविष्करणरते लोके वाच्यास्पदं वचनीयास्पदं तन्मरणं मृषा मिथ्या भविष्यति पतिव्रतायाः साध्वसाभावात् मरणक्रियाया अनिष्पत्तिः ॥ ९ ॥ भ०

अमंस्यतेत्यादि । यद्यद्यया भवानमंस्यत दुष्टेति ज्ञातवान् तथैतद्यदि नान्यथा तदा तव पिता दशरथः साक्षात्प्रत्यक्षो विमानस्थः सन् नागमिष्यत् नागतवान् स्यात् अत्र दुष्टताभवनं हेतुः दशरथागमनञ्च हेतुमत् तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ सत्यां भूते लङ् अत्र दुष्टताभवनक्रियायास्तद्विरुद्धादुष्टत्वोपनिपातादतिपत्तिः ॥ १० ॥ ज० म०

अमंस्यतेत्यादि । भवान् यच्च अमंस्यत दुष्टेयमिति यच्च ज्ञातवान् तत्तथैव चेत् यदि तदा तव पिता दशरथो विमानस्थः सन् साक्षात् प्रत्यक्षं नागमिष्यत् नागतवान् अस्या दुष्टत्वाभावात् मरणस्यानिष्पत्तिः दुष्टत्वज्ञानेनागमनस्यानिष्पत्तिः ॥ १० ॥ भ०

नाकल्प्स्यदित्यादि । मैथिली पतिव्रता सती चेद्यदि त्वत्तोऽन्येनान्वभाविष्यत परिभुक्ताभूत् चिरवदिट् तदायं स्थाणुर्महादेवः शूली वृषभवाहनः व्यक्तचिह्नः सन् सन्निधिं सन्निधानं नाकल्प्स्यत् न कृतवान् स्यात् तासिचक्रप इति चक्रारात्ये च परस्मैपदे लङ् अन्यानुभवनं हेतुः स्याद्यागमनं हेतुमत्-पूर्ववत् क्रियातिपत्तौ लङ् अत्रान्यानुभवनक्रियायास्तद्विरुद्धानन्यानुभवनोपपत्तिपातादतिपत्तिः ॥ ११ ॥ ज० म०

नाकल्प्स्यदित्यादि । पतिव्रता मैथिली चेद्यदि त्वत्तोऽन्येन नान्वभाविष्यत

आनन्दयिष्यदागम्य कथं त्वामरविन्दसत् ।
राजेन्द्र विश्वसृष्धाता चारित्रेऽ सीतया क्षते ॥ १२ ॥
प्रणमन् ब्रह्मणा प्रोक्तो राजकाधिपतिस्ततः ।
नाशोत्स्यन्मैथिली लोके नोचरिष्यदिदं यदि ॥ १३ ॥
नामोच्याम वयं शङ्कामिहाधास्यन्न चेद्भवान् ।

अनुभूता नाभूत् तदा अयं भूली दृषभवाहने व्यक्तचिह्नः स स्थाणुर्महादेवः सन्निधिं सन्निधानं नाकल्पयत् न कल्पितवान् सीतायाः पतिव्रतात्वादन्यानुभवस्यानिष्पत्तिः अनुभूतत्वे सन्निधिकल्पनस्यानिष्पत्तिः दृङ्गो नेमघे इति वचनात् क्षपेः यम् हनमहनश्च च इति भुवो मिण् ॥ ११ ॥ भ०

आनन्दयिष्यदित्यादि । हे राजेन्द्र सीतया चारित्रेऽ क्षते कुत्सिते क्षते सति एष धाता ब्रह्मा विश्वसृः सर्वस्य जगतः स्रष्टा अरविन्दसत् कमलासनः सन् आगम्य त्वां कथमानन्दयिष्यत् दर्शनाशीर्वादादिभिरानन्दिभिरानन्दितवान् गर्हितमेतत् युक्तमागत्यानन्दयितुमित्यर्थः विभाषाकथमिलिङ्वेति कथं शब्दोगर्हे च लिङ्निमित्तं तस्मिन् क्रियातिपत्तौ भूते लङ् अत्रानन्दनक्रियायास्तद्विरुद्धचारित्रेऽक्षतोपनिपातादतिपत्तिः ॥ १२ ॥ ज० म०

आनन्दयिष्यदित्यादि । हे राजेन्द्र सीतया चारित्रेऽ क्षते सति अरविन्दसत् पद्मासनो ब्रह्मा विश्वसृक् स्रष्टा धाता समस्तभुवनस्य धारयिता आगत्य त्वां कथमानन्दयिष्यत् दर्शनाशीर्वादादिभिः कथमानन्दितवान् पतितसंसर्गो हि निन्दामावहति सीतायाः क्षतचरित्रत्वे आनन्दस्यानिष्पत्तिः ॥ १२ ॥ भ०

प्रणमन्नित्यादि । ततोऽनन्तरं राजकाधिपतिः राजसमूहानां पतिः राजकं राजसमूहः गोत्रोक्षेत्यादिना कुञ् रामः प्रणमन् ब्रह्मणमित्यर्थात् ब्रह्मणा प्रोक्तः मैथिली यदि इदं वह्निप्रवेशनं नाचरिष्यत् नानुष्ठितवती तदा लोके दुराराधे नाशोत्स्यत् न शुद्धाभूत् किन्तु शुद्धा शुधशौचे दिवादिः अत्राग्निप्रवेशाचरणं हेतुः अशोधनञ्च हेतुमत् तयोर्हेतुहेतुमत्त्वे लिङ्निमित्ते क्रियातिपत्तौ भूते लङ् अत्राग्निप्रवेशनाचरणक्रियायास्तद्विरुद्धाचरणोपनिपातादतिपत्तिः ॥ १३ ॥ ज०म०

प्रणमन्नित्यादि । प्रणमन् ब्रह्मणे प्रणामं कुर्वन् राजकाधिपतौ राजसमूहाधिपो रामो ब्रह्मणा प्रोक्तः किं तदित्याह मैथिली यदि इदं वह्निप्रवेशनं नाचरिष्यत् नानुष्ठितवती तदा लोके नाशोत्स्यत् शुद्धा नाभूत् शुध्यौशोचे धात्वर्थस्यात्रानिष्पत्तिर्व्याख्यास्यते ॥ १३ ॥ भ०

किम्वा चित्रमिदं युक्तं भवान् यदकरिष्यत ॥ १४ ॥
प्रावर्त्तिष्यन्त चेष्टास्ते दयाथातथ्यवत्तव ।
अनुशास्ते त्वया लोके रामावर्त्यंस्तरां ततः ॥ १५ ॥

नेत्यादि । चेद्यदि भवानिह सीतां नाधास्यत् न रोपितवान् अन्तर्भावितोऽत्र ण्यर्थः तदा वयं किं शुङ्का नेति शुङ्कां नामोच्छ्याम न सुक्तवन्तः अस्मिन् वस्तुनि अग्निप्रमाणत्वेन लोको यद्धोयादित्येवसक्तवान् अन्यथा ब्रह्मणः सर्व्ववेदित्वात् कथं शङ्का स्यात् अत्राधानं हेतुः शङ्कात्यागश्च हेतुमान् अस्मिल्लिङ्गिनिमित्ते क्रियातिपत्तौ भूते लङ् अत्रानाधानक्रियायास्तद्विरुद्धाधानोपनिपातादतिपत्तिर्गम्यते अथवा नाहमवकल्पयामि यदिदं परगृहोषितायाः अग्निप्रवेशशोधनं युक्तं न्याय्यं तत् भवान् किं चित्रमकरिष्यत् विस्मायनीयं कृतवान् एवं राज्ञः कस्य व्यवस्थार्थं विशेषे प्रवर्त्तनात् अनवक्लृप्तमर्षयोरकिंवृत्तेऽपीत्यत्रापिशब्दात् किंवृत्तमनवक्लृप्तिश्च लिङ्गिनिमित्ते तस्मिल्लिङ्निमित्ते क्रियातिपत्तौ भूते लङ् अत्र चित्रीकरणक्रियाया अतिपत्तिस्तद्विरुद्धस्याचित्रीकरणस्योपनिपातादतिपत्तिर्गम्यते यदि भवान् परीक्ष्य सीतायाः प्रत्यग्रहणमकरिष्यत लोकोऽपि तथाकरिष्यत् ॥ १४ ॥ ज० म०

नामोच्छ्यामेत्यादि । यदि भवानिह वह्नौ सीतां नाधास्यत् न धारितवान् तदा तस्यां शङ्कां वितर्कं वयमपि न मोच्छ्याम न सुक्तवन्तः अत्र धात्वर्थस्याग्निप्रत्तिर्व्याख्यास्यते इदं किम्वा चित्रं किमाश्चर्यं यद्भवान् युक्तमकरिष्यत कृतवान् युक्तकरणत्वेन चित्रीकरणस्यानिष्पत्तिः ॥ १४ ॥

प्राधानानुयायित्वाल्लोकस्येति दर्शयन्नाह

प्रावर्त्तिष्यन्तेत्यादि । चेद्यदि तव लोकव्यवस्थाकारिणश्चेष्टाः कर्म्माणि अयाथातथ्यवत् यथा अज्ञाना असमीक्ष्यकारितया प्रवर्त्तन्ते तद्वत्प्रावर्त्तिष्यन्त तथा प्रवर्त्तनात् त्वया आनुशास्ते व्यवस्थायां स्थाप्ये लोके हे राम तास्चेष्टा अवर्त्मंप्रस्तरां अतिशयेन प्रावर्त्तिष्यन्त नव तव प्रवृत्ताः अत्र रामचेष्टाप्रवर्त्तनं हेतुः लोकचेष्टाप्रवर्त्तनञ्च हेतुमत् तस्मिन् लिङ्गिनिमित्ते क्रियातिपत्तौ भूते भविष्यति लङ् अत्रापि परीक्ष्य स्वीकरणलक्षणक्रियायास्तद्विरुद्धपरीक्षितोपादानदतिपत्तिः अयाथातथ्यवदिति वतिप्रत्ययान्तं क्रियाविशेषणं यथा तथा परयोः पर्य्यायेणेति नञः पर्य्यायेण वृद्धिः अवर्त्मंप्रस्तरामिति तिङश्चेत्यातिशयिकस्तरः किमेत्तिङीत्याम् न ङ्यापोरिति ङीत्वं ऊर्ङ्स्यानुस्तारः ॥ १५ ॥ ज० म०

प्रणमन्तं ततो राममुक्तवानिति शङ्करः ।
किं नारायणमात्मानं नाभोत्स्यत भवानजम् ॥ १६ ॥
कोऽन्योऽकर्त्स्यदिह प्राणान् दृप्तानाञ्च सुरद्विषाम् ।
को वा विश्वजनीनेषु कर्म्मसु प्राघटिष्यत ॥ १७ ॥

प्रावर्त्तिष्यन्तेत्यादि । हे राम तव व्यवस्थाकारिण्यचेत् यदि चेष्टाः कर्म्माणि व्यायाथातथ्यवत् प्रावर्त्तिष्यन्त यथा अत्रस्थासमीक्ष्यकारितया यथा प्रवर्त्तन्ते तद्वत्प्रवृत्ता अभूवन् तदयाथातथ्यप्रवर्त्तनात् त्वयाऽनुशास्ये दुष्टव्यवस्थायां स्याद्यमाने लोके एवंविधासेष्टा अवर्त्स्यंस्तरां अतिशयेन प्रवृत्ता अभविष्यन् किमेव्याऽचेति चतराम् अत्र धात्वर्थस्यानिष्पत्तिर्वाक्यात्प्रतीयते ॥ १५ ॥ भ० ।

प्रणमन्तमित्यादि । ततो ब्रह्मवचनानन्तरं शङ्करो महादेवः वक्ष्यमाणम् वचनं राममुक्तवान् प्रणमन्तं तमेव शङ्करमित्यर्थात् किन्नाम तत् यथा आत्मानम् नारायणमजं नित्यं अस्मिन् प्रादुर्भावे भवान्नाभोत्स्यत न बुद्धवान् अपित्व तथाविधं कर्म्म कुर्व्वन् ज्ञातवानेव अत्र नारायणानबोधक्रियायाः तद्विरुद्धबोधनोपनिपातादतिपत्तिः ॥ १६ ॥ ज० म०

प्रणमन्तमित्यादि । ततो ब्रह्मवचनानन्तरं प्रणमन्तं शङ्कराय प्रणामं कुर्व्वन्तं रामं शङ्कर उक्तवान् किमदित्याह भवान् अजं नारायणस्वभावं आत्मानं किं नाभोत्स्यत न बुद्धवान् अपित्व तथाविधं कर्म्म कुर्व्वन् ज्ञातवानेव बुध्यौऽवेदने भ्वभान्त्स्येति तः अत्र नारायणबोधस्यानिष्पत्तिः ॥ १६ ॥ भ०

तदेव दर्शयन्नाह

क इत्यादि । यदि नारायणो न भवान् तदा तस्मादन्यः को नाम सुरविद्विषां राक्षसानां दृप्तानां प्राणानकर्त्स्यत् छिन्नवान् कृतीच्छेदने नैव विश्वजनीनेषु सर्व्वलोकहितेषु कर्म्मसु अनुग्रहलक्षणेषु को नाम प्राघटिष्यत चेष्टितवान् अतोच्छेदनक्रियाया अघटनक्रियायाश्च तद्विरुद्धं छेदनघटनोपनिपातादतिपत्तिः सर्व्वत्र किंवृत्ते लङ्लुटाविति क्रियातिपत्तौ भूते गर्हायां लङ् ॥ १७ ॥ ज० म०

नारायणत्वं दर्शयति

कोऽन्य इत्यादि । यदि भवान् नारायणो न स्यात् तदा तस्मादन्यः क इह जगति दृप्तानां सुरद्विषां रक्षसां प्राणान् अकर्त्स्यत् भिन्नवान् कोऽपीत्यर्थः अन्यच्च विश्वजनीनेषु सर्व्वलोकहितेषु कर्म्मसु वा कः प्राघटिष्यत चेष्टितवान् न कोऽपीत्यर्थः ॥ १७ ॥ भ०

दैत्यक्षये महाराज यच्च यत्राघटिष्यथाः ।
समाप्तिं जातु तत्रापि किं नानेष्यस्त्वमीप्सितम् ॥ १८ ॥
तातं प्रसाद्य कैकेय्या भरताय प्रपीडितम् ।
सहस्रचक्षुषं रामो निनंसुः परिदृष्टवान् ॥ १९ ॥
प्रेता वरेण शक्रस्य प्राणन्तः कपयस्ततः ।
संजाताः फलिनानम्ररोचिष्णुद्रुमसद्रवः ॥ २० ॥

दैत्यक्षय इत्यादि । हे महाराज नैवेदमवकल्पयामि दैत्यक्षयनिमित्तम् यच्च यत्र त्वमघटिष्यथाः यां पुनरात्मनो घटनां करिष्यसि किन्तु पुनः प्रादुर्भावे घटिष्यसे तत्रापि प्रादुर्भावत्वमीप्सितं चेष्टितं जातु कदाचित् समाप्तिं सिद्धिं नानेष्यः किं न नेष्यसि जातुयदोर्लिङिति जातुयच्छब्दौ अनवक्लृप्तिश्च लिङ्निमित्तं तस्मिन् क्रियातिपत्तौ भविष्यति नित्यं लृङ् अत्राघटनक्रियायाश्चातिपत्तिः ज्ञानेनोपलब्धं भविष्यत्प्रादुर्भावसमाप्तिनयनयोस्तद्विरुद्धयोरुपनिपातात् ॥ १८ ॥ ज०म०

दैत्यक्षय इत्यादि । हे महाराज दैत्यक्षयनिमित्तं यत्र त्वं अघटिष्यथाः अनुष्ठितवानसि तत्र जातु कदाचित्त्वं ईप्सितं ईप्सितं किं समाप्तिं पूर्णतां न अनेष्यः न नीतवानसि अपितु नीतवानेव अत्र घटनक्रियायाः समाप्तिक्रियायाश्च ज्ञानानुपलब्धत्वादनिष्पत्तिः ॥ १८ ॥ भ०

तातमित्यादि । तातं दशरथं कैकेय्या प्रपीडितं सन्तापितं भरताय भरतार्थं राज्येऽभिषिच्यतामिति प्रसाद्य तद्विषये चित्तकालुष्यं त्याजयित्वा रामः सहस्रचक्षुषं इन्द्रं परिदृष्टवान् संदृष्टवान् निनंसुः नन्तुमिच्छुः ॥ १९ ॥ ज०म०

तातमित्यादि । तातं दशरथं प्रसाद्य कैकयीविषये चित्तमालिन्यं त्याजयित्वा रामः सहस्रचक्षुषं इन्द्रं दृष्टवान् तातं कीदृशं कैकेय्या भरतार्थं राज्येऽभिषिच्यतामिति प्रपीडितं निनंसुः प्रणामं कर्तुमिच्छुः ॥ १९ ॥ भ०

प्रेता इत्यादि । ततः प्रणामानन्तरं शक्रस्य प्रसन्नस्य वरेण कपयः संग्रामे प्रेताः संग्रामे मृताः प्राणन्तो जीवन्तः सञ्जाताः संदृष्टाः कीदृशा इत्याह फलिनाः फलवन्तः फलवद्भ्यामिनच् अतएव नम्राः नमनशीलाः रोचिष्णवः दीपनशीलाः ये द्रुमास्तेषु सद्रवः सदनशीलाः दाधेट्सीत्यादिना सदेरूः ॥ २० ॥ ज० म०

प्रेता इत्यादि । ततोऽनन्तरं प्रसन्नस्य शक्रस्य वरेण युद्धे प्रेताः कपयः प्राणन्तो जीवन्तः सञ्जाताः कीदृशाः फलिनः फलवन्त अतएव फलभारेणानम्रा

भ्रमरकुलाकुलोल्बणसुगन्धिपुष्पतरु-
स्तरुणमधूकसम्भवपिशङ्गिततुङ्गशिखः ।
शिखरशिलान्तरालपरिकल्पितजलावसरः-
सरसफलश्रियं वितनुते सुवेलगिरिः ॥ २१ ॥
संवाङ्गिः सकुसुमरेणुभिः समीरै-
रानम्रैर्बहुफलधारिभिर्वनान्तैः ।
श्रोतङ्गिर्मधुपटलैश्च वानराणा-
माप्यानो रिपुवधसम्भवः प्रमोदः ॥ २२ ॥

आनमनशीला रोचिष्णवो रोचनशीला ये द्रुमास्तेषु सद्रवः सदनशीलाः सत-सदसिधेदोरिति सदेरूः ॥ २० ॥ भ०

भ्रमरेत्यादि । वरेण च स सुवेलगिरिः सरसां अभिनवां फलश्रियं विभूतिं वितनुते विस्तृतवान् भ्रमरकुलैराकुला व्याप्ता उल्बणाः सुगन्धयश्च सपुष्पा-स्तरवो यत्र गिरौ तरुणानां अभिनवानां मधूकानां यः सम्भवः तेन पिशङ्गिता-स्तुङ्गाः शिखाः शिखराणि यत्र शिखरशिलानामन्तरालेषु परिकल्पिता जलावसरा जलधारा यत्र जलमपसरत्येभ्य इति खदोरप् ॥ २१ ॥ ज० भ०

भ्रमरकुलेत्यादि । सुवेलगिरिरचिरेण सरसानां फलानां श्रियं विवित-वान् कीदृशः भ्रमरसमूहेन व्याप्ता उल्बणशोभनगन्धयुक्ताः पुष्पसहिता दृक्षा यत्र अभिनवानां मधूकपुष्पाणां सम्भवोऽस्तित्वं तेन पिशङ्गिता तुङ्गा उच्चा शिखा दृक्षशिखा यत्र शिखरशिलान्तरालेषु परिकल्पिता जलावसरा जलधारा यत्र ॥ २१ ॥ भ०

सम्वाङ्गिरित्यादि । सम्भवत्यस्मादिति सम्भवः रिपुवधः सम्भवो यस्य प्रमोदस्य स वानराणामाप्यानः वृद्धिं गतः व्यवस्थितविभाषाविज्ञानात् सोप-सर्गस्य प्यायतेरिति पीभावो न भवति ओदितश्चेति निष्ठानत्वं कैराप्यानः समीरैः सकुसुमरेणुभिः सम्वाङ्गिः वहद्भिः वनान्तैः फलभरभारिभिः अतएवा-नम्रैः मधुकरपटलैश्चोतङ्गिः मधित्यर्थात् ॥ २२ ॥ ज० भ०

सम्वाङ्गिरित्यादि । वानराणां रिपुवधसम्भवः प्रमोदः समीरादिभिः आप्यानो वृद्धिं गतः कीदृशैः समीरैः सम्वाङ्गिः सम्यगवैपरीत्येन वहद्भिः पुष्प-

आयान्त्यः स्वफलभरेण भङ्गुरत्वं
भृङ्गालीनिचयचिता तलासरूणाम् ।
सामोदाः क्षितितलसंस्थितावलोप्या
भोक्तॄणां श्रमसुदयं न नीतवत्यः ॥ २३ ॥

इति भट्टिकाव्ये तिङन्तकाण्डे लृङ्प्रदर्शनो नाम
एकविंशतितमः सर्गः ।

परागसहितैः वनान्तैः कीटघ्नैः वरफलशालिभिः उत्तमफलयुक्तैः अतएवानम्रैः आनमनशीलैः मधुपटलैः कीटश्रेणीभिश्च तरङ्गिः ॥ २२ ॥ भ०

आयान्त्य इत्यादि । तरूणां लताः स्वफलभरेण भङ्गुरत्वं स्वभेद्यत्वमायान्त्यः गच्छन्त्यः सामोदाः अतएव भृङ्गालीनिचयचिताः क्षितितलसंस्थितैरेव अवलोप्तुं शक्याः भोक्तॄणां कपीनां श्रमं चित्तकायक्लेशं उदयं वृद्धिं न नीतवत्यः विनीतवत्य इति पाठान्तरं उत्पूर्वादयतेः कर्त्तर्यच वृद्धिमुपगच्छन्तं श्रममपनीतवत्य इत्यर्थः ॥ २३ ॥ ज० म०

इति भट्टिकाव्यटीकायां जयमङ्गलायां तिङन्तकाण्डे लृङ्विलसितं
नामाष्टमः परिच्छेदः ।
काव्यस्य सीतासंशोधनं नाम एकविंशः सर्गः ।

आयान्त्य इत्यादि । तरूणां लता भोक्तॄणां श्रमं उदयं वृद्धिं न नीतवत्यः न प्रापिताः अपनीतवत्य इत्यर्थः विनीतवत्य इति क्वचित्पाठः कीटघ्नः लताः फलभरेण भङ्गुरत्वं स्वयमेव भेद्यत्वं आयान्त्यः प्राप्नुवत्यः भ्रमरश्रेणीसमूहव्याप्ताः आमोदसहिताः क्षितितलसंस्थितैरेवावलोप्याः अवलोप्तुं शक्याः ॥ २३ ॥ भ०

इति सद्वैद्यहरिहरखानवंशसम्भवगौराङ्गमल्लीकात्मजश्रीभरतसेनकृतायां
सुग्धबोधिन्यां भट्टिटीकायामेकविंशतितमः सर्गः ।

द्वाविंशः सर्गः ।

ततो रामो हनूमन्तमुक्तवान् हृष्टमानसम् ।
अयोध्यां श्वः प्रयातासि कपे भरतपालिताम् ॥ १ ॥
गाधितासे नभो भूयः स्फुटन् मेघघटावलि ।
ईक्षितासेऽम्भसां पत्युः पयः शिशिरशीकरम् ॥ २ ॥
सेवितासे ध्रुवङ्ग त्वं महेन्द्राद्रेरधित्यकाः ।
व्युत्क्रान्तवर्त्मनो भानोः सहज्योत्स्नाः कुमुद्वतीः ॥ ३ ॥

इतः प्रभृति लुटमधिकृत्य विलसितमाह तत्र भविष्यदनद्यतने लुट् ।

तत इत्यादि । ततः सीतासंशोधनानन्तरं रामो हनूमन्तं तुष्टमानसं स्वामिकार्य्यस्य निष्पादितत्वात् उक्तवान् हे कपे श्वोदिने अयोध्यां भरतपालितां प्रयातासि गन्तासि तासस्योर्लोपः ॥ १ ॥ ज० म०

अथ डीमधिकृत्योच्यते तस्याः परमते लुट्संज्ञा

तत इत्यादि । ततः सीताशुद्ध्यनन्तरं रामो हनूमन्तं उक्तवान् कीदृशं प्रमुदितहृदयं स्वामिकार्य्यस्य निष्पादितत्वात् किमुक्तवानित्याह हे कपे भरतरक्षितां अयोध्यां रामपुरीं श्वोऽनागतेऽह्नि प्रयातासि गमिष्यसि भवद्भूतभव्ये इति भविष्यति डी भविष्यत्सामान्ये द्याविधानात् श्व इत्यस्य न वैयर्थ्यम् ॥ १ ॥ भ०

गाधितासे इत्यादि । भूयः पुनरपि नभः गाधितासे प्रस्थातासे गाधप्रतिष्ठालिप्सयोरित्यनुदात्तेत् त्वङ्गमनवातात् स्फुटन्त्यः खण्डशो-भवन्त्यः मेघघटा मेघपङ्क्तयो यत्र नभसि अम्भसां पत्युः समुद्रस्य पयः शिशिरशीकरं वीचितासे द्रक्ष्यसि ॥ २ ॥ ज० म०

गाधितासे इत्यादि । भूयः पुनरपि नभ आकाशं गाधितासे गाधस्नात् प्रतिष्ठामन्यथोः कीदृशं नभः स्फुटन्त्यः खण्डशो भवन्त्यः मेघघटा मेघावल्यो यत्र अम्भसां पत्युः समुद्रस्य शीतलकणकं जलं ईक्षितासे ॥ २ ॥ भ०

सेवितास इत्यादि । हे ध्रुवङ्ग भानोरादित्यस्य व्युत्क्रान्तवर्त्मनः अत्यु-

चन्दनद्रुमसंच्छन्ना निराक्रतहिमश्रथाः ।
दर्शितारस्त्वया ताश्च मलयोपत्यकाः शुभाः ॥ ४ ॥
प्रतन्वत्रः कोमला विन्ध्ये सहितारः स्यदं न ते ।
लतास्तवकशालिन्यो मधुलेहिकुलाकुलाः ॥ ५ ॥
द्रष्टासि प्रीतिमानारात् सखिभिः सह सेविताम् ।
सपत्त्रपातं किष्किन्ध्यां पूर्व्वक्रीडां स्मरन् मुहुः ॥ ६ ॥

स्त्वादतिक्रान्तमार्गस्य महेन्द्राद्रेः अधित्यकाः उपरिभागान् कुसुद्वतीः विद्यमानकुसुदाः सह ज्योत्स्नया सह पत्त्वाद्विशेषणसमासः सज्योत्स्नावा कुसुद्वत्यः कुसुदाकरा यासु अधित्यकासु तास्त्वं सेविताऽसि अनुभवितासि ध्रुवं गच्छतीति खच् प्रवङ्गतीति कर्त्तरि अच्वा उखउखीत्यत्र वगिः पठ्यते ॥ ३ ॥ ज० म०

सेविताऽसे इत्यादि । हे ध्रुवङ्ग हनूमन् महेन्द्रपर्व्वतस्य ऊर्द्धभूमीः सेविताऽसे महेन्द्राद्रेः कीदृशस्य भानोः सूर्य्यस्य उल्लङ्घितमार्गस्य उच्चत्वात् अधित्यकाः कीदृशीः ज्योत्स्नाकुसुद्वतीभ्यां सह वर्त्तमानाः ॥ ३ ॥ भ०

चन्दनेत्यादि । ताश्च पूर्व्वं दृष्टाः मलयोपत्यकाः मलयाभवा भुवः शुभाः चन्दनद्रुमसंच्छन्नत्वात् निराक्रतहिमश्रथाः तिरस्क्रतचन्द्राः त्वया दर्शितारः त्वो द्रष्टव्याः कर्म्मणि लुट् चिण्वदिट्चदति चेति सकारलोपः हिमं श्रथ्नाति सुञ्चतीति हिमश्रथः चन्द्रः अन्यसेचनप्रतिहर्षयोरिति कर्म्मण्यण् अचोदेर्धेत्यादिना अनुनासिकलोपोनिपात्यते ॥ ४ ॥ ज० म०

चन्दनद्रुमेत्यादि । त्वया ताः पूर्व्वं दृष्टा मलयाद्रेरासन्नभूमयो द्रष्टव्याः हनुमद्दृष्टश्च इति मिण् कीदृश्यः चन्दनवृक्षव्याप्ताः अतएव शुभाः सुखदत्वात् निराक्रतो हिमश्रथश्चन्द्रो याभिः हिमं श्रथ्नाति सुञ्चतीति हिमश्रथः अन्यगमोर्च्चे इत्यस्य घञन्तस्य स्यदैधावोदेत्यादिना निपातनाद्रूपम् ॥ ४ ॥ भ०

प्रतन्वत्र इत्यादि । विन्ध्ये लतास्तवकशालिन्यः सकुसुमस्तवकोपेताः मधुलेहिकुलाकुलाः भ्रमरकुलसङ्कुलाः प्रतनुत्वात्कोमलत्वाच्च गच्छतस्ते तव स्यदं जवं न सहितारः न सहिष्यन्ते स्यदो जव इत्यानुनासिकलोपोनिपात्यते ॥५॥ ज०म०

प्रतन्वत्र इत्यादि । विन्ध्यपर्व्वते लतास्ते तव स्यदं वेगं न सहिष्यन्ते कीदृश्यः प्रतन्वत्रः अतिक्रशाः कोमला मृद्व्यः स्तवकयुक्ताः अतएव भ्रमरसमूहव्याप्ताः ॥ ५ । भ०

द्रष्टासीत्यादि । किष्किन्ध्यां च आरात् नातिदूरे द्रष्टासि प्रीतिमान्

त्वया सन्दर्शितारौ ते माल्यवद्दण्डकावने।
उपद्रुतश्चिरं दुन्दैर्ययोः क्लिशितवानहम् ॥ ७ ॥
प्राप्तारौ भवता रम्यावाश्रमौ हरिणाकुलौ।
पुण्योदकद्विजाकीर्णौ सुतीक्ष्णशरभङ्गयोः ॥ ८ ॥
अतिक्रान्ता त्वया रम्यं दुष्खमत्रेस्तपोवनम्।
पवित्रचित्रकूटोऽद्रौ त्वं स्थातासि कुतूहलात् ॥ ९ ॥
ततः परं भरद्वाजो भवता दर्शिता मुनिः।

जातप्रीतिः सन् सखिभिर्मित्रैः सह सेवितां अनुभूतां एवञ्च ज्ञात्वा पूर्वक्रीडां स्मरन् मुहुः शेषत्वेन विवक्षितत्वात् षष्ठी न भवति सपक्षपातं सानुरागमिति क्रियाविशेषणं ॥ ६ ॥ ज० म०

दृष्टासीत्यादि। आराद्दूरे मित्रैः सहानुभूतां किञ्चिन्न्यां सपक्षपातं सानुरागं तथा स्नात्तथा त्वं पूर्वक्रीडां मुहुर्वारं वारं स्मरन् प्रीतियुक्तः सन् दृष्टासि वर्द्वीऽकिदिति रः ॥ ६ ॥ भ०

त्वयेत्यादि। माल्यवान् पर्वतः दण्डकावनं दण्डकेति नामारण्यं ते त्वया सन्दर्शितारौ कर्मणि लुट् ययोर्माल्यवद्दण्डकावनयोः व्यवस्थितैः दुन्दैः सीताविरोगदुःखैः चिरमुपद्रुतोऽभिभूतः सन् अहं क्लिशितवान् पीडामनुभूतवान् क्लियः क्त्वानिष्ठयोरितीट् स्टडन्देत्यादिना कित्त्वम् ॥ ७ ॥ ज० म०

त्वयेत्यादि। माल्यवान् पर्वतो दण्डकावनञ्च ते त्वया दृष्टे इनयङ्ङचच इति णिग् ययोर्माल्यवद्दण्डकावनयोरहं चिरं चिरकालं दुन्दैः सीताविरोगजैर्दुःखैरुपद्रुतः सन् अहं क्लिशितवान् पुक्लिशेति पक्षे दम् ॥ ७ ॥ भ०

आप्तारावित्यादि। सुतीक्ष्णशरभङ्गयो रम्यावाश्रमौ हरिणाकुलौ पुण्योदकैर्द्विजैः पक्षिभिश्चाकीर्णौ भवता आप्तारौ प्राप्तव्यौ ॥ ८ ॥ ज० म०

प्राप्तारावित्यादि। भवता सुतीक्ष्णशरभङ्गयोर्मुन्योराश्रमौ प्राप्तव्यौ रम्यीयौ मृगव्याप्तौ पुण्यजलविप्रव्याप्तौ ॥ ८ ॥ भ०

अतिक्रान्तेत्यादि। अत्रेश्च तपोवनं रम्यत्वात् त्वया दुःखमतिक्रान्ता अतिक्रमितव्यं चित्रकूटे चाद्रौ पवित्रे पुण्ये कुतूहलात् त्वं स्थातासि॥९॥ज०म०

अतिक्रान्तेत्यादि। अत्रेर्मुनेरम्यं तपोवनं त्वया दुःखं यथा स्नात्तथा अतिक्रान्ता अतिरमणीयत्वात् कष्टेन त्वं त्यक्ष्यसीति भावः। पवित्रे चित्रकूटपर्वते च त्वं कुतूहलात् स्थातासीत्यर्थः ॥ ९ ॥ भ०

द्रष्टारश्च जनाः पुण्या यमुनाम्बुचतांहसः ॥ १० ॥
स्नत्वा स्नत्वा दिवः शम्भोर्मूर्द्धि स्कन्त्वा भुवं गताम् ।
गाहितासेऽथ पुण्यस्य गङ्गां मूर्त्तिमिव द्रुताम् ॥ ११ ॥
तमसायाः महानीलपाषाणसदृशत्विषः ।
वनान्तान् वङ्ग मन्तासे नागराक्रीडशाखिनः ॥ १२ ॥
नगरस्त्रीस्तनन्यस्तधौतकुङ्कुमपिञ्जराम् ।

तत इत्यादि । ततः चित्रकूटात्परं गच्छता भवता भरद्वाजो मुनिर्दर्शितो द्रष्टव्यः जनाश्च पुण्याः यमुनाम्बुचतांहसः यमुनाजलस्य स्नानात्स्नानाच्च क्षयितपापाः द्रष्टारः द्रष्टव्या वा चिरवदिट्च ॥ १० ॥ ज० म०

तत इत्यादि । ततश्चित्रकूटगमनात्परं भरद्वाजो मुनिस्त्वया द्रष्टव्यः तत्र पुण्ययुक्ता जनाश्च द्रष्टारो द्रष्टव्याः यमुनाजलविनाशितपापाः ॥ १० ॥ भ०

स्नत्वेत्यादि । अथानन्तरं या गङ्गां दिवः स्नत्वा स्नत्वा स्नुत्वा स्नुत्वा आभीक्ष्ण्येण स्नुवेति चकारात् क्त्वाच आभीक्ष्ण्ये च द्वे भवतः शम्भोर्मूर्द्धि स्कन्त्वा गत्वा क्षितिं गता क्विस्कन्द्स्यन्दोरित्यनुनासिकलोपप्रतिषेधः तां पुण्यस्य मूर्त्तिमिव द्रुतां गाहितासे स्नातुम् विलोभितासि ॥ ११ ॥ ज० म०

स्नत्वेत्यादि । अथानन्तरं गङ्गां गाहितासे तस्यामवगाहं करिष्यसि कीदृशीं दिवः स्वर्गात् स्नत्वा स्नत्वा स्नुत्वा स्नुत्वा शम्भोः शिरसि मूर्द्धि स्कन्त्वा गत्वा क्षितिं गतां पुण्यस्य द्रवीभूतां मूर्त्तिमिव नकित्स्कन्द्स्यन्द् इति कित्त्वनिषेधात् नलोपाभावः ॥ ११ ॥ भ०

तमसाया इत्यादि । तमसायाश्च नद्याः वनान्तान् वनोपकण्ठान् महानीलमणेस्तुल्यत्विषोऽतिनीलत्वात् नागराणां आक्रीडो रत्नत्वं तत्साक्षिणः वङ्ग-मन्तासे स्नाधितासे ॥ १२ ॥ ज० म०

तमसाया इत्यादि । त्वं तमसाया नद्या वनान्तान् वनप्रदेशान् वङ्ग मन्तासे स्नाधितासे कीदृशान् अतिनीलत्वात् महानीलप्रस्तरतुल्यकान्तीन् नागराणां आक्रीड़ाः शाखिन उद्यानवृक्षा यत्र साक्षिण इति पाठे नागराणामाक्रीड़े रमणे साक्षिणः १२ ॥ भ०

नगरेत्यादि । नगरस्त्रियः अयोध्यास्त्रियः तासां स्तनेषु यत्पूर्व्वन्यस्तं पाचाद्धौतं कुङ्कुमं तेन पिञ्जरां कपिशां अतएव रम्यां सरयूं विलोक्य अयोध्या पुरी त्वया गन्तव्या गन्तव्या ॥ १२ ॥ ज० म०

विलोक्य सरयूं रम्यां गन्तायोध्या त्वया पुरी ॥ १३ ॥
आनन्दितारस्त्वां दृष्ट्वा प्रष्टारश्चावयोः शिवम् ।
मातरः सह मैथिल्यास्तोष्टा च भरतः परम् ॥ १४ ॥
आख्यातासि हतं शत्रुमभिषिक्तं विभीषणम् ।
सुग्रीवञ्चार्जितं मित्रं सर्वांश्चागामुकान् द्रुतम् ॥ १५ ॥
गन्तारः परमां प्रीतिं पौराः श्रुत्वा वचस्तव ।
ज्ञात्वैतत् सम्मुखीनश्च समेता भरतो ध्रुवम् ॥ १६ ॥

नगरेत्यादि । नगरस्त्रीणां अयोध्यास्त्रीणां स्तनेषु पूर्व्वं न्यस्तं पश्चाद्धौतं यत् कुङ्कुमं तेन पिञ्जरां रमणीयां सरयूं नदीं विलोक्य त्वया अयोध्या पुरी गन्तव्या ॥ १३ ॥ भ०

आनन्दितार इत्यादि । अयोध्यायाञ्च त्वां दृष्ट्वा मातरः कौशल्याद्याः आनन्दितारः आनन्दिष्यन्ति आवयोश्च रामलक्ष्मणयोः सह मैथिल्याः शिवं कल्याणं प्रष्टारः प्रश्नं करिष्यन्ति भरतश्च श्रुत्वा परमत्यर्थं तोष्टा प्रीतिं कर्त्ता आमन्त्रितायामनित्यत्वन्ना इति दर्शनं तेषां णिज् न भवति अन्यथा णेरनिटीति णिलोपो न प्राप्नोति ततश्चामन्त्रयितार इति स्यात् अथवा आमन्त्रणमामन्त्र इति घञन्ताद्याचारे सर्व्वप्रातिपदिकेभ्य इति क्विप् तदन्तात्तासेरिट् अतो लोपे च रूपं सह मैथिल्योरिति पाठान्तरं तत्रापि स्यात् बहुव्रीहौ सङ्घत्तेति कन्न भवति समासान्तविधिरनित्य इति कृत्वा ॥ १४ ॥ ज० म०

आनन्दितार इत्यादि । तत्रायोध्यायां त्वां दृष्ट्वा मातरः कौशल्याद्या आनन्दितारः आनन्दिता भविष्यन्ति मैथिल्या सहितयोरावयो रामलक्ष्मणयोः शिवं कल्याणं प्रष्टारः प्रक्ष्यन्तीत्यर्थः भरतः परमत्यर्थं तोष्टा तोक्ष्यति॥ १४ ॥भ०

आख्यातासीत्यादि । हतं शत्रुं रावणं लङ्कायामभिषिक्तं विभीषणं अर्जितं मित्रञ्च सुग्रीवं विशिष्टमाख्यातासि कथयितासि सर्व्वांश्चागान् द्रुतमागतुकान् आगमनशीलान् ॥ १५ ॥ ज० म०

आख्यातासीत्यादि । एतानि आख्यातासि वक्ष्यसि सर्व्वानागान् द्रुतं शीघ्रं आगमनशीलांश्च ॥ १५ ॥ भ०

गन्तार इत्यादि । त्वद्वचनं श्रुत्वा पौराः पौरजनाः परमां प्रीतिं गन्तारो गमिष्यन्ति एतन्मदागमनवृत्तान्तं श्रुत्वा सम्मुखीनः प्रतिविम्बाश्रय इव सम्मुखो भूत्वा सामेवागमिष्यति भरतो ध्रुवमसंशयम् ॥ १६ ॥ ज० म०

गते त्वयि पथानेन वयमप्यंहितास्महे ।
लब्धाहेऽहं धृतिं प्राप्ते भूयो भवति सम्मुखे ॥ १७ ॥
गते तस्मिन् गृहीतार्थे रामः सुग्रीवराक्षसौ ।
उक्तवान् श्वोऽभिगन्तास्थो युवां सह मया पुरम् ॥ १८ ॥
द्रष्टास्यस्मत्र तिस्रो मे मातृस्तुष्टान्तरात्मनः ।
आत्यन्तीनं सखित्वञ्च प्राप्तास्थो भरताश्रयम् ॥ १९ ॥
नैवं विरहदुःखेन वयं व्याधानितास्महे ।

गन्तार इत्यादि । तव एतद्वचनं श्रुत्वा पौराः पुरवासिजनाः परमां प्रीतिं गन्तारः गमिष्यन्ति एतन्मदागमनं श्रुत्वा भरतोऽपि सम्मुखीनः सन् समेता समागमिष्यति ॥ १६ ॥ भ०

गत इत्यादि । त्वयि पथा अनेन मयाभिहिते गते वयमपि अंहितास्महे प्रयाताः अहिगतौ भूयश्च पुनरपि भवति त्वयि सम्मुखे प्राप्ते धृतिमहं लब्धाहे प्राप्ताः स्मि एतीति तासि सकारस्य हकारः ॥ १७ ॥ ज० म०

गते त्वयीत्यादि । त्वयि गते सति अनेन ख्यातेन पथा वयमपि अंहितास्महे गमिष्यामः अहिङ्गतौ भूयः पुनरपि भवति त्वयि सम्मुखे प्राप्ते सति अहं धृतिं लब्धाहे प्राप्स्यामि ॥ १७ ॥ भ०

गते तस्मिन्नित्यादि । तस्मिन् हनूमति गृहीतार्थे अवगतसन्देशार्थे गते सति रामः सुग्रीवराक्षसावब्रवीत् युवां मया सह श्वोदिने अभिगन्तास्थः पुरमयोध्यां गमिष्यथः ॥ १८ ॥ ज० म०

गते तस्मिन्नित्यादि । तस्मिन् गृहीतप्रयोजने हनूमति गते सति रामः सुग्रीवविभीषणौ उक्तवान् किमुक्तवानित्याह श्वः प्रातर्मया सह युवां पुरमयोध्याम् गन्तास्थः गमिष्यथः ॥ १८ ॥ भ०

द्रष्टास्य इत्यादि । तत्र च पुनः पुर्यां नोऽस्माकं तिस्रो मातृः कौशल्याद्याः स्वस्रादित्वान्न ङीप्दासिप्रथमयोः पूर्वसवर्णदीर्घत्वं तुष्टान्तरात्मनः हृष्टमानसाः द्रष्टास्थः भरताश्रयञ्च भरतनिबन्धनञ्च सखित्वं मित्रत्वं आत्यन्तीनं अत्यन्तं गामीत्यस्मिन्नर्थे अवापारपारेत्यादिना सः प्राप्तास्थः लब्धासाथे ॥ १९ ॥ ज० म०

द्रष्टास्य इत्यादि । तत्रायोध्यायां नोऽस्माकं तृप्तमानसास्तिस्रो मातृर्युवाम् द्रष्टास्थः द्रक्ष्यथः आत्यन्तगं भरताश्रयं सखित्वं मित्रत्वञ्च प्राप्तास्थः प्राप्स्यथः ॥ १९ ॥ भ०

श्रमोऽनुभविता नैवं भवद्भ्राभ्यां वियोगजः ॥ २० ॥
एवं युवां मम प्रीत्यै कल्पास्थः कपिराजसौ ।
गन्तुं प्रयतितासाथे प्रातः सह मया यदि ॥ २१ ॥
उक्तवन्तौ ततो रामं वचः पौलस्त्यवानरौ ।
अनुग्रहोऽयं काकुत्स्थ गन्तास्वो यत्त्वया सह ॥ २२ ॥
अनुमन्तास्महे नावां क्रीडितुं विरहे त्वया ।
अपि प्राप्य सुरेन्द्रत्वं किं नु प्रत्तं त्वयास्मदम् ॥ २३ ॥

नैवमित्यादि श्लोकद्वयं । हे कपिराजसौ प्रातर्मया सह गन्तुं यदि प्रयतितासाथे यत्नं कर्त्तास्थः एवं सति युष्मद्विरहदुःखेन वयं न व्याधानितास्महे न पीडिता भविताख्यः कर्म्मणि लुट् चिण्वदिट् संयोजितास्महे इदि पाठान्तरम् न संयोजिता भविताख्यः युजेर्ग्रन्थे चिण्वदिट् इटोऽसिद्धत्वात् नेसन्तिणेरनिटीति णिलोपः भवद्भ्राभ्यां वियोगजः श्रमः खेदो नानुभविता अत्रापि चिण्वदिट् एवं मम प्रीत्यै युवां कल्पास्थः सम्पादितास्थः लुटिचक्लृप इति तङ्भावपक्षः तासिच क्लृप इतिट्प्रतिषेधः कपिसम्पद्यमाने चतुर्थी ॥ २० ॥ ॥ २१ ॥ ज० म०

नैवमित्यादि । हे कपिराजसौ सुग्रीवविभीषणौ प्रातर्मया सह गन्तुं प्रयतितासाथे प्रयत्नं करिष्यथ इति वक्ष्यमाणश्लोकेनान्वयः एवं सति तदा विरहदुःखेन युष्मद्वियोगकष्टेन वयं न व्याधानितास्महे न पीडितास्महे कर्म्मणि डी हनस्यहृदयच इति णिण् खेर्हेर्वर्ज्जणिति चेति घः इण् वर्ज्जनेन णिलो वर्ज्जनात् न हनस्तङ् संयोजितास्महे इति क्वचित्पाठः भवद्भ्रां मद्विरहजातः श्रमो नैवानुभविता नानुभविष्यते पूर्ववन्निण् एवं सति युवां मम प्रीत्यै कल्पास्थः नेमघेड्राः इति क्वपोड्राःभे इमनिषेधात् ड्राभ्यामयपदित्वं गम्यते ॥ २० ॥ २१ ॥ भ०

उक्तवन्तावित्यादि । ततोऽनन्तरं पौलस्त्यवानरौ विभीषणसुग्रीवौ रामं वच उक्तवन्तौ हे काकुत्स्थ त्वया सह यदावां गन्तास्वः गमिष्यावः अयमनुग्रहः प्रसाद इति ॥ २२ ॥ ज० म०

उक्तवन्तावित्यादि । ततो रामवचनानन्तरं पौलस्त्यवानरौ रामं वच उक्तवन्तौ किमुक्तवन्तौ तदित्याह हे काकुत्स्थ आवां त्वया सह गन्तास्वः गमिष्यावः अयं तवानुग्रहः प्रसादः ॥ २२ ॥ भ०

अनुमन्तास्महे इत्यादि । किञ्च सुरेन्द्रत्वञ्चेन्द्रत्वं प्राप्यावयोर्वां त्वया सह

ततः कथाभिः समतीत्य दोषामारुह्य सैन्यैः सह पुष्पकं ते ।
सम्प्रस्थिता वेगवशादगाधं प्रक्षोभयन्तः सलिलं पयोधेः ॥२४॥
सेतुं महेन्द्रं मलयं सविन्ध्यं समाल्यवन्तं गिरिमृष्यमूकम् ।
सदण्डकारण्यवतीश्च पश्यां रामः प्रियायाः कथयन् जगाम ॥२५॥

एते ते मुनिजनमण्डिता दिगन्ताः
शैलोऽयं ललितवनः सचित्रकूटः ।
गङ्गेयं सुतनु विशालतीररम्या
मैथिल्या रघुतनयो दिशन्ननन्द ॥ २६ ॥

भवन्तमुत्पद्यमानं विरहं वियोगं नानुमन्यास्महे किं पुनस्त्वया प्रत्तं दत्तं अत्र उपसर्गात्तः आस्पदं राज्यं प्राप्नवन्तौ अत्र सुतरामेव त्वया सह वियोगो न युज्यते भवन्तं विरहमिति वर्त्तमानकालः नानुमन्यास्महे इति भविष्यत्कालेन सम्बध्यमानः साधुर्भवति धातुसम्बन्धे प्रत्यया इति एतावल्लक्षणलक्षितम् ॥ २२ ॥ ज० भ०

अनुमन्यास्महे इत्यादि । सुरेन्द्रत्वं प्राप्यापि आवां त्वया सह भवन्तं उत्पत्स्यमानं विरहं नानुमन्यास्महे प्राप्येत्यत्र प्राप्नाविति क्वचित् पाठः त्वया किमास्पदं प्रभुत्वं आवाभ्यां न प्रत्तं न दत्तं राज्यं प्राप्नवन्तावेव ॥२३॥ भ०

अथ सर्गभङ्गार्थं छन्दोन्तरेण प्रकीर्णमाह

तच्छेषभूतमर्थवशात् प्रकीर्णकक्रियाविलसितं दर्शयन्नाह

तत इत्यादि । कथाभिरन्तरोक्ताभिः दोषां रात्रिं समतीत्य प्रेरयित्वा ततोऽनन्तरं ते रामादयः पुष्पकं विमानमारुह्य सैन्यैः सह अयोध्यां यातुं प्रस्थिताः पयोधेः सलिलमगाधमक्षोभ्यमपि वेगवशात् प्रक्षोभयन्तः ॥ २४ ॥ ज० भ०

तत इत्यादि । ततोऽनन्तरं कथाभिर्वाक्यैर्दोषां रात्रिं समतीत्य गमयित्वा ते श्रीरामविभीषणादयः सैन्यैः सह पुष्पकं विमानमारुह्य वेगवशात् सकुदुम्ब अगाधमतिविस्तरं जलं प्रक्षोभयन्तः अयोध्यां सम्प्रस्थिताः सम्यक्प्रस्थानं कृतवन्तः ॥ २४ ॥ भ०

सेतुमित्यादि । एष सेतुस्त्वदर्थं मया कारितः एते च महेन्द्रादयः इत्यादि प्रियायाः सीतायाः कथयन् जगाम अयोध्याभिमुखं गतवान् ॥ २५ ॥ ज० भ०

सेतुमित्यादि । रामः प्रियाया निकटे तानि कथयन् जगाम ॥२५॥ भ०

एते इत्यादि । शोभना तनुः शरीरं यस्याः सा त्वं हे सुतनु क्वचिदुका-

झिञ्झानभ्रमरकुलाकुलाग्रपुष्पाः
शीताम्भःप्रविलयसंभवातिलीनाः ।
एते ते सुतनु पुरीजनोपभोग्या
दृश्यन्ते नयनमनोरमा वनान्ताः ॥ २७ ॥

स्थानं नः पूर्व्वजानामियमधिकमसौ प्रेयसी पूरयोध्या
दूरादालोक्यते या ऊतविविधहविःप्रोक्षिताशेषदेवा ।

रात्नमपि स्त्रियः प्रोक्तमिति वचनात् नदीसंज्ञकत्वात् सम्बुद्धिह्रस्वत्वं क्वचिच्चमित-निसर्ज्जिमज्जिभ्य इत्यौणादिकस्नुशब्दः एते दिगन्ताः सुनिजनैस्तन्निवासिभि-र्मण्डिताः भूषिताः अयं स चित्रकूटः यत्र भरतेनागत्य दृष्टोऽस्मि लुलितवनो-ऽस्मद्गवशात् इयञ्च गङ्गा विशालतीर्थतया रम्या एवं मैथिल्या दिशन् कथ-यन् ननन्द सुदितः ॥ २६ ॥ ज० म०

एते इत्यादि । रघुतनयो रामो मैथिल्या इति दिशन् कथयन् ननन्द किमित्याह हे सुतनु ते पूर्व्वमनुभूता सुनिजनैः शोभिता दिगन्ताः सोऽयं मनो-हरश्चित्रकूटपर्व्वतः सेयं महातीरेण रमणीया गङ्गा तीरेत्यत्र तीर्थेति पाठे महातीर्थमध्ये रमणीयेत्यर्थः ॥ २६ ॥ भ०

झिञ्झानेत्यादि । हे सुतनु एते वनान्ताः पुर्य्या दृश्यन्ते झिञ्झानैः कूजद्भिः भ्रमरकुलैः आकुलाग्राणि पुष्पाणि येषां वनान्तानां प्रविलीयतेऽस्मिन्निति प्रविलयः एरच मिमीलायां खलचोः प्रतिषेधो वक्तव्यः विभाषालीयतेरित्यात्-दित्वं न भवति शीताम्भसः प्रविलयः कुल्या तेन यः संभवः स्नापना तेनाभि-लीनाः कुल्यया सिच्यमानमूलत्वात् अतएव नयनमनोरमाः रमयतीति कर्त्त-र्य्यच् पश्चात् षष्ठीसमासः एवञ्च पुरीजनानामयोध्यानिवासिनां उपभोग्याः तथा ॥ २७ ॥ ज० म०

झिञ्झानेत्यादि । हे सुतनु एते ते वनान्ता दृश्यन्ते कीदृशाः झिञ्झानैः कलं ध्वनद्भिर्भ्रमरसमूहैर्व्याप्तानि अग्रपुष्पाणि येषां प्रविलीयन्ते संश्लिष्यन्ते यत्र स प्रविलयः कुल्या शीताम्भासौ प्रविलयश्चेति तेन यः संभव आप्यायनं तेनाति-लीनाः कुल्ययाभिषिच्यमानमूलत्वात् पुरीजनोपभोग्याः सौन्दर्य्यात् नयन-मनोरमा ॥ २७ ॥ भ०

स्थानं न इत्यादि । हे सीते असौ पुरी नोऽस्माकं पूर्व्वजानां स्थानमधिकं अतएव च प्रेयसी प्रियतमा दूरादालोक्यते उच्चप्रासादयोगात् या ऊतैर्विविधै-

सोऽयं देशो रुदन्तं पुरजनमखिलं यत्र हित्वा प्रयातौ
आवां सीते वनान्तं सह धृतधृतिना लक्ष्मणेन क्षपान्ते ॥२८॥
तूर्याणामथ निस्वनेन सकलं लोकं समापूरयन्
विक्रान्तैः करिणां गिरीन्द्रसदृशां क्ष्मां कम्पयन् सर्वतः ।
सानन्दाश्रुविलोचनः प्रकृतिभिः सार्द्धं सहान्तःपुरः
सम्प्राप्तो भरतः समारुतिरलं नम्रः समं मातृभिः ॥ २९ ॥

र्ईविर्भिराज्यादिभिः प्रीणिता अग्नेयदेवा यत्र देशे पुरजनमखिलं समस्तं रुदन्तं क्षपान्ते उषसि हित्वा त्यक्त्वा ऊनेन आवां वनान्तं प्रयातौ सोऽयं देशः सह लक्ष्मणेन धृतधृतिना धृतसौमनस्येन ॥ २८ ॥ ज० म०

स्थानं न इत्यादि । हे सुतनु सेयं पुरी दूरादालोक्यते असावयोध्या नोऽस्माकं पूर्व्वजानाञ्च पितृपितामहादीनाञ्च स्थानं अतिशयं प्रेयसी प्रियतमा यास्योध्या ऋतैर्विविधैर्हविर्भिराज्यादिभिः प्रीणिता तर्पिता अग्नेया देवा यत्र तादृशी हे सीते सोऽयं देशः यत्र रुदन्तं अखिलं पुरजनं हित्वा त्यक्त्वा क्षपाया रात्रेरन्ते धृतधृतिना लक्ष्मणेन सह आवां वनान्तं प्रयातौ गतौ ॥२८॥ भ०

तूर्याणामित्यादि । अथानन्तरं भरतो हनूमतः सकृत्पलब्धरामदत्तान्तत्वात् सानन्दाश्रुविलोचनः सानन्दाश्रूणो विलोचने यस्य तथाभूतः प्रकृतिभिः अमात्यादिभिः सार्द्धं सहान्तःपुरः अन्तःपुरेण समं मातृभिः कौशल्यादिभिः सह मातृभिः हनूमता च सह अयं नम्रः अनुद्धतः समीपं मे नाथ आगत इति तूर्याणां निस्वनेन सकलं लोकं मार्गप्राप्तं समापूरयन् व्याप्नुवन् करिणाञ्च गिरीन्द्रसदृशां त्वदादिषु दृश इति चकारात् किन् विक्रान्तैः पादन्यासैः क्ष्मां कम्पयन् सर्व्वतो विधूनयन् अर्त्तिच्छेत्यादिना युक् सम्प्राप्तः रामसमीपमित्यर्थः ॥ २९ ॥ ज० म०

तूर्याणामित्यादि । अथानन्तरं रामवार्त्तां प्राप्य प्रकृतिभिरमात्यैः सार्द्धं अन्तःपुरेण सहितो मारुतिना हनूमता सहितः मातृभिः सह भरतः समाप्त आगतः कीदृशः तूर्याणां चतुर्विधवाद्यानां निस्वनेन ध्वनिता सकलं लोकं भुवनं समापूरयन् गिरीन्द्रसदृशां कुलपर्व्वततुल्यानां करिणां हस्तिनां विक्रान्तैर्विक्रमैः पादविक्षेपैर्वा क्ष्मां पृथिवीं सर्व्वतः सर्व्वां कम्पयन् चालयन् तत्क्रोरिति द्वितीयास्थम् आनन्दाश्रुसहिते विलोचने यस्य तादृशः नमनशीलः ॥२९॥ भ०

अथ ससम्भ्रमपौरजनादृतो भरतपाणिधृतोज्ज्वलचामरः ।
गुरुजनद्विजवन्द्यभिनन्दितः प्रविशति स्म पुरं रघुनन्दनः ॥२०॥
प्रविधाय धृतिं पुरीजनानां युवराजं भरतं ततोऽभिषिच्य ।
जघटे तुरगाध्वरेण यष्टुं कृतसम्भारविधिः पतिः प्रजानाम् ॥२१॥

अथेत्यादि । अथ भरतसम्मानानन्तरं रघुनन्दनो रामः ससम्भ्रमेण सादरेण सहर्षेण पौरजनेनादृतः भरतपाणिना धृतसुज्ज्वलं चामरं यस्य गुरुजनेन द्विजैर्वन्दिभिश्च स्तुतिपाठकैरभिपूजितैरभिष्टुतः सन् पुरमयोध्यां प्रविशति स्म प्रविष्टः ॥ २० ॥ ज० म०

अथेत्यादि । अथानन्तरं रघुनन्दनो रामः पुरमयोध्यां प्रविष्टवान् कीदृशः ससम्भ्रमेण सादरेण पौरजनेनादृतो वेष्टितः ससम्भ्रमेत्यत्र ससम्मदेति क्वचित्पाठः सम्मदो हर्षः पुनः कीदृशः भरतपाणिना धृतसुज्ज्वलं चामरं यस्य गुरुजनैर्द्विजैर्वन्दिभिः स्तुतिपाठकैश्चाभिनन्दितः श्लाघितः ॥ २० ॥ भ०

प्रविधायेत्यादि । प्रविश्य च पुरं प्रजानां पतौ रामः जनानां धृतिं प्रीतिरूपचेतोवृत्तिं परानुत्कृष्टां प्रविधाय कृत्वा भरतञ्च युवराजमभिषिच्य ततोऽनन्तरम् तुरगाध्वरेणाश्वमेधेन यष्टुं जघटे चेष्टितवान् कृतसम्भारविधिः संभियत इति सम्भारः द्रव्यगण इत्यर्थः कृतोऽनुष्ठितः सम्भारस्य विधिरितिकर्त्तव्यतारूपो येन स इति ॥ २१ ॥ ज० म०

प्रविधायेत्यादि । ततोऽनन्तरं प्रजानां पतौ रामः पुरीजनानां धृतिम् प्रविधाय दानसम्मानादिभिः प्रहृष्टां कृत्वा युवराजं भरतं अभिषिच्य यौवराज्ये भरतस्याभिषेकं कृत्वा कृतसम्भारविधिः कृतयज्ञोचितसामग्रीकः सन् तुरगाध्वरेण अश्वमेधेन यज्ञेन यष्टुं यागं कर्त्तुं जघटे चेष्टितवान् ॥ २१ ॥ भ०

कृत्वावितरणविद्यावैभवाम्बुदगोष्ठीवरहरिहरखानख्यातवंश्याम्बुधीन्दोः ।
भूवनविदितकीर्त्तिः सेमगौराङ्कतो योऽजनि स भरतसेनो भट्टिटीकाञ्चकार ॥

इति सहैत्यहरिहरखानवंशसम्भवगौराङ्कमल्लीकात्मजश्रीभरतसेनकृतायां
सुबोधिन्यां भट्टिटीकायां पुरप्रवेशो नाम
द्वाविंशतितमः सर्गः ।

समाप्तश्चायं भट्टिग्रन्थः ।

इदमधिगतमुक्तिमार्गचित्रं
विवदिषतां वदतां च सन्निबन्धात् ।
जनयति विजयं सदा जनानां
युधि सुसमाहितमैश्वरं यथास्त्रम् ॥ ३१ ॥
दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम् ।
हस्तामर्श इवान्धानां भवेद्याकरणादृते ॥ ३२ ॥
व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् ।
हता दुर्मेधसश्चास्मिन् विदुषां प्रीतये मया ॥ ३४ ॥

नायकाभ्युदयान्तं महाकाव्यमिति परिसमाप्य तत्र जयमिच्छता अस्मिन्नादरः कर्त्तव्य इति दर्शयन्नाह

इदमित्यादि । इदं महाकाव्यं उक्तैर्वचनस्य यो मार्गः पन्थाः सुसंस्कृतशब्दलक्षणः प्रपञ्चितः तेन चित्रं विस्मयनीयं सुसमाहितं अलङ्कारयुक्तं अधिगतं परिज्ञातं सज्जनानां विवदिषतां वक्तुमिच्छतां वदतां च वक्तुं प्रवर्त्तमानानां सदा विजयं जनयति सन्निबन्धात् शोभनबन्धात्कारणात् यथास्त्रमैश्वरं पाशुपतं अधिगतमुक्तिमार्गं अधिगतः प्राप्तः प्रज्ञातो मोक्षणमार्गः क्षेपणमार्गो येन चित्रं नानावर्णकेन चित्रितत्वात् सुसमाहितं युधि संग्रामे विजयं विदधाति तद्वत् ॥ ३१ ॥ ज० म०

तस्मादादरः कर्त्तव्य इति तत्रापि य एव व्याकरणमधीतवान् तस्यैवात्रादरो युक्त इति दर्शयन्नाह

दीपतुल्य इत्यादि । अयं प्रबन्धो महाकाव्यसंज्ञकः प्रबध्यते विरच्यत इति कृत्वा शब्दलक्षणमेव चक्षुर्येषां तेषां दीपतुल्यः अत एवैतत्काव्याधिगमात् स्वातन्त्र्येणान्यानपि शब्दान् प्रयोक्तुं क्षमत्वात् व्याकरणादृते विना हस्तामर्श इवान्धानां हस्तामर्श इवावबोधः यथा अन्धानां हस्तेन घटपटादिवत् स्वापरात्मन्य संस्थानमात्रपरिज्ञानं यथावस्थितस्वरूपपरिज्ञानं एवमनधीतव्याकरणानां न शब्दस्वरूपपरिज्ञानं अन्यत्र शब्दश्रवणात् ततश्च तत्स्वरूपापरिज्ञानात् कुतोऽप्यन्यशब्दप्रयोग इति ॥ ३२ ॥ ज० म०

एवञ्च कृत्वा विद्वद्भिरनुरुध्यमानेन मयेदं काव्यं कृतमिति दर्शयन्नाह

[illegible]गम्यमित्यादि । व्याख्यागम्यं व्याख्यानादिना बोद्धुं न शक्यते

काव्यमिदं विहितं मया वलभ्यां
श्रीधरसेननरेन्द्रपालितायाम् ।
कीर्त्तिरतो भवतान्नृपस्य तस्य
क्षेमकरः क्षितिपो यतः प्रजानाम् ॥ २५ ॥

इति भट्टिकाव्ये द्वाविंशतितमः सर्गः ।

समाप्तश्चायं भट्टिग्रन्थः ।

किमर्थमीदृशं कृतमिति चेत् उत्सवः सुधियामलं शास्त्रे कृषवद्धीनां परं प्रमोदो जायते एवञ्च सत्यस्मिन् काव्ये विषयभूतदुर्मेधसो व्याकरणवाह्याः मया कृताः मानुग्रहीताः तस्माद्विदुत्प्रियतया विदांसः प्रिया यस्य मम विदुत्प्रियः तद्भावस्तत्ता तया हेतुभूतयेति ॥ २४ ॥ ज० म०

यत्तेदं काव्यं कृतं तद्दर्शयन्नाह

काव्यमित्यादि । मयेदं काव्यं विहितं कृतं श्रीधरसूनुना नरेन्द्रनाम्ना सूनुना पालितायां रक्षितायां वलभ्यां वलभीनामपुर्य्यां अत एव काव्यविधानाय या कीर्त्तिः सा तस्यैव राज्ञो भवतात् आशिषि लोट् यतः प्रजानां प्रेमकरः प्रेमानुकूलः आनुलोम्ये टः ॥ २५ ॥ ज० म०

इति वलभीवास्तव्यस्य श्रीस्वामिसूनोर्भट्टमहाब्राह्मणस्य महावैयाकरणस्य कृतौ रावणवधे महातिङन्तकाण्डे लुङ्लिसितनाम्नो नवमपरिच्छेदस्य जटीश्वरो जयदेवो जयमङ्गल इति च नामभिस्त्रिभिः सुप्रसिद्धस्य अनेकशास्त्रव्याख्या तुल्यतौ टीकायां काव्यस्यायोध्याप्रत्यागमनं नाम द्वाविंशः सर्गः ।

जयमङ्गलकृता टीका समाप्ता ।

00000761

Digitized with financial assistance from the
Government of Maharashtra
on 18 July, 2018